Digitized by Arya Samaj Foundation Chennai and eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

130222

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

Central Library
Gurukul Kangri University
Hardwar-249404 (U.A.)
25
Vol.56
2001-2002
130222

५६ वर्षे
१-२ अङ्कौ

ज्येष्ठ-भाद्रपद-पूर्णिमे
जून - सितम्बर, २००१ ई.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमणी

१. **संस्कृतकवितायां भारतीयस्वातन्त्र्यसमरस्य चित्रणम्**
मिश्रोऽभिराजराजेन्द्रः १-१२

२. **वेदान्तमीमांसाशास्त्रारम्भणं युक्तम्**
प्रो. पारसनाथद्विवेदी १३-१६

३. **निम्बार्काचार्यस्य सिद्धान्तसारः**
डॉ. आदित्यनाथभट्टाचार्यः १७-२६

४. **पूर्वमीमांसादर्शने प्रमाणमीमांसा**
डॉ. कपिलदेवपाण्डेयः २७-३८

५. **जैनदर्शनपर्यालोचनम्**
डॉ. हरिप्रसाद-अधिकारी ३९-५०

६. **भवभूतिनाट्यसाहित्ये गुम्फिता पर्यावरणचेतना**
डॉ. बालकृष्णशर्मा ५१-६२

७. **भारविविशाखदत्तयो राजनीतिकदृष्टिः**
डॉ. दुर्गाप्रसादमिश्रः ६३-६८

८. **साहित्यशास्त्रे ध्वनिसिद्धान्तः**
डॉ. वृजेशमणिपाण्डेयः ६९-८८

लघु-ग्रन्थमाला

१. **रसचन्द्रिका**
श्रीविश्वेश्वरपाण्डेयः १-८७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

Central Library
Gurukul Kangri University
Hardwar-249404 (U.A.)

सम्पादकौ

डॉ. राजारामशुक्लः
निदेशकः, अनुसन्धानसंस्थानस्य

डॉ. हरिश्चन्द्रमणित्रिपाठी
निदेशकः, प्रकाशनसंस्थानस्य

130222

५६ वर्षे
३-४ अङ्कौ

वार्षिकं मूल्यम् - १०० रूप्यकाणि
दिसम्बर - मार्च, २००१-२००२ ई.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परामर्शदातृसम्पादकमण्डलम्

प्रो. राजेन्द्रमिश्रः, कुलपतिः, अध्यक्षः

१. **डॉ. उमाशङ्करशुक्लः**, वेदवेदाङ्गसङ्कायाध्यक्षः

२. **डॉ. रामकिशोरत्रिपाठी**, दर्शनसङ्कायाध्यक्षः

३. **डॉ. गङ्गाधरपण्डा**, साहित्य-संस्कृति-सङ्कायाध्यक्षः

४. **डॉ. राजीवरञ्जनसिंहः**, श्रमणविद्या-सङ्कायाध्यक्षः

५. **डॉ. सुभाषचन्द्रतिवारी**, आधुनिक-ज्ञान-विज्ञान-सङ्कायाध्यक्षः

६. **डॉ. राजारामशुक्लः**, संयोजकः

❖ ❖ ❖

प्रकाशकः —

डॉ. हरिश्चन्द्रमणित्रिपाठी
निदेशकः, प्रकाशनसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी - २२१००२

मुद्रकः —

श्रीजी-कम्प्यूटर प्रिण्टर्स
नाटी इमली
वाराणसी - २२१००१

प्राप्तिस्थानम्—

विक्रय-विभागः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी-२२१००२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमणी

१. **संस्कृते प्राविधिकविज्ञानम्**
मिश्रोऽभिराजराजेन्द्रः ८९-९८

२. **अन्यख्यात्यनिर्वचनीयख्यात्योर्विमर्शः**
प्रो॰ पारसनाथद्विवेदी ९९-१०८

३. **पाणिनीया स्वरप्रक्रिया**
डॉ॰ कपिलदेवपाण्डेयः १०९-११४

४. **महाकविभवभूतेः शब्दकोशपर्यालोचनम्**
डॉ॰ बालकृष्णशर्मा ११५-१२६

५. **त्रिपुरुषवादे पुरुषसम्प्रत्ययः**
डॉ॰ राममूर्तिचतुर्वेदी १२७-१४२

६. **प्रत्यक्षप्रमाणस्वरूपविमर्शः**
श्रीगणपतिशुक्लः १४३-१५४

७. **चमत्कारसिद्धान्तः**
प्रो॰ सन्निधानं सुदर्शनशर्मा १५५-१६४

लघु-ग्रन्थमाला

१. **सीतारावणसंवादझरी**
श्रीचामराजनगररामशास्त्री १-१२२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

५६ वर्षे	ज्येष्ठ-भाद्रपद-पूर्णिमे, वि.सं. २०५८	१-२ अङ्कौ

संस्कृतकवितायां भारतीयस्वातन्त्र्यसमरस्य चित्रणम्

मिश्रोऽभिराजराजेन्द्रः

कुलपतिः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयः

वाराणसी (उ.प्र.)

***

आवेदेभ्योऽभिजातसंस्कृतवाङ्मयं यावत् सर्वत्राऽपि स्वातन्त्र्यभावनायाः प्रतिपादनं पृथक्प्रसङ्गेषु समवलोक्यते। सर्वं परवशं दुःखं सर्वमात्मवशं सुखमिति समुद्घोषयद्भिः संस्कृतमनीषिभिरङ्गीकृतं यज्जीवितरसायनभूतं तत्त्वं स्वातन्त्र्यमेव। स्वकीयं तन्त्रमिति स्वतन्त्रम्। तस्य भावः स्वातन्त्र्यम्। स्वकीये तन्त्रे मानवः सर्वविधं सौख्यं भजते। स्वेच्छाऽनुरूपमसावाचरति; परन्तु परतन्त्रेऽवस्थिते सत्यसौ परकीयेच्छाऽनुरूपं समाचरितुं प्रभवति। तस्य शरीरं मनः किं वाऽऽत्माऽपि, चैतन्यमपि पराधीनं जायते। हन्त! किमतः परं दारुणं दुःखम्?

य खलु कीरः स्वतन्त्रः सन् स्वमित्रमण्डल्या सार्धमनन्तगगनविहरणसुखं स्वायत्तीकुर्वन् स्वर्गोपमसौख्यं भजते, स एव कनकपञ्जराबद्धः सन् दासदासीभिः सप्रणयं विविधस्वादुफलादिभिर्भोजितोऽपि न क्षणमपि प्रसन्नतामनुभवति। पञ्जराद् बहिर्विहायसि समुत्पततो वयस्यान् दर्शं दर्शमसावपि सङ्कीर्णपञ्जरपुटे पक्षतिद्वयमसकृद् धुनोति, पारवश्यमनुभूय च स्थूलस्थूलं श्वसन् करुणकरुणञ्च क्रन्दन् श्लथस्तिष्ठति। हा दैव! को नु वेत्ति तस्य विहरणप्रकृतेर्जीवस्य पारवश्यव्यथाम्? स्वार्थान्धो मानवः स्वक्रीडारसं सम्पूरयितुं कियदनर्थकरं पापमाचरति जीवानां जीवितरसायनं परिसमाप्य। आत्मनः प्रतिकूलानि परेषां न समाचरेदिति निगदति भगवान् योगेश्वरकृष्णोऽधिगीतम्। तदभिप्रायं कियन्तो विदन्ति? कारागारनिबद्धा जना एव ज्ञास्यन्ति पञ्जरबद्धानां शुकसारिकानां पीडाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्तुतः पारतन्त्र्यं नाम मरणमेव। मृतो जनो यथा किञ्चिदपि सार्थकं कर्तुं न प्रभवति, पराधीनोऽपि तथैव मुधा करोति, मुधा हसति, मुधा रोदिति, मुधा व्यवहरति। तस्य किमपि कर्म सार्थकं न भवति। किमेतादृशेन पशुतुल्येन जीवनेन? हलाकर्षणे योक्तुकामः कृषकः किं बलीवर्दं सकृदपि पृच्छति—भो, वर्तत उत्साहो हलाकर्षणे? नैव पृच्छति। आत्मोत्साहेन आत्मालस्येन वा वराकं वृषभं योजयति मुञ्चति वा। धिगेतादृशं पारवश्यम्!

तदेव दारुणमकीर्तिकरं पारतन्त्र्यं भारतजनन्याऽपि सोढम्; परन्तु पारतन्त्र्यमिदं खलीकर्तुं भारतपुत्रैः सततयुद्धं कृतं विजयश्चान्तेऽवाप्तः। संस्कृतकवितानिबद्धा सैव गाथाऽत्र प्रस्तूयते।

चतुरशीत्यधिकसप्तदशशततमे (१७८४ A.D.) ख्रिस्ताब्दे रॉयल एसियाटिकसोसाइटीनाम्न्याः संस्थायाः संस्थापना सञ्जाता कलिकातानगर्याम्। एतावता कालेन गौराङ्गशासनं भारते स्थायित्वमवाप। ईस्टइण्डियाकम्पनीनियोजिता लॉर्डपदवाच्याः शासका भारतवर्षं शासितवन्तः, साम्राज्यविस्तरञ्चापि कर्तुं प्रयतितवन्तः। अस्मिन्नेवाऽन्तराले कलिकातोच्चन्यायालयस्य न्यायाधीशः समवाप्तसुरभारतीवैदुषीको विद्वत्प्रियः सर-विलियमजोन्समहोदयः कविकुलगुरु-कालिदासप्रणीतस्य नाटकरत्नस्याभिज्ञानशाकुन्तलस्य रूपान्तरं कृतवान् आङ्ग्ल-भाषायाम्। अस्यैव रूपान्तरस्य जॉनफॉस्टरविहितं शर्मण्यभाषान्तरमनुशीलयन्तः प्रत्यग्राऽनुभूतान्तराह्लादा महाकविर्गेटेमहोदया रूपकमिदं स्वर्गवसुधयोः सङ्गमस्थलं निरूपितवन्तः। गेटेमहाभागानामनयाऽनुशंसयैव देववाणी निखिलेऽपि पाश्चात्त्यसाहित्यजगति परं प्रथिमानं गौरवञ्च भेजे। सर्वोत्कृष्टभाषारूपेण सा महतीं प्रतिष्ठामवाप।

आङ्ग्लशासनस्य प्रथमोपक्रमे देववाण्याः परप्रतिष्ठैतावतैवाऽनुमातुं शक्यते यल्लार्डपदवाच्येन भारतशासकेन वारेनहेस्टिंग्जमहोदयेन १७८४ मिते ख्रिस्ताब्दे **विवादसारार्णव**नामा कश्चिद्धर्मशास्त्रीयग्रन्थः संस्कृतपण्डितैः कारितः, स्वयमेव च तस्य आङ्ग्लभाषान्तरमपि कृतम्। अस्मिन्नेव वर्षे चार्ल्सविल्किसमहोदयः श्रीमद्भगवद्गीतामनूदितवान् आङ्ग्लभाषया। विलियमकैरेमहोदयः खण्डत्रयेण ख्रिस्तधर्मग्रन्थस्य बाइबलस्य (न्यू टेस्टामेण्ट) संस्कृतरूपान्तरं प्रकाशितवान् १८०८-११ वर्षमध्ये। मधुसूदनतर्कालङ्कारप्रणीतः **इङ्गलैण्डीयव्याकरणसारः** १८३५ मितख्रिस्ताब्दे प्राकाश्यमुपगतः। एवमेव श्रीशैलदीक्षितोऽपि कालेनानेन विलियमशेक्सपीयरप्रणीतनाटकस्य 'कॉमेडी ऑफ एरर्स' नाम्नस्संस्कृताऽनुवादं **भ्रान्तिविलासाख्यं** विदधे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपर्युक्तैरेतैः प्रमाणैः संस्कृतस्य परा प्रतिष्ठा, लोकप्रियता, आङ्ग्लशासन-विहितसम्मानना च स्फारीभवन्ति; परन्तु नेयं स्थितिः स्थेमानमभजत्। पञ्चत्रिंश-दुत्तराष्टदशशततमे (१८३५ A.D.) ख्रिस्ताब्दे सुरभारतीशरत्कौमुदीराहुभूतो लार्डमैकालेनामा कश्चिदीर्ष्याद्वेषकषायिताऽन्तःकरणोऽधिकारी समायातः, यः खलु संस्कृतप्रतिष्ठां खलीकृत्य तत्स्थाने आङ्ग्लभाषाया वर्चस्वं स्थापितवान्। प्रकृत्यैव भारतद्वेषी मैकाले संस्कृतमधिकृत्य स्वविषोद्गारं प्रकटितवान्—

'किमस्माभिरीदृशं (संस्कृत)साहित्यं प्रोत्साहनीयं यद्भवेन्निर्भूमिकम्। मौढ्यादृते किञ्च, अविश्वासेभ्य ऋते यस्मिन्न स्यात्किञ्चिदन्यत्?

अहो नु दौर्भाग्यं मैकालेमहोदयस्य! अन्धस्य करतले दर्पणमिव संस्कृतं तद्विचारपरिधावासीत्। भुक्तिमुक्तिदात्रीं वृन्दारकवाचमप्यसौ मूढो निर्गुणां निस्तत्त्वाञ्च मेने। मैकाले-षड्यन्त्रे कृतसंस्कृतोपकारो मैक्समूलरोऽपि सम्मिलित आसीदिति सम्यक् सिध्यति तयोः पत्राचारैः। मैक्समूलरो वेदरचनाकालं ख्रिस्तात् केवलं द्वादशशतवर्षप्राचीनं समुद्घोष्य, भारतीयधर्मसंस्कृतिसाहित्यानामर्वाचीनत्वं यथा मध्येविश्वविद्वन्निकायं प्रकाशितवान् तेन मैकालेऽतीव प्रहृष्ट आसीत्। यतो हि अनाद्यनन्तवेदज्ञानाभिमानिनो भारतीया मैक्समूलरस्थापनया प्रत्याख्याताः समतिष्ठन्। अत एव मैकाले वर्धापनपत्रं सम्प्रेष्य मैक्समूलरं सान्त्वयामास—**'यथा भवताऽऽत्मलेखजातेन भारतीयवाङ्मयस्य धर्मस्य संस्कृतेर्वा नवीनत्वं प्रमाणी-क्रियते, तेन वयं बहूपकृताः। भारते च आङ्ग्लशासनप्रतिष्ठापने तेन महत्सौकर्य-मवाप्यते। एतन्निमित्तं भवन्तोऽभिनन्दनीयाः पुरस्करणीयाश्चेति सन्दर्भेऽस्मिन्नहं प्रयत्नपरोऽस्मि'।**

लार्डमैकालेकृतानां संस्कृताऽधरीकरणोद्योगानां महान् विरोधोऽभून्निखिलेऽपि राष्ट्रे। सर्वेऽपि तदानीन्तनाः संस्कृतपत्रकाराः संस्कृतरक्षणाय बद्धपरिकराः सञ्जाताः। संस्कृतरत्नाकरे सूर्यनारायणशर्मा (१९०४) शारदायां कुप्पुस्वामिशास्त्री सूनृतवादिन्याञ्च जयचन्द्रसिद्धान्तभूषणः (१७ जनवरी, १९०७ मितेऽङ्के) संस्कृतपक्षमाश्रित्य दृष्ट्युन्मीलनक्षमान् विस्तृतलेखान् प्रकाशितवन्तः। काशीविद्यासुधानिधिः (१८६६ A.D.) साप्ताहिकी मञ्जुभाषिणी (१९०२ A.D.) दैनिकी जयन्ती (१९०६ A.D.) चापि लेखान् प्रकाश्य प्रतिविरोधं प्रकटितवत्यः।

यद्यपि काले तस्मिन् महाविभूतयश्शतमिता आसन् निखिलेऽपि राष्ट्रे। शासनेऽपि ते प्रतिष्ठिताः। तथापि, भारतीयाः सन्तोऽपि केचन भारतीयसंस्कृतिधर्मसाहित्यनिन्दकाः, अथ च पाश्चात्यसंस्कृतिचारणभूता आसन्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजा राममोहनरायः, राधाकान्तदेवः (१७८४-१८६७), कृष्णमोहन-वन्द्योपाध्यायः, माइकेलमधुसूदनदत्तश्चेति केचन जनास्तस्मिन् सन्दर्भे गणनीया वर्तन्ते। एते सर्वेऽपि संस्कृतभाषाया वाङ्मयस्य च घोरविरोधिन आसन्। मैकाले-माउण्टस्टुअर्ट-एलफिंस्टन-जेनरलब्रिग्सकृते संस्कृतविरोधाऽध्वरे यजमानभूमिकां निरवहद् राजा राममोहनरायः। हिन्दीभाषामहाकविर्भारतेन्दुहरिश्चन्द्रस्तद्वयस्याश्चापि राजभक्तिदीक्षिता एवासन्। एकतस्त्वसौ भारतदुर्दशानाम्नि हिन्दीनाटके ब्रिटिश-शासनं विनिन्दत्यपरतश्च विक्टोरियातनये (ड्यूक ऑफ एडिनबरा) काशीमुपागते सति **मानसोपायना**भिधमभिनन्दनग्रन्थं सम्पादयति (१८७७ A.D.), यत्र षट्षष्टिमितानां संस्कृतकवीनामपि राजस्तुतिपराणि काव्यानि प्रकाशितानि वर्तन्ते। एतत्पूर्वमपि प्रकाशिते **सुमनोऽञ्जलि**नाम्नि प्रशस्तिकाव्ये पञ्चदशमितानां संस्कृतकवीनां काव्यानि प्राकाश्यमुपगतानि।

राजप्रशस्तिकारा अन्ये चापि बहवः संस्कृतकवय आसन् तस्मिन् युगे, ये देवभारत्युपेक्षां प्रत्युदासीना दृश्यन्ते स्म। आङ्ग्लाधिराजस्वागतं जुबिलीगानमिति काव्यद्वयं (बम्बई, १८८७ A.D.) तादृग्गुणविशिष्टं लक्ष्यते। नरसिंहाचार्यो विक्टोरियाप्रशस्तिं, व्रजनाथशास्त्री चापि विक्टोरियाप्रशस्तिं प्रणिन्यतुर्यत्प्रकाशनं १८९२ मितवर्षे सञ्जातम्। हृषीकेशभट्टाचार्यः १८९० मितवर्षे राजपुत्रागमनाख्यं काव्यं प्रणिनाय। राजा सुरेन्द्रमोहनटैगोरश्च प्रिंसपञ्चाशदाख्यं १८७५ मितवर्षे विक्टोरियामाहात्म्याख्यं काव्यञ्च १८९८ मितवर्षे निबबन्ध।

सम्पत्कुमारनरसिंहाचार्यः स्वोपज्ञं विक्टोरियावैभवाख्यं काव्यमधि-संस्कृतचन्द्रिकं प्रकाशनाय प्रेषितवान्, यन्न मुद्रितवान् स्वाभिमानैकधनः सम्पादकोऽप्पाशास्त्री। किञ्च, भारतगौरवन्यक्करणार्थं काव्यकारं निर्विशङ्कं निन्दितवान्—

पूर्वाद्यतनयोरेव विशेषः कोऽपि पद्धतौ।
तथापि पूर्वधिक्कारः सरलेभ्यो न रोचते।।

पक्षविपक्षौ युगपदेव प्रवर्तेते इति प्रकृतिनियमः। यथैते संस्कृतकवयो विस्मृतभारतसौवर्णातीतकथाः स्वल्पस्वार्थसिद्ध्यर्थमाङ्ग्लशासनप्रशस्तिनिरता आसन्, तथैव दुर्मदशासनकृतभारतीयप्रजाजनशोषणव्यथिता वैदेशिकशासन-तन्त्रक्षुब्धाः स्वातन्त्र्यपक्षधराः स्वधर्मसंस्कृतिपरम्परागर्विता अन्ये शतसहस्रमिताः संस्कृतसेविनो निरन्तरमेव स्वहृदयामर्षमुद्गिरन्तस्समलक्ष्यन्त। देवेन्द्रनाथठाकुर-भवानीचरणवसु-भूदेवमुखोपाध्याय-ज्ञानेन्द्रमोहन-तारानाथतर्कवाचस्पति-ईश्वरचन्द्र-विद्यासागरप्रभृतयो महान्तस्संस्कृतज्ञास्तत्र सविशेषं स्मरणीया वर्तन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्तुतो व्यतीते सति सप्तपञ्चाशदुत्तराष्टादशशततमस्य वर्षस्य प्रथम-भारतीयस्वातन्त्र्यसमरे, यदा भारतशासनतन्त्रं सम्राज्ञी विक्टोरिया स्वयं गृहीतवती **वायसराया**ख्यमात्मप्रतिनिधिञ्च नियोक्तुमुपचक्रमे, तदा संस्कृतविद्वांसो देववाणीप्रतिष्ठापनार्थमाशावन्तो बभूवुः। १८५८ मितवर्षे कविवर्यो बालशास्त्री (१८२९-८२) संस्कृतगौरवपुनरानयनार्थं स्वकाव्यमयं विनिवेदनं सम्राज्ञीं प्रति प्रकाशितवान्। परन्तु सिकतायां क्व तैलम्? को नु खलु सम्राज्ञीं देववाणी-महिम्नाऽवगमयेत्? ये खलु राजभक्ताः, पाश्चात्त्यजीवनपद्धतिसम्पोषणवशात्तेषां मित्रभूता लन्दनगामिनस्ते पुनः पाश्चात्त्येभ्योऽपि समधिकतरं संस्कृतविरोधिनः। ते तु संस्कृतभाषां भारतीयधर्माचरणसंहितादिकञ्च तृणम्मन्यमाना आत्मकदर्थनाऽनुरक्ता आसन्। ये च ज्ञानविज्ञानपारगा ऋषिकल्पा विपश्चित्तल्लजास्ते पुनः स्वगृहकोणोप-रुद्धा सानुशयाः सर्वविधोपायहीनाः। एवं सति सर्वमेव ईश्वराधीनमासीत्।

सम्राज्ञ्या विक्टोरियायाः स्वर्णजयन्ती (पञ्चाशत्तमी वर्षग्रन्थिः) १८८७ मितख्रिस्ताब्दे सोत्साहं ससम्भारञ्च समाम्नाता भारते। अस्मिन्नेव वर्षे यथा शासनपक्षधरान् भारतीयान् पुरस्कर्तुं विविधोपाधयो वितीर्णाः (सर-रायबहादुर-प्रभृतयः), तथैव संस्कृतपण्डितानपि सम्मानयितुं **महामहोपाध्याय**नामा कश्चिदुपाधिरुपकल्पिता। एतावन्मात्रं संस्कृतादरनाटकं निर्व्यूढं विक्टोरियाशासनकाले; परन्तु राजकार्येषु, विद्यालयशिक्षापद्धतौ, न्यायालयादिषु च या महनीया स्थितिरासीत्संस्कृतस्य मैकालेपूर्वं सा न पुनराजगाम। राजकृपापात्रतामुपयाताः संस्कृतपण्डिताः समवाप्तमहामहोपाध्यायपदवीका एव स्वर्गसौख्यं जीवनसार्थकताञ्चानुभवन्तः परां प्रीतिमुपगताः।

परन्तु साम्राज्यवादविरोधिनः संस्कृतज्ञाः कथं राजभक्ताः स्युः? १८८२ मितवर्षे प्रकाशिते श्रीबंकिमचन्द्रस्यानन्दमठनाम्न्युपन्यासे भारतभूमिवन्दनात्मकं गीतमेकमासीत्—

वन्दे मातरम्!
सुजलां सुफलां मलयजशीतलाम्
शस्यश्यामलां मातरम्!
वन्दे मातरम्!!

अमोघमन्त्राक्षरकल्पं गीतमिदं भारतभूमिं हिमगिरिसिन्धुव्यायतां जननीरूपेण प्रतिष्ठापयामास। स्वातन्त्र्यभावनाया मूलमन्त्रभूतमिदं गीतं संस्कृतभाषयोप-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निबद्धमासीत्। अनेन सहैव आङ्ग्लशासनविरोधः समारब्धः। **उदयानन्दशर्मा** प्रबोधितवान् विस्मृतातीतगौरवान् भारतीयान्—

'क्व वा वयं हीनतया दरिद्राः'? इति प्रणीय।

ड्यूक ऑफ एडिनबरा तु कतिपयनगराण्यवलोक्य अभिनन्दन-समारोहांश्चात्मोपस्थित्या सार्थकीकृत्य प्रत्यावृतः स्वदेशम्; परन्तु दैन्यजर्जरितेषु भारतीयग्रामटिकाकुटीरेषु किमासीदवशिष्टं तत्तेन नाऽवलोकितम्। अत एव तमुपलक्ष्य जगाद **कन्हैयालालशर्मा** स्वकवितायाम्—

दीनानां खलु दीनकर्पटभृतां क्षुत्पीडितानां गृहे
गत्वा सान्त्वनवारिणा द्विगुणितं दुःखं त्वदालोकनात्!!

महाकविः सर्वतन्त्रस्वतन्त्रः **केरलवर्मा** आङ्ग्लशासनपीठमर्दभूतान् स्वप्रजाजनशातनरतान् भारतीयभूपान् निर्भरं निर्भर्त्सितवान् १८७५ मितवर्षे, यत्परिणामवशादसौ अष्टादशमासान् यावदलप्पुडा-तिरुवनन्तपुरकारागारयोरुपरुद्धो जातः। एतत्प्रमाणमुपलभ्यते तदुपज्ञे **विशाखविजय**नाम्नि महाकाव्ये—

राजकारालयं नीतः केरलो राजपूरुषैः।
अज्ञातसीमं स्वातन्त्र्यविच्छेदक्लेशमन्वभूत्।।

शिवराजविजयस्य कर्ता **श्रीमदम्बिकादत्तव्यासो**ऽपि (१८५८-१९०० A.D.) राष्ट्रभावनाया महान् सम्पोषक आसीत्। **श्रीधरपाठको** भारतगीतं भारतस्तवञ्च कृतवान् सरलमसृणपदबन्धैस्तद्यथा—

वन्दे भारतदेशमुदारम्। सुषमासदनसकलसुखसारम्।।
भालविशालहिमाचलभ्राजम्। चरणविराजित-अर्णवराजम्।।
तपधृतसहसकोटिकरवालम्। दुसहदुरापप्रतापविशालम्।।

लब्धयशा महान् पत्रकारो**ऽप्पाशास्त्रि**महोदयो मातृभक्तिनाम्नीं मर्मस्पर्शिनीं कवितां संस्कृतचन्द्रिकायां (१८९४ A.D.) प्रकाशितवान्। अधर्मविपाकाख्ये काव्ये संस्कृतचन्द्रिकोट्टङ्किते (७ अगस्त, १८९७ अङ्के) राशिवडे़करोऽप्पाशास्त्री पाश्चात्यसंस्कृत्यन्धानुकरणमुग्धान् भारतीयान् सव्यङ्ग्यं निर्भर्त्सितवान्। तद्यथा—

गोर्नात्मेति वचः प्रमाणयति च प्रावारकं नेहते
वक्त्रं मुण्डयते स्वयं प्रतिदिनं धत्ते शिखां तालुनि।
सूक्ष्मं द्रष्टुमपीश्वरो नयनयोर्न्यस्योपनेत्रद्वयं
प्रद्युम्नं लघयन्निवात्मवपुषाऽस्माकं धिनोत्यन्तरम्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरोजमोहिनी देव्यपि पाश्चात्त्यजीवनपद्धतिलोलुपा महिला विनिन्दन्ती विद्योदयपत्रिकायां लिलेख (खण्ड: १९, १८९० A.D.)—

धात्र्यै समर्प्यैव हि बालकानां सम्पालनं वा खलु रन्धनं वा।
संन्यस्य हस्ते परिचारिकाणां रक्ता असन्नाटकपाठकार्ये।।

हिन्दीसाहित्यपुरोधा **आचार्यमहावीरप्रसादद्विवेदी** (१८६४-१९३८ A.D.) उभयभाषाकविरासीत्। हिन्दीभाषयाऽसौ घोषयामास—

जिसको न निज गौरव तथा निज देश का अभिमान है,
वह नर नहीं नरपशु निरा है और मृतक समान है!!

काव्यमिदमाचार्य: स्वशिष्यवर्यस्य गणेशशङ्करविद्यार्थिन आग्रहवशात् प्रणिनाय। इदं वाक्ययुगलं विद्यार्थिसम्पादितप्रतापाख्यपत्रस्य मुखपृष्ठे सन्देशरूपेण प्रत्यङ्कं मुद्र्यते स्म। काव्यान्तरे श्रीद्विवेदिमहाभाग: कथयति—

हम बुलबुल तू गुल है प्यारा। तू सम्बल, तू देश हमारा
हमने तन-मन तुझ पर वारा। तेजस-पुञ्ज विशेष!!
आँख अगर कोई दिखलावे। उसका दर्प-दलन हो जावे
फल अपने कर्मों का पावे। बने नाम निश्शेष!!
जै जै प्यारे देश हमारे। तीन लोक में सबसे प्यारे
हिमगिरि-मुकुट मनोहर धारे। जै जै सुभग सुवेष!!

स एवाचार्यद्विवेदी संस्कृतचन्द्रिकायां (१ जून, १८९८) समाचारपत्र-सम्पादकस्तवाभिधां कवितां प्रकाशितवान्। राजभक्तान् सम्पादकानसौ आङ्ग्लप्रभु-सेवकभूतान् कदर्यांश्च निरूपितवान्। कृतघ्नसम्पादकास्ते कीदृशा आसन्निति ज्ञायते द्विवेदिपद्यबन्धेनैकेन—

इहास्ति साधुत्वमत: परं किं प्रकाश्य लोकस्य विमाननां यत्।
स्थिते भये पाणियुगं प्रसार्य क्षमस्व मोदस्व च भाषसे त्वम्!!

किञ्च, यथा यथा वैदेशिकशासकानामत्याचारा उपचिता:, यथा वा तेषां विविधानि दुष्कृत्यानि जघटिरे, तथा संस्कृतकवय: पत्रकाराश्च तद्विरोधार्थं बद्धपरिकरा: सञ्जाता:। पञ्चाधिकोनविंशतिशततमे खिस्ताब्दे (१९०५ A.D.) वायसरायकर्जनो बङ्गवसुन्धरां विभाजितवान्, येन न केवलं बङ्गवासिनोऽपि तु निखिलमेव राष्ट्रं शोकसन्तप्तं जातम्। भारतवर्षं प्रति कर्जनस्य यदवमाननमासीत्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

या च हीनदृष्टिरासीत्, तत्सर्वं सुष्ठु विज्ञाय अप्पाशास्त्री-राशिवडेकरः संस्कृतचन्द्रिकायां निर्भयं लिलेख—

'भारतवर्षेऽस्मिन् दोषानारोपयता लार्डकरधनमहोदयेन स्वजातीयानामेव अनेकेषां वचसि विश्वासो नाविष्कृतः। नूनमेतदाश्चर्यमेव! एतज्जातीया हि भूयांस एव पण्डिताः सानन्दं निर्भरं भारतं प्रशंसन्ति स्म'।

अत्राऽवधेयमिदं तथ्यं यल्लार्डकर्जनः श्रीगोपालकृष्णगोखलेमहोदयं वञ्चनपरायणमश्रद्धेयञ्च निरूपितवान्। भारतस्वातन्त्र्यसूत्रधारसमवायमप्यसौ प्रवञ्चकानां यूथं घोषितवान्।

बङ्गभङ्गे सञ्जात एव भारतवासिनः संक्षुब्धा जाताः। सर्वत्रापि क्रान्तिस्वरोऽश्रूयत। सर्वत्रापि विरोधः समदृश्यत। **यादवेश्वरतर्करत्नः** अश्रुविसर्जनाख्यां कवितां प्रणीय बङ्गभङ्गपीडामात्मनीनां प्रकाशितवान्। **ताराचरणभट्टाचार्यः** (बनारसषड्यन्त्रसंयोजनसदस्यः) भारतगीतिकां विरचय्य स्ववेदनां प्रकटितवान्। १६ अक्टूबर, १९०५ तिथौ कलिकातानगर्यां बङ्गभङ्गमुपलक्ष्य राष्ट्रियशोकदिवसः समाम्नातः। वन्दे मातरमिति स्वातन्त्र्यगीतमुद्गायन्तः परःसहस्रमिताः स्त्रीपुरुषा गङ्गापुलिनमासेदुः, स्ववेदनां, हृदयाऽमर्षं, शासनविरोधञ्च प्रकटितवन्तः।

अहो नु नियतिलीलाविलसितम्! असंस्कृतज्ञान् गौराङ्गराजपुरुषान् कश्चिद् भारतीय एवाऽवगमयति स्म यदेते वन्दे मातरं-गायकाः प्रोत्साहयन्ति सर्वान् यद् वध्यतां मार्यतां चाङ्ग्लजन इति। अनर्थपरमिमं गीतार्थं सत्यं मन्वाना गौराङ्गा राजपुरुषाः समधिकं नृशंसाः सञ्जाताः। किञ्च, क्रोधान्धैर्निर्विवेकैस्तैः पशुमारं मारिताः पुञ्जीभूताः स्त्रीपुरुषाः। बङ्गेषु स्वदेशीयान्दोलनमिति शीर्षकेऽग्रलेखे संस्कृतचन्द्रिकाप्रकाशिते (नवम्बर, १९०५ मितवर्षे) अप्पाशास्त्री लिखति—

'स्वजनविद्वेषिणः पुनः केऽपि दुर्मतयो 'वन्दे मातरम्' इति पदद्वितयस्य वध्यतां मार्यतां चेत्यर्थं बोधयन्ति'।

१९०८ मितवर्षे क्रूरशासनेन खुदीरामबोसाख्यो भास्वरस्वातन्त्र्यदीपो न्यायनाट्यमभिनीय निर्वापितः। समग्रमेव राष्ट्रमवसन्नं जातम्। षट्त्रिंशन्मिता अन्ये नवयुवानो गृहीताः। हाहाकारः सम्प्रवृत्तो दर्शं दर्शं नृशंसशासननग्नताण्डवम्। स्वश्रद्धाञ्जलिं समर्पयता सूनृतवादिनीसम्पादकेन लिखितम्—

'घटिकाऽर्धमात्रेण च प्रायासिषुरमुष्य प्राणाः। प्रेतस्य चामुष्य मुखं स्मयमानमिवासीत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतजननीदुर्ललिततनयं खुदीराममभिलक्ष्य कवितां मर्मोद्घाटिनीं निबन्धञ्च ब्रिटिशशासनच्छिद्रान्वेषणपरं लिखित्वैव **अप्पाशास्त्रिपञ्चाननतर्करत्नौ** च कारागारे निबद्धौ। तथापि किमेतावता? कारावासव्यथां निषेव्याऽपि स्वदेशानुरागिणां क्रान्तिस्वरो नाऽपचितः। स्वराष्ट्रवासिजनान् प्रबोधयन् अप्पाशास्त्रिराशिवडेकरो निजगाद—

भय बोध राजभक्तिं जहि पारतन्त्र्यपाशं
त्यज दैववादवेगं ननु पौरुषं श्रयस्व।
भज सङ्घशक्तियोगं त्यज भूरि भेदरोगं
परिलिप्स्यसे सुयोगं स्वभिमानरक्षितोऽसि।।

एवमेव **'पञ्जरबद्धः शुकः'** इत्याख्ये काव्येऽप्पाशास्त्री शुकव्याजेन पारतन्त्र्यपाशबद्धानां भारतीयानां मनोव्यथां सन्तापञ्च साधु विशदीचकार। काव्यमिदं पारतन्त्र्यपीडामभिव्यनक्ति।

मध्ये मध्ये सुबहु वृत्तजातं घटितं यस्य प्रतिक्रियात्मकं चित्रणमवाप्यते तदानीन्तनेषु संस्कृतपत्रेषु। निर्वासितो लालालाजपतरायः पञ्जाबकेसरी। 'कस्येदं निर्वासनम्' इति शीर्षकेण बृहल्लेखं प्रकाश्य सूनृतवादिनीसम्पादकः (अप्रैल, १९०७ मितवर्षे) लाजपतरायस्य महिमानं निरूप्य तस्य निर्दोषत्वमपि साधितवान्। अनेन निष्ठुरशासनस्य षड्यन्त्रं विशदीभूतम्। तावता कालेनैव भारतीयसैनिका रावलपिण्डीनगरे विद्रोहिणः सञ्जाताः। ततश्च ते शासनेन निर्दयं दण्डिताः। अनर्थकरवृत्तमिदं समुद्घाटयता सूनृतवादिनीसम्पादकेन निबन्धो व्यलेखि पत्रिकायाम्—**'अन्याय्यं किमपि'** इति शीर्षकेण।

'स्वराज्यमस्माकं जन्मसिद्धोऽधिकारः' इति स्वातन्त्र्यमन्त्रघोषको लोकमान्यो बालगङ्गाधरतिलकोऽपि शासनेन दण्डितो निर्वासितश्च। सूनृतवादिनीसम्पादकः पत्रिकायाः २३ जुलाई, १९०८ मितेऽङ्के **'हा धिक् कष्टम्! दण्डितो महात्मा तिलकः'** इति शीर्षकेण निजाग्रलेखं सङ्ग्रथ्य तिलकमहाभागानां व्यक्तित्वं कर्तृत्वञ्च सम्यगालोचितवान्। स्वप्रणामाञ्जलिं प्रस्तुवन्नसौ व्याजहार—

निगदन्तु निसर्गदुर्धियो निगडं दूषणमित्यमुं तव।
अपरं स तथापि भूषणं भवतो येन विशिष्य पूज्यते।।

भवतु। भारतीयस्वातन्त्र्यसङ्ग्रामकथेयं क्रान्तिवीराऽरविन्दघोषप्रणीताया भवानीभारत्याश्चर्चां विना न सार्थवती भविष्यति। योगसिद्धेः प्राग् **अरविन्दघोषो**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

महान् क्रान्तिनायक आसीत्। अलीपुरकारागारे निरुद्धोऽसौ १९०६ मिते ख्रिस्ताब्दे **भवानीभारतीं** प्रणीतवान्। अपूर्णे नवनवतिपद्यात्मकेऽस्मिन् खण्डकाव्ये भारतधरित्री भवानीभारतीरूपेण चित्रिता राष्ट्रभक्तेन कविना। प्रतिश्लोकमनुभूयते दुर्वारस्स्वातन्त्र्यभावः। काव्यमिदं चिरकालं यावद् ब्रिटिशशासनेन यावत्प्रतिबन्धित आसीत्।

स्वातन्त्र्यसमरावधौ यथा सुब्रह्मण्यभारती महोदयस्य काजीनजरुलइस्लामस्य मैथिलीशरणगुप्तस्य वा कविताः स्वदेशवासिनां मनस्सु विलक्षणोत्साहसञ्चारं विदधिरे, यथा वा कर्नलरामसिंहप्रणीतं **'कदम कदम बढ़ाये जा, खुशी के गीत गाये जा'** इत्याख्यं काव्यञ्च आजादहिन्दसैन्यस्य प्रयाणगीतं जातम्, यथा वा श्यामलालपार्षदप्रणीतं राष्ट्रध्वजगानं (**झण्डा ऊँचा रहे हमारा** इति), रामप्रसादबिस्मिलप्रणीतम् आत्मोत्सर्गगीतं (**सरफरोशी की तमन्ना अब हमारे दिल में है** इति) च स्वातन्त्र्यपथपथिकानां भारतीयानां कण्ठे कण्ठे समतिष्ठत्, सर्वथा तथैव तद्युगीनानां संस्कृतकवीनां काव्यान्यपि स्वाधीनतामन्त्रभूतान्यासन्। भाषाया विरलप्रचारवशात् सर्वजनाऽनवगमवशाच्च कामं तेषां गीतानां यथोचितोपयोगो न सञ्जातस्तथापि गीतविन्यस्तस्वातन्त्र्यसंवेदना भाषान्तरापेक्षयाऽधरीकर्तुं न कथमपि शक्याः।

तद्युगीनेषु पत्रपत्रिकासु एवंगुणविशिष्टाः शतसहस्रमिताः कविताः प्राकाश्यमुपगतास्तद्यथा—शारदाचरणमिश्रकृतं भारतगौरवम्, कृष्णमाचार्यकृतं भारतगीतम्, तिलकमञ्जरीसङ्ग्रहश्च, नगरकरप्रणीता राष्ट्रिया जागृतिः, आत्मारामशास्त्रिकृतं शिवहृदयम्, एम.के.ताताचार्यप्रणीतो भारतीयमनोरथः, वरदकृष्णमाचार्यकृतो भारतखड्गः, रामावतारशर्मप्रणीतम् अभिनवभारतम्, चारुचन्द्रवन्द्योपाध्यायकृतं मातृसम्बोधनम्, केशवगोपालकृतं तिलकसौभाग्यम्, विधुशेखरभट्टाचार्यप्रणीतं काव्यत्रयम् (भारतभूमिः, बद्धविहगः, उद्बोधनम्), कृष्णदेवकाव्यतीर्थप्रणीतं भारतवर्षम्, पी.शंकरसुब्रह्मण्यशास्त्रिप्रणीता भारतकौमुदी, द्विजेन्द्रब्रह्मचारिकृता 'मातृभूमिः', विजयचन्द्रशर्मप्रणीता उद्बोधनगाथा, शालग्रामशास्त्रिकृतं प्रबोधनम्, मेधाव्रताचार्यप्रणीता कविता—मातः का ते दशेति, म.म.गिरिधरशर्मचतुर्वेदप्रणीता जातीयप्रार्थना, लक्ष्मीनारायणशिवप्रसादशर्मप्रणीतं भारतेतिवृत्तसारञ्च।

सूनृतवादिनी (१९०६-१९०९) साप्ताहिकी पत्रिका स्वातन्त्र्यपक्षधरी तस्मिन् युगे महिम्नः परां काष्ठामधिरुरोह। ब्रिटिशशासनकोपभाजनभूतेयं पत्रिका मार्चमासे १९१० मिते ख्रिस्ताब्दे प्रकाशनादुपरता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रिटिशशासनकालस्य प्रमुखाः संस्कृतपत्रपत्रिका नाम्नैव निर्दिश्यन्ते। अस्मिन् सन्दर्भे विस्तृतपरिज्ञानार्थं विद्वत्प्रवराणां डॉ. हीरालालशुक्लमहाभागानां ग्रन्थरत्नं **'संस्कृत का समाजशास्त्र'**[1] इत्याख्यं सर्वैरिव परिशीलनीयम्—

पत्रिकाऽभिधानम्	प्रकाशनस्थानम्	प्रकाशनावधिः
१. जयन्ती (दैनिकी)	त्रिवेन्द्रम्	१.१.१९०७-४.१.१९०७
२. मञ्जुभाषिणी (पञ्चाह्निकी)	काञ्ची	१९०२-१९०३
३. मञ्जुभाषिणी (साप्ताहिकी)	काञ्ची	१९००-१९२५
४. विज्ञानचिन्तामणिः (साप्ताहिकी)	पट्टाम्बि (केरल)	१९०२-१९२०
५. सूनृतवादिनी (साप्ताहिकी)	कोल्हापुरम्	१९०६-१९१०
६. संस्कृतसाकेतम् (साप्ताहिकम्)	अयोध्या	१९२०-१९४७
७. संस्कृतम् (साप्ताहिकम्)	अयोध्या	१९३०-१९४७
८. देववाणी (साप्ताहिकी)	कलकत्ता	१९३४-१९४०
९. मञ्जूषा (साप्ताहिकी)	कलकत्ता	१९३६-१९३७
१०. विद्यार्थी (पाक्षिकम्)	पटना	१८८०-१८८२
११. विद्वन्मनोरञ्जिनी (पाक्षिकी)	मद्रास	१९०६-१९२०
१२. अमरभारती (पाक्षिकी)	त्रिवेन्द्रम्	१९१०-१९१८
१३. मित्रम् (पाक्षिकम्)	पटना	१९१८-१९२५
१४. सूर्योदयः (पाक्षिकः)	वाराणसी	१९२६-इदानीं यावत्
१५. सुप्रभातम् (पाक्षिकम्)	वाराणसी	१९३४-१९३८
१६. सहस्रांशुः (पाक्षिकः)	वाराणसी	१९२७-१९२९
१७. वाङ्मयम् (पाक्षिकम्)	वाराणसी	१९४०-१९४२
१८. उच्छृङ्खलम् (पाक्षिकम्)	वाराणसी	१९४१-१९४३

यद्यपि प्राचीनतादृष्ट्या काशीविद्यासुधानिधिनाम्नी (पण्डितपत्रिकेत्यपरपर्याया, १८६६-१९१७) साहित्यपत्रिकैव इदम्प्रथमतां भजते; परन्तु संस्कृतग्रन्थप्रकाशनैकमात्रलक्ष्येयं पत्रिका स्वातन्त्र्यसमरगाथाविरहितैव सन्दृश्यते; परन्त्वन्या उपरि निर्दिष्टाः पत्रिकाः स्वातन्त्र्यान्दोलने महतीं भूमिकां निरवहन्। तद्युगीनाः पत्रपत्रिकासम्पादका दामोदरशास्त्रि[2]-हृषीकेशभट्टाचार्य[3]-

---

१. भारतीय-विद्या-प्रकाशनम्, दिल्ली। प्रथमसंस्करणम्, १९८९।

२. विद्यार्थिसम्पादकः; ३. विद्योदयसम्पादकः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोहनलालविष्णुपण्ड्या-नीलकण्ठशास्त्रि[१]-जयचन्द्रसिद्धान्तभूषणभट्टाचार्य[२]-अप्पाशास्त्रिराशिवडेकर[३]-वी.कामेश्वरार्य[४]-प्रतिवादिभयङ्करानन्ताचार्य[५]-हनुमत्प्रसादत्रिपाठिप्रभृतयो[६] दम्भोलिपातोपमकण्ठा अकुतोभया नीरक्षीरविवेकिनो भारतीयस्वातन्त्र्यसमरसमर्थकाः स्वराष्ट्राऽभिमानिनश्चासन्। एषाम्मध्ये कियन्त एव शासनविरोधवशात् कारावासदण्डमपि सोढवन्तः। तत्सर्वं विलक्षणमेव राष्ट्रियवृत्तमितिमात्रं विनिवेद्य विरम्यते।

---

१. विज्ञानचिन्तामणिसम्पादकः;
२. संस्कृतचन्द्रिकासम्पादकः।
३. संस्कृतचन्द्रिका-सूनृतवादिनीसम्पादकः;
४. सहृदयासम्पादकः।
५. शास्त्रमुक्तावली-मञ्जुभाषिणीसम्पादकः;
६. संस्कृतसाकेतसम्पादकः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदान्तमीमांसाशास्त्रारम्भणं युक्तम्

प्रो॰ पारसनाथद्विवेदी
आचार्योऽध्यक्षश्च, वेदान्तविभागस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी

***

पूजितविचारवचनो मीमांसाशब्दः। मान्-धातोर्विचारार्थकात् 'मान्-वध-दान्-शान्भ्यो दीर्घश्चाभ्यासस्य' (पा.३.१.६) इति सूत्रेण 'मानेर्जिज्ञासायाम्' इति वार्त्तिकसहकारेण स्वार्थे सनि अभ्यासस्य दीर्घत्वे मीमांसाशब्दो निष्पद्यते। मानेर्जिज्ञासायामिति वार्त्तिके जिज्ञासाशब्दो विचारार्थ एव सर्वसम्मतः। विचारे पूजितत्वञ्च प्रमाणानुगृहीतत्वम्। वेदान्ता उपनिषदः। शास्त्रत्वं तेषां वेदान्तानां हिताहितेषु प्रवृत्तिनिवृत्तिकरत्वात्। मीमांसाद्वयं प्रसिद्धम्—पूर्वमीमांसोत्तरमीमांसा चेति। पूर्वमीमांसाशास्त्रे धर्मविचारः प्रस्तुतः कर्मकाण्डभागपठितवाक्यानाम्। अथातो धर्मजिज्ञासेत्यारभ्य द्वादशाध्यायलक्षणं कर्मप्रतिपादकं शास्त्रं पूर्वमीमांसाशब्देनोच्यते। अथातो ब्रह्मजिज्ञासेत्यारभ्यानावृत्तिशब्दादित्यन्तो ग्रन्थराशिः चतुरध्यायलक्षणो ब्रह्ममीमांसा-वेदान्तमीमांसा-शारीरकमीमांसा-उत्तरमीमांसादि-शब्देनाभिधीयते।

तत्रेदं विचार्यते—उभे मीमांसे एकशास्त्रं पृथक् शास्त्रं वेति? मीमांसाशब्दाभिधेयत्वाद् वेदार्थविचाररूपत्वाच्च जायत एवंविधा जिज्ञासा। तत्र रामानुजीयाः प्राहुः—कर्मब्रह्ममीमांसयोरेकशास्त्रत्वम्। नियतपौर्वापर्यभागद्वयात्मक-वेदाख्यैकप्रबन्धरूपत्वात्। अनेकव्यतिरेकेण सांख्यन्यायवत्। यथोक्तं श्रीभाष्ये श्रीरामानुजाचार्यैः स्वभाष्योपजीव्यभूतश्रीबोधायनवाक्यं प्रमाणीकुर्वद्भिः—मीमांसा-पूर्वभागजातस्य कर्मणोऽल्पास्थितफलत्वात्, उपरितनभागावसेयस्य ब्रह्मज्ञान-स्यानन्ताक्षयफलत्वाच्च पूर्ववृत्तात् कर्मज्ञानादनन्तरं तत एव हेतोर्ब्रह्म ज्ञातव्यमित्युक्तं भवति। तदाह वृत्तिकारः—वृत्तात् कर्माधिगमादनन्तरं ब्रह्मविविदिषा इति। वक्ष्यति च कर्मब्रह्ममीमांसयोरैकशास्त्रत्वम्—'संहितमेतच्छारीरकं जैमिनीयेन षोडश-लक्षणेनेति शास्त्रैकत्वसिद्धिः' इति। अतः प्रतिपिपादयिषितार्थभेदेन षट्कभेदवद्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अध्यायभेदवच्च पूर्वोत्तरमीमांसयोर्भेदः (श्रीभाष्यम्—१.१.१)। अनेन वाक्य-सन्दर्भेण विज्ञायते यत्—मीमांसाशास्त्रमेकं भागद्वयात्मकं षोडशाध्यायलक्षणम्। भागद्वयञ्च प्रतिपिपादयिषितार्थभेदेन अध्यायभेदादिवत्। तथा च यथैकस्मिन् ग्रन्थे प्रतिपाद्यविषयभेदाद् अध्यायादिभेदो भवति, तथैवेहापि कर्मब्रह्मणोः प्रतिपाद्ययो-र्भेदाज्जैमिनिबादरायणयोः कर्त्रोर्भेदात् स्वर्गमोक्षफलयोर्भेदाद् भिन्नयोरपि तयोरेक-प्रबन्धत्वं न विरुद्धम्। अनेककविकृतरामचरितादिप्रबन्धवत्। वामनजयादित्यविरचित-काशिकाग्रन्थवच्च। एकस्मिन्नपि मीमांसाशास्त्रे जैमिनीये यथा षट्कभेदोऽध्याय-भेदादिश्च न शास्त्रभेदप्रयोजकः। षट्कं नाम षण्णामध्यायानां समूहः। विषयभेदात् प्रायः शास्त्रेषु तथाविधो भेदो दृश्यते। यथा गीतादिशास्त्रेषु प्रथमषट्के द्वितीयषट्के इत्यादिव्यवहारः। तथैव त्रिसूत्रीचतुस्सूत्रीत्यादिभेदव्यवहारेऽपि शास्त्रभेदो न दृश्यते। एवं वेदाख्यैकप्रबन्धविचाररूपत्वाद् उभयोरेकप्रबन्धत्वं तैराचार्यैरङ्गीकृतम्।

अत्रोच्यते—वेदान्तमीमांसाशास्त्रं कर्ममीमांसातः पृथक् शास्त्रम्, अधिकारिविषयप्रयोजनादिभेदाद् न्यायादिशास्त्रवत्। कर्मब्रह्ममीमांसयोर्नैकशास्त्रत्वम्, अधिकारिविषयप्रयोजनादिभेदाद् वा। कर्ममीमांसायाः स्वर्गकामोऽधिकारी, इह तु मुमुक्षुः। न चैकपुरुषे उभयोः शास्त्रयोरधिकारिता सम्भवति। रागी स्वर्गकामः आत्मनः परलोकसम्बन्धित्वमवगम्याधिकारितावच्छेदकब्राह्मणत्वक्षत्रियत्वा-काणत्वाद्यहङ्कारवान् कर्तृत्वभोक्तृत्वाभिमानवान् स्वर्गकामो यजेतेत्यादिशास्त्रेण नियोज्यते। ब्रह्ममीमांसायाञ्च विरक्तः शान्तो दान्त उपरतः कर्मफलेषु अल्पास्थिरत्वादि विजानन् ब्रह्मज्ञानेन स्थिरमहाफलमिति ज्ञात्वा मोक्षार्थी कर्तृत्वभोक्तृत्वाद्यभिमानरहितोऽधिक्रियते। 'शान्तो दान्तः, तद्यथेह कर्मचितो लोकः क्षीयते'—इत्यादिश्रुतेः। तद् यदि एकं शास्त्रं स्याद् एकविध एव, स्वर्गार्थी मोक्षार्थी वा अधिकारी स्यात्। एकत्र उभयोरधिकारितावच्छेदकधर्मयोः रक्तत्वविरक्तत्वयो-रसम्भवात्। न चैक एवाधिकारी फलस्वाम्यभाक् स्वाध्यायोऽध्येतव्य इत्यादिना वेदाध्ययने नियुक्तः कृताक्षरग्रहणापाततोऽर्थग्रहणरूपाध्ययनः स एव धर्माख्यविधिनिषेधात्मकर्मावबोधे अथातो धर्मजिज्ञासेत्यादिशास्त्रेण नियुक्तः, स एव च सम्यग् कर्मावबोधपूर्वकं कृतानुष्ठानः कर्मफलेषु असारतामनुसन्दधानः, अत एव विरक्तो मोक्षकामो ब्रह्मजिज्ञासायां नियुक्त इति वाच्यम्, बहुशो विरोधात्। तथा हि—वेदाध्ययनं ततः कर्मावबोधस्ततः कर्मानुष्ठानं ततो ब्रह्मजिज्ञासेति क्रमोऽभिहितः। तस्मिन् यदि कार्यकारणभावस्तर्हि तत्रोपपद्यते—कर्मावबोधे सत्यपि ब्रह्मजिज्ञासा न दृश्यते, असत्यपि कर्मावबोधे ब्रह्मजिज्ञासा दृश्यते। अतः कार्यकारणभावः कर्मब्रह्ममीमांसयोर्नास्ति। यत्रापि कर्मावबोधादनन्तरं ब्रह्मजिज्ञासा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जायते, तत्र न तदेव हेतुरपि तु कर्मफलस्वर्गादेरनित्यत्वावगम एव। कर्मावबोधे सम्पन्ने ब्रह्मजिज्ञासा कर्तव्या इति, यदि अथातो ब्रह्मजिज्ञासेत्यस्यार्थस्तदा न व्यर्थतैवास्य वाक्यस्य स्यात्, कर्मावबोधस्य जिज्ञासाया अप्रयोजकत्वात्।

किञ्च कर्मावबोधानन्तरं कर्मानुष्ठानं स्यात्। न च शक्यं कर्मानुष्ठातुं तत्त्यक्तुं च सहैव। कर्माण्यनुष्ठाय स्वर्गार्थी स्वर्गफलं प्राप्नुयात्, न च ब्रह्म जिज्ञासेत। अथासक्तभावेन कर्मानुष्ठानं तच्च कर्मानुष्ठानं चित्तशुद्ध्यर्थमननुष्ठानमिव भवति, स्वर्गादिफलासाधकत्वात्। अथ कर्मानुष्ठानं ब्रह्मज्ञानञ्च सहैव समुच्चित्य विधानमुच्यते, तदपि न, तयोरत्यन्तविरोधयोः सहसम्भवाभावात्। कर्मानुष्ठानब्रह्मविद्ययोः सहसमुच्चयस्य भगवत्पादैः सर्वत्र भाष्ये निराकरणात्। तस्मादुभयोः शास्त्रयोर्नैकाधिकारित्वं सिध्यति। अधिकारिभेदात् शास्त्रभेदः। प्रतिपाद्यविषयभेदाच्च नैकशास्त्रत्वमुभययोः कर्ममीमांसायाः विषयो विधिनिषेधात्मकं कर्मैव धर्माधर्माख्यम्। तच्च साध्यं चोदनातन्त्रं पुरुषाधीनं कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं स्वर्गनरकादिसाधकमुत्पाद्यविकार्यसंस्कार्याद्यचतुर्विधभेदभिन्नमनित्यं दृष्टम्। ब्रह्ममीमांसायाश्च विषयः—ब्रह्म शुद्धबुद्धमुक्तस्वभावसच्चिदानन्दानन्तात्मकं सिद्धं नित्यं न चोदनातन्त्रं न वा पुरुषाधीनमुत्पाद्यादिचतुर्विधभेदरहितप्रत्यगभिन्नमिति प्रतिपाद्यविषयभेदेनोभयोरेकशास्त्रत्वम्।

किञ्च प्रयोजनभेदादपि नोभयोरेकशास्त्रत्वम्। कर्ममीमांसायाः प्रयोजनं कर्मज्ञानं तच्च अनुष्ठानापेक्षं स्वर्गादिसाधकम्। ब्रह्ममीमांसायाश्च ब्रह्मज्ञानं प्रयोजनं तच्च नानुष्ठानापेक्षं सर्वक्लेशपरिहाणानन्तानन्दप्राप्तिरूपनिःश्रेयससाधकमिति प्रयोजनभेदान्नोभयोरेकप्रबन्धत्वम्। एवं कर्तृभेदात् पूर्वोत्तरकाण्डनिबन्धनत्वात् कर्मब्रह्ममीमांसाशब्दव्यवहारविषयत्वाच्चानेकहेतुभिर्नैकशास्त्रत्वं सिध्यति। एवं बहुभेदसत्त्वे वेदार्थविचारत्वमात्रहेतुना शास्त्रैकत्वसमर्थनं न युक्तम्। शास्त्रैकत्ववादिनामप्युभयोर्भागयोर्विषयादिभेदेन भेदाङ्गीकाराच्च। एवं बहुविधभेदवैशिष्ट्यसद्भावे निश्चिते भिन्नशास्त्रत्वे एकशास्त्रत्वाङ्गीकारो निष्प्रयोजनः। षोडशाध्यायलक्षणमेकं शास्त्रमित्यादिव्यपदेशमात्रादन्यत् किञ्चित् प्रयोजनं नास्ति। एवञ्चेद् मोक्षप्रतिपादकशास्त्रत्वात् सर्वेषामेव न्यायादिशास्त्राणामेकशास्त्रत्वापत्तिः स्यात्। तथा श्रीरामानुजीयानुमानमधिकारिविषयप्रयोजनाभेदरूपस्योपाधित्वात्। भेदानुमानेन पूर्वोक्तेन सत्प्रतिपक्षिततत्वाच्च एकवेदनिबन्धनव्याकरणज्यौतिषादिशास्त्रेषु व्यभिचाराच्च निरस्तं वेदितव्यम्।

न च अथातो धर्मजिज्ञासेत्यनेन धर्मशब्देन वेदार्थमात्रस्योपलक्षणाद् ब्रह्मजिज्ञासाया अपि तेनैव गतार्थत्वं युक्तमिति वाच्यम्, एवं सति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदार्थमात्रजिज्ञासां प्रतिज्ञाय सिद्धब्रह्मबोधकवाक्यानां मीमांसासूत्राणि अरचयतां परमर्षीणां जैमिनीयानामन्यायत्वापत्तेः। न च ते तत्रभवन्तो प्रारम्भे वेदार्थजिज्ञासां प्रतिज्ञाय ब्रह्मप्रतिपादकवाक्यमीमांसां विस्मरेयुः। अतो ब्रह्ममीमांसा अप्रतिज्ञातैव महर्षिणेत्येव कल्पना ज्यायसी, अन्यथा अथातो वेदार्थजिज्ञासेत्येव सूत्रयेत्। अत एव जैमिनिनोभयोरेकशास्त्रत्वं न विवक्षितम्। न च धर्मशब्देन साधारणी प्रतिज्ञा कृता। धर्मश्च द्विविधः साध्यसिद्धभेदेन। सिद्धेऽपि ब्रह्मणि बहुशो धर्मपदप्रयोगात्। 'अणुरेष धर्मः' महाभारतादौ च—

ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः।
ते वदन्ति महात्मानं कृष्णं धर्मं सनातनम् ।।

इत्यादिरूपेण दृष्टत्वात्। तथा च साध्यधर्मसिद्धधर्मयोरुभयोरपि धर्मशब्देनैव गृहीतत्वाद् उभयप्रतिज्ञाया उपपद्यमानत्वात्। उभयभागस्यैकशास्त्रत्वं न विरुध्यत इति वाच्यम्। धर्मशब्देन चोदनालक्षणार्थस्यैव सूत्रे ग्रहणात्। चोदनालक्षणोऽर्थो धर्म इति स्वयमेव सूत्रकारेण धर्मशब्दार्थस्योक्तत्वात्। न च सिद्धधर्माख्यं ब्रह्म चोदनालक्षणम्, ब्रह्मज्ञानस्य चोदनाजन्यत्वात्। धर्मशब्दस्य च साध्ये यागादिकर्मणि चोदनाप्रतिपाद्ये प्रयोगस्य क्लृप्तत्वात् सिद्धे ब्रह्मणि धर्मशब्दवाच्यत्वाभावादिति।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निम्बार्काचार्यस्य सिद्धान्तसारः

डॉ. आदित्यनाथभट्टाचार्यः
अध्यक्षः, संस्कृतविभागस्य,
वर्धमानविश्वविद्यालये,
पश्चिमवङ्गः

***

आचार्यनिम्बार्कप्रचारितो द्वैताद्वैतवादः प्रथमं सनकसनन्दनसनातनसनत्कुमारैः ब्रह्मणो मानसपुत्रैर्हंसावतारस्य विष्णोः सकाशादधिगतः। स च महर्षिणा नारदेन सनकादेः सकाशाल्लब्धः। अनन्तरं नारदमुखाद् गुरुपरम्परया निम्बार्काचार्यसविधं समागतः। अतो निम्बार्काचार्यसम्प्रदायः 'हंससम्प्रदाय'नाम्ना 'सनकादिसम्प्रदाय'नाम्ना च सुख्यातोऽभवज्जगतीतले।

प्राचि आचार्यनिम्बार्कस्य नियमानन्दाचार्य इति नाम आसीत्। स च लोकोत्तरशक्तिसम्पन्नोऽभवत्। एकदा कश्चित् सन्न्यासी निम्बार्काचार्यस्याश्रमे आतिथ्यं गृहीतवान्। दार्शनिकतत्त्वालोचनया आसन्नप्राये सूर्यस्यास्तागमनकाले स सन्न्यासी निम्बार्कप्रदत्तमाहारं ग्रहीतुं न स्वीचकार। ततश्च निम्बार्कः सूर्यं तथा आदिष्टवान्, येन सन्न्यासिन आहारसमाप्तिं यावत् सूर्य आश्रमस्थनिम्बवृक्षोपरि निश्चलः सन् अवतिष्ठेत। सूर्यश्च अस्ताचलमगत्वा यथादेशं निश्चलमवस्थितः। ततः प्रभृत्ययमाचार्यो देवमनुष्यप्रपूजितः 'निम्बार्क'नाम्ना, 'निम्बार्कादित्य'नाम्ना च प्रथितो बभूव।

भगवत्कल्पोऽयमाचार्यः ऋषिप्रवरेण औडुलोमिना विरचितां वेदान्तदर्शनवृत्तिमवलम्ब्य **वेदान्तपारिजातसौरभमिति** नामकं ब्रह्मसूत्रभाष्यं रचयामास। स तत्र द्वैताद्वैतवादं भेदाभेदवादञ्च सम्यगुपपादितवान्।

ब्रह्म, चित्, अचिच्चेति त्रितत्त्ववादी आसीन्निम्बार्काचार्यः। स खलु नित्यपरिणामवादी। एतन्मते ब्रह्म जगत उपादानकारणं निमित्तकारणञ्च। जगत्पुनर्ब्रह्मणः परिणामभूतं कार्यम्। ब्रह्म खलु स्वकीयां सत्तामुपादानीकृत्य स्वेच्छाञ्च निमित्तीकृत्य दृश्यमानजगद्रूपेण परिणमति। सर्वत्रैवोपादानमोतप्रोतभावेन कार्येणान्वितं भवति। यथा उपादानं मृत्तिका घटकार्येणान्विता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवति, घटश्च मृण्मयो भवति, एवं ब्रह्मसत्ता जगति कार्यप्रपञ्चे अनुप्रविष्टा भवति 'तत् सृष्ट्वा तदेवानुप्राविशदि'ति श्रुतेः। ब्रह्मपरिणामतया च जगद् ब्रह्मसत्तामयं भवति 'सर्वं खल्विदं ब्रह्मे'ति श्रुतेः। अतः कार्यं खलु सर्वत्रोपादानं व्यतिरिच्य नैव साध्यते। उपादानातिरिक्ता सत्ता कार्यस्य नास्तीत्यतः कार्यमुपादानात्मकं स्यात्। एतेन कारणात् कार्यमभिन्नमिति सिद्ध्यति; किन्तु कार्यं नैव कारणाद् एकान्ततोऽभिन्नम्; अपि तु तत्त्वतो बहुधा भिन्नम्। उपादानस्यैकत्वम्, कार्यस्य तु नानात्वमित्युभयोर्भेदः। उपादानेन यादृशं कार्यं निर्वहति, न तथा तत्कार्येण सम्पाद्यते। मृत्तिकया लेपनादिमात्रं भवति, घटेन तु जलानयनादिकार्यं भवति, मृत्तिकया तु न तत् सम्भवति। अतो मृत्तिकाघटादिवद् ब्रह्मप्रपञ्चयोर्भेदाभेद एव सम्बन्ध इति निम्बार्काचार्यमतम्।

अपि च आचार्यनिम्बार्कमते पूर्णदर्शी ब्रह्म सर्वज्ञं सर्वशक्तिमत्। जीवस्तु अपूर्णदर्शी, अल्पविदल्पशक्तिमान्। अतो जीवब्रह्मणोर्भेद एव सिद्धः।

किञ्च जीवः खलु ब्रह्मणोंऽशभूतः। स च मोक्षावस्थायामपि ब्रह्मणोंऽशमात्रतां नातिक्रमति। तथा च श्रुतिः—'अंशो ह्येष परस्य'। 'तत्त्वमसि' इत्यत्र च तस्य त्वमिति विग्रहः। एतेन जीवब्रह्मणोरंशांशिभाव एवोपपद्यते। अंशाशिभावस्थले अंशानां सत्यपि स्वगतभेदे अंशांशिनोरपृथक् सम्बन्धोऽभेदसम्बन्ध एव वा प्रतीयते। एतेन च जीवब्रह्मणोर्भेदाभेदसम्बन्ध एव सिद्ध्यतितराम्, जागरूकश्च द्वैताद्वैतवादः।

अयमत्र विवक्षितोऽर्थः, निम्बार्काचार्यमते ब्रह्मणोंऽशमात्रत्वाज्जगन्नैव मिथ्या। प्रत्यक्षादिप्रमाणसिद्धं जगन्मिथ्या भवितुं नार्हति। ब्रह्मणश्चिच्छक्तेरचिच्छक्तेश्च विक्षेपभूतं सृष्टं जीवजगद् जडजगच्च ब्रह्मस्वरूपमेव। अतः सत्यमेव। एवं ब्रह्म जगच्चेति तत्त्वद्वयमस्ति। तत्र परमं तत्त्वन्तु केवलमखण्डं ब्रह्म। जाग्रत्-स्वप्नसुषुप्तिसमाध्यवस्थासु बद्धो जीवः कर्मफलं सुखं दुःखं वा भुङ्क्ते। ब्रह्म तु साक्षिमात्रमन्तर्यामि भवति। भोगेन सञ्चितकर्मणां क्षयो भवति। जन्मान्तरीय-सञ्चितकर्मणां यावत् क्षयो न स्यात्, तावद् मोक्षोऽपि न स्यात्। अतो मोक्षलाभाय कर्मफलभोग आवश्यकः। तदर्थं शरीरधारणम्, जाग्रत्स्वप्नसुषुप्तिसमाध्यवस्थानां प्रयोजनम्। तस्मान्मोक्षोपयोगितया सशरीरजीवभावस्य मिथ्यात्वं नैव कल्पनीयम्। अनया दृष्ट्या वेदान्ते यथा द्वैतवादः परिगृह्यते, मोक्षसाधनब्रह्मणः परमलक्ष्यतया एकाद्वितीयत्वेन प्रतिपादनाद् अद्वैतवादोऽपि व्यवतिष्ठत इत्यतो द्वैताद्वैतवाद एवात्र दत्तप्रसरो भवति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि च—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्य: पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति'।।

इति मन्त्रेणापि द्वैताद्वैतवाद एव विज्ञाप्यते। तथा हि जीवात्मा परमात्मा च चैतन्याश्रयी सख्यभावापन्न: समानवृक्षाश्रयिपक्षिद्वयवत् प्रतिभाति। तत्रैको विहगो जीवात्मा मिष्टं फलं भुङ्क्ते, अन्यश्च परमात्मा पश्यत्येव केवलं न तु अत्ति। एवमत्र द्वैताद्वैतवाद एव प्रसिद्ध्यति।

अपि च आचार्यनिम्बार्कमते भक्तिरेव मुक्ते: साक्षात्साधनम्। उपासको भक्तो उपास्यभगवतो भिन्न:। तथा भक्तिसाधनायां भक्तो आत्मानं कृत्स्नं जगच्च ब्रह्मरूपेण पश्यन् भगवतोऽभिन्नो भवति। एतावतापि द्वैताद्वैतवादो भेदाभेदवादो वा प्रतिपद्यते।

अथ शङ्केत, जगतो ब्रह्मपरिणामत्वाङ्गीकारे ब्रह्मणो निर्विकारत्वहानिर्नित्यत्वहानिश्च स्यात्। एतेन च सर्वसिद्धो नित्यमोक्षवादो व्याहन्येत। अस्माद्धेतोर्जगद् ब्रह्मणो विवर्त्त एव, न तु परिणाम इत्यद्वैतिभि: स्वीकृतम्। तथा च 'अतत्त्वतोऽन्यथाभावो विवर्त्त:', 'सतत्त्वतोऽन्यथाभाव: परिणाम:, इत्युक्तम्। विवर्त्तनस्थले उपादानस्य नैव स्वरूपहानिर्भवति, परिणामस्थले तु तस्य स्वरूपहानिर्भवतीति विशेष:। यथा रज्जुसर्पादिभ्रमस्थले रज्ज्वादे: सर्पादिरूपेण विवर्त्तनाद् अध्यस्तसर्पादिगतदोषगुणैरधिष्ठानस्य रज्ज्वादेरणुमात्रमपि न सम्बन्ध:, रज्जुस्तु निर्विकारं तिष्ठति। दुग्धदध्यादिस्थलेषु दुग्धादेर्दध्यादिरूपेण परिणमनाद् दुग्धाद्युपादानस्य विकार एव भवति। अतो हि जगतो ब्रह्मपरिणामत्वाभ्युपगमे ब्रह्मणो विकारित्वमनित्यत्वञ्चापद्येते। तस्माज्जगतो ब्रह्मविवर्त्तत्वमेवाभ्युपेयम् इत्यद्वैतिनां मतम्। स्वीकर्त्तव्ये तु विवर्त्तवादपक्षे अध्यस्तस्याधिष्ठानसत्तातिरिक्तसत्ताकत्वाभावाज्जगतो रज्जुसर्पादिवद् मिथ्यात्वमेव, न तु सत्यत्वमिति द्वैताद्वैतिनां सिद्धान्तो दत्तजलाञ्जलि: प्रसज्येत इति, तत्रोच्यते सृष्टे: पूर्वं चिदचित्तत्त्वद्वयं ब्रह्मणि सूक्ष्मशक्तिद्वयरूपेणावतिष्ठते। सृष्टिकाले तु ब्रह्मण: सूक्ष्मचिदचिच्छक्तिद्वयं नामरूपविशिष्टस्थूलजीवजडजगत्प्रपञ्चाकारेण परिणमति। ब्रह्म स्वसत्ताया अंशविशेषमेव जगद्रूपेण परिणमयति। ब्रह्मसत्ता खल्वेकाखण्डरूपा। सा च निर्विकारा। ब्रह्मणो जगत्सृष्टिकार्यमूर्णनाभेस्तन्तुवयनकार्येण तुलयितुमलम्। तथा च श्रुतिर्वर्णयति—

यथोर्णनाभि: सृजते गृह्णते च
तथाक्षरात् सम्भवतीति विश्वम्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तन्तुस्रष्टा ऊर्णनाभो यथा स्वयं तन्तुरूपेण न परिणमति; किन्तु स्वसत्तया तन्तुं रचयति, तेन चोर्णनाभस्य न कश्चिद् विकारः, तथैव जगत्स्रष्टा ब्रह्म स्वयमपरिणतमपि स्वसत्तया जगदुत्पादयति। एतेन स्वीकृतेऽपि परिणामवादे ब्रह्मणो न कोऽपि विकार आपद्यते।

एतदुक्तं भवति—कार्यस्य कारणपरिणामो द्विधा सम्पद्यते—(१) कुत्रचित् कारणम् (उपादानं) कार्यरूपेण परिणतं (परिवर्त्तितं) भवति। यथा मृत्तिका घटरूपेण परिणमति, दुग्धञ्च दधिरूपेण। (२) कुत्रचित् पुनः कारणम् (उपादानं) स्वयमपरिणतम् (अविकृतं) भूत्वा कार्यं घटयति। यथा ऊर्णनाभस्तन्तुरूपेण न परिणतो भवति, तथापि स्वसत्तया तन्तुं सृजति। एवं ब्रह्म अपि जगद्रूपेण नैव परिणमति, तथापि स्वसत्तया जगत् सृजति। अतः कार्योत्पत्तावुपादानकारणस्य कार्यरूपेण परिणतिर्नात्यन्तमुपयुज्यते। कार्योत्पादकशक्तिविशिष्टमेव कारणं परिणतम् (विकृतम्), अपरिणतम् (अविकृतं) वा कार्यमुत्पादयति। तस्मात् कार्योत्पादकशक्तिविशिष्टत्वमेव परिणाम्युपादानकारणत्वस्य प्रयोजकत्वं बोध्यम्। एतेन तावद् द्वैताद्वैतवादिनां नित्यपरिणामवाद उपपद्यतेतराम्। ततश्च ब्रह्मणो नित्यत्वनिर्विकारत्वे यथा सङ्गच्छेते, तथा तस्य नित्यचिदचिच्छक्तिविक्षेपभूतत्वाद् जीवजगतो जडजगतश्च नित्यत्वसत्यत्वे उपपद्येते। अथ शङ्केत, जीवो जगच्च यदि ब्रह्मातिरिक्तं नित्यतत्त्वद्वयं स्यात्, तर्हि ब्रह्म एकमेवाद्वितीयमिति शास्त्रवचनं कथमुपपन्नं भवति? तत्रोच्यते, जीवस्य जगतश्च यद्यपि नित्यत्वम्, तथापि न ब्रह्मव्यतिरिक्तत्वम्। शक्तिरूपेण कार्यरूपेण चोभयोर्ब्रह्माश्रयित्वमेव, न तु ब्रह्मभिन्नद्वितीयत्वम्। अतो यथार्थमाम्नातम् 'एकमेवाद्वितीयमि'ति।

पुनरन्या शङ्का जागर्ति, 'कारणगुणाः कार्यगुणानारभन्ते' इति न्यायेन उपादानकारणेन सह कार्यस्य सालक्षण्यमेव विवक्षितम्। मृत्तिका एव हि घटस्योपादानम्, सालक्षण्यात्। न तु वालुका, वैलक्षण्यात्। परन्तु नित्यशुद्धचेतनब्रह्मणो नित्याशुद्धाचेतनप्रपञ्चेन सालक्षण्यं नास्ति, अतः कथं ब्रह्म जगत उपादानं भवति? अत्रोच्यते—उपादानकार्ययोरेकान्ततः सालक्षण्यं नेष्टम्, किञ्चिद्वैलक्षण्यमप्यादर्त्तव्यम्। अन्यथा चेतनपुरुषात् कथमचेतननखकेशादेरुत्पत्तिः? अचेतनगोमयाच्च कथं चेतनवृश्चिकोत्पत्तिः। रसायनशास्त्रेऽपि दृश्यते, 'आक्सीजेन'-'हाइड्रोजेन'-नामकवायवीयपदार्थद्वयस्य मिश्रणेन जलस्योत्पत्तिः; किन्तु जलगतस्नेहादिगुणा उक्तपदार्थद्वये पृथक्तया न सन्ति। अपि च बीजाद् वृक्षस्योत्पत्तिर्भवति। वृक्षो मूलकाण्डशाखापत्रपुष्पफलविशिष्टः; किन्तु तादृशधर्मसालक्षण्यं बीजे नास्ति। एवं दुग्धस्य तरलत्वानम्लत्वधर्मास्तत्कार्यभूते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दध्नि न सन्ति, दध्नि घनत्वाम्लत्वधर्माः सन्ति। तैलस्य तरलत्वम्, सर्षपस्य तु कठिनत्वम्। अतो वैलक्षण्यसत्त्वेऽपि सर्षपादीनां तैलादेरुपादानत्वं यथा सम्भवति, एवं वैलक्षण्येऽपि ब्रह्मणो जगदुपादानत्वं कथं न सिद्ध्येत्?

अत एव कार्येण सह परिणाम्युपादानस्य न समस्वभावत्वमिष्टम्। अन्यथा कार्यकारणव्यपदेशभेदोऽपि लुप्येत; किन्तु सर्वत्रोपादानोपादेयभावस्थले किञ्चिद्वैलक्षण्येऽपि किञ्चित् सालक्षण्यमप्यनुसन्धेयम्। जगदस्ति, भाति, प्रियमिति लोकव्यवहाराज्जगतो यत् सच्चिदानन्दमयत्वं तदेव ब्रह्मसालक्षण्यम्। जगतो नामरूपव्याकृतानित्यत्वादिकं तु ब्रह्मवैलक्षण्यम्। एवं सर्वत्रानुसन्धेयम्। अतः कार्यकारणयोः सर्वत्र भेदाभेदसम्बन्ध एव स्वीकर्त्तव्यः। एतेन द्वैताद्वैतवाद एव प्रतितिष्ठतितराम्। तदुक्तं निम्बार्काचार्येण—

'नानाव्यपदेशाद् भेदव्यपदेशात्। अन्यथा च। अभेदव्यपदेशाच्च। इत्युभयविधवाक्यानां तुल्यबलत्वाज्जीवपरमात्मनोः स्वाभाविकौ भेदाभेदौ भवतः'।

भक्तिवादी दार्शनिकप्रवरो निम्बार्काचार्यः। भगवति श्रीकृष्णे अव्यभिचारिणीं भक्तिमादधत एव मृत्योरतिक्रमो भवतीति वल्लभाचार्यभास्कराचार्यादिवद् वैष्णववैदान्तिकस्य निम्बार्काचार्यस्य मतमवश्यमवगन्तव्यम्। तच्च सुष्ठ्वभिहितं भगवता जगद्धिताय श्रीमद्भागवते। भगवद्भक्तिरेव प्रेमलक्षणा भागवतोक्तः परमो धर्मः। दुःखमय-भवबन्धनजरामरणजर्जरिता जीवाः। दुःखार्णवनिपतितानामेषां समुत्तरणाय यद्यप्याचार्यवर्य्यैर्बहवः पन्थानो निगदिताः, यथा— कर्मयोगभक्तिज्ञानादीनां मार्गास्तथापि भक्तिरेव सहजतमतया सर्वतः प्रकृष्टो मार्ग इति विवेचनीयः। कलावन्नगतप्राणैर्जीवैः श्रीमद्भगवद्गीतोक्ताः कर्मयोगा-हिंसाद्यष्टाङ्गयोगज्ञानयोगाश्चातीव दुरूहतया न कथमप्यवलम्बितुं शक्यन्ते; किन्त्वापेक्षिकसुगमतया भक्तियोग एव सर्वैर्मुमुक्षुभिर्वरणीय इति निर्विवादमुच्यते।

अत्र वक्तव्यम्, निष्कामकर्मसाधना, यमनियमाद्यष्टाङ्गयोगोपासना, निर्गुणब्रह्मभावना, परमेश्वरभजना च त्रितापदग्धभवबन्धननाशस्य हेतुतया मोक्षसाधनानि स्युः। अतश्चत्वार एव निवृत्तिमार्गाः शास्त्रकृद्भिः प्रेक्षावद्भिः परिगृहीताः। अधिकारानुसारमेत एव मार्गाः स्थिरीकृताः। तत्तदधिकारिणां कृते हि सर्वे मार्गा उपयुज्यन्ते। वस्तुतस्तु चत्वारो मार्गा अन्योन्यसापेक्षा अन्योन्यपरिपूरकाश्च, न तु ते मिथो विरुद्धाः। अनन्यां भक्तिमन्तरेण न निष्कामकर्मसाधना सफलीभवति, न च तां विना यमनियमाद्यष्टाङ्गयोगोपासना तथा निर्गुणब्रह्मविचारणा च सम्भाव्येते। अतः सर्वत्रोपयोगिनी भक्तिः। भक्तिरेव हि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुक्तये परमा गतिः। तथैव निष्कामकर्मसाधनां विना, अष्टाङ्गोपासनञ्च विना भगवति शुद्धा भक्तिर्न सम्भवेत्, तथा ज्ञानस्य पराकाष्ठापि च न लभ्यते। एवं तत्त्वज्ञानमप्यन्तरेण कर्मयोगः, अष्टाङ्गयोगः, भक्तियोगश्च कथमपि नैव सम्पद्येरन्। अतः सर्वे मार्गा एकार्थोपयोगितया मोक्षपरा भवन्तीत्यत्र नास्ति संशयलेशोऽपि। एषु कश्चिदुत्कृष्टः कश्चिच्च निकृष्ट इति न कदापि विभावनीयः। यद्यप्याचार्यैः स्वस्वभाष्येषु चतुर्षु एकस्यैव प्राधान्यं प्रकटीकृतम्, तथापि तत्तदधिकारिविशेषाणां कृते सा सा व्यवस्था वेदनीया। नास्ति वस्तुतो आचार्याणां मध्ये कोऽपि विरोधः, सत्यपि स्थूलमतीनां तत्र विरोधाभासे यथोक्तदिशा सूक्ष्मदृष्टिभिः समन्वयः कर्त्तव्य इति तत्त्वविदां परामर्शः। न केवलं मुक्तये, भुक्तये च भक्तेरनन्योपयोगोऽस्ति। शरणागतस्य भक्तस्येश्वरानुग्रहादेव दुर्गतिनाशाद्यसाध्यसाधनं भवति, तथा तत्कृपयैव धनसम्पदादिलौकिकाभ्युदयलाभः, तद्रक्षणसमृद्धिरपि च भवति। तदुक्तं भगवता गीतायाम्—

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।।८।२२।।

सम्प्रति हिंसाद्वेषविच्छिन्नताऽसंहतिप्रपीडिते समाजे सर्वेष्वेव मैत्रीसंहतिस्थापनाय भक्तिवादिनां निम्बार्काचार्यप्रमुखाणां वैष्णववैदान्तिकदार्शनिकानां द्वैताद्वैतसिद्धान्तालोचनस्य महत्युपयोगिता विद्यते। आध्यात्मिकीं भक्तिसाधनां विना दृढमूलविच्छिन्नतायाः समूलमुत्पाटनं न सम्भवति। तथा हि साम्प्रतिकविच्छिन्नताया दूरीकरणाय अस्माभिर्व्यक्तिसत्ताया विश्वसत्तायामुन्नयनं कर्त्तव्यम्। अतो हि भागवते उत्तमभक्तस्य स्वरूपनिरूपणावसरे यथायथमुक्तम्—

सर्वभूतेषु यः पश्येद् भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः।।

सर्वजीवेषु स्वाभिन्नत्वद्रष्टुरेव मित्रामित्रेषु सर्वत्र समदर्शिन एव वा भागवतोत्तमभक्तत्वं निरूपितमत्र भगवता व्यासदेवेन। तदेवं भक्तिमार्गावलम्बनेनैव व्यक्तिसत्ताया विश्वसत्तायां समुन्नयनं भवतु, भवतु च विश्वप्रेम, विश्वशान्तिश्च।

अपि च सर्वेषु जीवेषु भगवत ईश्वरस्य नित्यमधिष्ठानम्। अतः 'मा हिंस्यात् सर्वा भूतानि' इति श्रुतेः प्राणिहिंसा न कर्त्तव्या; किन्तु सर्वेष्वेव प्राणिषु निःस्वार्था प्रेमानुरक्तिरेवाधेया। स्त्रीपुत्रकन्यादिजीवसेवा आसक्तिफलाकाङ्क्षाशून्या सती ईश्वरसेवायां घनीभूतप्रेमलक्षणभक्तिरूपायां पर्यवसिता भवतु। अनया भक्तिभावनया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विनश्यति स्वार्थबुद्धिः, जागर्त्ति च पुनः परार्थबुद्धिः। एवं स्वपरभेदभावना खलु सर्वथा दूरीभवति। तथा चोक्तम्—

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानान्तु वसुधैव कुटुम्बकम्।।

'सर्वे प्राणिनोऽमृतस्यैव सन्तानाः'। 'शृण्वन्तु विश्वे अमृतस्य पुत्राः', इति श्रुतीः। अतः सर्वेषां मध्ये मिथः सौभ्रातृत्वमेव सम्पर्कः। सर्वेषु समदर्शिताबुद्धेः प्रतिपादकानि अजस्राणि निदर्शनानि विलसन्ति गीताभागवतोपनिषदादिषु। अत्र खलु प्रकृतसाम्यवाद एव प्रसरति। नास्त्यत्र सन्त्रासवादस्य विच्छिन्नतावादस्य मौलसाम्प्रदायिकतावादस्य च कोऽप्यवकाशः। अतो विश्वजनीनसार्वभौम-भागवतभक्तिधर्म एव परमो धर्मः। भक्तिं विना प्रकृतं ज्ञानमपि न सम्भवति। अनन्या भक्तिरेव हि भगवद्दर्शनरूपज्ञानं तद्रूपताप्राप्तिञ्च साधयति। अतस्तत्त्वज्ञानावसाना भक्तिस्तत्सायुज्यापत्तिरूपा वेति मन्यते बुधैः। तथा चोवाच भगवान् गीतायाम्—

भक्त्या त्वनन्यया शक्यः अहमेवंविधोऽर्जुन।
ज्ञातुं द्रष्टुञ्च तत्त्वेन प्रवेष्टुञ्च परन्तप।।

अतः सर्वोत्कृष्टसाधनैव भक्तिसाधना। अनया साधनया यथा यथोक्तदिशा समाजकल्याणादिसार्वजनीनजागतिकोऽभ्युदयो भवति, तथा सकलप्रेक्षावदाराध्य-निःश्रेयसरूपपारमार्थिकसुखञ्च भवति। भक्तिरेव हि मुक्तेः साक्षात् साधनमिति भूयोभूय उपदिष्टं स्वयमेव भगवता गीतायाम्—

तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात्।
भवामि न चिरात् पार्थ मय्यावेशितचेतसाम्।।

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।।

श्रवणादिभिर्भगवद्धर्मैर्द्रवीभूतस्य चित्तस्य तैलधारावन्निरवच्छिन्ना भगवदाकारा वृत्तिरेव भक्तिरिति कथ्यते। भक्तिरसायनेऽप्युच्यते महामतिना मधुसूदन-सरस्वतीपादेन—

द्रुतस्य भगवद्धर्माद् धारावाहिकतां गता।
सर्वेशे मनसो वृत्तिर्भक्तिरित्यभिधीयते।।

130222

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रेमाभक्तेः साधनभूते श्रवणादिनवधाभक्तिविषये प्रकथितं श्रीमद्भागवते—

श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।।

त्रिविधा भक्तिरस्ति। आद्या साधनभक्तिर्वैधीभक्तिः, रागभक्तिर्वा। द्वितीया सिद्धभक्तिः, पराभक्तिर्वा। तृतीया चात्यन्तिकीभक्तिः, विशुद्धाभक्तिर्वा।

श्रवणकीर्त्तनादिवैधभक्त्या भगवत्यनुरागो जायते। प्रेमाभक्तेः साधनतया इयं खलु साधनभक्तिरित्युच्यते। प्रेमाभक्तेरेकादशभूमयश्च भागवते भक्तिरसायने च यथा सुष्ठु प्रतिपादिताः, तदनुसारं सारसङ्क्षेपतः किञ्चिदत्र विवक्षुरस्मि।

अत्र भक्तेः प्रथमा भूमिर्भक्तभगवन्महापुरुषयोः सेवा। द्वितीया भूमिः खलु एतादृशमहापुरुषयोः कृपालाभः। तृतीया भूमिः श्रवणकीर्त्तनादिभगवद्धर्मे स्पृहा। चतुर्थी भूमिः श्रवणादिना भगवत्यनुरागः प्रेमलक्षणः। पञ्चमी भूमिः पुनः पुनः प्रेमाभ्यासेन विगलितचित्ते भगवत्तत्त्वानुभवः। इयमेव तु रत्यङ्कुराख्या प्रेमलक्षणा भक्तिः। षष्ठी भूमिस्तावज्जीवस्य निश्चयात्मकः स्वस्वरूपापरोक्षानुभवः। सप्तमी भूमिश्च अनात्मवस्तुनि समुपजाते वैराग्ये परमेश्वरे तीव्रभक्तिप्रवाहः।

एतावत्पर्यन्ता भक्तेः साधनभूमयः प्रकटीकृताः। अष्टमादिभूमयस्तु सिद्धा भूमयः। एताः पूर्वतः प्रकृष्टाः, अतः परा इत्युच्यन्ते। अपृथक्प्रयत्नसिद्धा एता भूमयः।

अष्टम्यां भूमौ प्रयत्नव्यतिरेकेणापि भक्तेः क्रमपरिपाकवशाद् अनुक्षणमतितीव्रभक्तिप्रवाहश्चलति। प्रह्लादवत्तस्य भगवद्दर्शनं भवति। नवम्यां भूमौ भगवद्दर्शनजन्या महाप्रभुभगवच्चैतन्यदेवादिवत् तन्मयताप्राप्तिर्भवति। सदा भगवद्भावभावितं चित्तं भवति। दशम्यां भूमौ भगवतोऽणिमाद्यैश्वर्याणामाविर्भावः। भक्तेरेकादश्यां भूमौ प्राणपरित्यागात् पूर्वपर्यन्तं भगवद्विरहासहिष्णुतारूपप्रेम्णः पराकाष्ठा।

अथ साधनभक्तेस्तथा सिद्धभक्तेरपि चाधिकोच्चकोटिका परमोत्कृष्टा स्वाभाविकी शुद्धा 'आत्यन्तिकी' भक्तिरस्ति। अभिहितञ्च श्रीमद्भागवते—

अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे।
सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमच्युत।।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः।
स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः।। (३.१९.१२-१३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भागवतोक्तदिशा लक्षित: परमभक्त: सर्वकामविनिर्मुक्त एव भवति। सालोक्य-सार्ष्टि-सामीप्य-सारूप्यरूपमुक्तिकामनापि तस्य चित्ते न भवति। केवला भगवति नि:स्वार्था शुद्धा भक्तिरेवास्ति।

इदन्त्ववधेयम्, भक्तिसाधनायां विषयवैतृष्ण्यमेकान्तत एवापेक्ष्यते। नात्र कर्मकाण्डीयवेदोक्तप्रवृत्तिलक्षणभोगधर्मस्यावसर:। केवलं भगवत्प्रीत्यर्थमीश्वरे सर्वकर्मसमर्पणरूप: शुद्धसात्त्विकनिष्कामनिवृत्तिलक्षणभक्तिधर्म:। तत्त्वदृष्ट्या 'ग्रामकामो यजेत', 'पुत्रकामो यजेत', 'स्वर्गकामो यजेत' इत्यादिवाक्यानां नैव सकामकर्मप्रतिपादने तात्पर्यम्; किन्तु शास्त्रेषु रुचिसम्पादनार्थमेव तेषां तथोपदेशद्वारा निष्कामकर्मसाधनायामेव परमं तात्पर्यमङ्गीकर्त्तव्यमित्येव भगवतो वेदव्यासस्य वक्तव्यमवितथमेवाभिव्यक्तं भागवते—'रोचनार्था फलश्रुति:' इति। धनैश्वर्यादिभोगातिशय्यमीश्वराभिमुखितां व्युदस्ति, इत्यतोऽपरिहार्यग्रासाच्छनादि-प्रयोजनातिरिक्तस्य भोग्यविषयस्य लोभ: शास्त्रे भूयो भूय एव निन्दित:। विषयवैराग्यं विना परमा शान्तिर्न लभ्यते। तथा च श्रुतिस्मृतय:—

'तेन त्यक्तेन भुञ्जीथा मा गृध: कस्यस्विद् धनम्'।
'येनाहं नामृता: स्याम् किमहं तेन कुर्याम्'।
'न कर्मणा न प्रजया धनेन त्यागेनैक अमृतत्वमानशु:'।
'त्यागाच्छान्तिरनन्तरम्'।

समाजबद्धो जीव:। समाजस्य ऋणस्य परिशोधनाय प्रयोजनस्याधिकमर्थं दरिद्रेभ्य: प्रयच्छेत्, अन्यथा स धनापहर्त्ता 'चौर' इत्यतो निन्दनीय: स्यात्। तस्माद् बलवती विषयस्पृहा वर्जनीया इत्यत उक्तं भागवते—

यावद् भ्रियेत जठरं तावत् सत्त्वं हि देहिनाम्।
अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति।।

तदेवमैकान्तिकी भक्तिसाधना खलु विषयाच्चित्तं विमुखीकृत्य तत्र च ईश्वरोन्मुखितां सम्पाद्य परां शान्तिं जनयति, अमृतत्वञ्च ध्रुवं प्रापयति।

किं बहुना, ईश्वरे तत्त्वोपदेशके गुरौ च यस्य चित्ते परा भक्तिर्विराजते, ब्रह्मविद्याविषयिणी आध्यात्मिकी तत्त्वकथा तस्यैव कृते उपदिश्यते। तत: स्वयमाह श्वेताश्वतरोपनिषत्—

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्था: प्रकाशन्ते महात्मन:।। (६.२३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बलात्करणेन बहुशतोपदेशदानेन वा तत्त्वविद्यालाभो न भवति, न च हृदये भक्तिभावः समुदेति, न वा सन्न्यासः सम्पद्यते; किन्तु यस्य तावन्मुमुक्षोः प्रत्यक्प्रवणताबुद्धिः, चेतसि भगवन्मुखिता च विद्येते, तस्यैव खलु सन्न्यास-तत्त्वबोधभक्तिभावाः स्वतः स्फूर्त्ततया विराजन्ते। ईश्वरानुग्रहं विना तत् किमपि न सिध्यति। ईश्वरानुग्रहलाभाय च भक्तिरेव कक्षीकरणीया। तथा चाम्नातं कठोपनिषदि—

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वाम्।।

अपि च 'ईश्वरानुग्रहादेव पुंसामद्वैतवासना'। एतावता सर्वेष्वेवाचार्याणां सिद्धान्तेषु भक्तिवाद एव तिलेषु तैलवत् सुप्रतिष्ठित एवेति सर्वमनवद्यमिति।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वमीमांसादर्शने प्रमाणमीमांसा

डॉ. कपिलदेवपाण्डेयः
वाराणसीस्थः

❋❋❋

धर्मः खलु पूर्वमीमांसादर्शनस्य मुख्यतया मीमांस्यो विषयः। यथोक्तं जैमिनिना द्वादशलक्षण्यां प्रथमं सूत्रम् 'अथातो धर्मजिज्ञासा' इति। ततश्च 'चोदनालक्षणोऽर्थो धर्मः' इति द्वितीयेन सूत्रेण धर्मस्य ज्ञानं चोदनानिमित्तकमिति प्रतिपादितम्। तद् युक्तिभिः साधयितुं 'तस्य निमित्तपरीष्टिः' इति सूत्रं प्रवर्तते। धर्मस्य ज्ञानं प्रत्यक्षादिप्रमाणैर्न शक्यम्, केवलं 'वेद' एव तत्र प्रमाणमित्युद्दिश्य अन्यानि प्रमाणानि शास्त्रकारैः परीक्षितानि। अस्मिन्नेव प्रसङ्गे पूर्वमीमांसाशास्त्रे प्रमाणविचारः प्रवर्तते।

दर्शनेषु प्रमाणप्रमेययोः परस्पराश्रितः सम्बन्धः। प्रमेयानां सिद्धिः प्रमाणाश्रिता, 'प्रमेयसिद्धिः प्रमाणाद्धि' इति न्यायात्। प्रमाणसिद्धान्येव प्रमेयान्यभ्युपेयानि। प्रमेयानुसारमेव प्रतिदर्शनं प्रमाणान्यभिमतानि। यथा चार्वाकमते न कोऽप्येवं प्रमेयभूतः पदार्थो यत्संसिद्ध्यै प्रत्यक्षेतराणां प्रमाणानामावश्यकता अपेक्षा वा अनुभूयेत। अतः प्रत्यक्षमेव एकमात्रं प्रमाणं चार्वाकमतेऽभिमतम्। इयमेव स्थितिः सर्वेषां दर्शनानाम्। यथोक्तं मानमेयोदये—

चार्वाकास्तावदेकं द्वितयमपि पुनर्बौद्धवैशेषिकौ द्वौ
भासर्वज्ञश्च सांख्यस्त्रितयमुदयनाद्याश्चतुष्कं वदन्ति।
प्राहुः प्राभाकराः पञ्चकमपि च वयं तेऽपि वेदान्तविज्ञाः
षट्कं पौराणिकास्त्वष्टकमभिदधिरे सम्भवैतिह्ययोगात्।।

यथा नैयायिकमते 'प्रमाकरणं प्रमाणम्', तथा मीमांसका अपि प्रमाकरणमेव प्रमाणं मन्यन्ते। 'यथार्थानुभवः प्रमा' इत्यत्राप्युभयोः साम्यम्; किन्तु 'अज्ञाततत्त्वार्थज्ञानं प्रमा' इति मन्वानैर्मीमांसकैरज्ञातपदेन स्मृतिसंशयादिभिः सह अनुवादोऽपि निरस्यते। यतो हि अनुवादोऽर्थनिर्णये व्यवहारे वा पूर्वज्ञानापेक्षया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किमपि वैशिष्ट्यं न भजते। अतस्तस्य स्वीकारो निष्फलः। 'अयं घटः', 'अयं घटः' इति धारावाहिकज्ञानेषु द्वितीयादीनां ज्ञानानामप्रमात्वं न शङ्क्यम्, कालांशभेदात्। उत्तरे क्षणे घटसद्भावः पूर्वक्षणज्ञानेन अनधिगत एव। तथा चोक्तं मानमेयोदये—'अज्ञाततत्त्वार्थज्ञानं प्रमा' इति। अयथार्थज्ञानस्याभावात् प्रभाकरमतानुयायिनो मीमांसका अत्र 'तत्त्व'पदस्य प्रयोगं निरर्थकं मन्यन्ते। प्रभाकरमतानुसारेण अनुभूतीनां प्रामाण्यम्, स्मृतीनाञ्च अप्रामाण्यम्। यथा चोक्तं प्रकरणपञ्चिकायाम्—

> प्रमाणमनुभूतिः सा स्मृतिरन्या न सा स्मृतिः।
> न प्रमाणं स्मृतिः पूर्वप्रतिपत्तिव्यपेक्षणात्।।

भाट्टमतेन त्वन्यथाग्रहणरूपभ्रमादिज्ञाननिरासार्थं तत्त्वपदम्। अतोऽज्ञाततत्त्वादवगमरूपायाः प्रमायाः करणं प्रमाणम्। 'प्रमाण'शब्दः द्विधा व्युत्पाद्यते—'प्रमीयते ज्ञायते अनेन' इति, 'प्रमीयते यत्' इति च। द्वितीयव्युत्पत्त्या—'अविसंवादिविज्ञानं प्रमाणम्'। अविसंवादित्वं 'क्रियाकारित्वम्' इति बौद्धानां मतम्। भूतभविष्यद्विषयस्यानुमानस्य अर्थक्रियाकारित्वाभावादप्रामाण्यं प्रसज्येत, स्मृतेश्च क्वचिदर्थक्रियाकारित्वात् प्रामाण्यं जायेत। भाट्टमतानुसारेण तु यस्मिन् ज्ञानेऽज्ञाततत्त्वस्यानुभवो भवेत्, अन्यज्ञानेन बाधा न स्यात्, दोषराहित्यं च स्यात्, तदेव प्रमाणम्। यथोक्तं शास्त्रदीपिकायाम्—

> 'कारणदोषबाधकज्ञानरहितमगृहीतग्राहिज्ञानं प्रमाणम्'।

प्रथमव्युत्पत्त्या तु—'अज्ञाततत्त्वार्थज्ञानसाधनमेव प्रमाणम्'। प्रत्यक्षम्, अनुमानम्, शाब्दः, उपमानम्, अर्थापत्तिः, अनुपलब्धिः (अभावो वा) इति षट् प्रमाणानि भाट्टमतेन। प्राभाकरास्त्वभावं प्रमाणत्वेन न स्वीकुर्वन्ति। अतस्तेषां मतेन पञ्चैव प्रमाणानि।

प्रत्यक्षम्

सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम्। अत्र शाबरभाष्यम्—'सतीन्द्रियार्थसम्बन्धे या पुरुषस्य बुद्धिर्जायते तत्प्रत्यक्षम्'। तथा चेन्द्रियाणामर्थेन सह सम्बन्धे विद्यमाने सति यज्ज्ञानमुत्पद्यते तत्प्रत्यक्षम्। भविष्यद् भूतो वार्थो न ज्ञानकालेऽस्ति, अतः सत एव एतदुपलम्भनं नासतः। अतः प्रत्यक्षं प्रमाणं धर्मे न निमित्तम्। विद्यमानेन घटेन सह चक्षुःसंयोगे सत्येव घटज्ञानं भवति। तदेव प्रत्यक्षम्। शुक्तौ यद् रजतज्ञानं भवति, तत्र शुक्तेरविद्यमानत्वाद् इन्द्रियसंयोगाभावः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतस्तज्ज्ञानं न प्रत्यक्षम्, अपि तु भ्रमः। चक्षुः, रसनम्, घ्राणम्, स्पर्शनम्, श्रोत्रम्, मनश्चेति षडिन्द्रियाणि। तैजसं चक्षू रूपज्ञाने निमित्तम्, रसनं रसज्ञाने, घ्राणं गन्धज्ञाने, त्वगिन्द्रियं स्पर्शनं स्पर्शज्ञाने, शब्दज्ञाने श्रोत्रम्। चक्षुः तैजसम्, रसनं जलीयम्, घ्राणं पार्थिवम्, स्पर्शनं वायवीयम्। अत्र चतुर्षु भूतात्मकत्वं दृश्यते, अतोऽवशिष्टेन श्रोत्रेन्द्रियेण भूतात्मकेनैव भाव्यम्। नैयायिकास्तु शब्दस्य आकाशगुणत्वं साधयन्ति, तन्नोचितम्, शब्दस्य गुणत्वासिद्धेः।

मनस्तु सुखाद्युपलब्धिसाधनमिन्द्रियम्। विभुत्वे सत्यपि शरीरावच्छिन्नस्यैव मनसः प्रवृत्तिः। रूपादिज्ञानेषु चक्षुरादीनामपि परतन्त्रा प्रवृत्तिः। चक्षुःश्रोत्रयोरपि त्वगादिवत् प्राप्यकारित्वमभ्युपगन्तव्यम्, तयोर्बहिरिन्द्रियत्वात्। चक्षुरादीनि इन्द्रियाणि न प्रत्यक्षग्राह्याणि, अनुद्भूतरूपस्पर्शवत्त्वात्।

न्यायवैशेषिकमते षोढा इन्द्रियार्थसन्निकर्षः—संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्च। परन्तु भाट्टमतानुसारेण तु सन्निकर्षो द्विविधः—संयोगः, संयुक्ततादात्म्यं च। पृथिवी-जल-तेजसां चक्षुस्त्वगिन्द्रियाभ्यां संयोगाद् ग्रहणं भवति। वायोः त्वक्संयोगात्, शब्दस्य श्रोत्रसंयोगात्, आत्मनो मनःसंयोगाच्च। कालस्य सर्वैरपीन्द्रियैः संयोगाद् ग्रहणम्। चक्षुरादिसंयुक्तेषु पृथिव्यादिषु तदात्मभूतानां जातिगुणकर्मणां ग्रहणं संयुक्ततादात्म्य-सन्निकर्षात्। जातिगुणकर्मगतानां सत्तारूपत्वकर्मत्वादीनां ग्रहणे परम्परया तादात्म्यसम्भवात् संयुक्ततादात्म्यसन्निकर्षादेव। यथा नैयायिका रूपत्वादिग्रहणाय संयुक्तसमवेतसमवायमाश्रयन्ते, तथा भाट्टा अपि संयुक्ततादात्म्यतादात्म्यं नाम तृतीयं सन्निकर्षमाश्रयेयुरिति भाट्टमते द्वेधा त्रेधा वा सन्निकर्षः। शब्दस्य श्रोत्रगुणत्वाभावात् समवायसन्निकर्षः समवेतसमवायसन्निकर्षश्च निरवकाशः। प्रभाकरमतानुसारेण तु संयोगः, संयुक्तसमवायः, समवाय इति त्रेधा सन्निकर्षः। रूपत्वादीनामभावात् संयुक्तसमवेतसमवायो नाश्रयणीयः, शब्दत्वस्याभावात् समवेतसमवायोऽपि न। अभावस्याभावाद् विशेषणविशेष्यभावोऽपि नाश्रयणीयः।

जैमिनिकृते प्रत्यक्षलक्षणे अव्यापकत्वदोषमाक्षिप्य प्रभाकरस्तदलक्षणं मत्वा न स्वीचकार। प्रभाकरमतानुसारेण तु 'साक्षात्प्रतीतिः प्रत्यक्षम्'। प्रत्यक्षज्ञाने मेय-मातृ-प्रमाः' इति त्रितयमपि भवति। 'घटमहं जानामि' इत्यत्र 'घटः' 'अहम्' 'ज्ञानम्' इति त्रयाणां युगपद् भानं भवति। इदमेव त्रिपुटीप्रत्यक्षमुच्यते। 'प्रमा' स्वयंप्रकाशस्वरूपाऽस्ति। तस्याः प्रतीतिः स्वयं भवति। अत एव सुषुप्तौ मेयमात्रोः प्रकाशो न भवति, स्वयंप्रकाशाभावात् तयोः। इन्द्रियार्थयोः साक्षात्सम्बन्धेन प्रत्यक्षज्ञानं भवति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाट्टप्राभाकरयोरुभयोर्मतेन प्रत्यक्षज्ञानं द्विविधं भवति—निर्विकल्पकं सविकल्पकञ्चेति। तत्र इन्द्रियार्थसन्निकर्षानन्तरमेव द्रव्यादिस्वरूपमात्रावगाहि-शब्दानुगमशून्यं यत्सम्मुग्धज्ञानं जायते तद् विशिष्टकल्पनाभावान्निर्विकल्पकमुच्यते। यत्तु निर्विकल्पकज्ञानानन्तरं शब्दस्मरणसहकृतं जात्यादिविशिष्टवस्तुविषयं रक्तोऽयं घटोऽयमित्यादि-व्यक्तं ज्ञानं तत्सविकल्पकम्। शाब्दिकानां मते निर्विकल्पकं ज्ञानं न भवति। तेषां मतेन—'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमाद् ऋते'। मीमांसकमते तन्नोचितं पूर्वमर्थदर्शनाभावे शब्दस्मरणस्य हेत्वभावप्रसङ्गात्। बौद्धास्तु निर्विकल्पकमेव प्रत्यक्षं स्वीकृत्य सविकल्पकस्य प्रत्यक्षप्रमाणत्वं निषेधन्ति। तदपि नोचितम्, तस्य प्रत्यक्षरूपेण लोकसिद्धस्य निषेधे लोकविरोधात्। सविकल्पकानन्तरमेव प्रत्यक्षीकृते वस्तुन्यर्थक्रियाकारित्वं सम्भवति। प्रत्यक्षस्या-र्थक्रियाकारित्वरूपं लक्षणं नापलपितुं शक्यते। बौद्धमतानुसारेण सविकल्पकस्य प्रत्यक्षत्वं न स्वीकर्तुं शक्यते, तत्रानधिगतार्थत्वाभावाद् अक्षजत्वाभावाच्च। निर्विकल्पकेन स्वरूपमात्रस्य ग्रहणं कार्यते। तदेव बौद्धनये 'स्वलक्षणम्' इत्युच्यते—'भावानामन्यासाधारणमात्मीयं यत्स्वरूपं तत्स्वलक्षणम्' इति प्रसन्नपदायां चन्द्र-कीर्तिः। सविकल्पकं प्रत्यक्षं निषेधं कुर्वन् बौद्धाचार्यो निर्विकल्पकं विविनक्ति—

'कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम्'।

सविकल्पकेन प्रत्यक्षेण द्रव्य-जाति-गुण-कर्म-नामभिः पञ्चधा विकल्पो भवति। यथा—वेणुमानय, गोपोऽयम्, श्यामोयम्, गायत्ययम्, गोविन्दोऽयमिति च। प्रत्यभिज्ञाप्रत्यक्षमपि षष्ठो विकल्प इति केचित्, तन्न, नामकल्पनायां तस्या-न्तर्भावात्। प्रत्यक्षज्ञानेषु विवक्षाभेदेनेन्द्रियस्य तत्सन्निकर्षस्य ज्ञानस्य वा करणत्वं भवति। अतः सिद्धम्—इन्द्रियसन्निकर्षजं ज्ञानं प्रत्यक्षमिति।

योगिज्ञाने ईश्वरज्ञाने चाभिमतावलौकिकसन्निकर्षौ मीमांसकैरालोचितौ खण्डितौ च प्रत्यक्षस्य विद्यमानोपलम्भनियमात्। सामान्यलक्षण-ज्ञानलक्षण-योगजसन्निकर्षेषु विषयस्य परोक्षत्वाच्च। एवंप्रकारेण प्रतिपादितं प्रत्यक्षप्रमाणमनिमित्तं धर्मेऽधर्मे च, तत्रेन्द्रियैः सह सत्सम्प्रयोगाभावात्। प्रत्यक्षपूर्वकत्वाद् अनुमानोप-मानार्थापत्तीनामप्यकारणत्वम्।

अनुमानम्

मानमेयोदयानुसारेण व्याप्यदर्शनाद् असन्निकृष्टार्थज्ञानमनुमानम्। यथा वर्तते धूमवत्त्वदर्शनाद् अग्निमत्त्वज्ञानम्। व्याप्यत्वं चात्र अल्पदेशवृत्तित्वम्। अधिकदेशवृत्तित्वं व्यापकत्वम्। धूमो व्याप्यः, वह्निश्च व्यापकः। धूमो वह्नेरन्यत्र न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्तते, वह्निश्च धूमादन्यत्र वर्तते, यथा तप्तायोगोलके। अतोऽग्निधूमयोर्व्याप्तिः। इयं विषमव्याप्तिरित्युच्यते। क्वचित् समव्याप्तिरपि भवति यथा कृतकत्वानित्ययोः। स्वाभाविकोऽव्यभिचरितसम्बन्धो व्याप्तिः। अत्रोपाधिरहितत्वमेव स्वाभाविकत्वम्। प्राभाकरमतानुसारेण तु धूमस्याग्निसम्बन्धः सकृद्दर्शनादेवावगम्यत इति सकृद्दर्शनगम्यैव व्याप्तिः। उपाधिशङ्कानिरासार्थमेव भूयोदर्शनमपेक्ष्यते; किन्तु वस्तुतो निरुपाधिकत्वविशिष्टस्यैव सम्बन्धस्यानुमानाङ्गत्वरूपा व्याप्तिः, न तु धूमाग्निसम्बन्धमात्ररूपा। निरुपाधिकत्वावधारणं भूयो दर्शनसाध्यमेवेत्युभयमीमांसक-सम्मतं मतम्। अतो भूयो दर्शनगम्यैव निरुपाधिकसम्बन्धरूपा व्याप्तिः। भूयोदर्शनेन सह सहकारिरूपेणानुगुणस्तर्कोऽप्यपेक्षितो भवति। साध्यवैपरीत्यमग्न्यभावादिकमारोप्य तेन लिङ्गभूतेन धूमाभावाद्यनिष्टप्रसक्तिस्तर्केण क्रियते। तर्कोऽयं व्याप्तिग्रहणवेलायां व्यभिचारशङ्कां निरस्य व्याप्तिं संशोध्यानुमानस्यानुग्राहको भवति। यथा—यद्यग्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति। अध्ययनविधिर्यदि स्वर्गफलकः स्यात्तर्हि दृष्टार्थफलकत्वे सति अदृष्टफलकल्पनस्यान्याय्यत्वात् तर्कानुग्रहेणार्थज्ञानफलबोधको भवति। एवमेव 'अक्ताः शर्करा उपदधाति' इत्यत्र यदि घृतेन शर्कराणामञ्जनं न स्यात्, तर्हि 'तेजो वै घृतम्' इति वाक्यशेषो विरुध्येत इति तर्काद् घृताञ्जनं साध्यते। यथा चोक्तं मानमेयोदये—

> एवं सर्वत्र तर्कौघैरर्थाभासनिरासतः।
> वाक्यार्थस्थापनी सर्वा मीमांसा तर्करूपिणी।।
> तस्मात् सर्वप्रमाणानां तर्कोऽनुग्राहकः स्थितः।
> साध्ये विपर्ययाशङ्काविच्छेदस्तदनुग्रहः।।

अतस्तर्कसाहाय्येन भूयोदर्शनेनैव निरुपाधिकसम्बन्धावधारणाद् व्याप्तिः सिध्यति।

अग्निविशेषस्यानुमेयत्वे व्याप्तिरसिद्धा, अग्निसामान्यस्यैव धूमसामान्येन व्याप्तेः। अग्निसामान्यस्यानुमेयत्वे तु तस्य पूर्वमेव निश्चितत्वात् सिद्धसाधनदोष इति भाषमाणैश्चार्वाकैरनुमानभङ्ग एव आपाद्यते—

> अनुमाभङ्गपङ्केऽस्मिन् निमग्ना वादिदन्तिनः।
> विशेषेऽनुगमाभावः सामान्ये सिद्धसाधनम्।।

चार्वाकमतं परिहरन्तो मीमांसकाः प्रस्तुवन्ति—विशेषद्वारेणैव सामान्ययो-र्व्याप्तिः सिध्यति। इदानीं पर्वतेऽग्निरस्तीति देशकालविशेषस्याप्यनुमेयत्वात् तस्य च पूर्वमप्राप्तत्वात् सिद्धसाधनदोषस्यावकाश एव नास्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुमानं त्रिविधम्—अन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि च। व्याप्तिश्च द्वेधा—अन्वयव्याप्तिः, व्यतिरेकव्याप्तिश्च। साधनस्य सद्भावे साध्यस्यापि सद्भावोऽन्वयव्याप्तिः। साध्यस्याभावे साधनस्याप्यभावो व्यतिरेकव्याप्तिः। यत्रोभयविधा व्याप्तिरस्ति तदन्वयव्यतिरेक्यनुमानम्। यस्य केवलमन्वयव्याप्तिरेवास्ति तत्केवलान्वयि। यस्य तु केवलं व्यतिरेकव्याप्तिरेवास्ति तत्केवलव्यतिरेकि। एतत्तृतीयं भाट्टा न स्वीकुर्वन्ति तत्स्थाने ते पञ्चममर्थापत्तिरूपं प्रमाणमभ्युपगच्छन्ति। अत्र पक्षस्य दुष्टत्वात् केवलव्यतिरेक्यनुमानं न स्वीकार्यम्। एषां विस्तृतं विवरणं तु न्यायमतानुसारेण बोद्धव्यम्।

प्रयोजनानुसारेणानुमानं द्विविधम्—स्वार्थानुमानम्, परार्थानुमानञ्च। यत्र स्वयमेव धूमादिकं दृष्ट्वा व्याप्त्यादिकं निरूप्यानुमीयते, तत्र स्वार्थानुमानम्। यत्र च स एवार्थः परवाक्येन बोध्यते, तत्र परार्थानुमानम्। परार्थानुमानवाक्यं नैयायिकमते पञ्चावयवम्—

प्रतिज्ञा (परं बोधयितुं पक्षवचनम्)	—	पर्वतो वह्निमान्।
हेतुः (साधनत्वावेदकं लिङ्गवचनम्)	—	धूमवत्त्वात्।
उदाहरणम् (व्याप्तिप्रदर्शनपुरस्सरं दृष्टान्तविधानम्)	—	यो यो धूमवान् स स वह्निमान् यथा महानसम्।
उपनयः (सिद्धव्याप्तिकस्य पक्षे उपनयनम्)	—	तथा चायम्।
निगमनम् (सहेतुकं पक्षस्य पुनर्वचनम्)	—	तस्मात् पर्वतो वह्निमान्।

प्रतिज्ञया निगमनस्य हेतुना च उपनयस्य गतार्थत्वाद् मीमांसकाः परार्थानुमानवाक्यं त्र्यवयवं मन्यन्ते, न तु पञ्चावयवम्। प्रतिज्ञा-हेतूदाहरणानि उत वा उदाहरणोपनय-निगमनानि। बौद्धास्तूदाहरणमुपनयश्चेति द्वावेवावयवौ मन्यन्ते। उदाहरणम्—यो धूमवान् स वह्निमान् यथा महानसः। उपनयः—धूमवांश्चायम्।

'तस्माद् वह्निमान्' इति निगमनं त्वर्थात् सिध्यति। मीमांसका अत्र साध्यांशे अध्याहारदोषप्रसङ्गाद् एतत् सौगतमतं न स्वीकुर्वन्ति।

सामान्यविशेषभेदेनाप्यनुमानं द्विविधम्—विशेषतो दृष्टसम्बन्धः, सामान्यतो दृष्टसम्बन्धश्च। आद्ये द्वयोर्विशेषयोर्वस्तुनोः सम्बन्धो गृहीतो भवति। यथा—पर्वतो वह्निमान् धूमवत्त्वात्। अत्र वह्निधूमयोः सम्बन्धः। सामान्यतो दृष्टेऽनुमाने सामान्यज्ञानमहिम्ना सम्बन्धं स्थापयित्वा लिङ्गिनोऽनुमानं क्रियते। यथा—आत्मनः सद्भाव इच्छादिगुणवत्त्वाद् अनुमीयते। गतिमन्तं देवदत्तं देशान्तरे दृष्ट्वा सामान्यं ज्ञानं गृहीत्वा सूर्यस्य गतिविषयेऽप्यनुमानं क्रियते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

असिद्ध-विरुद्ध-अनैकान्तिक-प्रकरणसम-कालात्ययापदिष्टभेदेन नैयायिकाः पञ्चविधान् हेत्वाभासान् मन्यन्ते। मानमेयोदयकारमतेन तु एषु त्रयः (असिद्ध-अनैकान्तिक-कालात्ययापदिष्टाः) चतुर्थोऽसाधारण इति च चत्वारो हेत्वाभासाः। अप्रयोजक इति अनध्यवसित इति वाऽपरं हेत्वाभासं मत्वा षोढा हेत्वाभासा इति केचन भासर्वज्ञादयः। अयमुक्तेषु हेत्वाभासेष्वन्तर्भावयितुं शक्यते। एतत् सर्वं सविस्तरं शास्त्रदीपिकायां पार्थसारथिमिश्रेण विशदं विवेचितम्—प्रथमाध्यायस्य प्रथमपादे पञ्चमेऽधिकरणे। विस्तरभियाऽत्र मया पृथक् पृथग् विवेचनं न प्रस्तूयते।

शाब्दम्

यद्यपि नैयायिकैरनुमानप्रमाणानन्तरमुपमानं वर्णितम्, तथाप्यन्य-प्रमाणापेक्षया शाब्दस्य मीमांसानये विशेषगौरवात् शाब्दं प्रमाणं पूर्वं प्रतिपाद्यते। ज्ञातैः पदैः पदार्थस्मरणे कृते यद् असन्निकृष्टं वाक्यार्थज्ञानं तदेव शाब्दमुच्यते। पदबोधिताः पदार्था लक्षणया वाक्यार्थं बोधयन्ति। पदैः पदार्थबोधनं शब्दशक्तिजन्यत्वाद् अभिधानमेवेति पार्थसारथिमिश्राः। शब्दोऽपि संस्कारोद्बोधनद्वारेणैव पदार्थं बोधयतीति स्मरणमेव पदार्थज्ञानमिति चिदानन्दप्रभृतयः। पदानां पदार्थबोधेनोपक्षीणत्वाद् व्यवधानाच्च पदार्था एव स्वसंसर्गरूपं वाक्यार्थं बोधयन्तीति नैयायिकानां मतम्। भाट्टानां मते तु पदार्था लक्षणयैव वाक्यार्थं बोधयन्ति, वाच्यार्थानुपपत्त्या हि लक्षणा भवति। अतः पदैरवगताः पदार्थाः परस्परमन्वयं प्राप्य वाक्यार्थं बोधयन्ति। एतदेव भाट्टानामभिहितान्वयसिद्धान्तस्य स्वरूपम्। अभिहितान्वयवादे पूर्वं पदेभ्यः केवलमनन्विताः पदार्था उपस्थिता भवन्ति, ततस्तेषामाकाङ्क्षा-योग्यता-सन्निधिबलात् पदार्थानां परस्परमन्वयो भवति। ततश्च वाक्यार्थबोधो जायते। अस्मिन् विषये प्रभाकरमते अन्विताभिधानवादसिद्धान्तः प्रतिपादितोऽस्ति। तदनुसारेण पूर्वतोऽन्वितपदानामभिधया बोधनं भवति। अत्रास्मिन् मते तात्पर्याख्यशक्तेरपेक्षा न भवति। मतेऽस्मिन् अन्वितैः पदैरभिधानं भवति।

वाक्यार्थबोधे त्रीणि सहकारिकारणानि भवन्ति—आकाङ्क्षा, योग्यता, सन्निधिश्च। गौः, अश्वः, पुरुषो हस्तीत्यत्र पदानां परस्परमाकाङ्क्षाविरहा-दन्वयादर्शनाद् वाक्यार्थबोधो न भवति। 'अग्निना सिञ्चति' इत्यत्र अग्नौ सेचनयोग्यताभावाद् अन्वयाभावः, अतो वाक्यार्थबोधाभावः। भिन्नकालोच्चारितयोः 'गाम् आनय' इति पदयोः सन्निहितत्वाभावाद् अन्वयाभावः। प्रभाकरस्तु बुद्धिसन्निधिमात्रमेव सन्निधिं मन्यते, न तूच्चारणसन्निधिम्।

शाब्दं प्रमाणं द्विविधम्—पौरुषेयम्, अपौरुषेयञ्च। तत्र आप्तवचः पौरुषेयम्, वेदवचः अपौरुषेयम्। प्रभाकरमतानुसारेण वैदिकं वच एव शाब्दं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रमाणम्। पुरुषवचनानि तु वक्तुरभिप्रायानुमापकानि न स्वयमेव वाक्यार्थबोधकानि बहुविधशङ्काग्रस्तत्वात्। आप्तप्रणीतत्वमेवात्र हेतुः। आप्तत्वे च भ्रान्त्याद्यभावोऽभिमतः। कस्मिंश्चित् पुरुषे भ्रान्तिर्नास्तीति कदापि न निरूपयितुं शक्यते।

अपौरुषेये वेदे तु पुरुषस्पर्शसङ्गतः।
कलङ्को न विशङ्क्येत तत्कुतो व्यभिचारिता।।

पदार्थबोधिका शक्तिर्वृत्तिपदेन व्यपदिश्यते। वृत्तिश्च त्रिविधा—अभिधा, लक्षणा, गौणी च। मीमांसकनये या गौणी वृत्तिः, सैव आलङ्कारिकाणां मते व्यञ्जनावृत्तिः। तात्पर्याशक्तेरपि तत्रैवान्तर्भावः।

मुख्यतया वाक्यं वैदिकं भवेल्लौकिकं वा द्विविधं भवति—सिद्धार्थबोधकं वाक्यम्, विधायकवाक्यं च। सिद्धार्थबोधकवाक्यं यथा—'एष राजा पाञ्चालः'। विधायकवाक्यं यथा—'स्वर्गकामो यजेत'। विधायकवाक्यं किमपि कर्तुं प्रेरयति विधानं वा करोति। विधायकवाक्यं द्विविधं भवति—औपदेशिकम्, आतिदेशिकञ्च[1]। उपदेशवाक्यं यथा—'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'। इष्टीनां प्रकृतिर्दर्शपूर्णमासः। 'समिधो यजति' इत्यादीनि प्रयाजादीनि कथं सम्पाद्येरन् इति जिज्ञासायामतिदेशवाक्यं प्रवर्तते—प्रकृतिवद्विकृतिः कर्तव्या इति। वैदिकवाक्येष्वपि विधिवाक्यानामेव प्रामाण्यम्। अन्येषां तु मन्त्र-नामधेय-निषेध-अर्थवादवाक्यानां विधिवाक्यैः सहान्वयेन एकवाक्यतयैव प्रामाण्यम्। तथा हि जैमिनिसूत्रम्—'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्'। शाब्दमेव प्रमाणं धर्मे निमित्तं नान्यदिति मीमांसासिद्धान्तः।

उपमानम्

उपमानं तावच्चतुर्थं प्रमाणम्। सादृश्यजन्यं ज्ञानमुपमानम्। अत्रेन्द्रियार्थसन्निकर्षो न भवति। गोविषयकज्ञानवान् पुरुषो यदा वनं गत्वा गवयं पश्यति, तदा गां स्मृत्वा तद्गतं गोसादृश्यमनुभवति। अनेन सादृश्येन 'अयं गवयः' इति तस्य ज्ञानं भवति। एतज्ज्ञानमेव उपमितिः, तत्करणमुपमानम्।

प्रत्यक्षज्ञानाद् भिन्नमिदमुपमानज्ञानम्। गोविषयकप्रत्यक्षज्ञानवान् पुरुषो यदाऽरण्यं गच्छति, तत्र तत्सदृशं गवयं पश्यति च। तदा सादृश्यात् तस्य गोः स्मृतिर्भवति, ज्ञानं च भवति यद् गौः गवयसदृशो भवतीति।

न्यायमतेन तु कस्माच्चिदाप्तपुरुषात् कश्चित् शृणोति—'गवयो गोसदृशो भवति' इदं वाक्यं श्रुत्वा सोऽरण्यं गच्छति, तत्र गोसदृशं पशुमेकं पश्यति। तदा आप्तपुरुषवाक्यात् 'अयमेव गवयः' इति ज्ञानं भवति। एतदेव अनुमानज्ञानम्।

१. अतिदेशो नामान्यत्र श्रुतानामङ्गानामन्यत्र प्रापकं शास्त्रम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्रोपमानप्रमाणे मीमांसकानां रुचिर्नावलोक्यते, तत्र अन्यप्रमाणानामपि सद्भावात् (विद्यमानत्वात्)।

भाट्टमतेनाविद्यमानस्य गोः स्मरणम्, प्रभाकरमतेऽविद्यमानस्य गोः गवयेन सह सादृश्यज्ञानमुपमानम्। नैयायिकास्तु उपमानमन्यादृशं मन्वाना गोगतसादृश्यज्ञानमनुमानीकुर्वन्ति। मीमांसकानां कृते कर्मकाण्डेऽतिदेशसिद्धेर्दृष्ट्या उपमानस्याधिकं महत्त्वं वर्तते। यथा श्लोकवार्तिके—

'भिन्नानुमानाद् उपमेयतोक्ता सौर्यादिवाक्यैरसहापि दृष्टा।

सादृश्यतोऽग्न्यादियुतं कथं नु प्रत्याययेदित्युपयुज्यते नः।।

अवगतसाङ्गदर्शपूर्णमासादिरूपप्रकृतिपदार्थस्य विकृतिदर्शनेन तत्सदृशस्य प्रकृतियागस्य स्मरणम्—सौर्ययागसदृश एकदेवरूपत्वौषधद्रव्यकत्वादिना आग्नेय इति।

अर्थापत्तिः

मीमांसानये पञ्चमं प्रमाणमर्थापत्तिः। प्रमाणषट्केन प्रमितस्यार्थान्तरकल्पनं विनाऽनुपपत्तिं दृष्ट्वा तदुपपत्तये याऽर्थान्तरकल्पना सा अर्थापत्तिः। प्रमाणद्वयविरोधोऽनुपपत्तिः। तत्र (१) प्रत्यक्षप्रमितान्यथानुपपत्त्या अर्थकल्पना, यथा—प्रत्यक्षतोऽवगताद् दाहाद् वह्नेर्दाहशक्तिकल्पना। (२) अनुमानपूर्विकाऽर्थापत्तिर्यथा—देशान्तरप्राप्तिलिङ्गकेन अनुमानेन आदित्ये गतिमनुमाय तदन्यथाऽनुपपत्त्या आदित्ये गमनशक्तिकल्पना। (३) शब्दपूर्विका प्रमाणग्राहिणी अर्थापत्तिर्यथा—'पीनो देवदत्तो दिवा न भुङ्क्ते' इति श्रुतेन वाक्येन दिवाऽभुञ्जाने देवदत्ते पीनत्वरूपप्रमितार्थस्यान्यथानुपपत्तिमालोच्य तदुपपत्तये 'रात्रिभोजनवान् देवदत्तः' इति रात्रिभोजनरूपार्थप्रतिपादकवाक्यान्तरकल्पना। (४) उपमानपूर्विकाऽर्थापत्तिर्यथा—गवयदर्शनाद् एतत्सदृशो गौरिति यद् गवि गवयसादृश्यमुपमितं तदन्यथानुपपत्त्या तादृशसादृश्यविशिष्टे गवि तादृशप्रमाविषयत्वशक्तिरस्तीति कल्पना। (५) अर्थापत्तिपूर्विकाऽर्थापत्तिर्यथा—अर्थबोधान्यथानुपपत्त्या शब्दस्य वाचकशक्तिं कल्पयित्वा पुनस्तदनुपपत्त्या शब्दस्य नित्यत्वकल्पना। (६) अभावपूर्विकाऽर्थापत्तिर्यथा—जीवति देवदत्ते तस्य गृहेऽभावदर्शनेन बहिर्भावस्य या कल्पना सा अभावपूर्विकाऽर्थापत्तिः।

अस्या अर्थापत्तेरनुमान एवान्तर्भावमिच्छन्ति नैयायिकाः। यथोक्तं न्यायमञ्जर्याम्—'अभावपूर्विकाऽर्थापत्तिरनुमानमेव'। अनुपपन्नं तेषां मतम्। अर्थापत्तावनुपपद्यमानस्य गम्यत्वम्, उपपादकस्य गमकत्वम्, अनुमितौ तूपपादकस्यैव गम्यत्वम्, अनुपपन्नस्य गमकत्वमिति तयोरत्यन्तभेदाद् नार्थापत्तिरनुमानेऽन्तर्भाव्या।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थापत्तिर्द्विविधा—दृष्टार्थापत्तिः, श्रुतार्थापत्तिश्च। शब्दकल्पनरूपा श्रुतार्थापत्तिः। यथा 'द्वारं द्वारम्' इति वाक्येऽन्वयसिद्ध्यर्थं शब्दगम्येन आवरणाद्यर्थान्तरेण भवितव्यम्। तस्य श्रुतशब्दानुपलम्भेन बाधे आवरणाद्यर्थः कल्प्यते। वेदे यथा—'विश्वजिता यजेत' इत्यादौ 'स्वर्गकामः' इति श्रुतैकदेशवाक्यत्वेन कल्प्यते। प्रभाकरमते श्रुतार्थापत्तिर्नास्ति।

अनुपलब्धिः (अभावः)

प्रवृत्तियोग्यानां पञ्चानामपि प्रत्यक्षादीनां प्रमाणानां यत्राप्रवृत्तिः, सा योग्याऽनुपलब्धिर्नामाभावरूपं षष्ठं प्रमाणं घटाद्यभावविषयकम्। यथोक्तं कुमारिलभट्टपादैर्वार्तिके—

> प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते।
> वस्तुसत्तावबोधार्थं तत्राऽभावप्रमाणता।।

सोऽभावो नेन्द्रियग्राह्यो नाप्यनुमेयः, लिङ्गलिङ्गिनोर्ग्रहाभावात्, नाप्युपमानादेः प्रवृत्तिः, सादृश्यज्ञानादेरभावात्। अतः प्रमाणान्तरभूतयाऽनुपलब्ध्या प्रत्येतव्योऽभावः सिद्धः, सिद्धश्च अभावस्य षष्ठप्रमाणत्वम्, अभावविषयकत्वं च। प्राभाकरास्त्वभावपदार्थमस्वीकुर्वन्तस्तद्ग्राहकत्वेन षष्ठं प्रमाणमभावमनुपलब्धिं वा नाङ्गीकुर्वन्ति। भाट्टमते तद् अभावपदार्थस्य सत्त्वात् तस्य प्रत्यक्षादिप्रमाणैर्ग्रहीतुमशक्यत्वाच्च परिशेषाद् अनुपलब्धिप्रमाणस्य स्वीकर्तव्यत्वेन नोपेक्षणीयम्।

पौराणिकाभिमतस्य सम्भवाख्यस्य प्रमाणस्यानुमानेऽन्तर्भावाद् ऐतिह्यस्य च आगमे शाब्दे वाऽन्तर्भावान्न पृथक् प्रमाणकोटौ परिगणनावकाशः। अतस्तयोश्चर्चाऽत्रानावश्यकी।

प्रमाणानां स्वतस्त्वं परतस्त्वं वा (प्रामाण्यवादः)

उपर्युक्तप्रमाणषट्कैरुत्पन्नस्य ज्ञानस्य प्रामाण्याप्रामाण्यविषये भारतीयदर्शनेषु महान् मतभेदोऽवलोक्यते। प्रथमं तावदिदं विचारणीयं यत् प्रामाण्येऽप्रामाण्ये वा किं नाम स्वतस्त्वं किं नाम परतस्त्वं च। 'ज्ञानग्राहकातिरिक्तानपेक्षत्वं स्वतस्त्वम्'। अर्थाद् ज्ञानग्राहकसामग्रीव्यतिरिक्ता सामग्री प्रामाण्यग्रहाय नापेक्ष्यते चेत्, तर्हि प्रामाण्यस्य स्वतस्त्वम्। यत्र ज्ञानस्य तद्गतप्रामाण्यस्य च ग्रहणमेकयैव सामग्र्या भवति तत्प्रमाणं स्वतः। एतद्विपरीतं 'ज्ञानग्राहकातिरिक्तापेक्षत्वं परतस्त्वम्', अर्थाद् ज्ञानग्राहकसामग्री भिन्ना तत्प्रामाण्यग्राहकसामग्री ततो भिन्ना चेत्, तर्हि परतः प्रामाण्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मीमांसकमते ज्ञानस्य तत्प्रामाण्यस्य चोभयोर्ग्राहकसामग्री एकैव 'ज्ञातताऽन्यथानुपपत्तिप्रसूता अर्थापत्तिः' अस्ति। न्यायमते ज्ञानग्राहकसामग्री 'अनुव्यवसायः' प्रामाण्यग्राहकसामग्री च तद्भिन्नं 'प्रवृत्तिसाफल्यमूलकमनुमानम्' अस्ति।

अत्र विशेषरूपेणेदमवधेयं यद् मीमांसका वेदं नित्यम्, अपौरुषेयं स्वतः-प्रमाणं च मन्यन्ते। तेषां मतेन एकमात्रं प्रमाणं वेद एवास्ति। एष एव शाब्दं प्रमाणम् आगमप्रमाणं वा उच्यते। प्रत्यक्षादिप्रमाणानां चर्चा तु प्रसङ्गतः कृताऽस्ति। तानि मीमांसाया मुख्यप्रतिपाद्यानि न सन्ति। अतो मीमांसकानां स्वतःप्रामाण्यवादित्वं स्वाभाविकम्। अन्यथा वेदानां तदभिमतं स्वरूपं नङ्क्ष्यति। अत एव प्रत्यक्षादिप्रमाणानामपि प्रामाण्यसम्बन्धेऽपि वेदप्रामाण्यमाधारीकृत्य स्वतः-प्रामाण्यमेव स्वीक्रियते। चक्षुरिन्द्रियसंयोगाद् दूरत एव जलं दृष्ट्वा 'तत्र जलमस्ति' इति ज्ञानं यथार्थं मत्वा लोको जलार्थं तत्र गच्छति। अत्र सन्देहस्य अयाथार्थ्य-सम्भावनाया वा अवसर एव नास्ति। ज्ञानं तु यथार्थमेव भवति। तत्सत्यतायां सन्देहोऽयुक्तः। प्रभाकरेण तु स्पष्टमेवोक्तम्—'ज्ञानं' 'मिथ्या' चेति मिथो विरुद्धं वचनम्। यदि ज्ञानं तर्हि यथार्थमेव। तन्मिथ्या भवितुं न शक्नोति। कुमारिलभट्ट-स्याप्येतदभिमतम्। एवं मीमांसकानां सर्वेषु प्रमाणेषु स्वतःप्रामाण्यं सुस्थम्।

एतद्विपरीतं नैयायिका वदन्ति यद् यदा चक्षुरिन्द्रियसंयोगेन जलस्य ज्ञानं भवति, तदा जनो जलमाहर्तुं प्रवर्तते, तदा मनसि सन्देहो जायते 'जलं लभ्येत न वा लभ्येत', अर्थाद् जलविषयकं ज्ञानं सन्देहयुक्तमस्ति। ततस्तत्र गत्वा जले लब्धे सति निश्चिनोति—'जलमस्ति' इति मम ज्ञानं यथार्थमस्ति। चक्षुरिन्द्रियेण सह घटसन्निकर्षेण 'अयं घटः' इति ज्ञानं भवति। यन्नैयायिकैः 'व्यवसायः' इति कथ्यते। ज्ञानस्य व्यवसायस्य वा याथार्थ्यनिश्चयः पश्चात् 'घटज्ञानवानहम्' इति ज्ञानेन भवति, यत्तैरनुव्यवसाय इत्युच्यते। अतोऽनया प्रक्रियया नैयायिकाः प्रामाण्यस्य परतस्त्वमभ्युपगच्छन्ति।

अत्र मुख्यरूपेण मतद्वयं विद्यते—मीमांसकानां नैयायिकानाञ्च। मीमांसकेष्वपि मतत्रैविध्यं वर्तते—(१) प्रभाकरमतम्, (२) भाट्टमतम्, (३) मुरारिमिश्रमतञ्च।

१. प्रभाकरमतेन ज्ञानं स्वतःप्रमाणं स्वप्रकाशं चास्ति। प्रमाणस्य प्रामाण्यं स्वतः सिद्धमस्ति। ज्ञानत्वेनैव तस्य याथार्थ्यम्। अतो ज्ञानस्य प्रामाण्याय अन्यापेक्षा नास्ति, अतः प्राभाकराः स्वभावतः स्वतःप्रामाण्यवादिनः।

२. भाट्टमते येन ज्ञानमुत्पद्यते तेनैव तस्य प्रामाण्यमपि सिध्यति। चक्षुःघटसन्निकर्षाद् 'अयं घटः' इति ज्ञानं जायते। तेषां मते ज्ञानं स्वप्रकाशं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नास्ति। अतस्तस्य ज्ञानस्य भानं साक्षान्न भवति। तत्तु अतीन्द्रियमस्ति। अतो घटज्ञानानन्तरं 'मया ज्ञातोऽयं घटः' इति भानं भवति। ज्ञाते घटे ज्ञाततानामको धर्म उत्पद्यते। अस्या ज्ञाततायाः प्रत्यक्षं ज्ञानं भवति। अयं धर्मो घटे ज्ञात एव सम्भवः। अतो ज्ञातताऽन्यथाऽनुपपत्तिप्रसूतया अर्थापत्त्या भाट्टा ज्ञानस्यास्तित्वं स्वीकुर्वते। अनया ज्ञाततयैव ते ज्ञानस्य प्रामाण्यं स्थापयन्ति। एतदेव तेषां स्वतःप्रामाण्यस्य स्वरूपम्।

३. मुरारेस्तृतीयः पन्थास्तावत्। मुरारिमतानुसारेणेन्द्रियार्थसंयोगाद् ज्ञाने जाते 'अयं घटः' इति भानं भवति। अस्य ज्ञानस्य सत्यतानिश्चयार्थं 'घटज्ञानवानहम्' इत्यनुव्यवसायो भवति। अनेन अनुव्यवसायेनैव 'अयं घटः' इति ज्ञानस्य तस्य प्रामाण्यस्य चोभयोर्निश्चयो भवति।

प्रभाकरमते स्वप्रकाशादिना, भाट्टमते ज्ञाततालिङ्गकानुमित्यादिना मुरारिमते अनुव्यवसायादिना च यावज्ज्ञानग्राहकसामग्रीग्राह्यत्वस्य सर्वसाधारणत्वात् स्वतः-प्रामाण्यसिद्धिः। मुरारिमिश्रमते नैयायिकमते चानुव्यवसायगतं साम्यं वर्तते; किन्तु तयोरयं भेदोऽस्ति यन्नैयायिकमते ज्ञानं प्रथमं सन्दिग्धं भवति, मिश्रमते न तथा। यतो हि मिश्रमते प्रामाण्यसामग्री सैवास्ति या ज्ञानसामग्री। 'मनसैव ज्ञानस्वरूपवत् तत्प्रामाण्यग्रहः' इति कुसुमाञ्जलिप्रकाशे वर्द्धमानः। यद्यपि भाट्टमते ज्ञाततया प्रामाण्ये मिश्रमते अनुव्यवसायेन प्रामाण्ये सिद्धे वस्तुतः प्रभाकर एव यथार्थरूपेण स्वतःप्रामाण्यवादी। तथापि त्रयोऽपि न्यायमतापेक्षया स्वतःप्रामाण्यवादिन एव।

कुमारिलभट्टस्तु प्रामाण्यं स्वतः, अप्रामाण्यं च परतो मन्यते। यथोक्तं श्लोकवार्तिके—

स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यताम्।
न हि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यते।।

प्रामाण्याप्रामाण्यविषये भारतीयदर्शने षट् पक्षाः सन्ति—

(१) न्यायमते —	प्रामाण्यम्	अप्रामाण्यञ्च	उभयं	परतः।
(२) सांख्यमते —	,,	,,	,,	स्वतः।
(३) मीमांसकमते —	,,	स्वतः	,,	परतः।
(४) बौद्धानां केषाञ्चिन्मते—	,,	परतः	,,	स्वतः।
(५) शान्तरक्षितमते —	अभ्यासदशापन्ने	ज्ञाने	उभयं	स्वतः।
	अनभ्यासदशापन्ने	,,	,,	परतः।
(६) जैनमते —	उत्पत्तौ उभयं परतः, ज्ञप्तौ उभयं स्वतः।			

इति सङ्क्षेपतो विनिवेद्य विरम्यते।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जैनदर्शनपर्यालोचनम्

डॉ. हरिप्रसाद-अधिकारी

उपाचार्य:,
तुलनात्मकधर्मदर्शनविभागे
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी

***

जयति कामक्रोधरागद्वेषादिदोषानिति जिन:। जिनादागतो जिने भवो वा जैन:। जैनानां दर्शनं जैनदर्शनम्। जैनसम्प्रदायपरम्परायां चतुर्विंशतितीर्थङ्कराणां समुल्लेख: प्राप्यते। तीर्थं करोतीति व्युत्पत्त्या निष्पन्नोऽयं तीर्थङ्करशब्दस्तेषां पवित्रीकरणसामर्थ्यं द्योतयति। तेषां पदार्पणेनापवित्रमपि स्थानं तीर्थत्वं भजत इति जैनपथपथिका विश्वसन्ति। चतुर्विंशतितीर्थङ्करेष्वाद्य ऋषभदेवोऽन्तिमश्च गौतमबुद्धसमकालिको महावीरो वर्तते। जैनधर्माधारभूतानां चतुर्विंशतितीर्थङ्कराणां नामानीत्थं वर्तन्ते[1] —

१. ऋषभदेव:	२. अजितनाथ:
३. सम्भवनाथ:	४. अभिनन्दन:
५. सुमतिनाथ:	६. पद्मप्रभ:
७. सुपार्श्वनाथ:	८. चन्द्रप्रभ:
९. पुष्पदन्त:	१०. शीतलनाथ:
११. श्रेयांसनाथ:	१२. वासुपूज्य:
१३. विमलनाथ:	१४. अनन्तनाथ:
१५. धर्मनाथ:	१६. शान्तिनाथ:
१७. कुंथुनाथ:	१८. अदहनाथ:
१९. मल्लिनाथ:	२०. मुनिसुव्रतनाथ:
२१. नमिनाथ:	२२. नेमिनाथ:
२३. पार्श्वनाथ:	२४. महावीर:

१. २००१ वर्षे वाराणसीतो मैत्रीभवनद्वारा प्रकाशितायाः समन्वयपत्रिकाया: पृ. १४ द्रष्टव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जैनदर्शने सर्वेश्वरो न स्वीक्रियते। पूर्वोक्ताश्चतुर्विंशतितीर्थङ्करा एव जैनपथानुयायिनामुपास्याः। तीर्थङ्कराश्चैते भवबन्धनविरहितत्वाद् मुक्ता भवन्ति। सांसारिकाः कामक्रोधलोभमोहादयो भावा नैतानाबध्नन्ति। एते न केवलं मुक्ता एवापि त्वनन्तज्ञानशक्त्यैश्वर्यसमन्विता अपि भवन्ति। जैनमान्यतानुसारं सर्वे बन्धनग्रस्ता जीवाः (मानवाः) तत्पथानुशरणेन मोक्षाधिकारिणो भवन्ति।

जैनधर्मस्य श्वेताम्बर-दिगम्बराख्यौ द्वौ प्रमुखौ सम्प्रदायौ स्तः। एतयोः सैद्धान्तिको भेदः स्वल्पतर एव, चरित्रभेदश्च बहुतरो विद्यते। दिगम्बरा आचारपालने कठोराः, श्वेताम्बराश्चोदारा वर्तन्ते। दिगम्बरा निर्वस्त्राः, श्वेताम्बराश्च श्वेतवस्त्रधारिणो भवन्ति। नियमोऽयं केवलं मुनीनां कृते वर्तते, न तु गृहस्थानाम्। दिगम्बरसम्प्रदायानुसारं मूलागमग्रन्थाः सम्प्रति विलुप्तप्राया वर्तन्ते। केवलज्ञान-युतानां जनानां भोजनस्यावश्यकतापि न जायते। स्त्री मुक्तेरधिकारिणी न भवति। श्वेताम्बरास्तु नेत्थं स्वीकुर्वन्ति।

प्रमाणविचारः

प्रायशः सर्वाणि भारतीयदर्शनानि स्वस्वप्रमाणद्वारा तत्त्वं परिशीलयन्ति। नास्तिकाग्रगण्यश्चार्वाकोऽपि प्रत्यक्षप्रमाणमवलम्ब्य प्रवर्तते। चार्वाकादारभ्य पौराणिकपर्यन्तमाहत्याष्टौ प्रमाणानि भवन्ति। जैनास्तु प्रत्यक्षानुमानाप्तवचनरूपाणि त्रीण्येव प्रमाणानि स्वीकुर्वन्ति। जैनग्रन्थेषु प्रमाणानामुल्लेखः स्पष्टतया कृतो वर्तते। यथा हि—प्रत्यक्षानुमानशाब्दानि प्रमाणानि[१]। जैनदार्शनिकाश्चार्वाकमतखण्डनेऽपि दत्तावधाना दृश्यन्ते। तन्मते चार्वाकाणां प्रत्यक्षप्रमाणसिद्धिरपि अनुमान-प्रमाणद्वारेणैव जायते। परं चार्वाकास्त्वनुमानं भ्रमात्मकं भवतीति धिया तत्प्रामाण्यं न स्वीकुर्वन्ति, परं किं प्रत्यक्षं भ्रमात्मकं न जायते? एवमेव परलोकास्तित्वं खण्डयन्तश्चार्वाकाः स्वयमेव प्रत्यक्षसीमातो बहिर्भूता भवन्ति। अतः प्रत्यक्षानुमान-शब्दप्रमाणानि वस्तुतत्त्वाधिगमायावश्यं स्वीकर्तव्यानि।

ज्ञानविचारः

परोक्षापरोक्षभेदेन ज्ञानस्य द्वैविध्यं स्वीकुर्वन्ति जैनाः। अपरोक्षज्ञानमपि अवधि-मनःपर्याय-केवलभेदेन त्रिधा विभज्यते। मति-श्रुतभेदेन परोक्षज्ञानं द्विविधं

१. न्यायावतारविवृतिः, (पृ.४- सतीशचन्द्रविद्याभूषणसम्पादिता), भारतीय दर्शन (चटर्जी और दत्त) ६१ पृ. उल्लिखितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवति। इदं हि परोक्षापरोक्षत्वं जैनेतरभारतीयदर्शनेभ्यो भिद्यते[1]। अत्र तावदेतेषां सङ्क्षिप्तं विवरणं प्रस्तूयते—

१. **मतिः** — विषयेन्द्रियमनोगतज्ञानावरणेषु विनष्टेषु यज्ज्ञानं स्फुरति सैव मतिः। घटादीनां प्रत्यक्षतः पूर्वं यन्मनसात्मकं ज्ञानं जायते सैव मतिरस्ति। सङ्क्षेपतो दृष्टिस्थैर्यमेव मतिज्ञानम्।

२. **श्रुतम्** — ज्ञानावरणे पूर्णतो विनष्टे सति मतिज्ञानजन्यं स्पष्टज्ञानमेव श्रुतमित्यभिधीयते।

३. **अवधिः** — यद्धि ज्ञानं सम्यग्दर्शनादिभ्यः समुत्पन्नमुपशमकारणं विषयव्यापकञ्च भवति, तदवधिज्ञानशब्देनाभिधीयते। ईदृशमेवेदं वस्त्विति निर्धारणमेवावधिज्ञानम्।

४. **मनःपर्यायः** — ज्ञानावरणभूतानीर्ष्याप्रभृतिदोषान् विजित्य साधको यदा परहृदयवार्ताबोधसमर्थो जायते, तदा तज्ज्ञानं मनःपर्यायसंज्ञां लभते।

५. **केवलम्** — सर्वावरणानां क्षये जाते केवलज्ञानमुत्पद्यते। इदं ज्ञानं जैनज्ञानेषु समुत्कृष्टं मोक्षसाधनभूतञ्च मन्यते। एतस्य प्राप्तय एव साधका अहर्निशं दत्तावधाना जायन्ते। अन्यज्ञानेभ्यः पृथक्त्वादस्य केवलसंज्ञा। एतदेव ज्ञानं जैनानां तत्त्वदर्शनमित्युच्यते। एतेषु पञ्चप्रकारकज्ञानेषु प्रत्यक्ष-परोक्षयोर्भेदोऽपि स्वीक्रियते। यथोक्तम्—

विज्ञानं त्वपराभासि प्रमाणं बाधवर्जितम्।
प्रत्यक्षं च परोक्षं च द्विधा ज्ञेयं विनिश्चयात्[2]॥

तत्त्वविचारः (अनैकान्तवादः)

जैनदार्शनिकानां सापेक्षतावादसिद्धान्तोऽनैकान्तवादनाम्नापि ज्ञायते। एतेन वस्तुबाहुल्यं तद्धर्मबाहुल्यञ्च स्वीक्रियते। सर्वाणि वस्तूनि उत्पादव्ययध्रौव्यधर्मयुक्तानि भवन्ति। यथोक्तम्—

प्रतिक्षणोत्पादविनाशयोगिस्थिरैकमध्यक्षमपीक्षमाणः।
जिन त्वदाज्ञामवमन्यते यः स पातकी नाथ पिशाचकी वा[3]॥

---

१. न्यायावतारविवृतौ ३० पृष्ठे।
२. सर्वदर्शनसङ्ग्रहे आर्हतप्रकरणे, १५१ पृ.।
३. स्याद्वादमञ्जर्याः २१ तमं पद्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि च—

अनन्तधर्मात्मकमेव तत्त्वमतोऽन्यथा सत्त्वमसूपपादम्।
इति प्रमाणान्यपि ते कुवादिकुरङ्गसन्त्रासनसिंहनादाः[१]।।

एतस्मादिदं सुसिध्यति यद् जैनसिद्धान्तानुसारं प्रत्येकस्य वस्तुनोऽनेक-धर्मा भवन्ति। एकेन धर्मेण वस्तुनः स्थितिर्ज्ञायतेऽपरेण चान्यवस्तुभ्य-स्तत्पार्थक्यं स्वस्थितिबोधको धर्मो जैनैः स्वपर्यायनाम्नाऽभिसम्बोध्यते। परपार्थक्य-बोधकधर्मश्च परपर्याय इति। यथैकस्मिन् मनुष्ये वर्ण-कुल-गोत्र-जाति-प्रभृतयः प्रथमस्थानीया धर्मा राजन्ते, तथैव तस्य मनुष्यस्य देशधर्मप्रभृतयोऽभावात्मकधर्मा अपि भवन्ति। स्वपर्यायधर्मापेक्षया परपर्यायधर्माणां संख्याधिक्यमस्ति। यथोक्तम्—

स्तोकाः स्वपर्यायाः परपर्यायास्तु व्यावृत्तिरूपा अनन्ता अनन्तेभ्यो धर्मेभ्यो व्यावृत्तित्वात्। यद्येवंरूपेण भावात्मकाभावात्मकधर्मयोर्विचारः क्रियेत तदा प्रत्येकं वस्त्वनन्तधर्मसंवलितं सेत्स्यति[२]।

द्रव्यविचारः

जैनदर्शनं वस्तुवादि-सापेक्षतावादि-बहुत्ववादि चास्तीति पूर्वमेवोट्टङ्कितम्। एतद्दृष्ट्या तत्त्वमनन्तधर्मात्मकं भवति। उत्पादव्ययध्रौव्यं सदिति सल्लक्षणं जैनानाम्। द्रव्ये गुणपर्यायौ धर्मौ भवतः। चेतनाचेतने द्वे स्वतन्त्रद्रव्ये भवतः। द्रव्याणामप्यास्तिकायनास्तिकायरूपेण भेदद्वयं भवति। विस्तारयुतत्वात् सत्तासम्पन्नत्वाच्चास्तिकाय इति संज्ञा। कालं विहाय सर्वे पदार्था अस्तिकायकोटौ परिगण्यन्ते[३]।

अस्तिकायद्रव्याणामपि जीवाजीवभेदेन द्वैविध्यं भवति। जीवात्मशब्दौ पर्यायवाचिनौ वर्तेते। पुनरपि मुक्त-बद्धरूपेण जीवस्यापि द्वैविध्यं स्वीक्रियते। बद्ध-जीवा अपि त्रसस्थावरभेदेन द्विविधा भवन्ति। गतिमन्तो जङ्गमा त्रसजीवा वोच्यन्ते, अगतिकाश्च स्थावराः कथ्यन्ते। अनया तालिकया द्रव्यप्रकाराः सम्यग् ज्ञातुं शक्यन्ते[४]—

१. स्याद्वादमञ्जर्यां द्वाविंशतितमं पद्यम्।
२. भारतीय दर्शन, चटर्जी और दत्त, पृ. ६९।
३. तत्रैव, ६२ पृष्ठे।
४. भारतीय दर्शन (चटर्जी और दत्त), ७२ पृ. द्रष्टव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



जैनसिद्धान्तानुसारं त्रसजीवा गतिमन्तो भवन्ति, स्थावराश्चागतिमन्तः। स्थावराणां केवलं स्पर्शेन्द्रियबोधो जायते। त्रसजीवेषु मनुष्यः सर्वेभ्यो विकसितः पञ्चेन्द्रियसम्पन्नश्च वर्तते। अनस्तिकायविभागे धर्माधर्माकाशपुद्गलाः समापतन्ति[१]।

स्याद्वादः (सप्तभङ्गीनयः)

स्याद्वादसिद्धान्तोऽयं जैनदर्शनस्य प्रमुखतमः सिद्धान्तो वर्तते। अनेन ज्ञानसापेक्षता द्योत्यते। जैनेतरदर्शनसिद्धान्तदृष्ट्याऽवलोक्यते चेत्, जैनसिद्धान्ते सन्देहाभासो जायते; किन्तु जैनदर्शनदृष्ट्या स्याद्वादसिद्धान्ते लेशमात्रमपि सन्देहावकाशो न वर्तते। जैनदर्शने 'स्यात्'शब्दस्य प्रयोगो विशेषार्थे(विशिष्टार्थे) विहितोऽस्ति, येन ज्ञानस्यापेक्षता सूच्यते। अतः 'स्यात्'शब्दार्थः 'सापेक्षतया' इति शब्देन परिभाषयितुमुचितं प्रतिभाति। समस्तमानवीयज्ञानानामांशिकत्वात् सापेक्ष्यत्वाच्चास्मत्प्रकथनानि परामर्शवाक्यानि चांशिकानि सापेक्षाणि च भवन्ति। एतद्द्योतनाय प्रत्येकस्मात् प्रकथनात् परामर्शाद् वा पूर्वं 'स्यात्'पदमवश्यं योजनीयमिति जैनाचार्याणां सुचिन्तितमतमस्ति। अस्यैव सापेक्ष्यसत्यस्य सूचनं करोति स्याच्छब्दः। स्यात्पदतात्पर्यं प्रकाशयता लिखितं सर्वदर्शनसङ्ग्रहकारेण माधवाचार्येणापि[२]—'स्याच्छब्दः खल्वयं निपातस्तिङन्तप्रतिरूपकोऽनेकान्तद्योतकः। यथोक्तम्—वाक्येष्वनेकान्तद्योती गम्यं प्रति विशेषणम्। स्यान्निपातोऽर्थयोगित्वात्तिङन्तप्रतिरूपकः। यदि पुनः एकान्तद्योतकोऽयं स्याच्छब्दः स्यात्तदा स्यादस्तीति वाक्ये स्यात्पदमनर्थकं स्यात्। अनेकान्तद्योतकत्वे तु

१. भारतीय दर्शन (चटर्जी और दत्त), ७३तमे पृष्ठे।
२. सर्वदर्शनसङ्ग्रहे, आर्हतप्रकरणे १४९ पृष्ठे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यादस्ति कथञ्चिदस्तीति स्यात्पदात्कथञ्चिदयमर्थो लभ्यत इति नानर्थक्यम्। तदाह—

स्याद्वादः सर्वथैकान्तत्यागात् किं वृत्तचिद्विधेः।
सप्तभङ्गिनयापेक्षो हेयादेयविशेषकृत्।।

अतः परं समासेन सप्तभङ्गीनयः प्रस्तूयते—

१. स्यादस्ति (सापेक्षतया वस्त्वस्ति)
२. स्यान्नास्ति (सापेक्षतया वस्तु नास्ति)
३. स्यादस्ति च नास्ति च (सापेक्षतया वस्तु नास्ति चास्ति च)
४. स्यादवक्तव्यम् (सापेक्षतया वस्त्ववक्तव्यमस्ति)
५. स्यादस्ति चावक्तव्यञ्च (सापेक्ष्यतया वस्त्वस्त्यवक्तव्यञ्चास्ति)
६. स्यान्नास्ति चावक्तव्यञ्च (सापेक्षतया वस्तु नास्त्यवक्तव्यञ्चास्ति)
७. स्यादस्ति च नास्ति चावक्तव्यञ्च (सापेक्षतया वस्त्वस्ति नास्त्यवक्तव्यञ्चास्ति।

अतः परं क्रमशः सप्तानामेतेषां समासेन विस्तारो विधीयते।

१. स्यादस्ति

सर्वेषामेतेषां सप्तपरामर्शानां जैनपरम्परायां 'नय' इत्यपरा संज्ञा वर्तते। जैनतार्किकाः प्रत्येकनयेन सह स्यादिति पदं योजयन्ति। स्यात्पदेनेदमेवाभिप्रेतं यत् कोऽपि नयः परामर्शो वैकान्तिकरूपेण निरपेक्षरूपेण वा सत्यसंवलितो न वर्ततेऽपि त्वापेक्षिको भवति। घटोऽस्ति वाचकनयप्रयोग इत्थं जायते—स्याद् घटोऽस्ति। अत्र स्यात्पदेन घटस्य स्थान-काल-वर्णादीनां सङ्केतो जायते। स्याद् घटो रक्तोऽस्ति। एतेनेदं बोध्यते यद् घटः सर्वकालस्य कृते रक्तो नास्ति, अपि तु कस्मिंश्चिद् विशेषसमये परिस्थितौ वा रक्तोऽस्ति। अत्रेदमपि बोध्यते यद् एतस्य रक्तवर्णो विशिष्टप्रकारकोऽस्ति। जैनदार्शनिकानां मान्यतानुसारमस्ति-बोधकपरामर्शानां सामान्यस्वरूपं 'स्यादस्ति' इत्येवमस्ति।

२. स्यान्नास्ति

घटसम्बन्धे नास्तिबोधकपरामर्शस्वरूपमित्थं भवेत्—स्याद् घटोऽस्मिन् प्रकोष्ठे नास्ति। एतस्य तात्पर्यमिदं नास्ति यत् प्रकोष्ठाभ्यन्तरे कोऽपि घटो नास्ति स्थातुं वा न शक्नोति। अत्र स्यात्पदेनेदमेव द्योत्यते यद् यस्य घटस्य परामर्शो जायते स घटोऽत्र नास्तीति। विशेषवर्णाकृतिविशिष्टो घटोऽस्मिन् समयेऽस्मिन्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकोष्ठे नास्तीति भावः। यद्यत्र स्यात्पदप्रयोगो न क्रियेत चेत्, कस्यापि घटस्य बोधः सम्भवति। प्रकारान्तरेणापि ज्ञातुं शक्यते। तद्यथा—स्याद् घटः कृष्णो नास्ति, एतत्तात्पर्यं तु कश्चन विशेषघटो विशेषस्थाने काले च कृष्णो नास्ति। इत्थं नास्ति-बोधकपरामर्शेष्वपि स्यात्पदप्रयोगः परमावश्यको वर्तते। एतत्परामर्शस्य सामान्यं रूपं स्यान्नास्तीत्येवमस्ति।

३. स्यादस्ति च नास्ति च

घटः कदाचिद् रक्तवर्णो भवितुमर्हति, कदाचिच्चान्यवर्णः। एतद् व्यक्तीकरणाय मिश्रवाक्यस्य संयुक्तपरामर्शोऽपेक्ष्यते। घटो रक्तवर्णोऽस्ति, घटो रक्तवर्णो नास्ति। स्यादस्ति च नास्ति चानेन परामर्शेनास्तित्वमनास्तित्वञ्चोभयमपि सकृदेव सूच्यते। जैनतार्किकाणामयं तृतीयपरामर्शोऽस्ति। अनेन कस्यापि वस्तुनो नास्तित्वास्तित्वसम्बन्धे सकृदेव बोधो जायते। पदार्थानां विभिन्नदृष्ट्या विचारार्थमयं प्रकारभेद आवश्यक इति जैनदार्शनिका मन्वते।

४. स्यादवक्तव्यम्

यदा सम्यक्तया घटस्य पाको न जायते, तत्र किञ्चित् कृष्णांशस्तिष्ठति। यदा च घटस्य पूर्णपाको जायते, तदा तत्र रक्तवर्णः सम्यक् परिस्फुरति। अत्र यदि घटस्य सर्वावस्थासु सर्वसमयेषु च कः वर्ण इत्येवंविधं प्रश्नं कोऽपि कुर्यात्, तदेदमेवोत्तरं प्रदातुं शक्यते यद् अस्यामवस्थायां घटवर्णसम्बन्धे किमपि वक्तुं न शक्यते। अतो हेतोर्यस्मिन् परामर्शे परस्परविरोधिगुणानां युगपद् विचारः करणीयो भवेत्, तद्यथार्थरूपं स्यादवक्तव्यमिति युज्यते। अयञ्च जैनानां चतुर्थपरामर्शो विद्यते। दार्शनिकदृष्ट्या चतुर्थपरामर्शस्य स्वरूपमतीव महत्त्वपूर्णमस्ति। अस्य मूलरहस्यमिदमेवास्ति यद् विभिन्नानामवस्थानां दृष्टीनाञ्च दृष्ट्यैव कस्यापि वस्तुनो यत्किमपि वर्णनं सम्भवति। एवं न कृत्वा कोऽपि यदि युगपद् वस्तुवर्णने प्रवर्तेत तदा साफल्यं नाधिगच्छति। तत्रावश्यं वस्तुनोऽवक्तव्यता स्वीकर्तव्या भविष्यति। पुनश्चेदं तथ्यमप्यवगन्तव्यं यत् सर्वेषां प्रश्नानामस्तिनास्तिमूलकोत्तरदानमेव नास्ति पटुत्वं चातुर्यं वा दार्शनिकानाम्। दार्शनिकैरिदमप्यवगन्तव्यं यद् बहव एवंविधा प्रश्ना भवन्ति येषामुत्तरं न दातुं शक्यते। जैनदार्शनिकास्तर्कविरोधं दोषत्वेन स्वीकुर्वन्ति। तन्मत एकस्मिन् वस्तुनि सकृत् परस्परविरुद्धधर्माणां प्रयोगो न कर्तुं शक्यते।

सप्तभङ्गिनयेषु चत्वार एव भवन्ति मुख्यनयाः, अपरे त्रयो नयास्तु चतुर्णां नयानां मिश्रणेन समुत्पद्यन्ते। प्रथम-द्वितीय-तृतीयनयानन्तरं पृथक्-पृथक्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुर्थनययोगे कृते क्रमशः पञ्चम-षष्ठ-सप्तमनया जायन्ते। तेषामपि समासेनात्र प्रस्तुतिर्विधीयते—

५. स्यादस्ति चावक्तव्यञ्च

कयाचिद् विशेषदृष्ट्या घटो रक्तवर्णयुतोऽस्तीति वक्तुं शक्यते। परन्तु दृष्टेः स्पष्टनिर्देशनं विना तु घटवर्णवर्णनमसम्भवमेव सम्पद्यते। अतो व्यापकदृष्ट्या घटो रक्तोऽस्ति। एतेन सहैवात्रावक्तव्यमपि राजते। अयमेवास्ति पञ्चमो नयः।

६. स्यान्नास्ति चावक्तव्यञ्च

द्वितीयचतुर्थनययोः क्रमिकसंयोजनेन षष्ठो नयो जनिं लभते। कयाचिद् दृष्ट्या रक्तवर्णो नास्ति, अवक्तव्यञ्चास्ति।

७. स्यादस्ति च नास्ति चावक्तव्यञ्च

एवमेव तृतीयचतुर्थनययोः संयोजनेन सप्तमनयस्योत्पत्तिर्जायते। अत्रापि दृष्टिभेदेनास्तिनास्त्यवक्तव्यानां पृथक्-पृथक् सम्भावना जायते।

स्याद्वादसमालोचना

जैनेतरभारतीयदार्शनिकाः 'स्यात्'पदस्य 'सम्भवतः' इत्यर्थं स्वीकृत्य संशयवादी अयमित्याक्षेपपुरःसरं जैनानां कट्वालोचनां विदधति। बौद्धै-र्वेदान्तिभिश्चायं वादो बहुधा खण्डितः। तन्मते सत्त्वासत्त्वप्रभृतीनां विरोधिधर्माणामेकत्र स्थितिर्न सम्भवति। प्रकाशान्धकारौ कथमेकस्मिन् स्थाने स्थातुं शक्नुतः। अतः स्याद्वादोऽयं विरुद्धवाक्यानां समूह एवास्ति।

अत्र तावज्जैनदर्शनपक्षतो विचार्यते चेत् समालोचनेयं न सत्यसंवलिता वर्तते। यतो हि स्याद्वादसिद्धान्तोऽयं संशयवादो न, अपि तु सापेक्ष्यवादोऽस्ति। जैनदार्शनिकैरेतत् कदापि नोक्तं यद् वस्तुषु परस्परविरुद्धधर्मा एकयैव दृष्ट्या एकस्मिन्नेवार्थे भवन्तीति। इदं सत्यमस्ति यद् वस्तु अनन्तधर्मात्मकं भवति, तत्र परस्परविरुद्धधर्मा अपि राजन्ते। यतो हि वस्तूनामयं स्वाभावोऽस्ति। अस्मज्ज्ञान-स्यांशिकत्वात् सापेक्षत्वाच्च दृष्टिविशेषेणैव वस्तुधर्मा ज्ञायन्ते। न्यायवाक्येषु तेषामेवाभिव्यक्तिः क्रियते। यथा हि—द्रव्यदृष्ट्या वस्तुषु एकता नित्यता पर्यायदृष्ट्या चानेकतानित्यतादीनां सापेक्षतया विधानं क्रियते स्याद्वादसिद्धान्तेन। स्वद्रव्य-रूपदेशकालदृष्ट्या वस्तुनः सत्तायास्तथा च परद्रव्यरूपदेशकालदृष्ट्या वस्तुनोऽ-सत्तायाः सापेक्षतया विधानं क्रियते।[1] अतः स्याद्वादे विरोधकल्पनं नोचितम्।

१. स्वरूपद्रव्यक्षेत्रकालभावैः सत्त्वम्, पररूपद्रव्यक्षेत्रकालभावैःतदसत्त्वम्, तदा क्व विरोधावकाशः? भारतीय दर्शन (आलोचन एवं अनुशीलन), ३५ पृ., सी. डी. शर्मणाप्युद्धृतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बन्ध-मोक्षौ

कर्म भौतिकं पौद्गलिकञ्चास्ति। कर्मपुद्गलैर्जीवग्रहणं बन्धः, कर्मपुद्गलेभ्यो जीवानां सर्वथा निवृत्तिश्च मोक्षो वर्तते। जैनदर्शने कर्मणां मुख्या अष्टौ प्रकाराः वर्णिताः। ते च ज्ञानावरणीय-दर्शनावरणीय-मोहनीय-वेदनीय-आयुष्य-नाम-गोत्र-अन्तरायनाम्ना प्रसिद्धाः सन्ति। एतानि भोग्यजगता भोगायतनशरीरेण च जीवसम्बन्धकारकाणि भवन्ति। जीवः स्वभावत एव मुक्तो भवति; किन्त्वनाद्यविद्यावासनाकारणाद् बन्धने पतति। बन्धनान्यपि पञ्चप्रकारकाणि भवन्ति। तानि च मिथ्यात्व-अविरति-प्रमाद-कषाय-योगाख्यानि सन्ति। कषायाणां कारणादेव जीवः कर्मपुद्गलान् गृह्णाति, ये च तत्र प्रविश्य तत्राधिकारं कुर्वन्ति। अयमेव जीवबन्ध इत्युच्यते। सर्वेषां कर्मणामात्यन्तिकक्षय एव मोक्षो वर्तते[1]। जीवेन सह कर्मणः संयोगवियोगौ दर्शयितुं जैनदर्शने पञ्चपदार्थानां निरूपणं विधीयते। ते च पदार्थाः सन्ति—आस्रव-बन्ध-संवर-निर्जरा-मोक्षाख्याः। एभिर्जीवाजीवमेलनेन पदार्थसंख्या सप्त सञ्जायते। पुण्यपापयोः संयोजनेन तु नव संख्याऽत्र जायते। जैनसम्प्रदाये 'आस्रव'शब्दार्थो वर्तते प्रवाहः। कर्मपुद्गलानां जीवं प्रति प्रवाहः। भावास्रव-द्रव्यास्रवभेदेनास्रवस्यापि भवति द्वैविध्यम्।

जीवेषु कर्मोत्पादकरागादिभावानामुदयस्तथा च मानसिक-वाचिक-कायिक-क्रियाणां सङ्कल्पो भावास्रवोऽस्ति, कर्मपुद्गलानां जीवं प्रति जायमानप्रवाहस्तु द्रव्यास्रव इत्युच्यते। यदैते कर्मपुद्गला जीवं प्रविश्य तमधिकुर्वन्ति तदेयं जीवस्य बद्धसंज्ञा जायते। भावबन्ध-द्रव्यबन्धभेदेन बन्धस्यापि प्रकारद्वयं भवति। कषायस्य कर्मणश्चोदयो भावबन्धो भवति। कर्मपुद्गलानां जीवप्रवेशस्तन्निग्रहश्च द्रव्यबन्ध इति संज्ञां लभते। सकृत् कर्मप्रवाहे पतिते कर्मचक्रं निरन्तरं प्रवाहितं जायते। यावदेतेषां निरोधाय चेष्टा न क्रियते, तावत् कर्मप्रवाहोऽयमविरतमनादिरूपेण प्रचलति। स्वप्रयत्नद्वारा करिष्यमाणकर्मनिरोधः 'संवरः' इत्युच्यते। कर्मप्रवाहमार्गस्योद्घाटनमास्रवः, मार्गावरोधश्च 'संवरः'। द्वारपिधाने जाते जीवे नवकर्मप्रवेशो न जायते। तत्र स्थितानां प्राचीनकर्मणां विनाशार्थं 'निर्जरायाः' समाश्रयणं विधेयम्। जीवे विद्यमानकर्ममलं दर्शनज्ञानचरित्रस्य घर्षणेन सर्वथा अपसार्यते। एवं रीत्या यदा सर्वसञ्चितकर्मणां बीजानि नश्यन्ति, तदा जीवः स्ववास्तविकस्थितौ समायाति। जैनदर्शनदृष्ट्येयमेव मोक्षस्थितिः। इयमेव च केवलज्ञानप्राप्तिरस्ति[2]। सम्यग्दर्शनज्ञानचारित्राणि मोक्षप्राप्तिसाधनानि वर्तन्ते। जैनमार्गावलम्बिनां कृते

१. कृत्स्नकर्मक्षयो मोक्षः—तत्वार्थसूत्रे—१०.३।
२. सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः—तत्त्वार्थसूत्रे १.१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जिनोक्तशास्त्रसिद्धान्तान् प्रति गभीरा निष्ठा परमावश्यकी। एतदेव सम्यग्दर्शनमित्युच्यते। एतेषां ज्ञानमेव यथार्थज्ञानम्, तथा चैतेषां पालनं सम्यक्चारित्रमित्युच्यते। एतानि त्रीण्यङ्गानि त्रिरत्ननाम्ना विख्यातानि सम्मिलितरूपेण मोक्षमार्गरूपाणि सन्ति। सम्यक्चारित्र्यस्य कृते पञ्चव्रतपालन-मावश्यकमस्ति, पञ्चव्रतानि च सन्त्यहिंसासत्यमस्त्येयब्रह्मचर्यापरिग्रहाः। जैनमुनीनां कृते.. कठोरतया पञ्चव्रतानां पालनमावश्यकमस्ति। अतो व्रतान्येतानि मुनीनां कृते महाव्रतानि, गृहस्थानां कृते च अणुव्रतानि कथ्यन्ते। गृहस्थानां नियमेषु किञ्चिच्छैथिल्यं विधीयते। तत्कृते ब्रह्मचर्यनियमो धर्मानुकूलकामसेवने परिणतः। मुमुक्षोर्मोक्षाधिगमायानुस्त्रियमाणसाधनामार्गस्य बहूनि सोपानानि सन्ति। जैनदर्शन-मेतेषां गुणस्थानमिति विख्याता संज्ञा वर्तते। आहत्यैतेषां चतुर्दश संख्या भवति। एतेषां सम्यगभ्यासेन पुरुषः संयोगकेवलीमसंयोगकेवलीं च स्थितिं विलङ्घ्य मोक्षाख्यां परमां स्थितिं लभते। जैनमतानुसारमात्मस्वरूपे स्थितो जनः सिद्धशिलानामकपवित्रस्थलेऽनन्तचतुष्टयानुभवं कुर्वन् विराजते।

उपसंहारः

इत्थं भारतीयदर्शनेषु जैनदर्शनस्य महत्त्वपूर्णं स्थानमस्ति। समस्ते भारतेऽहिंसायाः सन्देशप्रसारणे जैनानामेवास्ति प्रमुखं योगदानम्। ऐतिहासिकदृष्ट्याऽपीत्थमेव प्रमाणितं जायते यज्जैना ईशापूर्वकालत एव 'अहिंसा-सत्यमस्त्येयब्रह्मचर्यापरिग्रहाः' इत्येतेषां महाव्रतानां प्रचार-प्रसारपरायणा अवर्तन्त। अत एव केचन विद्वांस एवमपि प्रतिपादयन्ति यद् वैदिकानां यो हि अहिंसाभावः सम्प्रति विलोक्यते तस्य मूलं जैना एव। विषयोऽयं महत्त्वपूर्णो विचारणीयश्च वर्तते। विस्तरभयादत्र नाधिकं विचार्यते।

अथ चेशायाः प्रथमशताब्दीतो दशमशताब्दीं यावद् भारतवर्षे बहूनां दर्शनानां प्रचलनमभवत्। परस्परखण्डन-मण्डनप्रक्रियया एतेषां दर्शनानां चरमो विकासः समजायत। खण्डन-मण्डनयोः क्रमो वैदिकावैदिकयोर्द्वैत्यद्वैतिनोर्मध्ये परम्परागतक्रमेण बहूनि वर्षाणि प्राचलत्। दार्शनिकखण्डनमण्डनक्रमे यदा कदा कटुताया भावोऽपि वृद्धिंगतो दरीदृश्यते। अत एव 'हस्तिना ताड्यमानोऽपि न गच्छेज्जैनमन्दिरम्' इति वैदिकानामुक्तिः प्रसिद्धिमत्राप। एवमेव बौद्धानां कृतेऽपि—'देवानां प्रिय इति च मूर्खे' इति व्याकरणनियमो व्यरचि तत्प्रतिपक्षिभिः। अस्यां विकटायां विभ्रमकारिण्यां स्थितौ यदि शान्तचेतसा, निश्छलेन मनसा विचिन्त्यते तदा जैनदर्शनस्य महद्वैशिष्ट्यं दृष्टिपथमायास्यति। यतो हि जगति जनानां शास्त्राणाञ्च परस्परं विवादस्यैक एव हेतुर्भवति, स च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वश्रेष्ठत्वसाधनमेव। अपरोऽपि जनः किमपि ब्रूते, तस्यापि मतं समीचीनं भवितुमर्हति तस्मात्तद्वाक्यमपि श्रोतव्यमिति न केनापि सिद्धान्तितम्। जनो मनुते यदहं करोमि तदेव कर्म, यदहं ब्रवीमि स एव धर्मः, यदहमाचरामि तदेवाचरणमिति। जनानां मूढतामिमां सूचयतोक्तं केनापि जैनविदुषा—

हा कीदृग् मूढता हीयं यन्मतं मत्प्रतिश्रुतम्।
सर्वेऽपि प्रतिपद्येरन् संशयीरन्न केचन।।

अयं दोषो जगति प्रच्छन्नतया सर्वत्र व्याप्तो वर्तते। जनः सर्वान् स्वानुकूलान् कर्तुं चेष्टते। विभिन्नधर्मोपासका विश्वसन्ति यत् तद्धर्माचरणेनैव संसारान्मुक्तिर्जायत इति। तेषामेव धर्मग्रन्थाः प्रामाणिका भगवन्मुखात् साक्षात् समुद्भूता इति। यद्यपि शास्त्रकाराः प्रवृत्तिमिमां निन्दन्ति, परमाचरणावस्थायां तेऽपि प्रकृतिनिहता प्रकृतमेवानुसरन्ति। श्रीमद्भगवद्गीतायामासुरव्यवहारस्य लक्षणानीत्थं प्रतिपादितानि—

इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम्।
इदमस्तीदमपि मे भविष्यति पुनर्धनम्।।

असौ मया हतः शत्रुर्हनिष्ये चापरानपि।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी।।

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया।
यक्षे दास्यामि मोदिष्य इत्यज्ञानविमोहिताः[1] ।।

यद्येतस्य कथनस्य परीक्षणं सम्यक्तया क्रियेत, तदा कियन्तो दैवीसम्पद्युता जना मिलेयुरिति चिन्तनीयो विषयः। अस्यां परमविषमायां परिस्थितावपि जैनदर्शनेन सर्वैः सह मित्रतास्थापनाय महान् प्रयत्नः कृतः। अन्यकथनमपि श्रोतव्यमित्यभिनवः सिद्धान्तो जैनैरेव समाविष्कृतः।

जैनैः स्याद्वादनामकं यत्तत्त्वं जगत्समक्षं प्रस्तुतं तस्योदाहरणं जैनातिरिक्तं क्वापि न लभ्यते। स्याद्वादसाहाय्येन सर्वेषां भारतीयदर्शनानां समन्वयः कर्तुं शक्यते। न केवलं भारतीयदर्शनानामेव, अपि तु जगतीतले या कापि दार्शनिक-समस्या वर्तते, तस्याः समाधानायापि स्याद्वादपद्धतिः सुतरामुपयोगिनी सेत्स्यति। कस्मिन्नपि शास्त्रार्थे वादविवादे वा यदा परस्य पक्षस्य विचारा ध्यानपूर्वकं श्रूयन्ते, तन्मान्यतादिशा तस्यार्थो विचार्यते चेद् ' विरोधाः स्वतः शिथिलाः सन्तोऽस्तं

१. श्रीमद्भगवद्गीता—१६.१३-१५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गच्छन्ति। विरोधस्यापरं प्रमुखं कारणं भवति स्वदर्शनमान्यतानुसारं परपक्षमूल्याङ्कनम्। यथा वेदान्तदृष्ट्या न्यायमूल्याङ्कनम्। वेदान्तेऽप्यद्वैतदिशा द्वैतमूल्याङ्कनम्। यस्य दर्शनस्य तत्त्वं प्रतिपाद्यते तत्परम्पराभावितनेत्रेण यदि तद् दृश्यते, तदा तत्र विरोधावकाशो नैव जायते। इमां विकटामसमाधेयां दार्शनिक-समस्यामधिकृत्यैव मन्ये जैनैः स्याद्वादस्य समुद्भावना कृता। स्याद्वाद-सिद्धान्तबलादेव कश्चन जैनदार्शनिको वदति––

भवबीजाङ्कुरजनना रागाद्याक्षयमुपागता यस्य।
हरो वा विष्णुर्वा जिनो वा नमस्तस्मै।।

जैनानामेतन्मार्गप्रभावितैर्वैदिकैरपि गौतमो बुद्धश्चतुर्विंशत्यवतारेषु सम्मेलितः। बौद्धाश्च केचन वैदिकान् प्रति—'तेषामल्पापराधस्तु विज्ञानं नित्यतोक्तितः' इति समुद्गिरन्तोऽवलोकिताः। एतस्याः समन्वयात्मकपद्धतेर्जनकास्तु जैना एव। यथोपनिषदि एकस्मिन् विज्ञाते सर्वं विज्ञातं भवतीत्युच्यते, एवमेव जैना अपि स्पष्टमुद्गिरन्ति—

एको भावः सर्वथा येन दृष्टः
सर्वे भावाः सर्वथा तेन दृष्टाः।
सर्वे भावाः सर्वथा येन दृष्टा
एको भावः सर्वथा तेन दृष्टः।।

इत्थं समालोडनेन भारतीयदर्शनेषु जैनदर्शनस्यानितरसाधारणं वैशिष्ट्यं सिध्यति। जैनदर्शनसाहाय्येन भारतीयं दर्शनं विश्वदार्शनिकमञ्चेऽपि कांश्चन महनीयाननुकरणीयांश्च विचारान् समुपस्थापयितुं क्षमते।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवभूतिनाट्यसाहित्ये गुम्फिता पर्यावरणचेतना

डॉ. बालकृष्णशर्मा
साहित्यविभागाध्यक्षः
शासकीय-संस्कृत-महाविद्यालयः
ग्वालियरनगरम् (म.प्र.)

***

कविताकामिनीकान्तो मधुरोदात्तपदावलीप्रयोगनिष्णातः पदवाक्यप्रमाण-पारावारीणो गभीरार्थनिर्भररूपकरचनाप्रवीणः सुकुमारकल्पनाकुशलो विपुल-शब्दकोशान्वितो वैदग्ध्यभङ्गिमामण्डितः सहृदयपण्डितो भूतार्थवादी सन्नप्यादर्शवादपोषकः करुणरसपरिपाकपटुः क्रान्तदर्शी लोकपरम्परासमर्थकः संस्कृतसाहित्यविभूतिः महाकविभवभूतिः सुरभारतीसाहित्यकविष्वन्यतम इत्यत्र नास्ति शङ्काया अवसरः। कविपुङ्गवेनानेन प्रणीतानि महावीरचरितम्, मालतीमाधवम्, उत्तररामचरितमित्याख्यानि त्रीणि रूपकाणि संस्कृतनाट्यसाहित्ये परमप्रथितानि सन्तीति सुविदितमेव सहृदयानां विदुषाञ्च। एतेषु रूपकेषु न केवलं नाट्यवैशिष्ट्यानि कमनीयतया सहृदयहृदयावर्जकरूपे वा विन्यस्तानि सन्ति, अपि तु रसगुणालङ्कारप्रभृतिकाव्यवैशिष्ट्यान्यपि प्रचुरतया प्रभाविरूपेण चोपनिबद्धानि सन्ति। एतेषां रूपकाणां परिशीलनेन प्रतिभाति यत् कविरसौ लोकोत्तरप्रतिभासमन्वितो निसर्गचेतनाचमत्कृतश्च पदे पदे प्रकृतिचित्रणेन सूक्ष्मनिरीक्षणसापेक्षेण प्रमाणयति स्वीयामसामान्यां पर्यावरणचेतनाम्। अतः कवेरस्य नाट्यसाहित्ये गुम्फितां पर्यावरणचेतनामधिकृत्य विवेचनं प्रस्तोतुमेवैष उपक्रमः।

तत्र सर्वप्रथमं विचारणीयमस्ति यत् किमिदं पर्यावरणं नाम? सन्दर्भेऽस्मिन् यदा चिन्तनं क्रियते, तदा प्रतिभाति यदस्मान् परितो यदावरणं तदेव पर्यावरणपदेन संज्ञायते। एतानि तत्त्वानि सन्ति वायुजलपृथ्वीतेजोगगनाख्यानि पञ्चमहाभूतानि, वनस्पतयः, ओषधयः, जलचरखेचरसरीसृपकीटादयो जन्तवः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र सूक्ष्मनिरीक्षणदक्षा कवेर्दृष्टि: प्रदरोदरेषु विद्यमानं स्वल्पं जलमपि ग्रहीतुं शक्नोति, का कथा पुन: विशालवस्तूनां ग्रहणस्य वर्णनस्य वा? एवमेव निर्झरिणीनां वर्णनावसरे कवि: समदखगाक्रान्तवानीरलतामेव केवलं न स्मरति, अपि तु तासां पुष्पगन्धै: सुरभितशीतलस्वच्छजलमपि स्मरति फलभरपरिणामश्यामजम्बूकनिकुञ्जानपि चोल्लिखति। तद्यथा—

'इह समदशकुन्ताक्रान्तवानीरवीरुत्-
प्रसवसुरभिशीतस्वच्छतोया वहन्ति।
फलभरपरिणामश्यामजम्बूनिकुञ्ज-
स्खलनमुखरभूरिस्त्रोतसो निर्झरिण्य:'[१]।।

अत्रैव प्रकृते: कोमलकठोरोभयो रूपयोर्वर्णने समानरूपेण दक्षो महाकविर्भवभूतिरेकत्र कुहरभाजां भल्लूकयूनामम्बूकृतानि सूक्ष्मेक्षिकया वर्णयति, अपरत्र च सल्लकीनां शिशिरकटुकषायमिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धं कमनीयतया सफलतया च निबध्नाति, येन तस्य प्रकृष्टा पर्यावरणचेतना पदं प्राप्नोति। यद्यथा—

'दधति कुहरभाजामत्र भल्लूकयूना-
मनुरसितगुरूणि स्त्यानमम्बूकृतानि।
शिशिरकटुकषाय: स्त्यायते सल्लकीना-
मिभदलितविकीर्णग्रन्थिनिष्यन्दगन्ध:'[२]।।

एकत्र पर्यावरणनिरीक्षणचमत्कृतचित्त: कवि: खगानां कोयष्टिकपूर्णिकादात्यूहकुक्कुभादीनां सूक्ष्मनिरीक्षणसापेक्षं वर्णनं कुर्वन् स्वकीयां परिपक्वपर्यावरणचेतनां प्रमाणयति। तद्यथा—

'काश्मर्या: कृतमालमुद्गतदलं कोयष्टिकष्टीकते
तीराश्मन्तकशिम्बिचुम्बितमुखा धावन्त्यप:पूर्णिका:।
दात्यूहैस्तिनिशस्य कोटरवति स्कन्धे निलीय स्थितं
वीरुन्नीडकपोतकूजितमनुक्रन्दन्त्यध: कुक्कुभा:'[३]।।

१. उत्तररामचरिते–२.२०, महावीरचरिते–५.४०।
२. उत्तररामचरिते–२.२१, महावीरचरिते–५.४१, मालतीमाधवे–९.६।
३. मालतीमाधवे ९.७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्यत्र महाकविरसौ क्रौञ्चावतगिरिं वर्णयन् कूजत्कुञ्जकुटीरकौशिकघटाघूत्कारं तु स्मरत्येव कीचकस्तम्बाडम्बरमूकमौकुलिकुलमपि न विस्मरति। अपि चात्रैव प्रचलतां प्रचलाकिनां कूजितैरुद्वेजितान् पुराणरोहिणतरुस्कन्धेषु उद्वेल्लनपरान् कुम्भीनसान् अपि अभिनिवेशपूर्वकं प्रस्तौति। तद्यथा—

'कूजत्कुञ्जकुटीरकौशिकघटाघूत्कारवत्कीचक-
स्तम्बाडम्बरमूकमौकुलिकुलः क्रौञ्चावतोऽयं गिरिः।
एतस्मिन् प्रचलाकिनां प्रचलतामुद्वेजिताः कूजितै-
रुद्वेल्लन्ति पुराणरोहिततरुस्कन्धेषु कुम्भीनसाः'[१]।।

अपि च गद्गदनदद्गोदावरीवारिकुहरान् मेघालम्बितमौलिनीलशिखरान् दाक्षिणान् पर्वतानत्रैव स्मरति कविः, अन्योन्यप्रतिघातसङ्कुलचलत्कल्लोल-कोलाहलैरुत्तालान् गभीरपयसः पुण्यसरित्सङ्गमान् च न विस्मरति, येन कविहृदयनिष्ठा नदीपर्वतविषयिका पर्यावरणचेतना सुष्ठुरूपेणाभिव्यक्ता भवति। तद्यथा—

'एते ते कुहरेषु गद्गदनदद्गोदावरीवारयो
मेघालम्बितमौलिनीलशिखराः क्षोणीभृतो दाक्षिणाः।
अन्योन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलै-
रुत्तालास्त इमे गभीरपयसः पुण्याः सरित्सङ्गमाः'[२]।।

पर्यावरणघटकानां नदीपर्वतकाननादीनां सूक्ष्मनिरीक्षणपटिष्ठो महा-कविर्भवभूतिः प्रकृतेः परिवर्तनान्यपि सूक्ष्मेक्षिकया गृह्णाति प्रस्तौति च। तद्यथा—

'पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्यासं यातो घनविरलभावः क्षितिरुहाम्।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति'[३]।।

१. उत्तररामचरिते–२.२९, मालतीमाधवे–५.१९।
२. उत्तररामचरिते–२.३०।
३. तत्रैव–२.२७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनेन प्रकारेण प्रतिभाति यद् महाकविर्भवभूतिः पर्यावरणचेतना-भावितहृदयो भूत्वा पदे पदे यथाप्रसङ्गं प्रकृतिचित्रणं पर्यावरणघटकजलवायुप्रभृतीनां विन्यासं लतापादपपुष्पफलमूलौषधिप्रभृतीनां कमनीयवर्णनं जलचरखेचर-भूचरजीवजन्तूनां सरीसृपादीनां निबन्धनं नदीपर्वतनिर्झरकाननादीनाञ्च सहृदयहृदयाह्लादिकामभिव्यक्तिं करोति त्रिष्वेव स्वरूपकेषु, येनास्य रूपकसाहित्यं पर्यावरणचेतनानिर्भरं प्रतिभाति। कवे रूपकेषु समुपनिबद्धां पर्यावरणचेतनां नैकेषु वर्गेषु पृथक्कृत्य प्रस्तोतुं शक्यते। तद्यथा—(१) महाभूतसम्बद्धा पर्यावरणचेतना, (२) प्राणिजातसम्बद्धा पर्यावरणचेतना, (३) वनस्पतिजातमोषधिजातञ्चाधिकृत्य विन्यस्ता पर्यावरणचेतना, (४) निसर्गघटकजातसम्बद्धा पर्यावरणचेतना, (५) शिष्टवस्तुजातसम्बद्धा पर्यावरणचेतना च। अत्र समासेनैतेषामेकैकशः सोदाहरणं विवेचनं प्रस्तूयते।

महाभूतसम्बद्धा पर्यावरणचेतना

निखिलनिसर्गसर्गः प्रधानतया स्थूलरूपेण वा पञ्चमहाभूतात्मको भवति। पञ्चमहाभूतेषु भूमिजलाग्निवायुगगनानां गणना क्रियते। पर्यावरणघटकेषु पञ्चमहाभूतानामेतेषां विद्यते प्राधान्यम्। एतावता यदा पर्यावरणचेतनामधिकृत्य चिन्तनं विधीयते तदा पञ्चमहाभूतानां प्रसङ्गः प्राथम्येनोपस्थितो भवति। महाकविभवभूतिः स्वरूपकेषु पञ्चमहाभूतानां चित्रणे तैः सम्बद्धां पर्यावरणचेतनाञ्च स्वीयां प्रस्तोतुं सन्नद्धः प्रतिभाति। तस्य जलविषयिका चेतना वह्निविषयिका च चेतना एकत्रैव श्लोकेऽस्मिन् विन्यस्ते स्तः। तद्यथा—

'उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः।
तीर्थोदकश्च वह्निश्च नान्यतः शुद्धिमर्हतः'[१]।।

एवमेवोत्तररामचरितनाटके कविः सीतासंरक्षणतत्परां पृथिवीं गङ्गाञ्च प्रस्तौति येन तस्य धराविषयिका पर्यावरणचेतना जलविषयिका च पर्यावरणचेतना स्फुटीभवतः। पृथिवीभागीरथ्योः कथनेऽस्मिन् भवभूतिः स्वीयां पृथ्वीजलविषयिकां चेतनां सुष्ठुरूपेण निबध्नाति। तद्यथा—

'जगन्मङ्गलमात्मानं कथं त्वमवमन्यसे।
आवयोरपि यत्सङ्गात् पवित्रत्वं प्रकृष्यते'[२]।।

१. उत्तररामचरिते–१.१३।
२. तत्रैव–७.८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकत्र नाटकेऽस्मिन् कविः शीकरक्षोदशीतं पद्मकिञ्जल्कगन्धाकर्षणपरं वीचीवायुं चित्रयन् स्वीयां वायुविषयिकां पर्यावरणचेतनां प्रस्तौति। तद्यथा—

'वीचीवातैः शीकरक्षोदशीतैराकर्षद्भिः पद्मकिञ्जल्कगन्धान्।
मोहे मोहे रामभद्रस्य जीवं स्वैरं स्वैरं प्रेरितैस्तर्पयेति'[१]।।

एवं प्रकारेण प्रतीयते यत् कविरसौ पर्यावरणचेतनाचित्रणनिष्णातः क्वचिज्जलस्य दैवीं महत्तां प्रतिपादयति, क्वचिद् धराया लोकोत्तरमाहात्म्यं प्रस्तौति, क्वचिच्च वसुन्धरावायुगगनानां चमत्कारं निरूपयति येनास्य पञ्चमहाभूतविषयिका पर्यावरणचेतना परिपुष्टा भवति।

प्राणिजातान्विता पर्यावरणचेतना

संस्कृतकवयः प्राणिजातमधिकृत्य वृत्तनिबन्धने सदैव तत्परा दृश्यन्ते। तेषां हृदये मनसि वा प्राणिवर्गं प्रति परा संवेदना विराजते। ते बलाकावर्णनेन राजहंसवर्णनेन वा वर्षां व्यञ्जयन्ति, भल्लूकघूत्कारेण काननस्य भयानकत्वं निरूपयन्ति, कोकिलरवेण वसन्तस्यागमनं वर्णयन्ति, मयूरनृत्यनिबन्धनेन घनसञ्चरणं प्रस्तुवन्ति, कुलायं प्रति आगच्छतः खगान् वर्णयित्वा दिनावसानं सूचयन्ति, खगकलरववर्णनेन निशावसानं ख्यापयन्ति, चतुष्पदखगसरीसृपादीनां व्याकुलतावर्णनव्याजेन निदाघतीक्ष्णतां च ज्ञापयन्ति। एवमेव संस्कृतकवयोऽरण्यतपोवनवर्णनप्रसङ्गेषु मृगादीनां नदीतडागादीनां वर्णनप्रसङ्गेषु मत्स्यमकरादीनां वाटिकोद्यानादीनां वर्णनप्रसङ्गेषु विविधखगानां शैलकाननादीनां वर्णनप्रसङ्गेषु सिंहशार्दूलादीनां लतापादपादीनां वर्णनप्रसङ्गेषु चान्यानेकजीवानां वर्णनं प्रस्तुवन्ति।

साहित्येऽस्मिन् मयूराणां नर्तनं सिंहानां गर्जनं गजानां चीत्कारो भल्लूकानां घूत्कारो द्विजिह्वानां फूत्कारो हंसानां क्रेङ्कारो मृगाणां धावनं मर्कटानां कूर्दनं कोकिलानां कूजनं भ्रमराणां गुञ्जनं दर्दुराणां सम्प्लुतिश्चातकानां नदनं च परमप्रथितानि सन्ति। अनेन संस्कृतकवीनां प्राणिजातान्विता पर्यावरणचेतना सम्यग्रूपेण विशदीभवति। महाकविभवभूतिविरचितानां रूपकाणामध्ययनेन तथ्यमिदं भृशं स्पष्टं भवति। एष कविः क्वचित् करिकलभकेलिं निबध्नाति, क्वचित् मयूरनर्तनं प्रस्तौति। एकत्र हरिणहृदयावर्जकतां निबध्नाति, अपरत्र च मल्लिकाक्षपक्षव्याधूतिं वर्णयति भवभूतिः। सूक्ष्मनिरीक्षणदक्षः कविर्यदा कलभवर्णनं करोति तदा तस्य गण्डूषसङ्क्रान्तिं तु निबध्नात्येव

१. उत्तररामचरिते-३.२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्नेहादनरालनालनलिनीपत्रातपत्रधारणकलामपि न विस्मरति। यथा पद्येनानेन प्रमाणितं भवति—

'लीलोत्खातमृणालकाण्डकवलच्छेदेषु सम्पादिताः
पुष्यत्पुष्करवासितस्य पयसो गण्डूषसङ्क्रान्तयः।
सेकः शीकरिणा करेण विहितः कामं विरामे पुन-
र्यत्स्नेहादनरालनालनलिनीपत्रातपत्रं धृतम्'[१]।।

अनेनैव प्रकारेण कविः स्वरूपकेषु प्रसङ्गानुसारेण गजवधूवृकमातङ्गफेरवकूर्माजगरकौशिकराजहंसकोकिलश्येनवर्तिकादात्यूहकोयष्टिकपूर्णिकाकपोतकुक्कुभमल्लिकाक्षशिखण्डीगोलाङ्गूलचकोरकुररसारसप्रभृतिपशुपक्षिणां जीवजन्तूनां वा सूक्ष्मेक्षिकया वर्णनं निबध्नाति येन तस्य प्राणिजातान्विता पर्यावरणचेतना परिपुष्टा भवति। नीलकण्ठचकोरगोलाङ्गूलानामेकत्र वर्णनकारिपद्यमधोलिखितमनुशीलनीयमत्र। तद्यथा—

'केकाभिर्नीलकण्ठस्तिरयति वचनं ताण्डवादुच्छिखण्डः
कान्तामन्तःप्रमोदादभिसरति मदभ्रान्ततारश्चकोरः।
गोलाङ्गूलः कपोलं छुरयति रजसा कौसुमेन प्रियायाः
कं याचे यत्र तत्र ध्रुवमनवसरग्रस्त एवार्थिभावः'[२]।।

एवमेव कविरसौ वलीवदनवर्णनपरस्तस्य मुखलौहित्यं दन्तमालमोष्ठारुणिमरञ्जितञ्च वर्णयत्येव, सहैव प्रणयव्यापारमपि कमनीयतया सहजतया च प्रस्तौति। तद्यथा—

'दन्तच्छदारुणिमरञ्जितदन्तमाल-
मुन्नम्य चुम्बति वलीवदनः प्रियायाः।
काम्पिल्यकप्रसवपाटलगण्डपालि-
पाकारुणस्फुटितदाडिमकान्तिवक्त्रम्'[३]।।

एवं प्रकारेण प्रतिभाति यद् महाकविर्भवभूतिर्जीवमनोविज्ञानस्य वेत्ता तेषां प्रवृत्तीनां सूक्ष्मनिरीक्षणदक्षश्चास्ति। अत एव सः पदे पदे स्वरूपकेषु सत्त्वानां

---

१. उत्तररामचरिते–३.१६, मालतीमाधवे–९.३४।
२. मालतीमाधवे–९.३०।
३. तत्रैव–९.३१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सहजक्रियाकलापानां मनोहारिवर्णनं प्रस्तौति। अनेन कवेः सत्त्वविषयिणी चेतना मुखरीभवति। अयं मयूराणां नर्तनं दृष्ट्वा नृत्यति कलभहावभावान् दृष्ट्वा रमते खगकलरवं श्रुत्वा प्रसीदति वन्यजीवानां भयोत्पादकनादं श्रुत्वा मोदते मर्कटकेलिमवलोक्य हसति कृकलासाजगरादिप्रवृत्तिं विलोक्य चिन्तयति सर्वै-रेभिर्जीवैश्च स्वकीयं तादात्म्यं स्थापयति, ज्ञापयति च सत्त्वाश्रितां पर्यावरण-चेतनाम्। सत्त्वानां सूक्ष्मनिरीक्षणे पटुर्महाकविर्भवभूतिस्तेषां प्रवृत्तीनां केलिव्यापाराणां हावभावानां च वर्णनं करोत्येव, तथा च तेषां व्याध्यादीनामपि सङ्केतं ददाति। तद्यथा कूटपाकलाख्यं गजव्याधिं निर्दिशन् कविर्मकरन्दाश्रयेण वदति—

'अभिहन्ति हन्त कथमेष माधवं सुकुमारकायमनवग्रहः स्मरः।
अचिरेण वैकृतविवर्तदारुणः कलभं कठोर इव कूटपाकलः'[१]।।

समासेन वक्तुं शक्यते यद् भवभूतिः सत्त्वचेतनाभावितहृदयः कविरस्ति, येन तस्य रूपकेषु प्राणिजातान्विता पर्यावरणचेतना प्राचुर्येण समुपनिबद्धाऽस्ति।

वनस्पत्यौषधिजातान्विता पर्यावरणचेतना

निसर्गचेतनाचमत्कृते संस्कृतसाहित्ये पर्यावरणोपादानीभूतवनस्पत्यौषध्यादिषु तत्तदभिमानिदेवानां सद्भावोऽभ्युपगतोऽस्ति। यथा प्रसिद्धवेदभाष्यकारः सायणाचार्यो ब्रूते—

'ओषध्यादिमन्त्रेष्वपि चेतना एव तत्तदभिमानिदेवतास्तेन नाम्ना सम्बोध्यन्ते'[२]।

अतः संस्कृतकवयः विविधवनस्पतीनां वर्णनव्याजेन कन्दमूलफलौषधीनां वर्णनव्याजेन स्वकीयां वानस्पतिकचेतनामेव चित्रयन्ति। महाकविर्भवभूतिरपि स्वरूपकेषु एवमेव करोति। सः स्थाने स्थाने प्रसङ्गानुसारेण बकुल-काञ्चनपादप-कुन्द-कुब्जक-प्रियङ्गु-बालचूत-विसिनीपत्र-कमलिनीकन्द-पाटल-चूतप्रसून-उत्पल-पुण्डरीक-अतिमुक्तक-खर्जूर-रोहिण-शिरीष-कदलिका-ताम्बूल-वेत्रलता-हरिचन्दन-शैवल-मृडाल-पूगद्रुम-कक्कोलीफल-जपा-अरविन्द-केसर-ताली-केतकी-उत्पल-अश्वकर्ण-सरल-मालूर-कदम्ब-जम्बू-सल्लकी-काश्मरी-अश्मन्तक-तिनिश-वानीर-यूथिका-कुटज-शिलीन्ध्र-लोध्र-अर्जुन-सर्ज-तमाल-काम्पिल्यक-दाडिम-वटप्रभृति-

१. मालतीमाधवे–१.४०।
२. ऋग्वेदभाष्यभूमिकायाम्, (डॉ. हरिदत्तशास्त्रिणः संस्करणे), पृ. १९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

फलवृक्षाणां पुष्पपादपानां काष्ठप्रदायकवृक्षाणां लतानां मूलानामोषधिप्रदायकानाञ्च पादपानां वर्णनं करोति, येन तस्य वानस्पतिकचेतना पदे पदे मुखरीभवति। एष कविः शृङ्गवेरपुरस्थमिङ्गुदीपादपं तु स्मरत्येव भरद्वाजावेदितचित्रकूटयायिनि वर्त्मनि कालिन्दीतटस्थं श्यामाख्यं वटमपि न विस्मरति। तद्यथा—

'इङ्गुदीपादपः सोऽयं शृङ्गवेरपुरे पुरा।
निषादपतिना यत्र स्निग्धेनासीत् समागमः'[१]।।

अपि च—'लक्ष्मणः—अयमसौ भरद्वाजावेदितचित्रकूटयायिनि वर्त्मनि वनस्पतिः कालिन्दीतटे वटः श्यामो नाम'[२]।

अन्यत्र कविर्विविधवनस्पतीनामुल्लेखं कुर्वन् दण्डकारण्यभूधरान् स्मरति। तद्यथा—

'एताश्चन्दनाश्वकर्णसरलपाटलाप्रायतरुगहनाः परिणतमालूरसुरभयोऽरण्यगिरिभूमयः स्मारयन्ति तरुणकदम्बजम्बूवनावबद्धान्धकारगुरुगिरिनिकुञ्जगुञ्जद्गम्भीरगद्गदोद्गारघोरघोषणगोदावरीमुखरितविशालमेखलाभुवो दक्षिणारण्यभूधरान्'[३]।

भारतदेशेऽस्मिन् आयुर्वेदविशारदा वानस्पतिकचेतनाभाविता यत्र तत्र विविधौषधीनामन्वेषणं कुर्वन्ति वनपर्वतादिषु, येनात्र ध्यानपूर्वकविचयनकार्यस्य तुलना ओषधिविचयनकार्येण क्रियते। महाकविर्भवभूतिरपि महावीरचरिते ओषधिविचयनकार्यमुल्लिखति। तद्यथा—

'यामोषधिमिवायुष्मन् विचिनोषि महावने।
सा सीता मम च प्राणा रावणेनोभयं हृतम्'[४]।।

एवं प्रकारेण प्रतिभाति यद् महाकविर्भवभूतिर्विविधवनस्पतीनामोषधीनां वा विषये परां चेतनामधिकरोति, येन तस्य रूपकेषु वनस्पत्यौषधिजातान्विता पर्यावरणचेतना प्राचुर्येणोपलभ्यते।

निसर्गघटकजातसम्बद्धा पर्यावरणचेतना

सम्पूर्णेयं स्थूला सृष्टी रजनीदिवसान्धकारप्रकाशप्रातःसन्ध्यामध्याह्नरात्रिवसन्तग्रीष्मवर्षाशरद्हेमन्तशिशिरघर्मतुषारसीकरसूर्योदयसूर्यास्तचन्द्रोदयचन्द्रास्तप्रभृति-

१. उत्तररामचरिते–१.२१;
२. तत्रैव–१.२३ अनन्तरम्।
३. मालतीमाधवे–९.३ अनन्तरम्;
४. महावीरचरिते–५.२४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निसर्गघटकैः सङ्कुलिताऽस्ति। अतः संस्कृतकवयो यथास्थानमेतेषां वर्णनं कुर्वन्ति। महाकविर्भवभूतिरपि स्वरूपकेषु चन्द्रसूर्यतुषारसीकरघर्मादीनां मञ्जुलनिबन्धनं करोति, येन तस्य निसर्गघटकजातान्विता पर्यावरणचेतना विशदीभवति। महाकवेरस्य मनसि सूर्यं प्रति महती निष्ठा वर्तते। अत एव स सर्वेषु रूपकेषु सूर्यमधिकृत्य स्वभावाननेकत्र व्यञ्जयति। एवमेव प्रकृतेः सूक्ष्मपर्यवेक्षणपटोः कवेर्मनः सीकरवर्णने भृशं रमते। एकत्र बालचन्द्रोदयवर्णनव्याजेन कविर्माधवं वर्णयति। तद्यथा—

'तत उदयगिरेरिवैक एष स्फुरितगुणद्युतिसुन्दरः कलावान्।
इह जगति महोत्सवस्य हेतुर्नयनवतामुदियाय बालचन्द्रः'[१]।।

कवेः सूक्ष्मेक्षिकादृष्टी राजमार्गस्य निशीथनिःसञ्चाररमणीयतां तु वर्णयत्येव तदानीन्तनं वलभीतुङ्गवातायनेषु प्राप्तामोदं परिणतसुरागन्धसंस्कारगर्भं मुहुरुपचितस्फीतकर्पूरवासं वातमपि न विस्मरति। तद्यथा—

'प्रासादानामुपरि वलभीतुङ्गवातायनेषु
प्राप्तामोदः परिणतसुरागन्धसंस्कारगर्भः।
माल्यामोदी मुहुरुपचितस्फीतकर्पूरवासो
वातो यूनामभिमतवधूसन्निधानं व्यनक्ति'[२]।।

एवं प्रकारेण प्रमाणितं भवति यद् भवभूतेर्निसर्गघटकजातान्विता पर्यावरणचेतना परमसूक्ष्मा परमपृथुला चास्ति। एतेषु वर्गेषु वर्णितानि वस्तूनि तत्त्वानि वा विहाय कानिचिदन्यानि शिष्टानि तत्त्वान्यपि महाकविभवभूते रूपकेषु निबद्धानि तस्य पर्यावरणचेतनां प्रमाणयन्ति। यथा श्मशानवर्णनं शवभक्षणवर्णनं वा। एकत्र कविश्चिताधूमस्य तत्रत्यगन्धस्य च वर्णनं कुर्वन् ब्रूते। तद्यथा—

'इदं च पुराणनिम्बतैलाक्तपरिभृज्यमानरसोनकरसगन्धिभिश्चिताधूमैरधस्ताद्विभावितस्य श्मशानवाटस्य नेदीयः करालायतनम्'[३]। एवमेवान्यत्र कविराश्रमेषु सर्पिष्मतो भक्तस्य गन्धं स्मरत्यपि च कर्कन्धूफलमिश्रशाकपचनामोदं न विस्मरति। तद्यथा—

१. मालतीमाधवे-२.१०।
२. मालतीमाधवे-७.५।
३. तत्रैव-५.४. अनन्तरम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'नीवारौदनमण्डमुष्णमधुरं सद्यः प्रसूताप्रिया-
पीतादभ्यधिकं तपोवनमृगः पर्याप्तमाचामति।
गन्धेन स्फुरता मनागनुसृतो भक्तस्य सर्पिष्मतः
कर्कन्धूफलमिश्रशाकपचनामोदः परिस्तीर्यते'[१]।।

एवं समासेन वक्तुं शक्यते यद् महाकविर्भवभूतिः पर्यावरणचेतनाचित्रणाय नैकानवसरान् कल्पयति, अभिनिवेशपूर्वकञ्च पर्यावरणचेतनां निबध्नाति। अत्र स्थालीपुलाकन्यायेन केषाञ्चन स्थलानां विमर्शो विहितोऽस्ति, येन दृष्ट्याऽनया भवभूतेः परिशीलनस्य क्रमः प्रसरेदिति शम्।

१. उत्तररामचरिते–४.१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारविविशाखदत्तयो राजनीतिकदृष्टिः

डॉ. दुर्गाप्रसादमिश्रः
डी. ३६/८३ बी., अगस्तकुण्डम्
वाराणसी

***

भारविविशाखदत्तयोरुभयोरपि स्वकीयकाव्ये प्रतिपाद्यं वस्तु राजनीतिरेवास्ति। उभयोरपि किरातार्जुनीये मुद्राराक्षसे च काव्ये विशेषेण कौटिलीयार्थशास्त्रस्यैव समावेशोऽस्तीति नास्त्यत्र विवादविषयता। तत्राधुनिकराजनीतिसंस्पर्शोऽस्तीति तदीयग्रन्थावलोकनेन निश्चेतुं शक्यमेव। तथा हि आधुनिकराजनीतौ पक्षविपक्षौ स्तः। तत्र पञ्चसंवत्सरपर्यन्तं पक्षो राजधुरां सञ्चालयति। विपक्षोऽपि पक्षस्य क्रियामालोकयन् स्वीयभूमिं निर्वाहयति। सत्तापक्षः प्रायेण स्वीयोत्कर्षसंसाधनाय स्वीयराज्ये प्रजानामभ्युन्नत्यै कार्याणि करोति। प्रजानां हर्ष एव तस्य प्रयासो भवति, येनासौ विपक्षाय राज्यवैमुख्यमेव सम्पादयेत्। इयं दृष्टिर्भारवेर्विशाखदत्तस्याप्यस्ति। तथा हि किरातार्जुनीये विपक्षभूमौ पाण्डवाः सन्ति। राज्यं तु दुर्योधनस्य हस्ते निपतितं वर्तते।

दुर्योधनः स्वीयकौशलेन सर्वप्रकारेण राज्यसञ्चालनाय व्यापृतो वर्तते। स सर्वदा युधिष्ठिराद् भीतस्तं नयेन जेतुमिच्छति जगतीमपि। तेनासावालस्यं त्यजति। मनुप्रतिपाद्यं राजनीतिधर्ममङ्गीकरोति। अग्निहोत्रादिकं धार्मिकं कृत्यं सम्पादयति। तत्रापि तस्यालस्यं न भवति। तस्य शासनं तावद् मनोहरमासीत्। नृपैरपि शिरोभिर्माल्यमिवोह्यते। तस्य सैन्यसङ्घटनमपि बलवदासीद् यत्र महौजस्का मानधनाः प्राप्तयुद्धकीर्तयः सम्पत्तर्पिता धनुर्धारिणो भेदवृत्तिरहिता सेनानायकास्तस्य प्राणैरपि प्रियाणि वाञ्छन्ति। तत्र राज्यसञ्चालने तस्योपमा महेन्द्रेण कृता वर्तते। तस्य जनपदे प्रजाः सस्याय केवलं दैवाश्रिता नासन्, अपि तु अदेवमातृकास्ता आसन्, येन वृष्ट्यभावेऽप्यन्योपायैः सस्यसम्पत्तिः सम्पादयितुं शक्यत एव।

अर्थसम्पदोऽपि तस्य पूर्णा एवासन्। तत्तत्पदेषु विनियोगोऽपि पुरुषाणां सम्यगासीत्। तस्य सम्पदो भृत्याधीनाः कृताः कृतज्ञतामेव वदन्ति स्म।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दण्डविषयेऽप्यसौ धैर्यमाश्रित्यैव कार्यकारी आसीत्। तत्र गुरूपदिष्टमार्गमेवाश्रित्य रिपौ सुते वा दण्डविषये तस्य समचित्तताऽऽसीत्। इत्थं युधिष्ठिरादपि उपरि यातुमिच्छन् दुर्योधनो राज्ञां सर्वानेव गुणान् धारयन्नासीत्। अस्मिन् विषये प्रथमसर्गस्य वनेचरस्य युधिष्ठिरं प्रति वचनान्याकलनीयानि सन्ति। तत्रैतत् श्लोकद्वयं द्रष्टव्यम्[१]—

'विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः।।
तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन् भूतिमनार्यसङ्गमाद्वरं विरोधोऽपि समं महात्मभिः'[१]।। इति।

एतच्छ्लोकद्वयेन साम्प्रतिकराजनीतिपरम्परा स्पष्टं सम्यक्त्वमुपैति। वस्तुतः सर्वदोषाकरोऽपि सुयोधनो युधिष्ठिरस्पर्धया पापं कर्म प्रजापीडनादिकं न करोति, केवलं सत्कर्म कुर्वन् प्रजाः पुत्रानिव पालयन् धर्मविप्लवं दण्डेन परिहरन् लोकानां हृदयान्यावर्जयन्निव केवलं यशस एव विस्तारं करोति।

किं बहुना, प्रजाः स्वं श्रेष्ठं राजानमिव दर्शयन्नसौ नीतिसाहाय्येन जगतीमपि जेतुमिच्छति। तथा चायं श्लोक आकलनीयोऽस्ति—

'कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तन्दिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम्'[२] ।।इति।

भृत्यानां हृदयान्यावर्जयितुं किं करोत्यसावित्युच्यते—

'सखीनिव प्रीतियुजोऽनुजीविनः
समानमानान् सुहृदश्च बन्धुभिः।
स सन्ततं दर्शयते गतस्मयः
कृताधिपत्यामिव साधु बन्धुताम्'[३] ।।इति।

---

१. किरा. १.७-८।
२. तत्रैव-१.९।
३. तत्रैव-१.११।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि च—

'निरत्ययं साम न दानवर्जितं न भूरिदानं विरहय्य सत्क्रियाम्।
प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया'[१] ।।

इत्यनेन दुर्योधनराज्ये गुणानामेव पूजाऽऽसीदिति भ्रष्टाचारस्य लेश एव नासीत्। कथम्? युधिष्ठिरस्पर्धयैवेति ब्रूमः। तेन दुर्भिक्षस्य, मरणस्य, भयस्य च नास्ति लेशः। यतो हि—

'अपूज्या यत्र पूज्यन्ते पूज्यानामवमानना।
त्रीणि तत्र प्रवर्तन्ते दुर्भिक्षं मरणं भयम्'[२] ।।

इति वस्तुनोऽभाव एवासीत्। इत्थं सर्वविधा चेष्टा दुर्योधने राज्यसञ्चालनाय प्रशस्ता एवासन्। अतन्द्रितो दुर्योधनो नक्तन्दिवं विभज्य प्रवर्तमानश्चारव्यवस्थामपि सम्यक् कृतवान्। असौ चारै राज्ञां क्रियाः सम्यग् वेत्ति, यतो हि तस्य गुप्तचराः सच्चरिता आसन्। तथा हि महाकविर्वनेचरमुखेन प्रस्तौति—

'महीभृतां सच्चरितैश्चरैः क्रियाः
स वेत्ति निःशेषमशेषितक्रियः।
महोदयैस्तस्य हितानुबन्धिभिः
प्रतीयते धातुरिवेहितं फलैः'[३] ।।

अत्राशेषितक्रिय इति दुर्योधनस्य विशेषणं राज्ञः सर्वगुणवत्तामेव ख्यापयति। इत्थमुक्तप्रकारेण भारवेर्दृष्टिः साम्प्रतिकी एवास्तीति प्रकरणं साम्प्रतिकराजनीतिविदां प्रेरणाप्रदमेवास्ति। अपि च द्वितीयसर्गे राजानं प्रत्युपादेयवचनं सर्वथा प्रासङ्गिकमस्ति। तत्र प्रकृतिप्रकोपेन जायमानो विग्रहो राज्ञां बलवद्भेदकत्वेन प्रदर्शितोऽस्ति। यथोक्तं महाकविना—

'अणुरपि उपहन्ति विग्रहः प्रभुमन्तःप्रकृतिप्रकोपजः।
अखिलं हि हिनस्ति भूधरं तरुशाखान्तनिघर्षजोऽनलः'[४] ।।इति।

एतदपि साम्प्रतिकराजनीतावुपलभ्यते प्रायः प्रधानमन्त्रिणो मुख्यमन्त्रिणश्च प्रकृतिप्रकोपेण समूलं लीयमाना इव दरीदृश्यन्ते। तत्र राजानं प्रति

१. किरा., १.१२;
२. पञ्चतन्त्रे।
३. किरा., १.२०;
४. तत्रैव, २.५१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मदादीनामानर्थक्यप्रदर्शनद्वारा तद्राहित्योपदेशः सुतरां प्रासङ्गिकोऽस्ति। तेनैव च राज्ञां सुदृढा स्थितिः सम्भावयितुं शक्यते। तथा हि मदस्यानर्थहेतुत्वं युधिष्ठिरमुखेन कविः ख्यापयति—

'मदमानसमुद्धृतं नृपं न वियुङ्क्ते नियमेन मूढता।
अतिमूढ उदस्यते नयान्नयहीनादपरज्यते जनः।।
अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसन्ततिः।
सुकरस्तरुवत् सहिष्णुना रिपुरुन्मूलयितुं महानपि'[१] ।।इति।

युद्धविषयेऽपि व्यूहसञ्चालनादिकं सैन्यगमनादिकञ्च सम्यक्तया प्रतिपाद्यते चतुर्दशसर्गे। पञ्चदशसर्गे च पलायमानं सैन्यं प्रति पुनस्तदुत्साहवर्धनाय सेनापतेरोजस्विवचनमस्ति। एतद्द्वयमपि सम्प्रत्यपि राजनीतिविषये सम्यग्भूमिकां निर्वाहयति। राज्ञां मैत्रीविषये कवेर्दृष्टिरात्यन्तिकी समीचीना वर्तते। मैत्रीविषये सकृदपि स्खलनं राज्ञामनर्थायोपकल्पते। अतो मैत्री सम्यक् परीक्ष्य कर्तव्या। किं बहुना, नीचं जनं राजाऽवज्ञयाऽवहेलयत्विति कवेः शासनं भवति। तथा हि प्रसिद्धं पद्यम्—

'यदा विगृह्णाति हतं तदा यशः
करोति मैत्रीमथ दूषिता गुणाः।
स्थितिं समीक्ष्योभयतः परीक्षकः
करोत्यवज्ञोपहतं पृथग्जनम्'[२] ।।

अपि च 'भवन्ति गोमायुसखा न दन्तिनः' इति प्रसिद्धा सूक्तिः असन्मैत्रीं प्रतिषेधति। इत्थमेव राजानं प्रति जितेन्द्रियत्वस्यात्यन्तमुपादेयत्वमपि कवेराशयोऽस्तीति निश्चीयते। किं बहुना, यदि राजा जितेन्द्रियोऽस्ति, तदा तं शत्रुर्न जेतुं पारयति। पराऽऽत्माभिरक्षा जितेन्द्रियतैवास्तीति कवेरुद्घोषः। तथा ह्युक्तम्—

'प्रभवति न तदा परो विजेतुं
भवति जितेन्द्रियता यदात्मरक्षा'[३] ।।इति।

१. किरा., २.४९-५०।
२. तत्रैव, १४.२४।
३. तत्रैव, १०.३५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्थं राजनीतिं प्रति भारवेर्दृष्टिरत्यन्तं सूक्ष्माऽस्तीति ज्ञायते। मुद्राराक्षसेऽपि सर्वत्रैव राजनीतिविधा दृश्यते। तत्रापि राजान्तरं न्यक्कृत्य प्रतिष्ठितस्यापरस्य राज्ञः प्रजाः प्रति स्वकीयविश्वासदार्ढ्याय यत् प्रेमप्रवणत्वमपेक्षितं वर्तते, तदपि स्पष्टं विलोक्यते। तथा हि प्रथमसर्ग एव राज्ञश्चन्द्रगुप्तस्य प्रकृतिरञ्जकत्वं दृश्यते। चाणक्यः स्वसमीहितसाधनाय राक्षसस्य मित्रं चन्दनदासमाहूय पृच्छति— चन्द्रगुप्तस्य राज्ञो दोषा अतिक्रान्तपार्थिवगुणान् प्रकृतीः स्मारयन्ति? इति, तदा चन्दनदासो निजकर्णौ पिधाय कथयति—'शान्तं पापम्। शारदनिशासमुद्गतेनेव पूर्णिमाचन्द्रेणाप्यनुश्रियाऽधिकं नन्दन्ति प्रकृतयः'[१] इति वचनेनैव प्रकृतिरञ्जकत्वं तथा—

'भो श्रेष्ठिन्! चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्। यतो नन्दस्यैवार्थरुचेरर्थ-सम्बन्धः प्रीतिमुत्पादयति, चन्द्रगुप्तस्य तु भवतां परिक्लेश एव'[२]। इति वचनेन चाणक्यश्चन्दनदासं चन्द्रगुप्तस्यालोभित्वख्यापनेन तथा नन्दस्य सलोभत्व-दोषवत्त्वख्यापनेन चन्द्रगुप्तस्य नन्दाद् गुणाधिक्यमेव ख्यापयति, येन वणिग्-वर्गोऽपि राजानुकूलो भवतु। वणिग्वर्गस्य राजानं प्रति धनदानादिना महानुपकार आसीदिदानीमपि तथैव दृश्यते। अस्मिन् विषये 'कियदस्माज्जनादिष्यते'[३] इति चन्दनदासवचनं प्रमाणम्। यतो हि चन्दनदासः 'उक्तवचनेन चाणक्यं स्वाभीष्टद्रव्यराशिर्मत्तो ग्रहीतुं शक्यते' इति कथयति। राज्ञामपि वणिक्समुदाये तथैव कृपा आसीत्। तत्तु 'आर्यस्य प्रसादेनाखण्डिता मे वाणिज्या, इति चन्दनदासवचनेन निश्चीयते। तत्पश्चाच्चन्द्रगुप्तस्य राजा पश्यकारिणं प्रति यथार्हदण्ड-प्रतिपादनमपि कवे राजनीतिविषये सूक्ष्मेक्षिकत्वमेव प्रथयति। तदेव चाणक्यः कथयति—

'श्रेष्ठिन्! एवमयं राजा पश्यकारिषु तीक्ष्णदण्डो राजा न मर्षयिष्यति राक्षस-कलत्रप्रसादनं भवतः। तद्रक्ष परकलत्रेणात्मनः कलत्रं जीवितञ्च'[४]।।इति।

'षड्गुणं संयोगदृढा उपायपरिपाटी घटितपाशमुखी।
चाणक्यनीतिरज्जू रिपुसंयमनोद्यता जयति'[५]।।

१. मुद्रा., पृ. ७७; २. तत्रैव, पृ. ७८।
३. तत्रैव, पृ. ७८; ४. तत्रैव, पृ. ८८।
५. तत्रैव, पृ. ६.४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यादिश्लोकेन राजनीतौ षाड्गुण्यस्य तथा सामदानदण्डभेदात्मकस्योपायस्य परमोपादेयत्वमपि कवेः सम्मतमस्ति। स्वीयशासने सर्वगुणोपेतस्यामात्यस्य स्थितिः कर्तव्येति चाणक्यप्रयासेन राक्षसस्य चन्द्रगुप्तमन्त्रिपदे नियोजनमेव ख्यापयति। चाणक्यो राक्षसं द्विषन्नपि आत्मना तं प्रशंसन्नासीत्। सर्वथा तस्य राक्षससङ्ग्रहायैव मतिरासीत् राक्षसगुणप्रशंसायामयं श्लोकोऽवलोकनीयो वर्तते—

'ऐश्वर्यादनपेतमीश्वरमयं लोकोऽर्थतः सेवते
तं गच्छन्त्यनु ये विपत्तिषु पुनस्ते तत्प्रतिष्ठाशया।
भर्तुर्ये प्रलयेऽपि पूर्वसुकृतां सङ्गेन निःसङ्गया
भक्त्या कार्यधुरां वहन्ति कृतिनस्ते दुर्लभास्त्वादृशाः'[१] ।।इति।

इत्थं विशाखदत्तस्य मुद्राराक्षसे विशाला दृष्टिरासीत् राजनीतिविषयिणी।

१. मुद्रा., १.१४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साहित्यशास्त्रे ध्वनिसिद्धान्तः

डॉ. वृजेशमणिपाण्डेयः
अनुसन्धाता,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी

***

स्वीयया ऋजुतया मृदुतया मधुरतया च प्रसिद्धस्य साहित्यशास्त्रस्य संस्कृतवाङ्मये विशिष्टवैशिष्ट्ययुक्तं गरिममयं महत्त्वं सर्वथा विश्वविश्रुतं प्रथितञ्च वरीवर्ति, तत्रापि ध्वनिसिद्धान्तस्तु साहित्यशास्त्रे आत्मस्थानमालभते।

ध्वनेर्विवृतिक्रमे निष्पत्तिव्युत्पत्तिज्ञानमावश्यकम्। प्रथमं तावन्निष्पत्तिप्रकारो विविच्यते—ध्वनिशब्दो भौवादिक-ध्वन-शब्दे धातोर्भावे कर्मणि कर्तरि वा इप्रत्यये कृते निष्पन्नः।

व्युत्पत्तयश्च क्रमश एवं वर्तन्ते, भावे प्रत्यये 'ध्वननं ध्वनि'रित्यनया व्युत्पत्त्या व्यञ्जनाव्यापारो ध्वनिशब्दार्थः, कर्मणि प्रत्यये ध्वन्यते यत् तद् ध्वनिरित्यनया व्यङ्ग्यरूपोऽर्थो ध्वनिपदार्थः, कर्तरि प्रत्यये ध्वनतीति ध्वनिरित्यनया च व्युत्पत्त्या वाच्योऽर्थः, वाचकः शब्दश्च ध्वनिशब्दार्थः। प्रकारेणानेन चतुष्प्रकारा ध्वनिविषयाः, ध्वनिशब्दस्य पञ्चमो विषयः समुदायरूपकाव्यमस्ति, यतो ह्युक्ताः चतुष्प्रकाराः समुदायरूपकाव्ये भवन्ति, अत एव काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः। अत्र समुदायरूपकाव्ये ध्वनिशब्दस्य व्यवहारः, प्रथमकारिकायां 'काव्यस्यात्मा ध्वनिः' इत्याचार्येण प्रतिपादितः।

अन्यार्थेषु व्युत्पत्तितो व्यवहारतश्च ध्वनिशब्दस्य प्रयोगे सत्यपि मुख्यतो व्यङ्ग्यार्थ एव ध्वनिशब्देनाभिधीयते।

प्रायेण समेषु साहित्यग्रन्थेषु ध्वनिपदार्थविवेचनं वर्तते, तथापि प्रामुख्येन विस्तृतेन रूपेण च प्रतिपादनं ध्वन्यालोक एव समुपलभ्यते। आनन्दवर्धनाचार्येण ध्वनिनिरूपणारम्भः प्रथमोद्द्योतस्य मन्दाक्रान्ताछन्दोबद्धया प्रथमकारिकया कृतः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व-
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।
केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं
तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम्[१] ।।

श्लोकस्यास्य विवृतिरेवंविधा विधीयते। ध्वनिकारा आनन्दवर्धनाचार्या ध्वनिसिद्धांन्तारम्भकर्तृत्वेन स्वं न ज्ञापयन्ति, अपि तु तदनुसारेण, यो ध्वनिर्बुधजनैः काव्यस्यात्मेति रूपेण समाम्नातः, अर्थात् सम्यग् आ समन्ताद् म्नातः प्रकटितः, तस्य ध्वनेः स्वरूपं सहृदयजनमनःप्रीतये आचार्या निरूपयन्ति।

अनेनेदं ज्ञायते यद् ध्वनिसिद्धान्तो ध्वनिकारात् पूर्वमप्यासीत्, ग्रन्थरूपेण तदारम्भो ध्वनिकारेणैव सम्पादितः। यदि च पूर्वं स्थितिरासीत् तर्हि विरोधोऽप्य-वश्यमेवासीत्, अत एव ध्वनिकारेण प्रथमकारिकायां ध्वनिविरोधे त्रयाणां वैमत्यानामुपस्थापनं कृतम्। प्रथमोऽभाववादः, द्वितीयो भाक्तवादः, तृतीयश्च अनिर्वचनीयतावादः। सम्भावनाऽऽधारितोऽभाववादः पक्षत्रये विभक्तः। तत्र प्रथमः पक्षः—

अभाववादिनां प्रथमः पक्षः

शब्दार्थशरीरं तावत् काव्यम्, वृत्तिग्रन्थे तावद्ग्रहणेन ज्ञायते यदेतत्सर्वसिद्धान्तसम्मतम्, न कस्याप्यत्र विप्रतिपत्तिः। ध्वनेः प्रतिपादनं सर्वथा काव्यात्मरूपेणाभीष्टमस्ति, अतः काव्यशरीरभूतौ शब्दार्थौ केनापि प्रकारेण ध्वनिपदवाच्यौ भवितुं न शक्नुतः। यदि चोच्यते शब्दार्थयोश्चारुत्वहेतवः गुणालङ्कारा ध्वनिरिति, तदपि न, यतो हि शब्दस्य चारुत्वहेतवोऽनुप्रासादयः, अर्थगताश्चोपमादयः, ते चालङ्कारा न ध्वनिपदवाच्याः, यतो हि शब्दार्थयोश्चारुत्वं द्विविधम्—स्वरूपमात्रनिष्ठं सङ्घटनाश्रितञ्च। तत्र शब्दानां स्वरूपमात्रकृतं चारुत्वं शब्दालङ्कारेभ्यः, अर्थानाञ्च स्वरूपमात्रकृतं चारुत्वमर्थालङ्कारेभ्यः, तथा च शब्दानां सङ्घटनाश्रितञ्चारुत्वं शब्दगुणेभ्यः। अर्थानाञ्च सङ्घटनापर्यवसितञ्चारुत्वमर्थगुणेभ्यः। सङ्घटना च वर्णविन्यासरूपा। अतो गुणालङ्कारव्यतिरिक्तो न कश्चिद् ध्वनिः। यद् गुणालङ्कारव्यतिरिक्तं भवति, तच्चारुत्वकारि न भवति, यथा असाधुदुःश्रवादयो नित्यानित्यदोषाः।

१. ध्वन्यालोकप्रथमोद्द्योते कारिकासंख्या १।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभाववादी स्वमतपुष्ट्यर्थं केवलव्यतिरेक्यनुमानस्य प्रयोगं करोति। न्यायशास्त्रेऽनुमानप्रसङ्गे त्रिविधहेतवः प्रदर्शिताः—अन्वयव्यतिरेकी, केवलान्वयी, केवलव्यतिरेकी च। अन्वयेन युक्ता व्याप्तिः अन्वयव्याप्तिः, व्यतिरेकेण युक्ता व्याप्तिर्व्यतिरेकव्याप्तिः, यत्रोभयव्याप्तिप्रयोगस्तत्रान्वयव्यतिरेकव्याप्तिः, यथोदाहरणम्—यत्र धूमस्तत्राग्निर्यथा महानसमित्यन्वयव्याप्तिः, यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा ह्रद इति व्यतिरेकव्याप्तिः, यत्र व्यतिरेकमात्रेण व्याप्तिग्रहः सम्पद्यते, तत्र केवलव्यतिरेकी हेतुर्भवति यथा—पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वात्, यदितरेभ्यो न भिद्यते न तद् गन्धवत्, यथा जलम्। अर्थाद् यत्र यत्र पृथिवीतरभेदाभावस्तत्र तत्र गन्धाभावः, यथा जलादिकम्, उक्तलक्षणसङ्घटनं च यथा—पृथिवीतरभेदः पृथिव्याम्, पृथिवीतरभेदाभावो यत्र तत्र गन्धाभावः, यथा जलादिकम्, जलादौ पृथिवीतरभेदाभावः, अतो गन्धाभावः, प्रकारेणानेन व्यतिरेकदृष्टान्तो जलमिति सम्पद्यते। यद् गन्धवत् तदितरभिन्नमेवंरूपा अन्वयव्याप्तिरत्र न सम्भवति। प्रकृते चानुमानप्रयोग एवं भविष्यति—ध्वनिर्गुणालङ्कारव्यतिरिक्तत्वाभाववान्, चारुत्वहेतुत्वात्। यो हि गुणालङ्कार-व्यतिरिक्तो भवति स चारुत्वहेतुर्न भवति, यथा—असाधुदुःश्रवत्वादिको दोषः। यदि च ध्वनिर्गुणालङ्कारव्यतिरिक्तस्तर्हि चारुत्वहेतुर्न, अथ च चारुत्वहेतुर्ध्वनिः, स न गुणालङ्कारव्यतिरिक्त इति व्यतिरेकी हेतुः।

अत्रोच्यते—वृत्तयो रीतयश्च यथा गुणालङ्कारव्यतिरिक्ताश्चारुत्वहेतवश्च, तथा ध्वनि.।५ गुणालङ्कारव्यतिरिक्तश्च चारुत्वहेतुश्च भविष्यतीत्यसिद्धो केवलव्यतिरेक्यनुमानप्रयोगः। अनेनाभिप्रायेणाह—तदनतिरिक्तवृत्तय इति। वृत्तिरीतीनां गुणालङ्कारव्यतिरिक्तत्वं नास्ति। यतो ह्यनुप्रासानामेव दीप्तमसृणमध्यमवर्णनीयोपयोगितया परुषत्वललितत्वमध्यमत्वस्वरूपविवेचनाय वर्गत्रयसम्पादनार्थं तिस्रोऽनुप्रासजातयो वृत्तय इत्युक्ताः। आसु वृत्तिसु वर्तन्तेऽनुप्रासभेदाः। परुषानुप्रासा नागरिका, मसृणानुप्रासा (ललितानुप्रासा) उपनागरिका, मध्यमानुप्रासा (कोमलानुप्रासा) ग्राम्या। एता वृत्तयस्तत्तद्-वृत्त्यनुकूलवर्णप्रयोगेण निर्धार्यन्ते। तस्माद् वृत्तयोऽनुप्रासादिभ्योऽनतिरिक्ता न। अर्थाद् वृत्तयो गुणालङ्कारव्यतिरिक्ता न सन्ति, अपि तु अलङ्कारेष्वेव तासामन्तर्भावः। रीतयोऽपि गुणालङ्कारव्यतिरिक्ता न, दीप्तललितमध्यम-वर्णनीयविषयं गौणीयवैदर्भपाञ्चालदेशस्वभावप्राचुर्यदृष्ट्या तदेव त्रिविधं रीतिरित्युक्तम्। ताश्च गुणान्तर्भूता एव जातिर्जातिमतो नान्या, समुदायश्च समुदायिनो नान्यः, अतो वृत्तिरीतयो गुणालङ्कारव्यतिरिक्ताः न। अतस्तत्र केवलव्यतिरेकी हेतुस्तदवस्थ एव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभावादिनां द्वितीयः पक्षः (विकल्पः)

द्वितीयाभाववादप्रकारं निरूपयन्नाह, नास्त्येव ध्वनिः प्रसिद्धप्रस्थानव्यतिरेकिणः काव्यप्रकारस्य काव्यत्वहानेः, प्रसिद्धप्रस्थानञ्च = गुणालङ्कारवृत्तिरीतयः, तेषु ध्वनेरनन्तर्भावाद् नास्त्येव ध्वनिः। उक्तप्रस्थानातिरिक्तकाव्यप्रकारोऽसम्भव एव, यदि च तत्कालिकान् कांश्चित् सहृदयान् परिकल्प्यैवं निगद्यते, तर्हि तत् सकलविद्वन्मनोग्राहितां नावलम्बते।

अभाववादिनां तृतीयः पक्षः

कामनीयकमनतिवर्तमानस्य तस्य ध्वनेरुक्तेष्वेव चारुत्वहेतुषु, अर्थाद् गुणालङ्कारवृत्तिरीतिष्वन्तर्भावाद् ध्वनिर्नापूर्वः कश्चित्। कमनीयस्य कर्म कामनीयकम्, यदि च चारुत्वहेतूनामर्थाद् गुणालङ्कारवृत्तिरीतीनामन्यतमस्य ध्वनिरिति नामकरणं तर्हि तन्नामकरणं यत्किञ्चन कथनं स्यात्। एवं त्रिप्रकारकेणाभाववादेन प्रतिपाद्यते यद् नास्त्येव ध्वनिः।

तथा च यद्यपि कैश्चिदपि काव्यलक्षणविधायिभिर्ध्वनिरिति प्रकारलेशोऽपि न प्रदर्शितः, तथापि ध्वनिवादिभिर्यदेतदलीकसहृदयत्वभावनामुकुलितलोचनैर्नृत्यते, तत्र किं कारणमिति न जानीमः। विद्वद्भिः सहस्रशोऽलङ्कारप्रकाराः प्रदर्शिताः, परन्तु तेष्वलङ्कारेषु ध्वनिरिति प्रकारो न श्रूयते, तस्मात् प्रवादमात्रं ध्वनिः।

भाक्तवादोपस्थापनम्

भज्यते सेव्यते पदार्थेन प्रसिद्धतयोत्प्रेक्ष्यत इति भक्तिः = धर्मोऽभिधेयेन तटादीनां सामीप्यादिधर्म उत्प्रेक्षितो भवति, तत आगतो भाक्तो लाक्षणिकोऽर्थः। यदाहुः—

अभिधेयेन सामीप्यात्सारूप्यात्समवायतः।
वैपरीत्यात् क्रियायोगाल्लक्षणा पञ्चधा मता[१]।। इति।

गुणसमुदायवृत्तेः शब्दस्यार्थभागस्तैक्ष्ण्यादिर्भक्तिः, तत आगतो गौणोऽर्थो भाक्तः। अनेन ज्ञायते भाक्तशब्दो गौणलाक्षणिकपर्यायवाची, मुख्यस्य चार्थस्य भङ्गो भक्तिरित्येवं मुख्यार्थबाधा, निमित्तं, प्रयोजनमिति त्रयसद्भाव उपचारबीजमित्युक्तं भवति। उक्तव्याख्यानेन ज्ञायते यद् ध्वनिर्भाक्तो लक्षणान्तर्भूत इति यावत्। एवंविधासु विमतिषूपस्थितासु सहृदयमनःप्रीतये ध्वनेः स्वरूपं प्रतिपादयामः।

१. ध्वन्यालोकलोचनम्, प्रथमोद्द्योतः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनिर्वचनीयतावादः

अनिर्वचनीयतावादः प्रकारान्तरेण ध्वनेः स्वीकृतिरेव।

ध्वनिस्वरूपम्

तस्य ध्वनेः स्वरूपं सकलसत्कवीनां यानि काव्यानि तेषु काव्येषूपनिषद्धूतमतिरमणीयमणीयसीभिरपि प्राचीनकाव्यलक्षणविधायिनां बुद्धिभिरनुन्मीलितपूर्वम्। तथा च रामायणमहाभारतप्रभृतीनि लक्ष्ये सर्वत्र प्रसिद्धव्यवहारं लक्षयतां सहृदयानामानन्दो मनसि प्रतिष्ठां लभतामित्युद्देश्येन ध्वनेः स्वरूपं प्रकाश्यते।

योऽर्थः सहृदयश्लाध्यः काव्यात्मेति व्यवस्थितः।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ[1]।।

काव्यात्मरूपेण व्यवस्थितः सहृदयश्लाघ्यो योऽर्थः, तस्य वाच्यः प्रतीयमानश्चेति द्वौ भेदौ।

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।।

यथा अङ्गनासु (नवयौवनासु) लावण्यं पृथग्रूपेण दृष्टिगोचरीभवन् निखिलावयवव्यतिरिक्तं किमप्यन्यदेव, सहृदयानां लोचनामृतं तत्त्वान्तरं तद्वदेव काव्येषु प्रतीयमानार्थः काव्यस्य ये निखिलावयवाः शब्दार्थगुणालङ्कारवृत्तिरीतयस्तेभ्यो व्यतिरिक्तः पृथग्भूत्वैव दृष्टिगोचरो भवति। लावण्यञ्च—

मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा।
प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते।।

लोचनकारस्तु लावण्यं हि नामावयवसंस्थानाभिव्यङ्ग्यमवयवव्यतिरिक्तं धर्मान्तरमेव स्वीकरोति। तत्र प्रतीयमानस्य तावद् द्वौ भेदौ—लौकिकः, काव्यव्यापारैकगोचरश्चेति। लौकिकोऽपि द्विविधः—वस्तुध्वनिः, अलङ्कारध्वनिश्च। यः पूर्वं कुत्रापि वाक्यार्थेऽलङ्कारभावमुपमादिरूपतयान्वभूत्, इदानीं त्वनलङ्कार एवान्यत्र गुणीभावाभावात्, स ब्राह्मणश्रमणन्यायेन पूर्वप्रत्यभिज्ञानबलादलङ्कारध्वनिरिति व्यपदिश्यते। तद्रूपताभावेन तूपलक्षितं वस्तुमात्रमुच्यते।

१. ध्वन्यालोके, १.२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्तु स्वप्नेऽपि न स्वशब्दवाच्यः, न लौकिकव्यवहारपतितः, किन्तु शब्दसमर्प्यमाणहृदयसंवादसुन्दरविभावानुभावसमुचितप्राग्विनिविष्टरत्यादिवासनानुरागसुकुमार-स्वसंविदानन्दचर्वणाव्यापाररसनीयरूपो रसः सः काव्यव्यापारैकगोचरो रसध्वनिरिति, स च ध्वनिरेवेति स एव मुख्यतयात्मेति।

सः प्रतीयमानार्थो वाच्यसामर्थ्येन वस्त्वलङ्काररसादिभेदेनानेकविधः। सर्वेषु च तेषु प्रकारेषु तस्य प्रतीयमानस्य वाच्यादन्यत्वम्, सः प्रतीयमानार्थः कदाचिद् वाच्ये विधिरूपे प्रतिषेधरूपो भवति, यथा—

भ्रम धार्मिक विस्रब्धः स शुनकोऽद्य मारितस्तेन।
गोदावरीनदीकूललतागहनवासिना दृप्तसिंहेन[१]।।

प्रस्तुतोदाहरणे भ्रम इति विधिरूपार्थानन्तरं मा भ्रम इति निषेधरूपार्थप्रतीतिर्भवति। परस्परविरुद्धस्य विधिनिषेधरूपार्थस्य युगवद् वाच्यता भवितुं नार्हति, यतो हि 'विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे' इति न्यायेन शब्दस्य सङ्केतितार्थाभिधाने यद् व्यापारस्तदभिधेति निगद्यते। निषेध-रूपार्थश्च सङ्केतितो नास्ति, अतस्तद्बोधार्थं कस्या अप्यन्यशक्तेः कल्पनमावश्यकम्। सा च शक्तिर्व्यञ्जनारूपा, तया शक्त्या प्रतीतो निषेधरूपोऽर्थो व्यङ्ग्यो भविष्यति।

लक्षणयाऽपि निषेधरूपार्थस्य प्रतीतिर्भवितुं नार्हति, लक्षणायाः प्रवृत्ति-र्मुख्यार्थबाधायामेव भवति, बाधा च विरोधप्रतीतिरेव। न चात्र पदार्थानां स्वात्मनि विरोधः।

अतो नाभिधया न वा लक्षणया तात्पर्यशक्त्या वा निषेधरूपार्थस्य प्रतीतिर्भविष्यति, तदर्थं तु व्यञ्जनाव्यापारोऽवश्यमेवाङ्गीकरणीय इति।

क्वचिद् वाच्ये प्रतिषेधरूपे व्यङ्ग्यो विधिरूपः, यथा—

श्वश्रूरत्र निमज्जति अत्राहं दिवसकं प्रलोकय।
मा पथिक रात्र्यन्धक शय्यायामावयोः शयिष्ठाः[२]।।

निषेधाभावोऽत्र विधिः, न तु निमन्त्रणरूपोऽप्रवृत्तप्रवर्तनास्वभावः सौभाग्याभिमानखण्डनाप्रसङ्गाद् वाच्यो निषेधरूपो व्यङ्ग्यश्च विधिरूपो भावतदभावयोश्च साक्षाद्विरोधाद् वाच्याद् व्यङ्ग्यस्य भिन्नत्वं स्फुटमेव।

१. ध्वन्यालोकलोचनम्, प्र.उ.; २. तदेव, प्र.उ.।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्वचिद् वाच्ये विधिरूपेऽनुभयरूपो यथा—

व्रज ममैवैकस्या भवन्तु निःश्वाससेवितव्यानि।
मा तवापि तया विना दाक्षिण्यहतस्य जनिषत[१] ।।

अत्र व्रजेति विधिः। न चासौ व्रज्याभावरूपो निषेधः, नापि विध्यन्तरमेवान्यनिषेधाभावः। अत्र नायकः शठः, खण्डिता च नायिका।

एवमेव क्वचिद् वाच्ये प्रतिषेधरूपेऽनुभयरूपस्य क्वचिद् वाच्याद् विभिन्नविषयत्वेन व्यवस्थापितस्य व्यङ्ग्यार्थस्य प्रतीतिर्भवति।

रसादिरूपस्तृतीयः प्रभेदस्तु वाच्यसामर्थ्येनाक्षिप्तः प्रकाशते, न तु साक्षाच्छब्दव्यापारस्य (अभिधाव्यापारस्य) विषयः, अपि तु वाच्याद् भिन्न एव। प्रकृते तु शब्दो व्यतिरेके, यस्यायमभिप्रायः—वस्त्वलङ्कारौ शब्दमाध्यमेनाभिहितौ भवतः, परन्तु रसादयः कदाचिद् शब्दद्वारा (अभिधया) अभिहिता न भवन्ति, केवलं प्राणरूपेण विद्यमाना या तेषां (रसादीनाम्) आस्वाद्यमानताऽस्ति, तयैव ते रसादयः प्रकाशिता भवन्ति। तत्र ध्वननव्यापारादृते नास्ति कल्पनान्तरम्। स्खलद्गतित्वाभावे मुख्यार्थबाधादित्रयहेतुत्वाभावाल्लक्षणाऽपि नाशङ्कनीया; किन्तु सर्वत्र तेषां रसादीनां स्वशब्दनिवेदितत्वं न, यत्र कुत्रापि रसादिध्वनिरस्ति, तत्र सर्वत्र विशेषप्रकारेण विभावादिप्रतिपादनमुखेनैव रसादीनां प्रतीतिः। सा प्रतीतिः केवलं स्वशब्देनानूद्यते, न तु तच्छब्दकृता भवति, यतो हि विषयान्तरे तेन प्रकारेण तस्याः प्रतीतेर्दर्शनाभावात्। सर्वत्र तेषां रसादीनां स्वशब्दनिवेदितत्वं न इत्याशयं प्रकटयन्नाह लोचनकारः, यथा भट्टेन्दुराजस्य—

यद् विश्रम्य विलोकितेषु बहुशो निःस्थेमनी लोचने
यद् गात्राणि दरिद्रति प्रतिदिनं लूनाब्जिनीनालवत्।
दूर्वाकाण्डविडम्बकश्च निबिडो यत्पाण्डिमा गण्डयोः
कृष्णे यूनि सयौवनासु वनितास्वेषैव वेषस्थितिः[२] ।।

अत्र विभावानुभावबोधानन्तरमेव तन्मयीभवनस्य युक्त्या तद् विभावानुभावोचितचित्तवृत्तिवासनानुरञ्जितस्वसंविदानन्दचर्वणागोचरोऽर्थो रसात्मा स्फुरत्येवाभिलाषचिन्तौत्सुक्यनिद्राधृतिग्लान्यालस्यश्रमस्मृतिवितर्कादयः शब्दाभावेऽपि स्फुरिता भवन्ति।

---

१. ध्वन्या, प्र.उ.; २. ध्व., लो., प्र.उ.।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्र यत्र रसादीनां प्रतीतिस्तत्र तत्र स्वशब्दनिवेदितत्वमित्यन्वयव्याप्तिः। यत्र यत्र स्वशब्दनिवेदितत्वाभावस्तत्र तत्र रसादिप्रतीत्यभाव इति व्यतिरेकव्याप्तिः। तस्मादन्वयव्यतिरेकाभ्यामभिधेयसामर्थ्येनाक्षिप्तत्वमेव रसादीनाम्। न तु केनापि प्रकारेण रसादीनां वाच्यत्वम्। अतः तृतीयोऽपि प्रभेदोऽर्थाद् रसादिध्वनिरपि वाच्याद् भिन्न एवेति स्थितम्।

काव्यात्मपर्यालोचनायां निगदितमानन्दवर्धनाचार्येण—

काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः[१]।।

स एव तृतीयो रसध्वनिः काव्यात्मा। विविधवाच्यवाचकरचनाप्रपञ्चचारुणः काव्यस्य स एवार्थः सारभूतः। यथा चादिकवेर्वाल्मीकेर्निहतसहचरी-विरहकातरक्रौञ्चाक्रन्दजनितः शोक एव श्लोकतया परिणतः।

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।। इति।

सः प्रतीयमानार्थः—

शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते।
वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम्[२]।।
सोऽर्थस्तद्व्यक्तिसामर्थ्यभोगी शब्दश्च कश्चन।
यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः[३]।।

व्यङ्ग्योऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च न शब्दमात्रम्। तावेव शब्दार्थौ महाकवेः प्रत्यभिज्ञेयौ व्यङ्ग्यव्यञ्जकाभ्यामेव सुप्रयुक्ताभ्यां महाकवित्वलाभो महाकवीनां न वाच्यवाचकरचनामात्रेण। ज्ञातस्यापि विशेषतो निरूपणमनु-सन्धानात्मकमत्र प्रत्यभिज्ञानम्, न तु तदेवेदमित्येतावन्मात्रम्। व्यङ्ग्यव्यञ्जकयोः प्राधान्येऽपि यद् वाच्यवाचकावेव प्रथममुपाददते कवयस्तदपि युक्तमेव। तथा हि—

आलोकार्थी यथा दीपशिखायां यत्नवाञ्जनः।
तदुपायतया तद्वदर्थे वाच्ये तदादृतः[४]।।

---

१. ध्व., प्र.उ., का. ५;
२. तत्रैव, प्र.उ., का. ७।
३. तत्रैव, १.८;
४. तत्रैव, १.९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थे इत्यस्य व्यङ्ग्यार्थे इत्यभिप्रायः। तथा च—

यथा पदार्थद्वारेण वाक्यार्थः सम्प्रतीयते।
वाच्यार्थपूर्विका तद्वत्प्रतिपत्तस्य वस्तुनः[१]।।

तस्य वस्तुन इत्यस्य व्यङ्ग्यरूपस्य सारस्येत्यर्थः। यथा हि पदार्थद्वारेण वाक्यार्थावगमस्तथा वाच्यार्थप्रतीतिपूर्विका व्यङ्ग्यस्यार्थस्य प्रतिपत्तिः। एवं वाच्यातिरिक्तस्य व्यङ्ग्यस्यार्थस्य सद्भावे सिद्धे तस्योपयोगोऽपि प्रकृतेऽस्ति तथा हि—

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः[२]।।

उपयोजयन् = उपयोगं गमयन् प्रकृतश्लोके स्वशब्दो आत्मवाची। स्वश्च अर्थश्च तौ स्वार्थौ = शब्दार्थौ तौ गुणीकृतौ याभ्याम्, यथासंख्येन तेनार्थो गुणीकृतात्मा, शब्दो गुणीकृताभिधेयः। तमर्थम् = वस्त्वलङ्कारसादिषु च यत्सारभूतं तमर्थं व्यङ्क्तः = द्योतयतः। यद्यपि अविवक्षितवाच्ये शब्द एव व्यञ्जकस्तथापि अर्थस्यापि सहकारिता न त्रुट्यति, यदि अर्थस्य सहकारिता न स्यात्, तर्हि अज्ञातार्थोऽपि शब्दस्तद्व्यञ्जकः स्यात्, विवक्षितान्यपरवाच्ये च शब्दस्यापि सहकारित्वं भवत्येव, विशिष्टशब्दाभिधेयतया विना तस्यार्थस्याव्यञ्जकत्वादिति सर्वत्र शब्दार्थयोरुभयोरपि ध्वननं व्यापारः। यत्रार्थः शब्दो वेति विकल्पाभिधानं प्राधान्याभिप्रायेणार्थात् केवलाः शब्दा अर्था वा व्यञ्जका न भवन्ति, अपि तु मिथः साहाय्येन व्यञ्जका भवन्ति, अनेन प्रकारेण भवार्थः प्राधान्येन व्यङ्ग्यव्यञ्जकस्तदा शब्दस्य सहकारिता, यदा च शब्दः प्राधान्येन रूपेण व्यङ्ग्यव्यञ्जकस्तदाऽर्थस्य सहकारिता। अनेनाभिप्रायेणाचार्येण 'वा' इत्यस्य प्रयोगः कृतः, शब्दार्थयोरनया सम्मिलितव्यञ्जकतया व्यङ्क्त इति द्विवचनप्रयोगोऽपि सार्थकः। भट्टनायकेन यद् द्विवचनं दूषितं तद् गजनिमीलिकयैवार्थाज्ञानवशादेव।

काव्यञ्च तद्विशेषश्चासौ काव्यविशेषः, अथवा काव्यस्य विशेषः काव्यविशेष इति कर्मधारयः षष्ठीतत्पुरुषो वा। आचार्येण पूर्वमेव निर्दिष्टो यद्ध्वनिरवश्यमेव काव्यात्मा; परन्तु तेनैव ध्वनिना काव्यव्यवहारो न भवति, अपि तु ध्वनिना सहैव शब्दार्थयोर्गुणालङ्कारोपस्कृतत्वमवश्यमेव भवेत्। यदि च ध्वनिमात्रे काव्यव्यवहारो स्यात्, तर्हि मीमांसकप्रणीतेषु शास्त्रेषु यत् प्रसिद्धं

१. ध्व., का. १०; २. तत्रैव, का. १३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रुतार्थापत्तेः स्थलं तत्रापि काव्यव्यवहारः स्यात्, यथा 'पीनोऽयं देवदत्तो दिवा न भुङ्क्ते' इत्यत्र श्रुतवाक्येन भोजनं विना पीनत्वानुपपत्त्या रात्रिभोजनमनुमीयते। अत्र ध्वनिरस्ति; परन्तु गुणालङ्कारोपस्कृतशब्दार्थयोरभावस्तेन काव्यव्यवहारो न भवति।

प्रथमस्याभाववादस्य खण्डनम्

यच्चोक्तम्—'चारुत्वप्रतीतिस्तर्हि काव्यात्मा स्यात्' इति तदङ्गीकुर्मः, नाम्नि खल्वयं विवादः। मूले यदुक्तं 'स काव्यविशेषो ध्वनि'रिति, तत्र स इति पदं विवृण्वन्नाह लोचनकारः—अर्थो वा शब्दो वा व्यापारो वा, ध्वनतीति व्युत्पत्त्या शब्दार्थयोर्ग्रहणं ध्वन्यते इत्यनया च व्युत्पत्त्या व्यापारस्य। यत्रार्थो वाच्यविशेषो वाचकविशेषः शब्दो वा तमर्थं व्यङ्क्तः, स काव्यविशेषो ध्वनिरिति। अनेन वाच्यवाचकचारुत्वहेतुभ्य उपमादिभ्योऽनुप्रासादिभ्यश्च विभक्त एव ध्वनेर्विषय इति दर्शितम्। उक्तव्याख्यानेनाभाववादिनां प्रथमो विकल्पः पराहतः।

द्वितीयाभाववादखण्डनम्

यदुक्तं कामनीयकमनतिवर्तमानस्यार्थाद् विशेषतः कमनीयत्वाभावात् तस्य ध्वनेरुक्तालङ्कारादिप्रकारेष्वन्तर्भाव इति तदसमीचीनम्। यतो हि वाच्यवाचकमात्राश्रयिणि प्रस्थानेऽर्थाद् अलङ्कारादौ व्यङ्ग्यव्यञ्जकसमाश्रयेण व्यवस्थितस्य ध्वनेः कथमन्तर्भावः। वाच्यवाचकचारुत्वहेतवोऽलङ्कारादयस्तस्य ध्वनेरङ्गभूताः, स तु ध्वनिरङ्गीरूप एवेति प्रतिपादयिष्यमाणत्वात्। परिकरश्लोकश्चात्र—

> व्यङ्ग्यव्यञ्जकसम्बन्धनिबन्धनतया ध्वनेः।
> वाच्यवाचकचारुत्वहेत्वन्तःपातिता कुतः[१] ।।

यत्र प्रतीयमानस्यार्थस्य वैशद्येनार्थात् चारुतया स्फुटतया चाप्रतीतिः, स नाम मा भूद् ध्वनेर्विषयः। यत्र तु प्रतीतिरस्ति, यथा—समासोक्त्याक्षेपानुक्तनिमित्त-विशेषोक्तिपर्यायोक्तापह्नुतिदीपकसङ्करालङ्कारादौ, तत्र ध्वनेरलङ्कारादिष्वन्तर्भावो भविष्यतीत्यादि निराकर्तुमभिहितम्। उपसर्जनीकृतस्वार्थौ—अर्थो गुणीकृतात्मा, गुणीकृताभिधेयः शब्दो वा यत्रार्थान्तरमभिव्यनक्ति, स ध्वनिरिति। तस्य ध्वनेः तेष्वलङ्कारादिषु कथमन्तर्भावः। व्यङ्ग्यप्राधान्ये हि ध्वनिः। न चैतद् व्यङ्ग्यप्राधान्यं समासोक्त्यादिष्वलङ्कारेष्वस्ति।

---

१. परिकरश्लोकः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्रोक्तौ गम्यतेऽन्योऽर्थस्तत्समानैर्विशेषणैः।
सा समासोक्तिरुदिता सङ्क्षिप्तार्थतया बुधैः[1]।।

अर्थद्वयस्य यत्र सङ्क्षेपेण कथनं तत्र समासोक्तिरलङ्कारः, यथा—

उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्।
यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद् गलितं न लक्षितम्[2]।।

इत्यत्र समासोक्तेर्लक्षणस्वरूपं, हेतुर्नाम, तन्निर्वचनमिति पादचतुष्टयेन क्रमादुक्तम्, तच्चैवम्—समासोक्तेर्लक्षणस्वरूपम्—यस्मिन्नुक्तौ कथने वा प्रस्तुतेनार्थेन अतिरिक्तस्याप्रस्तुतार्थस्य सङ्क्षेपेण कथनं तत्र समासोक्तिः। तन्निरूपणमुपोढरागेण विलोलतारकमित्यत्र। उपोढो रागः सान्ध्योऽरुणिमा प्रेम च येन। अत्रोपोढरागशब्देन सान्ध्योऽरुणिमा इत्यस्य प्रेम इत्यस्य च कथनं विलोलास्तारकाः = ज्योतींषि नेत्र विभागाश्च यत्र इति सङ्क्षेपेण प्रस्तुतेनाप्रस्तुतार्थस्यापि कथनमतः समासोक्तिरलङ्कारः। तृतीयान्तपञ्चम्यन्तपदानामेव हेतुत्वं शास्त्रकारैरङ्गीकृतम्, तदनुसारेण तत्समानैर्विशेषणैरिति हेतुः। तच्च श्लोकस्य द्वितीयपादे प्रदर्शितम्, 'तथा गृहीतं शशिना निशामुखमि'त्यत्र निशाया मुखं = प्रारम्भो वदनं कोकनदं च तस्य विशेषणं तथा गृहीतमिति तदुभयस्मिन् पक्षे समानमेव। नामकथनं तृतीयपादे 'यथा समस्तं तिमिरांशुकं तया' इत्यत्र तिमिरं चांशुकाश्च सूक्ष्मांशवस्तिमिरांशुकं रश्मिशबलीकृतं तमःपटलम्, तिमिरांशुकं नीलजालिका नवोढाप्रौढवधूचिता, अत्र तयेत्यनेन नामकथनं समासोक्त्यलङ्कारनिर्वचनमर्थाद् व्युत्पत्तिश्चतुर्थपादेन पुरोऽपि रागाद् गलितं न लक्षितमित्यनेन पुरोऽपि समक्षं पूर्वदिशायां वा।

प्रकृते व्यङ्ग्यस्य प्रतीतावपि तस्य प्राधान्यं न भविष्यति, यतो हि नायकव्यवहारो निशाशशिनावेव संस्कुर्वाणः शृङ्गारविभावरूपोऽलङ्कारतां भजते। ततस्तु विभावीभूताद् वाच्याद्रसनिष्यन्दः पाणिनेः 'पुमान् स्त्रिया' इति नियमानुसारेण। एकशेषस्तु नाशङ्कनीयः, नायिकायाः नायके यो व्यवहारः, स निशायां समारोपितो नायिकायां नायकस्य यो व्यवहारः, स निशायां समारोपितः, नायिकायां नायकस्य यो व्यवहारः स शशिनि समारोपित इति व्याख्यानेन नैकशेषप्रसङ्गः। अलङ्कारेष्वपि यच्चारुत्वं तद् व्यङ्ग्यविशेषाक्षेपिणो वाच्यस्यैव। तथा हि तत्र शब्दोपारूढो विशेषाभिधानेच्छया प्रतिषेधरूपो य आक्षेपः, स एव व्यङ्ग्यविशेषमाक्षिपन् मुख्यं काव्यशरीरम्। यथा—

१. लो.प्र.उ.; २. ध्व.प्र.उ.।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहं त्वां यदि नेक्षेयं क्षणमत्युत्सुका ततः।
इयदेवास्त्वतोऽन्येन विमुक्तेनाप्रियेण ते[१] ।।

इति वक्ष्यमाणमरणविषयो निषेधात्माक्षेपः। एवमेव पूर्वोक्तान्यालङ्कारेष्वपि वाच्यस्यैव प्राधान्यं न तु व्यङ्ग्यस्य। चतुर्षु प्रकारेषु व्यङ्ग्यसत्त्वेऽपि ध्वनिव्यवहारो न भवति। प्रथमस्तावद् व्यङ्ग्यस्याप्राधान्ये, द्वितीयो व्यङ्ग्यस्य श्लिष्टप्रतीतौ, तृतीयो वाच्येण सह व्यङ्ग्यस्य समप्राधान्ये, चतुर्थश्च व्यङ्ग्यस्यास्फुटे प्राधान्ये। ध्वनिव्यवहारः कुत्रेति चेदुच्यते—

तत्परावेव शब्दार्थौ यत्र व्यङ्ग्यं प्रति स्थितौ।
ध्वनेः स एव विषयो मन्तव्यः सङ्करोज्झितः[२] ।।

अर्थात् सङ्करेणालङ्कारानुप्रवेशसम्भावनया उज्झितो रहितः, यत्र शब्दार्थौ व्यङ्ग्यं प्रति तत्परावेव स्थितौ स एव ध्वनेर्विषयो मन्तव्यः। तस्माद् ध्वनेरन्यत्रार्थाद् अलङ्कारादिषु नान्तर्भावः। अनन्तर्भावस्यान्योऽपि हेतुः, तच्च—यतः काव्यविशेषोऽङ्गी ध्वनिरिति कथितः, तस्य पुनरङ्गानि अलङ्कारगुणा वृत्तयश्चेति प्रतिपादयिष्यन्ते।

न केवलमन्योन्यविरुद्धवाच्यवाचकभावव्यङ्ग्यव्यञ्जकभावसमाश्रयत्वान्न तादात्म्यमलङ्काराणाम्, ध्वनेश्च यावत्स्वामिभृत्यवदङ्गिरूपाङ्गरूपयोर्विरोधादित्यर्थः। न चावयव एव पृथग्भूतोऽवयवीति प्रसिद्धः। पृथग्भावाभावेऽपि तेषामलङ्कारादीनां तस्य ध्वनेरङ्गरूपत्वमेव न त्वङ्गिरूपम्। यत्रापि वा अलङ्कारादीनामङ्गित्वम्, तत्रापि ध्वनेर्महाविषयत्वाद् अलङ्कारादिषु ध्वनेर्नान्तर्भावः। सूरिभिः कथित इति विद्वदुपज्ञेयमुक्तिः, न तु यथाकथञ्चित् प्रतिपाद्यते प्रवृत्तेति। प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च वैयाकरणाः श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। यथाह भगवान् भर्तृहरिः—

यः संयोगवियोगाभ्यां करणैरुपजन्यते।
स स्फोटः शब्दजाः शब्दा ध्वनयोऽन्यैरुदाहृताः[३] ।।

करणैः = जिह्वादिस्थानैः, तथा च—

शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते[४] ।।

१. लो., प्र.उ.; २. ध्व., प्र.उ.।
३. वाक्यपदीये, ब्रह्मकाण्डे, कारिका. सं.१०२।
४. वाक्यपदीये, ब्रह्मकाण्डे, कारिका–सं. ६६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथैवान्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः। अस्या अभिप्रायं स्फुटतया प्रतिपादयन्नाह लोचनकारो वाच्यवाचकसहितः सम्मिश्र इति मध्यमपदलोपीसमासः। 'गामश्वं पुरुषं पशुम्' इतिवत्समुच्चयोऽत्र चकारेण विनाऽपि, तेन ध्वनतीति व्युत्पत्त्या वाच्योऽपि ध्वनिः, वाचकोऽपि शब्दो ध्वनिः, ध्वन्यत इति ध्वनिरिति व्युत्पत्त्या ध्वन्यते सम्मिश्र्यते विभावानुभावसंवलनयेति व्यङ्ग्यार्थोऽपि ध्वनिः, ध्वननं ध्वनिरिति व्युत्पत्त्या शब्दनं शब्दः शब्दव्यापारः, न चासावभिधास्यः, अपि त्वात्मभूतः, अतः शब्दव्यापारोऽपि ध्वनिः, काव्यमिति व्यपदेश्यश्च योऽर्थः, सोऽपि ध्वनिः, उक्तप्रकारध्वनिचतुष्टयमयत्वात्। एवंविधस्य ध्वनेः प्रभेदो यथा—मुख्ये द्वे रूपे, लक्षणामूलध्वनिः (अविवक्षितवाच्यध्वनिः) अभिधामूलध्वनिः (विवक्षितान्यपरवाच्यध्वनिः) च। तद्भेदाश्च यथा—अविवक्षित-वाच्यध्वनेर्द्वौ भेदौ—अर्थान्तरसङ्क्रमितवाच्यः, अत्यन्ततिरस्कृतवाच्यश्च। तथा च विवक्षितान्यपरवाच्यध्वनेर्मुख्यतो द्वौ भेदौ—असंलक्ष्यक्रमव्यङ्ग्यः, संलक्ष्यक्रमव्यङ्ग्यश्च। तत्राप्यवान्तरभेदाः। एवं महाविषयस्य ध्वनेर्यत्प्रकाशनं तदप्रसिद्धालङ्कारविशेषमात्रप्रतिपादनेन तुल्यं नास्ति। स्थितावस्यां तद्ध्वनिं प्रति भावितचेतसां युक्त एव संरम्भः। न च तेषु ध्वनिवादिषु कथञ्चिदीर्ष्यया कलुषितशेमुषीकत्वमाविष्करणीयम्। एवं ध्वनेस्तावदभाववादिनः पराहताः। अस्ति ध्वनिः। स चासावविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्विविधः सामान्येन।

मूलोक्ताभिप्रायं विवृण्वन्नाह लोचनकारः—स चेति। पञ्चधाऽपि ध्वनि-शब्दार्थो येन, यत्र, यतः, यस्य, यस्मै इति बहुव्रीह्यर्थाश्रयेण यथोचितं सामानाधि-करण्यं सुयोज्यम्। उदाहरणार्थं यथा—अविवक्षितवाच्यो यस्येति बहुव्रीहिसमाश्रयेण ध्वनिः शब्दः (वाचकः) इत्यस्य सङ्गतिर्जायते। अन्यार्थेष्वपि एवमूह्यम्।

बहुव्रीहावन्यपदार्थप्राधान्यं भवति। स्थितावस्यां ध्वनेर्यो ह्यर्थो व्यङ्ग्यं, व्यञ्जनं, काव्यञ्च एष्वर्थेषु बहुव्रीहिसौलभ्यं जायते; किन्तु वाच्यरूपार्थे बोध्ये बहुव्रीहिसमासः सुलभो न भवति, यतो ह्ययमन्यपदार्थो नास्ति, अपि तु समास-कुक्षावेव स्थितः। तत्समाधाने लोचनकारेण वाच्यस्यार्थः स्वात्मा कृतः, समासश्चैवं विहितः—अविवक्षितः स्वात्मा येन वाच्येन) इति। मूले यदुक्तं सामान्येनेति तदभिप्रायं प्रकटयन्नाह—वस्त्वलङ्काररसात्मना हि त्रिभेदोऽपि ध्वनिरुभाभ्यामेवाभ्याम् (अविवक्षितवाच्यध्वनिः, विवक्षितान्यपरवाच्यध्वनिश्च) सङ्गृहीतः। ध्वनिनामा-नन्तरमेतद्द्वयनामनिवेशनस्य किं फलमिति जिज्ञासायामुच्यते—अविवक्षितवाच्यः, विवक्षितान्यपरवाच्यश्चेति। एतद्द्विनामनिवेशनस्याभिप्रायोऽस्ति यत्—केवलेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यञ्जनाव्यापारेण ध्वनेः पूर्णत्वं न सिध्यति, अपि तु सहकारिरूपेण प्रतिपत्तॄन् अभिधायास्तात्पर्यस्य लक्षणायाश्चार्थानां प्रयोक्तुर्विवक्षायाश्चावश्यकता भवति, अत एवाचार्येण एतद्द्वौ नामनिवेशने कृते। अविवक्षितवाच्यध्वनिर्लक्षणामूलो भवति, अतस्तत्र लक्षणायाः सहकारिता, विवक्षितान्यपरवाच्ये च प्रयोक्तुर्विवक्षायाः सहकारिता भवति। यतो ह्येतदभावे केवलेन व्यञ्जनाव्यापारेण प्रतिपत्ता प्रतिपिपादिषितस्यार्थस्य ज्ञानं कर्तुं न शक्नोति, अनेनोद्देश्येन लोचनकारेणोक्तं वस्तुतस्त्वत्र एतन्नामद्वयनिवेशनेन ध्वनेः स्वरूपं प्रोज्जीवितं जातम्।

आद्यस्य (अविवक्षितवाच्यध्वनेः) उदाहरणम्—

सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्[१]।।

लोचनकारेण 'सुवर्णपुष्पा' इत्यस्यार्थः 'सुवर्णानि पुष्प्यति' इति कृतः। एतत्केवलमाचार्येण अर्थप्रदर्शनं कृतमन्यथा कर्मण्यणि कृते 'टिड्ढाणञ्' इत्यनेन ङीप्-प्रसङ्गः स्यात्, अतः सुवर्णमेव पुष्पं यस्या इति विग्रहः समुचितः।

अभिधया पदार्थज्ञानानन्तरं तात्पर्यशक्त्याऽन्वयबोधः सञ्जायते, तथाप्यत्र मुख्यार्थबाधं स्पष्टीकर्तुं लोचनकाररीतिरेव ज्यायसी। पृथ्वी नास्ति काऽप्येतादृशी लता या सुवर्णपुष्पाणि विकासयति। प्रकारेणानेनात्र मुख्यार्थबाधो जायते, तत्पश्चात् सादृश्यमहिम्ना शूरः कृतविद्यः सेवकश्चेत्येतेषां त्रयाणां सुलभसमृद्धिसम्भारभाजनता लक्षिता भवति। अर्थाद् ये जनाः शूराः कृतविद्याः सेवकाश्च भवन्ति, ते महतीं समृद्धिं समाप्नुवन्ति, अयं लक्ष्यार्थस्तथा च लक्षणायाः प्रयोजनस्वरूपं त्रयाणां प्राशस्त्यप्रतीतिर्भवति।

द्वितीयस्य (विवक्षितान्यपरवाच्यध्वनेः) उदाहरणम्—

शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः।
तरुणि येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः[२]।।

प्रस्तुतपद्ये 'तवाधरपाटलं दशति' इत्यंश एव विशेषतो विचारपथं गमयति, अतस्तव इत्यस्य व्यस्तप्रयोगो विशेषार्थव्यञ्जको लोचनकारेणाङ्गीकृतः। समस्तप्रयोगे तु नायिकासम्बन्धबोधो न जायते; अपि तु साधारणरूपेण तस्याः नायिकायाः अधरपाटलं शुकशावको दशति, अस्यार्थस्य प्रतीतिर्भवति। एवमत्राविमृष्टविधेयांशदोषस्याभावः 'तव' इत्यसमस्तेन पदेन नायिकासम्बन्ध-

१. ध्वन्यालोके, प्र.उ.;
२. ध्वन्या., प्र.उ.।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतीतेरवगमात् श्लोकार्थे वैशिष्ट्यप्रतीतिर्जायते, तेन चायमभिप्राय: समुदेति यत् तवाधरस्तव कारणेनात्यधिकं स्वादुचुञ्चुतां सम्प्राप्त:, तेनायं शुकशावको बिम्बफलमास्वादयन् भुङ्क्ते, न त्वौदरिकवत्परं भुङ्क्ते। अनेन शुकशावकस्य रसज्ञता व्यञ्जिता भवति। यैस्त्वसमस्तप्रयोगो द्रुतविलम्बितवृत्तानुरोधेनाङ्गीकृत:, तन्मतं नैव समीचीनम्। पद्येनानेन कस्यापि कामुकनायकस्य नायिकां प्रत्यभिलाषो व्यञ्जितो भवति। त्रयोऽत्र व्यापारा:—अभिधा, तात्पर्यम्, ध्वननञ्चेति। यतो हि मुख्यार्थबाधाद्यभावे मध्यमकक्षायां तृतीयाया लक्षणाया अभावात् प्रथमोदाहरणे लक्षणा प्रधानीभूय ध्वननव्यापारे सहकारिणी, प्रकृतोदाहरणे चाभिधा तात्पर्याख्या वा वृत्ति: सहकारिणी वर्तते। वाक्यार्थसौन्दर्यादेव व्यङ्ग्यप्रतिपत्ते: केवलं लेशेन लक्षणाव्यापारोपयोगोऽस्तीत्युक्तम्, तेन द्वितीयेऽपि भेदे चत्वार एव व्यापारा:।

भाक्तवादखण्डनम्

यदप्युक्तं भक्तिर्ध्वनिरिति तत्प्रतिसमाधीयते—भक्तेर्ध्वनेश्चाभेद: प्रकारत्रयेण प्रतिपादयितुं शक्यते—पर्यायेण, लक्षणेन, उपलक्षणेन च। अर्थात् किं भाक्तवादिनो भक्तिध्वन्यो: पर्यायतामामनन्ति यथा घटकलशयो:। उत वा भक्तिर्ध्वनेर्लक्षणं यथा पृथिवीत्वं पृथिव्या व्यावर्तकधर्मरूपलक्षणमस्ति। अथवोपलक्षणमर्थात् सूचकमात्रमस्ति, यथा—काकवद् देवदत्तस्य गृहम्। विकल्पेष्वेतेषु त्रिषु भक्तेर्ध्वनेश्च मिथ: क: सम्बन्ध:? इत्युद्भाव्याचार्येण निराक्रियते। प्रथमो विकल्प: पर्याय:, तत्सम्बन्धे आचार्या एवं सङ्गिरन्ते यद् भक्तिर्ध्वनिश्च कथमपि मिथ: पर्यायताश्रयणं न विधास्यत:, उक्तञ्चाचार्येणानन्दवर्धनेन—

भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनि:[१]।

अयमुक्तप्रकारको ध्वनिर्भक्त्या नैकत्वं बिभर्ति भिन्नरूपत्वात्। अर्थाद् ध्वने: स्वरूपं भिन्नमस्ति भक्तेश्च भिन्नम्, वाच्येन व्यतिरिक्तार्थस्य वाच्यवाचकाभ्यां तात्पर्येण रूपेण प्रकाशनं यत्र व्यङ्ग्यप्राधान्ये स ध्वनि:, उपचारमात्रन्तु भक्ति:। लोचनकारस्त्वाह—कारिकायां प्रयुक्तो ध्वनिशब्द: पञ्चस्वर्थेषु योज्य:—शब्दे, अर्थे, व्यापारे, व्यङ्ग्ये, समुदाये च। उपचारशब्दार्थो लोचनकारैरित्थं प्रकटित:—उपचरणमतिशयितो व्यवहारस्तेन चार्थेन व्यक्तीकृतो यद् यस्य शब्दस्य यस्मिन्नर्थे सङ्केतितो व्यवहारप्रसिद्ध:, तमर्थं परित्यज्य तेन सम्बद्धेऽर्थे शब्दव्यवहार एवातिशयितव्यवहार:। यद्यप्यस्यामुपचाररूपगुणवृत्तौ लक्षणायां वा प्रयोजनमप्यस्ति;

१. ध्व., प्र.उ.।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किन्तु लक्षणायां प्रयोजनद्योतनध्वननरूपव्यापारोपयोगाभावाद् मात्रशब्दः प्रयुक्तः। यदर्थमधिकृत्य कश्चित् प्रवर्तते तत्प्रयोजनम्। तत्रार्थात् प्रयोजनेऽपि लक्षणाऽस्ति। एवं व्याख्यानेन ज्ञायते यदेकस्मिन्नन्योऽशतः प्रविष्टः, एकरूपत्वे त्वेतादृशी चर्चा एव न स्यात्। तस्माद् भक्तिरन्या ध्वनिश्चान्यः, न तु पर्यायः। द्वितीयश्च विकल्पो भक्तिर्ध्वनेर्लक्षणम्। तत्पक्षं दूषयन्नाह—लक्षणञ्च तदेव यदव्याप्त्यति-व्याप्त्यादिदोषशून्यम्; किन्तु भक्तेर्ध्वनिलक्षणत्वस्वीकारे अव्याप्तिरतिव्याप्तिश्च दोषौ समुद्भूतौ भविष्यतः। प्रोक्तञ्चाचार्येण—

अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तया[१]।

अर्थाद् भक्तिर्ध्वनेर्लक्षणं न, अतिव्याप्त्यव्याप्तिदोषदुष्टत्वात्। ध्वनिव्यति-रिक्तेऽपि विषये भक्तेः सम्भवात्, लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वरूपातिव्याप्तिः। यत्र व्यङ्ग्यकृतमधिकसौष्ठवं नास्ति, तत्राप्युपचरितशब्दव्यापारेण (गौणीवृत्त्या) प्रसिद्ध्यनुरोधेन प्रवर्तितव्यवहाराः कवयो दृश्यन्ते, यथा—

परिम्लानं पीनस्तनजघनसङ्गादुभयत-
स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशाङ्ग्याः सन्तापं वदति विशिनीपत्रशयनम्[१]।।

प्रकृतश्लोके 'वदति' इत्येव विचारणीयम्, तच्चैवम्—वदति = प्रकटयति, वदतीत्यस्य प्रयोजनमस्ति प्रकटनस्य ज्ञानम्। यदि प्रकटयतीति लेखः स्यात्, तथापि न किमप्यचारुत्वम्। वदतीत्यस्योपचरितव्यवहारेण गूढरूपेण वर्णनेन वा किमप्यधिकचारुत्वं न सिद्ध्यति। कथनमिदं कदापि ध्वनेर्विषयो भवितुं न शक्नोति; किन्तु भक्तेर्विषयः स्वीकर्तुं शक्यते। एवञ्चात्र ध्वनिर्नास्ति, भक्तिश्चास्त्यतोऽतिव्याप्त्या भक्तिर्ध्वनेर्लक्षणमिति वक्तुं न पार्यते।

एवं प्रकारेण पञ्चसंख्याकान्युदाहरणानि ध्वन्यालोके आचार्येण प्रदर्शितानि, तेषु सर्वेषूदाहरणेष्वतिव्याप्तेः सत्त्वाद् भक्तिर्ध्वनेर्लक्षणं नेति प्रतिपादितम्।

उक्त्यन्तरेणाशक्यं यत्तच्चारुत्वं प्रकाशयन्।
शब्दो व्यञ्जकतां बिभ्रद् ध्वन्युक्तेर्विषयी भवेत्[२]।।

यच्चारुत्वमुक्त्यन्तरेणार्थाद् ध्वन्यतिरिक्तेन स्फुटेन शब्दार्थव्यापारविशेषेण प्रकाशयितुं न शक्यते, तच्चारुत्वं प्रकाशयन् व्यञ्जकताञ्च बिभ्रत् (धारयन्) शब्दः

---

२. ध्वन्या. प्र.उ.;   ३. तत्रैव, का. १५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'ध्वनिः' इत्युक्तेर्विषयो भवति। अत्र चोदाहृतविषये शब्द उक्त्यन्तरा शक्यचारुत्वस्य व्यञ्जनाया हेतुर्नास्ति। प्रकृतप्रसङ्गोक्तः शब्द इति पञ्चस्वर्थेषु योज्यम्। किञ्च—

दृढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि।
लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः[1]।।

तेषु लावण्यादिशब्देषु उपचरितशब्दवृत्तिरर्थाद् गौणी लाक्षणिकी चास्तीति। आदिग्रहणेनानुलोम्यं, प्रातिकूल्यं, सब्रह्मचारीत्येवमादयः शब्दा लाक्षणिका गृह्यन्ते। न चात्र किञ्चित् प्रयोजनमुद्दिश्य लक्षणा प्रवृत्तेति न तद्विषयो ध्वननव्यवहारः। तथाविधे च विषये क्वचित् सम्भवन्नपि ध्वनिव्यवहारो व्यञ्जकत्वेनैव प्रवर्तते, न तूपचरितलावण्यादिशब्दप्रयोगात्।

एवं यत्र यत्र भक्तिस्तत्र ध्वनिरिति तावन्नास्ति। तेन यदि ध्वनेर्भक्तिलक्षणं तदा भक्तिसन्निधौ ध्वनिव्यवहारः स्यादित्यतिव्याप्तिः। यत्र यत्र भक्तिस्तत्र तत्र ध्वनिरिति साहचर्यनियमस्वीकारेऽपि। तथापि यद्विषयो लक्षणाव्यापारः, न तद्विषयो ध्वननव्यापारः, न च भिन्नविषययोर्धर्मधर्मिभावः, धर्म एव च लक्षणमित्युच्यते। तत्र लक्षणा तावदमुख्यार्थविषयो व्यापारः, ध्वननञ्च प्रयोजनविषयः, न च प्रयोजनविषयोऽपि लक्षणाव्यापारः समुचितः, लक्षणासामग्र्यभावादित्यभिप्रायेणोक्तमाचार्यैः—

मुख्यां वृत्तिं परित्यज्य गुणवृत्त्याऽर्थदर्शनम्।
यदुद्दिश्य फलं तत्र शब्दो नैव स्खलद्गतिः[2]।।

अस्याः पङ्क्तेरयमभिप्रायो यद् यत् फलं प्रयोजनं वा उद्दिश्य मुख्यां वृत्तिं (अभिधावृत्तिं) परित्यज्य गुणवृत्त्याऽर्थाल्लक्षणावृत्त्याऽर्थबोधः क्रियते, तत्रार्थात् प्रयोजनप्रतिपादने शब्दस्य (वाचकशब्दस्य) स्खलद्गतित्वाभावोऽर्थात् प्रयोजनप्रतिपादने स वाचकशब्दः समर्थ एव, न त्वसमर्थः, अभिधापुच्छभूतैव लक्षणेति प्रतिपादितम्। यतो हि यदा मुख्यार्थबाधेनाभिधाया अवरोधो भवति, तदाऽभिधा स्वयमेवाचरितार्थीभूयान्यार्थमवगमयति। एवं लक्षणा स्वोपस्थित्याऽमुख्यार्थं बोधयति। तत्राप्यमुख्यरूपेण सङ्केतग्रहणं भवति। स्थितावस्यामभिधां विना लक्षणावसर एव नास्ति, अतोऽभिधापुच्छभूतैव लक्षणा। उक्तञ्च—

१. ध्वन्या., १.१६;　　२. तत्रैव, प्र.उ., का.-१७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता।
व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम्[१]।।

गुणवृत्तिशब्दार्थः लक्षणेति। यतोऽभिधापुच्छभूतैव लक्षणा। तस्मादन्यो ध्वनिः, अन्या च गुणवृत्तिः। लक्षणा व्यञ्जनरूपध्वनेर्लक्षणमिति वक्तुं न शक्यते, यतो हि भक्तिर्ध्वनेर्लक्षणमिति सिद्धान्ताङ्गीकारे लक्ष्यातिरिक्तस्थले (ध्वन्यतिरिक्तस्थले) लक्षणस्य प्राप्तिरूपातिव्याप्तिः, तथा च लक्ष्यावृत्तित्वरूपा व्याप्तिरपि। यथा विवक्षितान्यपरवाच्यध्वनौ लक्षणाप्रसङ्गाभावाद् ध्वनेश्च सत्त्वाद् भक्तिरूपलक्षणमव्याप्तं भविष्यति। लोचने आचार्येण लक्षणायाः पञ्चरूपाणां निर्देशः कृतः, यथा—

अभिधेयेन सामीप्यात् संयोगात्समवायतः।
वैपरीत्यात् क्रियायोगाल्लक्षणा पञ्चधा मता।।

क्रमश उदाहरणं यथा—भ्रमरः, गङ्गायां घोषः, यष्टीः प्रवेशय, वैपरीत्याद् यथा—शत्रुमुद्दिश्य कश्चिद् ब्रवीति—किमिवोपकृतं न तेन ममेति। क्रियायोगात् कार्यकारणभावादित्यर्थः, यथा अन्नापहारिणि व्यवहारः 'प्राणानयं हरति' इति। एवमनया पञ्चविधया लक्षणया विश्वमेव व्याप्तम्।

अनेन प्रकारेण शिखरिणि॰ इत्यस्मिन् श्लोके प्रश्नविशेषादिरूपं बाधकमाश्रित्य सादृश्याल्लक्षणा भविष्यति। एवं विवक्षितान्यपरवाच्यध्वनावपि लक्षणायाः सत्त्वान्नातिव्याप्तिः। अत्र लोचनकारेण सारांशतो निगद्यते यत्—यद्यपि मुख्यार्थबाधादिरूपलक्षणाहेतुसत्त्वाद् विवक्षितान्यपरवाच्यध्वनौ लक्षणा सम्भवाऽस्ति, तथापि सहृदयानां प्रकृतस्थले तादृश्यपेक्षा नास्ति। ते त्वत्र वक्तुः (अनुरागिणः) प्रच्छन्नस्वाभिप्रायख्यापनवैदग्ध्यचाटुविरचनात्मकविभावोद्दीपनं व्यङ्ग्यमिति स्वीकुर्वन्ति। अतोऽत्र लक्षणाप्रसङ्गकल्पना अनावश्यक्येव।

वस्तुतो ध्वनेर्यस्मिन् स्थले लक्षणायाः काचन सम्बन्धसम्भावना नास्ति, तदस्ति असंलक्ष्यक्रमव्यङ्ग्यः, अर्थाद् रसादिध्वनिः। काव्येन यत्र विभावानुभावप्रतिपादनं क्रियते, तत्र लेशमात्रमपि बाधकानुप्रवेशः (लक्षणाहेतुप्रवेशः) नास्त्यस्यां स्थितौ भक्तिरूपलक्षणस्य स्वीये लक्ष्येऽर्थाद् ध्वनावभावाद् अव्याप्तिर्भविष्यति।

---

१. ध्वन्या., १.१८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततो मीमांसकैराशङ्क्यते यत् पूर्वोक्तस्वरूपलक्षणां वयं नाङ्गीकुर्मः, अपि त्वभिधेयस्याविनाप्रतीतिरेव लक्षणालक्षणमर्थादभिधेयेन सह येन केनापि सम्बन्धेन सम्बद्धस्य प्रतीतिरेव लक्षणा। एवमभिधेयरूपविभावानुभावयोरविनाभूता रसादयो लक्षणाविषया भविष्यन्ति, अतोऽसंलक्ष्यक्रमव्यङ्ग्ये लक्षणाप्राप्तिरस्त्येव, पूर्वोक्ता समस्या तदवस्थैव।

अस्या आशङ्कायाः समाधानं कुर्वता आचार्येण प्रथमतः 'अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते' इति लक्षणस्य खण्डनं कृतम्। तच्च खण्डनमेवमस्ति—यदाऽभिधेयस्याविनाभूतप्रतीतिरेव लक्षणा भविष्यति, तदा धूमशब्दाद् धूमज्ञाने सति तेनाविनाभूतामग्निस्मृतिमपि भवन्तो लक्षणायाः कार्यं स्वीकरिष्यन्ति, तत्पश्चादग्निना शीतापनोदनस्मृतिरपि धूमशब्दार्थोऽङ्गीकरिष्यते, तेनानन्तशब्दार्थकल्पना कर्तव्या भविष्यति। अन्ततो भवताऽपि 'मुख्यार्थबाध एव लक्षणाबीज'मिति स्वीकर्तव्यं भविष्यति। तत्स्वीकारे तु असंलक्ष्यक्रमव्यङ्ग्येऽर्थाद् रसादिध्वनौ विभावादौ बाधकाभावाल्लक्षणायाः सम्बन्ध एव न, ध्वनेश्च सत्त्वादव्याप्तिः।

स्वसिद्धान्तखण्डनेनाक्रोशतां गतो मीमांसकः कथयति यद् रत्यादिचित्तवृत्तिज्ञाने शब्दव्यापार एव नास्तीति वयमङ्गीकुर्मः, अपि तु येन प्रकारेण धूमज्ञानेनाग्नेः स्मरणं कुर्मस्तथैव विभावादिप्रतीत्यनन्तरं रसादिचित्तवृत्तिप्रतीतिर्भवति। अत्रोच्यते लोचनकारेण—तदा तु परचित्तवृत्तिज्ञानमेव रसज्ञानमिति भवतामभिमतम्; किन्त्वेतत्तु परचित्तवृत्तेरनुमानमात्रमस्मिन् रसत्वं कथम्? अपि तु काव्यगतविभावादीनां चर्वणया रूपलौकिकचमत्काररूपरसास्वादोऽस्ति तं स्मरणानुमानादावाकृष्य तद्धीनताज्ञापनं नैवोचितम्।

रसानुभूतयेऽनुमानस्मृत्यादयो बद्धा न सन्ति। केवलं दर्शको दृश्यमानेन सह हृदयसंवादमनुभवन् चर्वणाबलेन पूर्णतया तन्मयतां प्राप्नोति, तदा तेन दर्शकेन ज्ञायते यत् सः कस्यापि भिन्नस्य तटस्थव्यक्तेर्वा सुखेन सुखी, दुःखेन दुःखी वा भवति। एतदेव रसभूमेरलौकिकताऽत्र। दुःखस्याप्यानन्दरूप एवानुभवो भवति। एवमालङ्कारिकैराचार्यै रसानुभूतये चर्वणाऽनिवार्येति स्वीकृतम्; अपि तु ते त्वेतदपि कथयन्ति यच्चर्वणायां रसानुभूतौ च भेद एव नास्ति। सम्प्रति यदि केनाप्युच्यते यच्चर्वणा केनापि प्रभावेणोत्पन्ना भवति, तदा त्विदं समाधानमस्ति यत् साऽलौकिक्यस्ति। अतस्तत्र लौकिकप्रत्यक्षादिप्रमाणानामुपयोग एव नास्ति। लोके यत् कार्यं कारणञ्च भवतस्ते एव काव्ये विभावानुभावनाम्ना ज्ञायेते। चर्वणा स्थायिभावं रस्यमानमापादयति, अस्यायमभिप्रायो नास्ति यच्चर्वणाप्रमाणव्यापारमिव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञापनस्वरूपमथवा हेतुव्यापारमिवोत्पादनरूपमस्ति, अपि तु तत्त्वभिव्यञ्जनमस्ति। चर्वणामाध्यमेन विभावादयः रसहेतवोऽवश्यमेव सन्ति किन्त्वलौकिकाः, अतस्ते विभावादयो न ज्ञापकहेतवः, न वा कारकहेतवः। यदा रसः स्वसंवेदनसिद्धोऽस्ति, तदा तस्य सिद्धये अतिरिक्तप्रमाणराहित्यकथनं न किञ्चिदपि विकृतिकारकम्।

अस्तु, यदा भवन्तो लक्षणया रसबोधप्रतिपादनं विधास्यन्ति, तर्हि तु यदा अर्थाभिधानुपयोगी अनुप्रासोऽपि रसव्यञ्जकस्तदा त्वभिधाप्रसङ्ग एव नास्ति। पुनश्च लक्षणया रसबोधप्रतिपादनं नाशङ्कनीयम्। अन्ते आचार्येण कस्याप्येषा शङ्का समुद्भाविता यत् काव्यं वाच्यार्थबोधकं व्यङ्ग्यार्थबोधकञ्च। प्रकारेणानेन वयं वाक्यभेदं विधास्यामः। तस्योत्तरे लोचनकारोक्तिरस्ति यद् वाक्यार्थः कदापि द्विधा भवितुं न शक्नोति, यतो ह्येकस्मिन् काले वाक्यार्थद्वयज्ञानं भवितुं न शक्नोति प्रकरणादेः साहाय्यं द्वितीये वाक्येऽप्याश्रयणीयं भविष्यति। यदि च भवन्तः प्रकरणादीन् नियामकत्वेन नाङ्गीकरिष्यन्ति, तदा तु 'अग्निहोत्रं जुहुयात् स्वर्गकामः' अस्य श्रुतिवाक्यस्यार्थः खादेच्छ्वमांसमिति स्यात्, तर्हि तदर्थनिरसने किं प्रमाणं भवतां पार्श्वे स्थास्यति। अन्ततः प्रकरणादिस्वीकारपूर्वकमेवार्थाभिधानं भवद्भिर्विधातव्यं भविष्यति। अतो वाक्यभेदकथनं दोषपूर्णमेव।

रसास्वादस्थितौ लौकिकस्थितिरिव पूर्वापरकालचिन्ता न जायते, सा तु सर्वथा अलौकिकी स्थितिः। यथा हि वृत्तिकारः सामान्यतो विवक्षितान्यपरवाच्यध्वनौ भक्तेरभावनिर्देशं कृतवान्। तत्र लोचनकारकथनमस्ति यत्—मन्ये विवक्षितान्यपरवाच्यध्वनेः संलक्ष्यक्रमरूपभेदे लक्षणा कथञ्चित् स्वीकार्याऽपि; किन्तु रसादिरूपालक्ष्यक्रमे लक्षणाङ्गीकारस्य नास्ति काचिदावश्यकता, न केवलं विवक्षितान्यपरवाच्य एव, अपि त्वविवक्षितवाच्यध्वनौ यत् खलु लक्षणामूलमस्ति, तत्रापि मुख्यार्थबाधादिलक्षणासामग्र्यनपेक्षयैव व्यङ्ग्यार्थे विश्रान्तिर्भवति।

एतेनेदं परिपुष्टं भवति यद् भक्तिर्ध्वनेर्लक्षणं नेति।

•

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लघु-ग्रन्थमाला

[६३]

श्रीविश्वेश्वरपाण्डेयविरचिता

रसचन्द्रिका

सम्पादकः

डॉ. हरिवंशकुमारपाण्डेयः

ईक्ष्यशोधकः, प्रकाशन-संस्थानस्य

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये

वाराणसी

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

वि.सं. २०५९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

साहित्यपाथोनिधिमन्थनोत्थं
काव्यामृतं रक्षत हे कवीन्द्राः।
यदस्य दैत्या इव लुण्ठनाय
काव्यार्थचौराः प्रगुणीभवन्ति।।

अस्ति काव्यं कवेश्चिन्तनप्रासादं किं काव्यमिति जिज्ञासानिवृत्तये। यावत् काव्यं भुवि वर्तते तावत् कवेः सारस्वतं कर्म परिपूर्णम्। यथा चोक्तम्—

काव्यमय्यो गिरो यावच्चरन्ति विशदा भुवि।
तावत् सारस्वतं स्थानं कविरासाद्य मोदते।।

सम्पूर्णं ज्ञानं विज्ञानं भूगोलं खगोलमितिहासादिकं च काव्यविषयपरिधौ समापतति। किञ्चिदपि वस्तु लोके ईदृग्विधं नास्ति यत्र काव्यप्रसरोऽप्राप्तावसरः। सुष्ठूक्तं केनापि —

न स शब्दो न सा विद्या न स न्यायो न सा कला।
जायते यत्र काव्याङ्गमहो भारो महान् कवेः।।

सुखपूर्वकं सुकुमारमतीनामपि चतुर्वर्गफलप्राप्तिसाधकं काव्यमेव। नास्ति काव्यादन्यद्वस्तु पुरुषार्थचतुष्टयसाधकं सुखपूर्वकं स्वल्पबुद्धीनां राजश्रेष्ठिसुतानां कृते। यथाह तत्रभवान् साहित्यदर्पणकारो विश्वनाथः—

चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते।।

अन्यैरपि समर्थितम्—

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्।।

कवेः कर्म काव्यमुच्यते। संसारस्यास्य रचनाकर्ता अपि कविः। यथा चोक्तम्—

कविर्मनीषी परिभूः स्वयम्भूः।।इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रख्यातकोशकारोऽमरसिंहः काव्यं कविं च पर्यायरूपेण गृहीतवान्। यथा—शुक्रो दैत्यगुरुः, काव्य उशना भार्गवः कविः।

ननु कोऽयं कविर्यस्य कर्म काव्यमुच्यत इति जिज्ञासायां वैजयन्तीकोषो वदति—प्राज्ञा काव्यकृतौ कविः। यास्काचार्येण कविः क्रान्तदर्शी मननशीलो दूरद्रष्टा च स्वीकृतः। अमरसिंहोऽपि कथयति—संख्यावान् पण्डितः कविः। व्याकरणरीत्या 'कु'शब्दे, 'कुङ्'शब्दे इति धातोर्वा इप्रत्यये कृते कविशब्दो निष्पद्यते। मुकुटादिकोशकारैश्च 'कवृ-'वर्णे इति धातुना निष्पादितः कविशब्दः। सामान्यतयाऽनेन शब्देन क्रान्तदर्शनं कृत्वा वस्तुवर्णनरतो विद्वान् व्यज्यते। कवेः कृते क्रान्तदर्शनं तद्वर्णनमुभयमस्त्यावश्यकम्। यथा स्वीकरोति भट्टतौतः—

दर्शनाद् वर्णनाच्चाथ रूढा लोके कविश्रुतिः।
तथा हि दर्शने स्वच्छे नित्येऽप्यादिकवेर्मुनेः।।
नोदिता कविना लोके यावज्जाता न वर्णना।।

रूपकं भारतीयचिन्तनधाराया विशिष्टा सारग्राहिका शैली। काव्यस्वरूपबोधनायापि बह्व्यो रूपककल्पनाः कृता मनीषिवर्य्यैः। राजशेखरस्य काव्यपुरुषस्य कल्पना तु प्रशंसनीयाऽस्ति। अस्य काव्यपुरुषस्य शरीरं वर्णयन् वदति राजशेखरः सरस्वतीमुखेन काव्यमीमांसायाम्—'शब्दार्थौ चास्य शरीरम्। प्राकृतं बाहुः। पिशाचभाषा चरणौ। गुणा गुणस्थानीयाः। मिश्रभाषा वक्षःस्थलम्। सस्कृतं मुखम्। छन्दांसि रोमस्थानानि। अलङ्काराश्चालङ्करणभूताः। रस आत्मा। वचनविन्यासो रीतिः। प्रवृत्तिश्च वेषविन्यासः' इत्यादि।

भाषायां व्युत्पत्तिवर्धनाय यथा व्याकरणशास्त्रमपेक्ष्यते, तथैव काव्ये नैपुण्यायालङ्कारशास्त्रमपि। अलङ्कारशास्त्रं विना केवलं काव्ये नैपुण्यमेव न सम्पद्यते; अपि तु वाक्यदोषदृष्टिरपि नोत्पद्यते। नैतद्विना पूर्णरूपेणार्थावगतिः। वचसो व्यङ्ग्यार्थविलसितत्वं वा व्यञ्जकपदावलिपेशलत्वमलङ्कारशास्त्राधीनमेवास्ति। अत एव शास्त्रमिदं स्वजन्मसमयादेव नितरां लोकप्रियतामभजत्। तस्मादेतत् काव्यालङ्कार-काव्यशास्त्र-क्रियाकल्प-साहित्यविद्याऽलङ्कारशास्त्र-साहित्यशास्त्रादि-कतिपयनामभिः ससम्मानं सानुरागञ्च समाहूतमभूत्।

अलङ्कारशास्त्रस्येतिहासः कालक्रमेण चतुर्षु भागेषु विभजितुमर्हति—

१. **प्रारम्भिककालः**—वैदिककालादारम्भ भामहपूर्वकालः। कालेऽस्मिन् चतुर्णामलङ्काराणां निरूपणमाचार्यैः कृतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२. **रचनाकालः**—आचार्यभामहादारभ्याऽऽनन्दवर्धनाचार्यपूर्वकालः। कालेऽस्मिन् अलङ्कारसम्प्रदायस्य विकासो जातः। तस्य प्रमुखा आचार्याः—भामहः, दण्डी, उद्भटः, रुद्रटश्चासन्।

३. **निर्णयात्मककालः**—आनन्दवर्धनाचार्यादारभ्य मम्मटान्तकालः। यद्यपि कालेऽस्मिन् आनन्दवर्धनाचार्येण काव्ये 'ध्वनिरेवात्मा' इति प्रतिपादितम्, तथापि अलङ्कारादयस्तस्य गुणोत्कर्षकाः सन्तीति निर्णीतम्। तदनन्तरमाचार्यकुन्तकस्य 'वक्रोक्तिजीवितम्' उपलभ्यते। आचार्यमम्मट एतस्य कालस्य प्रमुख आलङ्कारिकः। 'काव्यप्रकाशः' तस्य प्रमुखा रचनाऽद्यापि विद्वत्समाज आद्रियते।

४. **व्याख्यात्मककालः**—आचार्यमम्मटादारभ्य विश्वेश्वरपाण्डेयपर्यन्तमस्त्यस्य कालस्य सीमा। कालेऽस्मिन् विश्वनाथ-जयदेव-अप्पयदीक्षित-जगन्नाथ-विश्वेश्वर-पाण्डेयसमा आलङ्कारिका जाताः, यैः सर्वाङ्गपूर्णालङ्कारिका ग्रन्था रचिताः।

आचार्यविश्वेश्वरपाण्डेयः

पण्डितराजजगन्नाथस्यानन्तरं काव्यशास्त्रविषयकरचनाक्षेत्रे प्रायः संस्कृतविदुषां प्रतिभा कुण्ठिता जाता। तथाविधे समये व्याकरणशास्त्रस्य 'वैयाकरणसिद्धान्तसुधानिधिः', न्यायशास्त्रस्य 'तर्ककुतूहलम्', 'दीधितिप्रवेशादयः' इति ग्रन्थानां प्रणेता परमप्रतिभासम्पन्नो विद्वान् विश्वेश्वरपण्डितः पाण्डेयो वा नामाऽऽलङ्कारिकः 'अलङ्कारकौस्तुभ'-'रसचन्द्रिका'प्रभृत्युच्चकोटिकानलङ्कार-शास्त्रीयान् ग्रन्थान् प्रणीतवान्। नारिकेलरसमिवास्य पण्डितस्य ग्रन्थेषु विविधरूपाः गम्भीरपाण्डित्यञ्च लक्ष्यते।

विश्वेश्वरपाण्डेयस्य पितुर्नाम **लक्ष्मीधर** आसीत्। उत्तरप्रदेशस्य अल्मोडामण्डलान्तर्गते 'पाटिया'नामके ग्रामे ब्राह्मणकुले विद्वानयं जनिं लेभे। पण्डितस्यास्य समयोऽष्टादशशताब्द्याः प्रारम्भिकः कालो मन्तव्यः। अस्य पूर्वजा भारद्वाजगोत्रियाः कान्यकुब्जब्राह्मणा आसन्। अस्य पिता लक्ष्मीधरपाण्डेयो वृद्धावस्थायां काशीमेत्य गङ्गातटे मणिकर्णिकाघट्टे वासमकरोत्। भगवतो भूतभावनस्य विश्वनाथस्य शरण एव शेषं जीवनमयापयत्। तत्रैव तस्य विश्वेश्वरपाण्डेयस्य शिक्षा दीक्षापि जाता। मन्दारमञ्जर्यादिषु स्वरचनासु प्रारम्भेऽनेन स्वपितुरेव वन्दना कृता। अनेन ज्ञायते यदस्य विद्यागुरुरपि पितैवासीत्। तद्यथा—

जयति यथाजातानां वाग्जात-सुजात-पारिजातश्रीः।
श्रीलक्ष्मीधरविबुधावतंसचरणाब्जरेणुनिकरः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसचन्द्रिकायामपि तदेव मङ्गलाचरणं समुपलभ्यते। जनश्रुतिरियमस्ति यदयं विश्वेश्वरः पञ्चदशवर्षस्यावस्थायामेव काव्यरचनां प्रारब्धवान्; किन्तु चत्वारिंशद्वर्षस्यावस्थायामेवाकाले कालकवलितोऽभूदयं पदवाक्यप्रमाणविद् पण्डितः श्रीविश्वेश्वरः। अस्मिन्नल्पीयसि कालेऽपि पण्डितेनानेन विंशत्यधिकानां ग्रन्थानां प्रणयनं विहितम्।

विश्वेश्वरपाण्डेयस्य कृतयः

आचार्यविश्वेश्वरपाण्डेयस्य मन्दारमञ्जर्याष्टीकाकारः श्रीतारादत्तपाण्डेयस्तस्य विदितरचना निम्ननिर्दिष्टा अमन्यत—१. अलङ्कारकौस्तुभम्, २. अलङ्कार-मुक्तावली, ३. आर्यासप्तशती, ४. कवीन्द्रकण्ठाभरणम्, ५. काव्यतिलकम्, ६. काव्यरत्नम्, ७. तर्ककुतूहलम्, ८. दीधितिप्रवेशः, ९. नवमालिका, १०. नैषधीयटीका, ११. मन्दारमञ्जरी, १२. रसचन्द्रिका, १३. रसमंञ्जरी, १४. रोमावलीशतकम्, १५. लक्ष्मीविलासः, १६. वक्षोजशतकम्, १७. शृङ्गारमञ्जरीसट्टकम्, १८. षड्-ऋतुवर्णनम्, १९. व्याकरणसिद्धान्तसुधा-निधिः, २०. होलिकाशतकञ्च। कतिपयतान्त्रिकग्रन्थानपि पण्डितोऽयं रचितवान्। तद्यथा—तारासहस्रनामव्याख्या। रुक्मिणीपरिणयनाटकमप्यस्यैव रचना।

'अलङ्कारकौस्तुभम्'-नामकोऽस्य काव्यशास्त्रस्यान्तिमः प्रामाणिकश्चाति-गौरवपूर्णो ग्रन्थोऽस्ति, यस्मिन् स रसगुणदोषरीतिप्रभृतीनां मम्मट-जगन्नाथादि-भिरप्यधिकं विशिष्टं विवेचनमकरोत्। स्थाने स्थानेऽसावप्पयदीक्षितस्य पण्डितराजस्य च मतखण्डनमकरोत्। स्थाने स्थाने स्वरचितपद्यानुदाहृत्य स्वकाव्य-निर्माणपाटवमपि पण्डितेनानेन प्रमाणितम्। ग्रन्थेऽस्मिन् अलङ्कारविवेचनमतिविशदं तर्कपूर्णञ्चास्ति। अस्योपर्यनेन स्वोपज्ञटीकापि रचिता, या रूपकालङ्कारपर्यन्तमेव प्राप्यते। सरलपरिपाट्यावबोधायानेन लिखितोऽपर आलङ्कारिको ग्रन्थः 'अलङ्कार-प्रदीपः'। कवीन्द्रकण्ठाभरणे विदग्धमुखमण्डनग्रन्थमनुसृत्य शब्दालङ्काराणां विवेचनं सुन्दरं चित्रकाव्यनिरूपणमपि विहितम्। रसचन्द्रिकायां रसस्य साङ्गोपाङ्गनिरूपणं कृतमस्ति। मन्दारमञ्जर्यां बाणस्य कादम्बरीशैल्या तेनोत्कृष्टा रचना कृता। काव्यस्यास्य कादम्बरीव भागद्वयम्—पूर्वार्द्धमुत्तरार्द्धञ्च। पूर्वार्द्धस्य रचना विश्वेश्वरपाण्डेयेन, उत्तरार्द्धस्य तु तच्छिष्येण केनापि कृता। वैयाकरण-सिद्धान्तसुधानिधिग्रन्थे पाणिनीयाष्टाध्यायिक्रमेण तत्सूत्राणां व्याख्या तेन विहिता। एतेन एष व्याकरणग्रन्थोऽतीवसरलोऽभूत्।

रसचन्द्रिका

रसचन्द्रिकेयं पाण्डेयकुलभूषणपण्डितप्रवरश्रीविश्वेश्वरशर्मणः कृतिः। इयं च नायकनायिकादीनां परिष्कृतलक्षणनवीनप्रायोदाहरणरसादिनिरूपणादिभिः स्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सदृशानपरान् प्रबन्धानतिशेत इत्यत्र न बहुवचनप्रपञ्चनस्य प्रयोजनम्। प्रबन्धस्यास्यादौ ग्रन्थनिर्मितिप्रयोजनं कथयता तेन पण्डितप्रवरेणोद्घुष्टम्—

सारासारविचारैकपरायणहृदां सताम्।
चमत्कारप्रकाराय क्रियते रसचन्द्रिका।।

तेन प्रथमं नायकनायिकाभेदनिरूपणं कृतम्। निरूपणप्राथम्ये हेतुमभिदधता तेन कथितं यद् रसस्य प्रादुर्भावे नायिकानायकावेवासाधारणकारणं भवतः, तस्मात् तावेव प्रथमं निरूप्येते। तयोर्भेदप्रभेदं सोदाहरणं प्रस्तुतमादौ। तत्रापि बहुवक्तव्यत्वात्प्रथमं नायिका निरूपिता। सा स्वीया-परकीया-सामान्याभेदेन त्रिविधा। तत्र पतिमात्रविषयकानुरागवती स्वीया। परपरिणीतत्वे सति स्वानुरक्ता परकीया। वित्ताभाववता सहास्याः सम्भोगो मा भूदित्येतादृशेच्छाविषयत्वे सत्यनुरक्ता सामान्या। तासां प्रभेदपुरस्सरं बहु व्याख्यातम्, विशेषजिज्ञासानिवृत्तये तत्रैवावलोकनीयं सुधीजनैः। सामान्येन नायिकाभेदानां सङ्कलनमित्थं कृतम्।

इह मुग्धा तावदेकैव। मध्याप्रगल्भे धीरादिभेदेन षट्, ज्येष्ठाकनिष्ठाभेदेन द्वादशेति त्रयोदश स्वीयाभेदाः। परोढा कन्यका चेति परिकीयाद्वैविध्यम्। सामान्या एकैवेति षोडशभेदाः। तासां च वक्ष्यमाणैरष्टाभिर्भेदैरष्टाविंशत्यधिकशतं भेदाः। प्रत्येकमुत्तमादिभेदत्रयेण शतत्रयं चतुरशीतिश्च भेदा भवन्ति। तत्र प्राचीनसम्मतिं प्रदर्शयता चोक्तम्—

त्रयोदशविधा स्वीया द्विविधा च पराङ्गना।
एका वेश्या पुनश्चाष्टाववस्थाभेदतो मताः।।
पुनस्तास्त्रिविधाः सर्वा उत्तमाधममध्यमाः।
इत्थं शतत्रयं तासामशीतिश्चतुरुत्तरा।।
जातिकालवयोऽवस्थाभावकन्दर्पनायकैः।
इतरा अप्यसङ्ख्याता नोक्ता विस्तरभीतितः।। (रसच०, पृ० १५)

प्रसङ्गेऽस्मिन् सखी-दूत्यादीनां निरूपणं विहितम्। तत्र 'नाप्रामाण्यं लिखितं किञ्चित्' इति मतं प्रमाणयता भरत-क्षीरस्वामि-विद्यानाथ-भोजराज-अमरसिंह-विश्वनाथादीनां मतं प्रस्तुतम्।

नायकनिरूपणप्रसङ्गे तस्य भेदत्रयं प्रतिपादितम्, पत्युपपतिवैशिकभेदात्। विवाहजन्यसंहकारवान् पतिः। तद्भिन्नत्वे सत्यनुरागविषय उपपतिः। वेश्योपभोगरसिको वैशिकः। तेषां सप्रभेदं लक्षणोदाहरणं च प्रस्तुतम्। नायकस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सहायाश्चतुर्द्धा, पीठमर्द-विट-चेटक-विदूषकभेदात्। तेषामपि लक्षणोदाहरणं प्रस्तुतम्। तत्र विद्यानाथस्य सम्मतिं प्रस्तौति—

किञ्चिदून: पीठमर्द एकविद्यो विट: स्मृत:।
सन्धाननिपुणश्चेटो हास्यप्रायो विदूषक:।। (रसच०, पृ०३३)

एतेषां नायकानुकूलाचरणं व्यापार:। तेषां व्यापारस्योदाहरणं श्रीरुद्रचन्द्रदेवानां प्रस्तौति। यथा—

मानं त्यक्ष्यसि कान्तमेष्यसि पुन: सम्भावयिष्यस्यलं
भूषा: पास्यसि वारुणीं रतिकलाकेलिं समारोक्ष्यसि।
किञ्च त्वां विनिवेदयामि सरले! मन्दानिलोल्लासिता
प्रालेयांशुकृतोदया मधुनिशा हस्तं गता हार्यते।।

अथ रसनिरूपणप्रसङ्गे त्रिविधा शक्तिर्लक्षणा व्यञ्जना च वृत्तिर्निरूपिता। रसोऽसंल्लक्ष्यक्रमो ध्वनिर्भवति। ननु रसस्यासंल्लक्ष्यक्रमत्वं कथमिति चेत्, उच्यते— न हि विभावादय एव रसा:; किन्तु रसस्तैर्निष्पद्यत इत्यस्ति क्रम:। तत्क्रमसत्त्वेऽपि क्रमानवबोधात्। तत्र प्रमाणरूपेण भरतसूत्रं प्रस्तौति—

'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्ति:' इति। सूत्रस्यास्य व्याख्याने भट्टलोल्लट-श्रीशङ्कुक-भट्टनायक-अभिनवगुप्तपादाचार्याणां मतं प्रस्थापयति। अस्मिन् क्रमे शृङ्गारं सभेदं प्रपञ्चयति। स्थायिभावस्य लक्षणं विदधता तेनोक्तम्—

सजातीयविजातीयैरतिरस्कृतमूर्त्तिमान्।
यावद्रसं वर्तमान: स्थायी भाव उदाहृत:।।

तत्र भरतस्य सम्मतिं प्रस्तौति—

यथा नराणां नृपति: शिष्याणां गुरवो यथा।
तथैव सर्वभावानां स्थायी भावो महानिह।।

पुन: भावस्याभासस्य च लक्षणमुदाहरणपुरस्सरं व्याख्याति।

अनेन प्रकारेणासंल्लक्ष्यक्रमध्वनिं निरूप्य संल्लक्ष्यक्रमध्वनिं निरूपयति। तस्य त्रयोदशभेदा निरूपिता:। तद्यथा—

द्वौ शाब्दी शक्तिरष्टार्थी द्व्युत्थैकं भेदमञ्चति।
द्वौ लक्षणेत्यमी भेदा: प्राधान्येन त्रयोदश।। (रसच०, पृ०४५)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसभेदनिरूपणक्रमे शान्तरसस्य स्थापना काव्ये मतान्तरप्रदर्शनपुरस्सरं कृता। पुनः व्यभिचारिभावानां निरूपणं कृतम्। अस्मिन्नेव क्रमे स्तम्भाद्यष्टभावानां निरूपणं विहितम्। तदनन्तरं यौवनकालीनभावान् निरूप्य लीलादिदशहावजन्यचेष्टाविशेषाः कथिताः। हावभावादीनां विवेकं प्रस्तुवन् कथयति ग्रन्थकारो विश्वेश्वरः—अनभिव्यक्तो मानसो विकारो भावः, किञ्चिदभिव्यक्तो हावः, स्फुटतरमभिव्यक्तो हेलेति। तेन—

बाह्यार्थालम्बनो यस्तु विकारो मानसो भवेत्।
भाव इत्युच्यते सद्भिस्तस्योत्कर्षो रसः स्मृतः।। (रसच०, पृ०७२)

इति हलायुधकोशस्य प्रमाणं प्रस्तौति। अथ स्वाभाविकगुणान् प्रतिपादयति। तद्यथा—

शोभा कान्तिश्च दीप्तिश्च तथा माधुर्यमेव च।
धैर्यं प्रागल्भ्यमौदार्यमित्येते स्युरयत्नजाः।। (रसच०, पृ०७५)

तेषां लक्षणोदाहरणं च निरूपयति। प्रशान्ते ग्रन्थे लोके ग्रन्थस्यास्य स्वकीयस्य मुदप्रदायकत्वस्य कामनां विधाय मौनमालम्बते। तद्यथा—

श्रीमन्महीमहिततत्तदसीमधीम-
न्मूर्द्धन्यताकलनसङ्गतधन्यताकः।
लक्ष्मीधरोऽयमुदसूत मुदं प्रसूतां
विश्वेश्वरस्य कृतिरस्य चिरस्य लोके।।

इत्थं ग्रन्थोऽयं साहित्यसारभूतस्य रसस्य सारसङ्ग्राहकः प्रकरणरूपो विलसतितराम्।

प्रस्तुतं संस्करणम्

आचार्यविश्वेश्वरपाण्डेयप्रणीता रसचन्द्रिकेयं विश्वविश्रुतस्य सरस्वतीभवन-पुस्तकालयस्य हस्तलिखितपाण्डुलिपिं ४०६९७ संख्याकामाधारीकृत्य संशोध्य सम्पाद्य च प्रकाश्यते विश्वविद्यालयेनानेन लघुग्रन्थमालायाम्। यद्यपीतः पूर्वमपि श्रीजयकृष्णदासद्वारा १९८३ वैक्रमाब्दे प्राकाश्यं नीता रसचन्द्रिकेयम्; किन्त्विदानीं सा दुर्लभतां प्राप्ता। तया पाठसंशोधने बहुसाहाय्यं प्राप्तमेतदर्थं तस्मै नैकविधप्रबन्धरत्नमुद्रणबद्धपरिकराय श्रीजयकृष्णदासमहोदयाय सबहुमानं सादरं कृतज्ञतां विनिवेदयामि। ग्रन्थस्यास्य भूमिकायां ग्रन्थकारस्य व्यक्तित्वकृतित्वप्रकाशकमितिवृत्तं प्रस्तुतम्। विषयनिर्देशिका बृहद्विषयानुक्रमणिका

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिपादिता। परिशिष्टभागे च श्लोकार्द्धानुक्रमणिका, ग्रन्थे स्मृतानां ग्रन्थानां ग्रन्थकाराणाञ्चानुक्रमणिकापि सुनिबद्धा। तस्मादस्य नावीन्यमक्षुण्णमस्तीति नास्त्यत्र सन्देहलेशावसरः।

ग्रन्थस्यास्य सम्पादने कृतसहायानामाधमर्ण्यं बिभ्रन् सर्वप्रथमं विश्वविद्यालयस्यास्य कुलपतिवर्य्यान् महनीयकीर्तिभाजः कविकुलचूडामणीन् मिश्रोपाधिविभूषितान् **प्रो. 'अभिराज'-राजेन्द्रमिश्रमहोदयान्** नतमस्तकेनाभिवादयामि, येषां कृपालवलेशेन ग्रन्थरत्नोऽयं सम्पाद्य प्रकाश्यतां नीयते। अतः परं प्रकाशनसंस्थानस्य निदेशकेभ्यो रुचिरोत्तमोत्तमप्रकाशनकाष्ठायां परां काष्ठामाटीकमानेभ्यो दिवानिशमस्मत्सदृशानां विकासे निबद्धपरिकरेभ्यो **डॉ० हरिश्चन्द्रमणित्रिपाठिमहोदयेभ्यः** सश्रद्धं प्रणामाञ्जलिं समर्पयन् नितरामात्मसन्तुष्टिमधिगच्छामि। किञ्च समये समये साहाय्यप्रदायकाय ग्रन्थस्यास्य सम्पादने दत्तसहायकाय सहायकसम्पादकाय **डॉ० ददन-उपाध्यायाय** साधुवादपुरस्सरं कृतज्ञतां वितरामि। अथ च श्रीजीकम्प्यूटरप्रिण्टर्ससञ्चालकान् **श्रीअनूपकुमारनागर**महाशयान् प्रकाशनौपयिकसौविध्यप्रदानोत्कानभिशंसामि धन्यवादम्।

अन्ते च विश्वेश्वरस्य भगवतः सान्नपूर्णस्य श्रीकाशीविश्वनाथस्य पदपद्मयोः साञ्जलिप्रणतिततीर्विनिवेद्य यथौचित्यं मानप्रदानाय दोषविस्मरणाय च कृतिनो मनीषिणः प्रार्थयमानो विरमति—

वाराणस्याम्,
गुरुपूर्णिमायाम्,
२०५९ तमे वैक्रमाब्दे

हरिवंशकुमारपाण्डेयः
ईक्ष्यशोधकः, प्रकाशनसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमणिका

विषयाः	पृष्ठाङ्काः
मङ्गलाचरणम्	१
पितुर्वन्दनम्	१
ग्रन्थनिर्मितिप्रयोजनम्	१
नायकनायिकानिरूपणे कारणम्	१
नायिकायाः प्रथमं निरूपणे हेतुः	१
नायिकात्रैविध्यम्	१
स्वीयालक्षणम्, उदाहरणञ्च	१
स्वीयात्रैविध्यम्	२
मुग्धालक्षणं भेदाश्च	२
सामान्याया उदाहरणम्	२
अज्ञातयौवनाया उदाहरणम्	३
ज्ञातयौवनाया उदाहरणम्	३
अस्या एव नवोढात्वं विश्रब्धनवोढात्वञ्च	३
नवोढाया उदाहरणम्	४
विश्रब्धनवोढाया उदाहरणम्	४
मध्याया लक्षणमुदाहरणञ्च	४
प्रगल्भाया लक्षणमुदाहरणञ्च	४
मध्याधीराया लक्षणमुदाहरणञ्च	५
मध्याऽधीराया उदाहरणम्	५
मध्याधीराधीराया उदाहरणम्	६
प्रगल्भाधीराया उदाहरणम्	६
प्रगल्भाऽधीराया उदाहरणम्	६
प्रगल्भाधीराधीराया उदाहरणम्	६
धीरादिभेदाः स्वीयाया एवेति प्राचां मतम्	६
एते भेदाः परकीयादेरपीति नव्यमतम्	७
ज्येष्ठाकनिष्ठयोर्लक्षणे	७
ज्येष्ठाभेदेषु धीराया उदाहरणम्	७
ज्येष्ठाभेदेष्वधीराया उदाहरणम्	७
ज्येष्ठाभेदेषु धीराधीराया उदाहरणम्	७
कनिष्ठाभेदेषु धीराया उदाहरणम्	७
कनिष्ठाभेदेष्वधीराया उदाहरणम्	७
कनिष्ठाभेदेषु धीराधीराया उदाहरणम्	८
परकीयाया लक्षणमुदाहरणञ्च	८
अस्या गुप्तादिसप्तभेदाः	८
गुप्तायास्त्रैविध्यम्	८
आद्याया उदाहरणम्	८
द्वितीयाया उदाहरणम्	९
तृतीयाया उदाहरणम्	९
विदग्धाया द्वैविध्यम्	९
वाग्विदग्धाया उदाहरणम्	९
क्रियाविदग्धाया उदाहरणम्	९
लक्षिताया लक्षणमुदाहरणञ्च	९
कुलटाया लक्षणमुदाहरणञ्च	१०
अनुशयानाया लक्षणम्	१०
अस्यास्त्रैविध्यम्	१०
आद्याया उदाहरणम्	१०
द्वितीयाया उदाहरणम्	१०
तृतीयाया उदाहरणम्	१०
मुदिताया लक्षणमुदाहरणञ्च	१०
कन्यकाया उदाहरणम्	१०
सामान्याया लक्षणमुदाहरणञ्च	११
पुनरपि स्वीयादीनां त्रैविध्यम्	११
अन्यसम्भोगदुःखिताया उदाहरणम्	११
गर्विताया द्वैविध्यम्	११
आद्याया उदाहरणम्	११
द्वितीयाया उदाहरणम्	११

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयाः	पृष्ठाङ्काः
मानद्वैविध्यनिरूपणम्	११
प्रणयमानवर्णनम्	११
नायिकानिष्ठप्रणयमानोदाहरणम्	१२
नायकनिष्ठप्रणयमानोदाहरणम्	१२
युगपदुभयनिष्ठमानोदाहरणम्	१२
ईर्ष्यामानप्रतिपादनम्	१२
अस्य लघुत्वादिवर्णनम्	१२
लघोरुदाहरणम्	१२
मध्यस्योदाहरणम्	१३
गुरोरुदाहरणम्	१३
पत्युरन्यासङ्गप्रत्यक्षोदाहरणम्	१३
स्वप्नायितोदाहरणम्	१३
भोगाङ्कदर्शनोदाहरणम्	१३
गोत्रस्खलनोदाहरणम्	१३
पत्युरन्यासक्तिश्रवणोदाहरणम्	१४
सामादिमाननिवृत्त्युपायषट्कनिरूपणम्	१४
साम्न उदाहरणम्	१४
भेदस्योदाहरणम्	१४
दानस्योदाहरणम्	१४
नतेरुदाहरणम्	१५
उपेक्षाया उदाहरणम्	१५
रसान्तरस्योदाहरणम्	१५
उक्तभेदानां सङ्कलनेन चतुरशीत्यधिकशतत्रयत्वनिरूपणम्	१५
दिव्यत्वादेर्भेदाप्रयोजकत्वनिरूपणम्	१६
मुग्धाया धीरादिभेदानुपपत्तिपरिहारः	१६
परस्त्रियोः कन्यकोढयोर्भेदाष्टकमध्ये त्रिविधावस्थावत्त्वमेवेति केषाञ्चिन्मतस्य निरासः	१६
भरतोक्तवासकसज्जाद्यष्टविधभेदवर्णनम्	१६
वासकसज्जाया लक्षणम्	१६
मुग्धायाः स्वीयाया वासकसज्जाया उदाहरणम्	१६
मध्यायाः स्वीयाया वासकसज्जाया उदाहरणम्	१६
प्रगल्भायाः स्वीयाया वासकसज्जाया उदाहरणम्	१७
परकीयाया वासकसज्जाया उदाहरणम्	१७
सामान्याया वासकसज्जाया उदाहरणम्	१७
विरहोत्कण्ठिताया लक्षणम्	१७
विरहस्य लक्षणम्	१७
मुग्धायाः स्वीयाया विरहोत्कण्ठिताया उदाहरणम्	१७
मध्यायाः स्वीयाया विरहोत्कण्ठिताया उदाहरणम्	१८
प्रगल्भायाः स्वीयाया विरहोत्कण्ठिताया उदाहरणम्	१८
परकीयाया विरहोत्कण्ठिताया उदाहरणम्	१८
सामान्याया विरहोत्कण्ठिताया उदाहरणम्	१८
स्वाधीनभर्तृकाया लक्षणम्	१८
मुग्धायाः स्वीयायाः स्वाधीनभर्तृकाया उदाहरणम्	१८
मध्यायाः स्वीयायाः स्वाधीनभर्तृकाया उदाहरणम्	१९
प्रगल्भायाः स्वीयायाः स्वाधीनभर्तृकाया उदाहरणम्	१९
परकीयायाः स्वाधीनभर्तृकाया उदाहरणम्	१९
सामान्यायाः स्वाधीनभर्तृकाया उदाहरणम्	१९
कलहान्तरिताया लक्षणम्	१९
मुग्धायाः स्वीयायाः कलहान्तरिताया उदाहरणम्	१९
मध्यायाः स्वीयायाः कलहान्तरिताया उदाहरणम्	१९
प्रगल्भायाः स्वीयायाः कलहान्तरिताया उदाहरणम्	२०
परकीयायाः कलहान्तरिताया उदाहरणम्	२०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयाः	पृष्ठाङ्काः
सामान्यायाः कलहान्तरिताया उदाहरणम्	२०
खण्डिताया लक्षणम्	२०
खण्डितालक्षणप्रतिपादकभरतवचन-व्याख्यानम्	२०
मुग्धायाः स्वीयायाः खण्डिताया उदाहरणम्	२१
मध्यायाः स्वीयायाः खण्डिताया उदाहरणम्	२१
प्रगल्भायाः स्वीयायाः खण्डिताया उदाहरणम्	२१
परकीयाया खण्डिताया उदाहरणम्	२१
सामान्यायाः खण्डिताया उदाहरणम्	२१
विप्रलब्धाया लक्षणम्	२२
मुग्धायाः स्वीयाया विप्रलब्धाया उदाहरणम्	२२
मध्यायाः स्वीयाया विप्रलब्धाया उदाहरणम्	२२
प्रगल्भायाः स्वीयाया विप्रलब्धाया उदाहरणम्	२२
परकीयाया विप्रलब्धाया उदाहरणम्	२२
सामान्याया विप्रलब्धाया उदाहरणम्	२२
प्रोषितभर्तृकाया लक्षणम्	२२
मुग्धायाः स्वीयायाः प्रोषितभर्तृकाया उदाहरणम्	२३
मध्यायाः स्वीयायाः प्रोषितभर्तृकाया उदाहरणम्	२३
प्रगल्भायाः स्वीयायाः प्रोषित-भर्तृकाया उदाहरणम्	२३
परकीयायाः प्रोषितभर्तृकाया उदाहरणम्	२३
सामान्यायाः प्रोषितभर्तृकाया उदाहरणम्	२३
अभिसारिकाया लक्षणम्	२४
अभिसारिकापदे णिजर्थस्याविवक्षितत्वम्	२४
अत्र भरतवचनम्	२४

विषयाः	पृष्ठाङ्काः
विद्यानाथोक्तिः	२४
भोजराजोक्तिः	२४
मुग्धाभिसारिकाया उदाहरणम्	२४
मध्याभिसारिकाया उदाहरणम्	२५
प्रगल्भाभिसारिकाया उदाहरणम्	२५
परकीयाभिसारिकाया उदाहरणम्	२५
सामान्याभिसारिकाया उदाहरणम्	२५
अन्धकाराभिसारिकाया उदाहरणम्	२५
ज्योत्स्नाभिसारिकाया उदाहरणम्	२५
दिवाभिसारिकाया उदाहरणम्	२६
एतासामुत्तममध्यमाधमभेदेन त्रैविध्यम्	२६
उत्तमाया लक्षणमुदाहरणञ्च	२६
मध्यमाया लक्षणमुदाहरणञ्च	२६
अधमाया लक्षणमुदाहरणञ्च	२६
सख्या लक्षणम्	२७
मण्डनाद्यस्याः कर्म	२७
मण्डनोदाहरणम्	२७
उपालम्भोदाहरणम्	२७
शिक्षोदाहरणम्	२७
परिहासोदाहरणम्	२७
प्रियपरिहासोदाहरणम्	२७
प्रियापरिहासोदाहरणम्	२८
दूत्या लक्षणम्	२८
सङ्गमनाद्यस्याः कर्म	२८
सङ्गमनोदाहरणम्	२८
विरहनिवेदनोदाहरणम्	२८
कुलभोगाद्याधिक्यकथनोदाहरणम्	२८
नायकनिरूपणे कारणाभिधानम्	२८
नायकस्य पत्यादित्रैविध्यम्	२८
पत्युर्लक्षणमुदाहरणञ्च	२८
उपपतिलक्षणमुदाहरणञ्च	२९
वैशिकलक्षणमुदाहरणञ्च	२९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयाः	पृष्ठाङ्काः
पत्युरनुकूलादिचतुर्विधत्वम्	२९
अनुकूललक्षणमुदाहरणञ्च	२९
दक्षिणलक्षणमुदाहरणञ्च	२९
धृष्टलक्षणमुदाहरणञ्च	२९
शठलक्षणमुदाहरणञ्च	३०
भरतोक्तचतुरादिभेदपञ्चकं तल्लक्षणानि च	३०
उत्तमोदाहरणम्	३१
मध्यमोदाहरणम्	३१
अधमोदाहरणम्	३१
मानिन उदाहरणम्	३१
चतुरस्य द्वैविध्यम्	३१
आद्यस्योदाहरणम्	३१
द्वितीयस्योदाहरणम्	३२
उदाहरणान्तरम्	३२
नायकाभासलक्षणमुदाहरणञ्च	३२
स्वभावस्यैव नायकभेदप्रयोजकत्वं न त्ववस्थाभेदस्येति निरूपणम्	३२
प्रोषितपतेरुदाहरणम्	३२
उपपतेरुदाहरणम्	३२
उदाहरणान्तरम्	३३
वैशिकस्योदाहरणम्	३३
नायकसहायानां पीठमर्दादीनां विद्यानाथोक्तलक्षणानि	३३
साहित्यदर्पणोक्तान्येषां लक्षणानि	३३
एतेषां व्यापारः	३४
व्यापारोदाहरणम्	३४
विटोदाहरणम्	३४
सामान्यवनितायामप्यस्य सहायत्वम्	३४
अस्योदाहरणम्	३४
चेटोदाहरणम्	३४
विदूषकोदाहरणम्	३४
वृत्तिनिरूपणम्	३५

विषयाः	पृष्ठाङ्काः
शक्तिलक्षणम्	३५
रूढादित्रिविधशब्दनिरूपणम्	३५
शक्तिग्राहकप्रमाणप्रदर्शनम्	३५
लक्षणा तद्भेदाश्च	३५
व्यञ्जनानिरूपणम्	३६
ध्वनिस्तद्भेदाश्च	३७
रसस्वरूपविषये भट्टलोल्लटादिमतम्	३७
रसस्वरूपविषये श्रीशङ्कुकमतम्	३७
रसस्वरूपविषये भट्टनायकमतम्	३८
रसस्वरूपविषयेऽभिनवगुप्तपादाचार्यमतम्	३८
रसस्य कार्यत्वज्ञाप्यत्वादिखण्डनम्	३९
शृङ्गाररसनिरूपणम्	४०
तद्भेदकथनम्	४०
सम्भोगशृङ्गारोदाहरणम्	४०
उदाहरणान्तरम्	४०
अभिलाषहेतुकविप्रलम्भोदाहरणम्	४०
सङ्गमोत्तरकालीनविप्रलम्भोदाहरणम्	४१
भावस्वरूपनिरूपणम्	४१
देवविषयकरतेरुदाहरणम्	४१
मुनिविषयकरतेरुदाहरणम्	४१
पुत्रविषयकरतेरुदाहरणम्	४१
व्यभिचारिण उदाहरणम्	४१
रसाभासोदाहरणम्	४१
भावाभासोदाहरणम्	४२
संलक्ष्यक्रमध्वनेर्भेदाः	४२
अर्थशक्तिमूलध्वनेरष्टविधत्वम्	४२
कविनिबद्धवक्तृप्रौढोक्तिसिद्धत्वेन भेदान्तरकल्पनस्य खण्डनम्	४२
शब्दशक्तिमूलालङ्कारध्वनेरुदाहरणम्	४२
शब्दशक्तिमूलवस्तुध्वनेरुदाहरणम्	४३
स्वतःसम्भविवस्तुना वस्तुध्वनेरुदाहरणम्	४३
स्वतःसम्भविवस्तुनाऽलङ्कारध्वनेरुदाहरणम्	४३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयाः	पृष्ठाङ्काः
स्वतःसम्भव्यलङ्कारेण वस्तुध्वनेरुदाहरणम्	४३
स्वतःसम्भव्यलङ्कारेणालङ्कारध्वनेरुदाहरणम्	४३
कविप्रौढोक्तिसिद्धवस्तुना वस्तुध्वनेरुदाहरणम्	४४
कविप्रौढोक्तिसिद्धवस्तुनाऽलङ्कारध्वनेरुदाहरणम्	४४
कविप्रौढोक्तिसिद्धालङ्कारेण वस्तुध्वनेरुदाहरणम्	४४
कविप्रौढोक्तिसिद्धालङ्कारेणालङ्कारध्वनेरुदाहरणम्	४४
उभयशक्तिमूलध्वनेरुदाहरणम्	४४
अविवक्षितवाच्यध्वनेरुदाहरणम्	४४
अत्यन्ततिरस्कृतवाच्यध्वनेरुदाहरणम्	४५
विप्रलम्भे हरिहरोक्ता दशावस्थाः	४५
अभिलाषस्य लक्षणमुदाहरणञ्च	४५
उदाहरणान्तरम्	४५
चिन्तालक्षणमुदाहरणञ्च	४५
उदाहरणान्तरम्	४६
स्मृतिलक्षणमुदाहरणञ्च	४६
उदाहरणान्तरम्	४६
गुणकीर्तनलक्षणमुदाहरणञ्च	४६
उदाहरणान्तरम्	४७
उद्वेगलक्षणमुदाहरणञ्च	४७
उदाहरणान्तरम्	४७
विलापलक्षणमुदाहरणञ्च	४७
उदाहरणान्तरम्	४८
उन्मादलक्षणम्	४८
कायिकोन्मादोदाहरणम्	४८
उदाहरणान्तरम्	४८
वाचिकोन्मादोदाहरणम्	४८

विषयाः	पृष्ठाङ्काः
उदाहरणान्तरम्	४८
व्याधिलक्षणमुदाहरणञ्च	४८
उदाहरणान्तरम्	४९
जडतालक्षणमुदाहरणञ्च	४९
जातप्रायत्वेन वर्णनीयमरणोदाहरणम्	५०
उदाहरणान्तरम्	५०
आकांक्षितत्वेन वर्णनीयमरणोदाहरणम्	५०
उदाहरणान्तरम्	५०
पूर्वरागलक्षणम्	५०
श्रवणादितत्कारणम्	५०
श्रवणोदाहरणम्	५०
इन्द्रजाले दर्शनोदाहरणम्	५०
चित्रे दर्शनोदाहरणम्	५१
साक्षाद्दर्शनोदाहरणम्	५१
स्वप्ने दर्शनोदाहरणम्	५१
हास्यरसनिरूपणमुदाहरणञ्च	५१
तद्व्यभिचारिभावाः	५१
स्मितादीनां स्वरूपकथनम्	५१
करुणरसनिरूपणमुदाहरणञ्च	५२
तद्व्यभिचारिभावाः	५२
रौद्ररसनिरूपणमुदाहरणञ्च	५२
तद्व्यभिचारिभावाः	५३
वीररसनिरूपणम्	५३
दानवीरोदाहरणम्	५३
दयावीरोदाहरणम्	५३
युद्धवीरोदाहरणम्	५३
धर्मवीरोदाहरणम्	५४
व्यभिचारिभावाः	५४
रौद्रे क्रोधस्य स्थायित्वं वीरे व्यभिचारित्वमिति कथनम्	५४
भयानकरसनिरूपणमुदाहरणञ्च	५४
अस्य व्यभिचारिभावाः	५५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयाः	पृष्ठाङ्काः
बीभत्सरसनिरूपणमुदाहरणञ्च	५५
अस्य व्यभिचारिभावाः	५५
अद्भुतरसनिरूपणमुदाहरणञ्च	५५
अस्य व्यभिचारिभावाः	५५
शान्तरसनिरूपणम्	५६
'अष्टावेव रसा नाट्ये' इत्युक्तेः खण्डनपूर्वकं व्यवस्थापनम्	५६
निर्वेदस्य शान्ते स्थायित्वोपपादनम्	५६
शान्तरसस्योदाहरणम्	५७
शान्तरसस्येव मायारसस्याप्यधिकस्याशङ्कनं तत्खण्डनञ्च	५७
व्यभिचारिणो लक्षणम्	५७
निर्वेदादित्रयस्त्रिंशद्व्यभिचारिणः	५८
मात्सर्यादीनामुक्तेष्वेवान्तर्भावप्रदर्शनम्	५८
सहेतुनिर्वेदस्वरूपनिरूपणमुदाहरणञ्च	५८
ग्लानिनिरूपणमुदाहरणञ्च	५८
शङ्कानिरूपणमुदाहरणञ्च	५९
असूयालक्षणमुदाहरणञ्च	५९
सहेतुसकार्यमदलक्षणमुदाहरणञ्च	५९
सहेतुसकार्यश्रमलक्षणमुदाहरणञ्च	६०
आलस्यलक्षणमुदाहरणञ्च	६१
दैन्यलक्षणमुदाहरणञ्च	६१
चिन्तालक्षणमुदाहरणञ्च	६१
मोहलक्षणमुदाहरणञ्च	६१
स्मृतिलक्षणमुदाहरणञ्च	६२
धृतिलक्षणमुदाहरणञ्च	६२
व्रीडालक्षणमुदाहरणञ्च	६३
चापललक्षणमुदाहरणञ्च	६३
हर्षलक्षणमुदाहरणञ्च	६३
आवेगलक्षणमुदाहरणञ्च	६३
जडतालक्षणमुदाहरणञ्च	६४
गर्वलक्षणमुदाहरणञ्च	६४

विषयाः	पृष्ठाङ्काः
विषादलक्षणमुदाहरणञ्च	६४
औत्सुक्यलक्षणमुदाहरणञ्च	६५
निद्रालक्षणमुदाहरणञ्च	६५
अपस्मारलक्षणमुदाहरणञ्च	६५
स्वप्नलक्षणमुदाहरणञ्च	६६
प्रबोधलक्षणमुदाहरणञ्च	६६
अमर्षलक्षणमुदाहरणञ्च	६६
अवहित्थालक्षणमुदाहरणञ्च	६७
उग्रतालक्षणमुदाहरणञ्च	६७
मतिलक्षणमुदाहरणञ्च	६७
व्याधिलक्षणमुदाहरणञ्च	६८
उन्मादलक्षणमुदाहरणञ्च	६८
मृतिलक्षणमुदाहरणञ्च	६८
त्रासलक्षणमुदाहरणञ्च	६९
तर्कलक्षणमुदाहरणञ्च	६९
स्तम्भाद्यष्टविधसात्त्विकभावनिरूपणम्	७०
स्तम्भलक्षणमुदाहरणञ्च	७०
स्वेदलक्षणमुदाहरणञ्च	७०
रोमाञ्चलक्षणमुदाहरणञ्च	७०
स्वरभेदलक्षणमुदाहरणञ्च	७१
कम्पलक्षणमुदाहरणञ्च	७१
वैवर्ण्यलक्षणमुदाहरणञ्च	७१
अश्रुलक्षणमुदाहरणञ्च	७१
प्रलयलक्षणमुदाहरणञ्च	७१
यौवनकालिकभावनिरूपणम्	७२
हावभावहेलानां विवेककरणम्	७२
लीलादिदशहावजन्यचेष्टाविशेषाः	७२
भावोदाहरणम्	७२
हावोदाहरणम्	७३
हेलोदाहरणम्	७३
लीलालक्षणमुदाहरणञ्च	७३
विलासलक्षणमुदाहरणञ्च	७३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयाः	पृष्ठाङ्काः
विच्छित्तिलक्षणमुदाहरणञ्च	७३
विभ्रमलक्षणमुदाहरणञ्च	७४
किलकिञ्चितलक्षणमुदाहरणञ्च	७४
मोट्टायितलक्षणमुदाहरणञ्च	७४
कुट्टमितलक्षणमुदाहरणञ्च	७४
विव्वोकलक्षणमुदाहरणञ्च	७५
ललितलक्षणमुदाहरणञ्च	७५
विहृतलक्षणमुदाहरणञ्च	७५
शोभादिसप्तस्वाभाविकगुणाः	७५
शोभालक्षणम्	७५
रूपलावण्ययोर्लक्षणम्	७६
शोभोदाहरणम्	७६
कान्तिलक्षणमुदाहरणञ्च	७६
दीप्तिलक्षणमुदाहरणञ्च	७६
माधुर्यलक्षणमुदाहरणञ्च	७७
धैर्योदाहरणम्	७७
प्रागल्भ्यलक्षणमुदाहरणञ्च	७७
औदार्यलक्षणमुदाहरणञ्च	७७
ग्रन्थसमाप्तिसूचकं पद्यम्	७७
श्लोकार्द्धानुक्रमणिका	७९-८६
ग्रन्थग्रन्थकारनामानुक्रमणिका	८७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीविश्वेश्वरपाण्डेयविरचिता

रसचन्द्रिका

तिर्यङ्मात्रप्रवणनयनोपान्तदृश्यत्वलोभा-
दन्योन्यार्द्धावयवघटितं स्वाङ्गमाधायि याभ्याम्।
तौ सद्रूपावपि जनकतां जन्यमात्रे भजन्तौ
देवावाद्यौ जगति जयतः प्रेमसीमायमानौ।।१।।

जयति यथाजातानां[१] वाग्जातसुजातपारिजातश्रीः।
श्रीलक्ष्मीधरविबुधावतंसचरणाब्जरेणुकणः।।२।।

सारासारविचारैकपरायणहृदां सताम्।
चमत्कारप्रकाराय क्रियते रसचन्द्रिका।।३।।

इह खलु नायकसमवेतायां रतौ नायिका विषयः, नायिकासमवेतायां च नायक[२] इति विषयस्य रतावसाधारणकारणत्वमिति तौ निरूप्येते। तत्र नियामकाभावाद्ग्रन्थभेदेन पौर्वापर्यानियमदर्शनेऽपि इच्छाया एव नियामकत्वादिह बहुवक्तव्यत्वात्प्रथमं नायिका निरूप्यते। सा त्रिविधा—स्वीया परकीया सामान्या चेति। तत्र पतिमात्रविषयकानुरागवती स्वीया। पतिश्च विवाहजन्यसंस्कारविशेषवान्। उभयानुरक्तायामतिव्याप्तिवारणाय मात्रेति। सा यथा—

सञ्चारो रतिमन्दिरावधि सखीकर्णावधि व्याहृतं
चेतः कान्तसमीहितावधि महामानोऽपि मौनावधि।
हास्यं चाधरपल्लवावधि दृशोः कोणावधि प्रेक्षितं
सर्वं सावधि नावधिः कुलभुवां प्रेम्णः परं विद्यते।।

१. यथाजातानाम्=मूर्खाणाम्।

२. तथा च विषयत्वसम्बन्धावच्छिन्ननायिकानिष्ठरतिनिष्ठकार्यतानिरूपिता या तादात्म्यसम्बन्धावच्छिन्नकारणता तच्छालित्वं नायकत्वमिति नायकलक्षणं पर्यवसन्नम्। एवं नायिकालक्षणमप्यूह्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परं=केवलम्। अस्याश्चेष्टा-शीलसंरक्षणं कुलटादिसंसर्गपरिहारः। स च 'सकृदपि कुलटाभिर्योगिनीभिक्षुकीभि[१]र्नटविटघटिताभिः संसृजेन्मेलिकाभिः'।। (**रतिर.** भार्याधिकारे, प. १२, श्लो. ४) इति **कामशास्त्रे**, 'न गणिकाधूर्त्ताभिसारिणीप्रव्रजिताप्रेक्षणिकामायामूलकुहककारिकादुःशीलादिभिः सहैकत्र तिष्ठेत्, संसर्गो हि चारित्रं दुष्यति' इति **शङ्खस्मृत्यादौ** चोक्तः। भर्तृसेवा तदानुकूल्यम् अहितात्तन्निवर्त्तनं च[२]।

'पतिप्रियहिते युक्ता स्वाचारा विजितेन्द्रिया।
कुर्याच्छ्वशुरयोः पादवन्दनं भर्तृतत्परा।।

इति **योगीश्वरोक्तेः**। हितमायतिसुखमिति **विज्ञानेश्वरः**। 'तत्र निषिद्धोद्युक्तः प्रतिषेद्धव्यः प्रणामाद्यैः' इति **कामशास्त्रम्**। सेयं त्रिविधा मुग्धा मध्या प्रगल्भा च। तत्र लज्जापेक्षापकर्षवद्रतिका मुग्धा। अपकर्षश्च द्विधा। स्वरूपेण तत्प्रतिवध्यव्यापारकत्वेन च। द्वितीयमपि द्वेधा। व्यापारे यावत्त्व-यत्किञ्चित्त्वयोर्विवक्षाभेदात्। आद्या अज्ञातयौवना। द्वितीया नवोढा। तृतीया विश्रब्धनवोढा। नवोढादिभेदद्वयं ज्ञातयौवनाया बोध्यम्। तथा च **भरतः** —

'पीनोरुगण्डजघनस्तनाधरं कर्कशं रतिमनोज्ञम्।
सुरतं प्रति सोत्साहं प्रथमं तद्यौवनं विद्यात्'।।

पीनपदं किञ्चिदुपचयाभिप्रायम्।

'गात्रं पूर्णावयवं पीनौ च पयोधरौ नतं मध्यम्।
कामस्य सारभूतं यौवनमेतद् द्वितीयं तु'।।

इति तदुक्तेः। तथा च प्रथमयौवनस्य पूर्वापरावस्थाद्वयमत्राज्ञातज्ञातताभ्यां विवक्षित्वा भेदद्वयाभिधानम्। ज्ञानं च स्वनिष्ठं परनिष्ठं वेत्यत्र नाग्रहः।

सामान्योदाहरणं यथा—

उरःस्थलमदन्तुरं वचसि नाश्रिता चातुरी
विकारि न विलोकितं न च मुखे स्मितस्योद्गमः।
तथापि हरिणीदृशो वपुषि कापि कान्तिच्छटा।
पटावृतमहामणिद्युतिरिवात्र संलक्ष्यते।।

१. अत्र न च इति पाठः समीचीनो भवेत्। तस्य च संसृजेद् इत्यनेनान्वयः। अत्र 'मेलिकाभिः' इत्यस्य वशीकारादिप्रयोगेण सम्मेलनकारिकाभिरित्यर्थः। **रतिरहस्ये** तु 'मौलिकीभिः' इति पाठः। तत्र मूलेन वशीकरणकर्मणा चरन्तीत्यर्थे ठक्प्रत्ययो बोध्यः।
२. अस्य चेष्टेति पूर्वेणान्वयः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यौवनस्य लेशमात्रेणाप्यनुदये रत्यालम्बनत्वे प्रमाणाभावात्किञ्चित्तदुन्मेषो मुग्धाया आवश्यकः। नायिकाविभाजकोपाधिमध्ये रत्यालम्बनदशायामसतो धर्मस्य परिगणनानर्हत्वात्। एतेन—

सुधायाः सध्रीची न च वचनवीची वरतनोः
स्तनश्रीः कर्क्कन्धूफलमपि न बन्धूकृतवती।
न शीलं दृग्भङ्गी कलयति कुरङ्गीनयनयो-
स्तथापि श्रीरस्या युवजननमस्या विजयते।।

इत्यादिकमपि व्याख्यातम्।

अज्ञातयौवना यथा मम—

व्युत्तिष्ठन्ते हृदयगतयो बालकेलीकलापा
नाप्यन्यस्मिन् सजति विषये लेशतोऽप्यात्मवृत्तिः।
एतत्किं स्यादिति नववधूरन्तरालोचयन्ती
धत्ते दोलामिव तरलताशालिनीमेव बुद्धिम्।।

ज्ञातयौवना यथा मम—

जाता कुहूरुतरवा विहसन्मुखश्री-
र्लब्धा तपःश्रवणसंयुतदृष्टिपाता।
अर्द्धोदये सति पयोधरयोः प्रियस्ते
पुण्यं प्रकाशयतु तत्परिशीलनेन[१]।।

इयमेव रतिकार्याभिभवसमर्थलज्जायोगाद् नवोढा, लज्जायाः किञ्चिदपकर्षे विश्रब्धनवोढा, लज्जामदनयोः साम्ये तु मध्या वक्ष्यते। केचित्तु विश्रब्धनवोढाया

१. नायिकां प्रति सख्या उक्तिः। अत्र कुहूः उत रवौ इहेति च्छेदः। उतेत्यानन्दे। सन्मुखश्रीः रवौ=रविवारे जाता तपसि माघे श्रवणनक्षत्रयुतः दृष्टं दर्शनमस्यास्तीति दृष्टी दृष्ट इत्यर्थः। पातः=व्यतीपातो यस्यां सा। कुहूः=अमा लब्धा। एतेन—

अमार्कपातश्रवणैर्युक्ता चेत्पौषमाघयोः।
अर्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः समः।।

इति **स्कन्दपुराणा**द्युक्तोऽर्धोदयाख्यो योगः सूचितः। यत्र स्नानादिना स्वर्गो भोगश्च जायते। पक्षे—कुहूरुतरवेत्येकं पदम्। कुहूरुतं कोकिलशब्दः, तदिव रवो यस्याः। विहसन्मुखश्रीः तपसा श्रवणसंयुतदृष्टिपातः कर्णान्तगतदृक्पातो यस्याः सा त्वं प्रियेणेति शेषः। लब्धा। स्तनयोः अर्धाविर्भावे सति प्रियः तयोः=स्तनयोः परिशीलनेन मर्दनेन पुण्यम् अर्धोदयस्नानजं प्रकटीकरोतु। अर्धोदयस्नाकर्तॄणां त्वादृश्यः स्त्रियो भवन्तीति भावः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्यमायामेवान्तर्भावमिच्छन्ति। तथा च **विद्यानाथः** —

उदयद्यौवना मुग्धा लज्जापिहितमन्मथा।
लज्जामन्मथमध्यस्था मध्यमोदितयौवना।।
स्मरमन्दीकृतव्रीडा प्रौढा सम्पूर्णयौवना।। इति।

आद्या यथा मम—

नीता प्राणसमेन दृग्विषयतां सद्यः परावर्त्तते
तस्मिन्सन्निहिते बुभूषति भवत्यस्माद्विदूरात्पुनः।
संयोगे विहितेऽपि तेन तनुते तस्माद्विभागं स्वयं
प्रायस्तत्प्रतिकूलमेव चरितं प्रीणाति वामभ्रुवः।।

द्वितीया यथा मम—

हस्तस्वस्तिकगोपितस्तनतटा सम्बद्धबिम्बाधरा
वक्षोदेशमिलन्मुखी दृढतरं लग्नोरुयुग्मा मिथः।
स्वप्नोद्भाविततद्विरोधिदयितव्यापाररोधोल्लस-
त्तद्यत्नेन धिनोति नूतनवधूप्रस्वापरीतिर्मनः।।

[1]समप्रधानलज्जामदना मध्या। इयमेवातिविश्रब्धनवोढा। यथा—

जं जं सो णिज्झाअइ अङ्गोआसं मह अणिमिसच्छो।
पच्छाएमि अ तन्तं इच्छामि अ तेण दीसन्तम्[2]।।

अत्र नायकेन द्रष्टुमिष्यमाणस्याङ्गस्य आच्छादनेन लज्जायास्तेन दृश्यतामितीच्छया कामस्य च समं प्राधान्यम्। लज्जाभिभावकमदना प्रगल्भा। तस्याश्चेष्टा रतिप्रीतिरानन्दात्सम्मोहश्च। आद्या यथा—

आणासआइ देन्ती तह सुरए हरिसविअसितकवोला।
गोसेवि ओणअमुही अह सत्ति पिआ ण सद्दहिमो[3]।।

---

१. समप्रधानौ तुल्यप्रधानौ लज्जामदनौ यस्याः सा। तुल्यत्वं च परस्परनिष्ठप्रतिबन्धकता-निरूपितप्रतिवध्यताशालिव्यापारकत्वम्। तथा च लज्जाप्रतिबद्धमदनव्यापारकत्वे सति मदनप्रतिबद्धकिञ्चिल्लज्जाव्यापारकत्वं मध्यात्वमिति फलितम्।

२. यद्यत्स निभालयत्यङ्गोपाङ्गं ममानिमिषाक्षः।
प्रच्छादयामि च तत्तदिच्छामि च तेन दृश्यमानम्।। इति च्छाया।

३. आज्ञाशतानि ददती तथा सुरते हर्षविकसितकपोला।
प्रभातेऽप्यवनतमुखी अथ सेति प्रिया न श्रद्दध्मः।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीया यथा—

धन्यासि या कथयसि प्रियसङ्गमेऽपि
विश्रब्धचाटुकशतानि रतान्तरेषु।
नीवीं प्रति प्रणिहिते तु करे प्रियेण
सख्यः शपामि यदि किञ्चिदपि स्मरामि।।

मध्या-प्रगल्भयोर्मानावस्थायां त्रयो भेदाः—धीरा अधीरा धीराधीरा चेति। तदुक्तं दर्पणे—

'ते धीरा चाप्यधीरा च धीराधीरा च षड्विधे।
प्रियं सोत्प्रासवक्रोक्त्या मध्याधीरा दहेद्रुषा।।
धीराऽधीरा तु रुदितैरधीरा परुषोक्तिभिः।
प्रगल्भा यदि धीरा स्याच्छन्नकोपाकृतिस्तदा।।
उदास्ते सुरते तत्र दर्शयत्यादरान्बहिः।
धीराधीरा तु सोल्लुण्ठभाषितैः खेदयेदमुम्।।
तर्जयेत्ताडयेदन्या...........।।इति। (साहि. द. प. ३)

अन्या अधीराप्रगल्भेत्यर्थः।

मध्याधीरा यथा मम—

पलाशकुसुमानि ते वपुषि बिभ्रते दृश्यतां
वहन्ति वदनानिला मलयजस्फुरत्सौरभाः।
इयं दयित! माधवी मधुरता समाधीयते
ततो भवति मीयते कुसुमधन्वनः सौहृदम्।।

अधीरा यथा—

तेण ण मरामि मण्णूहि पूरिआ जेण रेसुहअ।
तुग्गअमणा मरंती पुणोवि मा तुज्झ लग्गिस्सम्[१]।।

[१]. तेन न म्रिये मन्युभिः पूरिता येन रे सुभग!।
त्वद्गतमना म्रियमाणा पुनरपि मा त्वामेव लगिष्ये।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धीराधीरा यथा—

वाहोल्लफुरिअगंडाहराइ भणिअं विलक्ख हसिरीए।
अज्जवि कीस रूसिज्जइ सवहावत्थं गए प्पेम्मे[१]।।

प्रगल्भा यथा—

एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्दूरत-
स्ताम्बूलाहरणच्छलेन रभसाश्लेषोऽपि संविघ्नितः।
आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः।।

अत्र सामानाधिकरण्याद्यनुपपादनद्वारकं रतौदास्यम्। तत्सत्त्वेऽपि यथा—

जाणइ जाणावेउं अणुणअविद्दवि अमाणपरिसेसम्।
पइरिक्वम्मिवि विणआवलम्वणं सच्चिअ कुणंती[२]।।

अत्रैकान्तादिसत्त्वेऽपि विनयालम्बनात्तत्।

अधीरा यथा—

कोपात्कोमललोलबाहुलतिकापाशेन बद्धा दृढं
नीत्वा वासनिकेतनं दयितया सायं सखीनां पुरः।
भूयो मैवमिति स्खलन्मृदुगिरा सञ्चिन्त्य दुश्चेष्टितं
धन्यो हन्यत एव निह्नुतिपरः प्रेयान् रुदन्त्या हसन्।।

धीराधीरा यथा मम—

आलक्ष्यैव विपक्षपक्ष्मलदृशो वक्षोरुहाद्वक्षसि
प्राणेशस्य घनानुषङ्गि घुसृणं वक्रीबुभूषाजुषा।
उत्तंसोत्पलमुत्तरत्वरपरावृत्तिस्यदात् प्रस्खल-
न्नेत्रस्य प्रतियातनेव दयितं द्रष्टुं विसृष्टं रसात्।।

धीरादिभेदाः स्वीयायामेव। परकीयादौ मानसत्त्वेऽपि नायकस्य नायकान्तरसम्भोगमभ्युपगम्यैव तत्रानुरक्तत्वादुक्तभेदप्रयोजकत्वाभावादिति प्राञ्चः। नव्यास्तु

---

१. वाष्पार्द्रस्फुरितगण्डाधरया भणितं विलक्ष्य हसितया।
अद्यापि कुतो रुष्यते शपथावस्थां गते प्रेम्णि।।इति च्छाया।

२. जानाति ज्ञापयितुमनुनयविद्रावितमानपरिशेषम्।
पत्युरेकान्तेऽपि विनयावलम्बनं सत्यमिव कुर्वन्ती।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वीयाया अपि नायकस्यान्यसम्भोगानभ्युपगमेनानुरागोत्पत्तौ मानाभावान्मानस्य सर्वत्र कादाचित्कतया निमित्तत्वोपपत्तेश्च परकीयादेरप्युक्तभेदाङ्गीकारो युक्त इत्याहुः। एताश्च ज्येष्ठाः कनिष्ठाश्चेति द्विधाः। परिणायकनिष्ठोत्कृष्टस्नेहविषयभूता ज्येष्ठा। तादृशापकृष्टस्नेहविषयभूता कनिष्ठा। ज्येष्ठाभेदेषु **धीरा यथा—**

पुसिआ कण्णाहरणेंदणीलकिरणाहआ ससिमऊहाः।
माणिणिवअणम्मि सकज्जलसुसंकाइ दइएण[१]।।

अधीरा यथा—

हिअअम्मि वससि ण करेसि अप्पिअं तहवि णेहपडिएहिं।
सङ्किज्जसि जुअइसहावगलिअधीरेहि अह्मेहिं[२]।।

धीराधीरा यथा—

णवि तह अणालवंती हिअअं दूमेइ माणिणी अहिअं।
जह दूरविअम्भिअगरुअरोससमज्झत्थबअणेहिं[३]।।

कनिष्ठाभेदेषु धीरा यथा—

अणुणअ णाहं कुविआउअऊहसु किं मुहा पमाएसि।
तुह मण्णुसमुप्पाअएण माणेणवि ण कज्जम्[४]।।

अधीरा यथा—

पिअविरहो अप्पिअदंसणं अ गरुआइ दोवि दुक्खाइं।
जीआ तुमं कारिज्झसि तीअ णमो आहि आईए[५]।।

---

१. प्रोञ्छिताः कर्णाभरणेन्द्रनीलकिरणाहताः शशिमयूखाः।
मानिनीवदने सकज्जलसुशङ्कया दयितेन।।इति च्छाया।
२. हृदये वससि न करोषि अप्रियं तथापि स्नेहपतिताभिः।
शङ्क्यसे युवतीस्वभावगलितधैर्याभिरस्माभिः।।इति च्छाया।
३. नापि तथा अनालपन्ती हृदयं दुनोति मानिन्यधिकम्।
यथा दूरविजृम्भितगुरुकरोषमग्नार्थवचनैः।।इति च्छाया।
४. अनुनय नाथं कुपिता मुहुर्मुहुः किं प्रमाद्यसे।
तव मन्यूत्पादकेन मानेनापि न कार्यम्।।इति च्छाया।
५. प्रियविरहोऽप्रियदर्शनं च गुरुणी द्वे अपि दुःखे।
यया त्वं कार्यसे तस्यै नमोऽस्त्वायत्यै।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धीराधीरा यथा—

सा सुहअ अहिअगुणरूअसोहिरीआ मणिग्गुणाअहअं।
भण तीअ जो णसरिसो सो किं सब्वो जणो मरउ[१]।।

।। इति स्वकीया ।।

परपरिणीतत्वे सति स्वानुरक्ता परकीया। स्वपदं यन्निरूपितं परकीयात्वं तत्परम्। परिणीतपदेन सामांन्यायां परपदेन स्वकीयायामतिव्याप्तिनिरासः। नन्वेवं कन्यकायामव्याप्तिः। परोढाकन्यकाभेदेन परकीयाद्वैविध्यस्याभियुक्तैरङ्गीकारात्। न च स्वापरिणीतत्वं सत्यन्तार्थः। सामान्यायामतिव्याप्तेः। सत्यम्। यथोक्ता कन्यका चेत्येतदन्यतरत्वं परकीयात्वमिति तात्पर्यात्। वस्तुतस्तु यद्विषयकानुरागवत्त्वज्ञानेन लोकानां तस्यां विगानं तदनुरक्तत्वं लक्षणं बोध्यम्। यथा—

अनाहूतैवैत्य प्रगुणगुणलोभेन भवतः
समीहे सौभाग्यं तदिदमुपहासं प्रथयति।
विदग्ध! त्वामेवं तदपि कथयाम्याचर तथा
यथा न स्यादालीकपटकरतालीपटुरवः।।

सा च गुप्ता विदग्धा लक्षिता कुलटानुशयाना मुदिता कन्यका चेति सप्तविधा। तदुक्तम्—

गुप्ताविदग्धाकुलटानुशयानादयस्तु याः।
परकीयासु सर्वासामन्तर्भावो निरूपितः।।

तत्र **गुप्ता** त्रिविधा, भूतभाविवर्त्तमानरतगोपनभेदात्।

आद्या यथा—

हंसैः शैवलमञ्जरीति कबरी चञ्चूभिराकर्षिता
वक्त्रे चन्द्रधिया चकार कुपिता चक्री[२] नखैराक्रमम्।
भृङ्गैः पङ्कजकोरकप्रतिधिया वक्षोरुहोऽपि क्षत-
स्तन्मातः! करवै पुनर्न सरसीतोयावगाहोद्यमम्।।

---

१. सा सुभग! अधिकगुणरूपशोभिता मनाग्गुणा चाहम्।
भण कि तस्य यो न सदृशः स सर्वो जनो म्रियताम्।।इति च्छाया।

२. चक्री=चक्रवाकी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीया यथा—

दृष्टिं हे प्रतिवेशिनि! क्षणमिहाप्यस्मद्गृहे दास्यसि
प्रायेणास्य शिशोः पिता न विरसाः कौपीरपः पास्यति।
एकाकिन्यपि यामि तद्वरमितः स्त्रोतस्तमालाकुलं
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थयः।।

तृतीया यथा—

गहवइ गओह्मसरणं रक्खसु एअंति अडअणा भणिअ।
सहसागअस्स तुरिअं पइणो कण्ठं मिलाएइ[१]।।

अत्र शरणागतोऽयमिति जारस्य भर्त्रे समर्पणम्। **विदग्धा** द्विविधा—वाग्विदग्धा, क्रियाविदग्धा च।

आद्या यथा—

नाथो मे विपणिं गतो न गणयत्येषा सपत्नी च मां
त्यक्त्वा मामिह पुष्पिणीति[२] गुरवः प्राप्ता गृहाभ्यन्तरम्।
शय्यामात्रसहायिनीं परिजनः श्रान्तो न मां सेवते
स्वामिन्नागमलालनीय[३] रजनीं[४] लक्ष्मीपते! रक्ष माम्।।

द्वितीया यथा—

नाथेऽनिशं निजनिवाससमीपनीप-
मुच्छेत्तुमादिशति संसदि सेवकेभ्यः।
खिन्ना वधूः सखि! सदैव सदैवतोऽय-
मुक्त्वेति तं सपदि पूजयितुं प्रतस्थे।।

अन्यैर्ज्ञातोपनायकानुरागा **लक्षिता**। यथा—

दिठ्ठीअजं ण दिठ्ठो सरलसहावाइ जं अणालविओ।
उअआरो जं ण कओ तंच्चिअ कलिअं छइल्लेहिं[५]।।

१. गृहपते गतोऽस्मच्छरणं रक्षस्वैनमिति स्वैरिणी भणित्वा।
सहसागतस्य पत्युस्त्वरितं कण्ठे मेलयति।।इति च्छाया।
२. पुष्पिणी=रजस्वला।
३. आगमलालनीय!=विष्णुपक्षे वेदस्तुत्य! जारपक्षे आगमेन आगमनेन लालनीय!।
४. रजनीमिति रात्रिं व्याप्येत्यर्थः। अत्यन्तसंयोगे द्वितीया।
५. दिष्ट्या यत्र दृष्टः सरलस्वभावया यदनालपितः।
उपचारो यत्र कृतस्तदपि च कलितं विदग्धैः।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिणीतत्वे सति अनेकानुरागिणी **कुलटा**। यथा—

पृथ्वी तावत्त्रिकोणा नगनगरगिरिग्रामरुद्धं तदर्द्धं
तत्राप्यर्द्धं युवत्यः शिशुविगतवयोदूषितं यत्तदर्द्धम्।
त्याज्यास्तत्रापि पुत्रश्वशुरगुरुजनाः शेषवन्तः कियन्तो
मिथ्यावादो जनानां मुखरमुखरवः पुंश्चली पुंश्चलीति।।

सङ्केतविघटनदुःखवत्य**नुशयाना**। सा च त्रिधा। स्वविरहितसङ्केतस्थाने नायकगमनज्ञानवती, सङ्केतस्थानस्य स्वरूपतो विघटनज्ञानवती, भाविसङ्केतस्थानाभावशङ्कावती चेति।

आद्या यथा—

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया।।

द्वितीया यथा—

वाहित्ता पडिवअणं ण देइ रूसेइ एक्कमेक्कस्स।
अज्जा कज्जेण विणा पलिप्पमाणे णईकच्छे[१] ।।

तृतीया यथा—

किं रुअसि ओणअमुही धवलाअंतेसु शालिछेत्तेसु।
हरिआलमंडिअमुही णडिव्व शणवाडिआ जाआ[२] ।।

प्रियप्राप्तिजन्यानन्दवती **मुदिता**। यथा—

अलससिरमणी धुत्ताण आग्गिमो पुत्ति धणसमिद्धिमओ।
इअ भणिएण णअंगी पप्फुल्लविलोअणा जाआ[३] ।।

कन्यका यथा—

आरोपिता शिलायामश्मेव त्वं स्थिरेति मन्त्रेण।
मग्नापि परिणयापदि जारमुखं वीक्ष्य हसितैव।।

।। इति परकीया।।

---

१. व्याहृता प्रतिवचनं न ददाति रुष्यति एकमेकस्य।
आर्या कार्येण विना प्रदीप्यमाने नदीकच्छे।।इति च्छाया।

२. किं रोदिषि अनवतमुखी धवलायमानेषु शालिक्षेत्रेषु।
हरितालमण्डितमुखी नटीव शणवाटिका जाता।।इति च्छाया।

३. अलसशिरोमणिर्धूर्तानामग्रिमः पुत्रि! धनसमृद्धिमयः।
इति भणितेन नताङ्गी प्रोत्फुल्लविलोचना जाता।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वित्ताभाववता सहास्याः सम्भोगो मा भूदित्येतादृशेच्छाविषयत्वे सत्यनुरक्ता सामान्या। विषयत्वं चेच्छाविशेष्याभावप्रतियोगिप्रतियोगित्वम्। भवति चोक्तेच्छा-विशेष्योऽस्याः सम्भोगाभावः, तत्र प्रतियोगी सम्भोगस्तत्प्रतियोगित्वं चास्याम्। तादृशेच्छा च क्वचिद्द्वेश्यायाः क्वचित्तन्मात्रादेरिति नाव्याप्तिः। यथा—

क उव्वरिआ के उण ण वंचिआ के अलुत्तगुरुविहवा।
णहराइं बेसिणिओ गणणारेहा विअ वहन्ति[1]।।

।। इति सामान्या।।

एताश्च तिस्रोऽपि अन्यसम्भोगदुःखिता, वक्रोक्तिगर्विता, मानवती चेति त्रिविधाः।

आद्या यथा—

निःशेषच्युतचन्दनं स्तनतटं निर्मुक्तरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि! दूति! बान्धवजनस्याज्ञातपीडागमे!
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्।।

गर्विता प्रेमगर्विता सौन्दर्यगर्विता च।

आद्या यथा—

हल्लफलल्हाणपसाहिआण मज्झे सवत्तीणं।
अज्जाइ मज्जणाणाअरेण कहिअं व सौहग्गम्[2]।।

द्वितीया यथा—

गर्वमसम्भाव्यमिमं लोचनयुगलेन किं वहसि भद्रे!।
सन्तीदृशानि दिशि दिशि सरस्सु ननु नीलनलिनानि।।

मानस्तु द्विधा—प्रणयादीर्ष्यातश्च। तदुक्तं दर्पणे—

'मानः कोपः स तु द्वेधा प्रणयेर्ष्यासमुद्भवः।
द्वयोः प्रणयमानः स्यात्प्रमोदे सुमहत्यपि।।
प्रेम्णः कुटिलगामित्वात्कोपो यः कारणं विना'।।

१. के उर्वरिताः के पुनर्न वञ्चिताः के अलुप्तगुरुविभवाः।
नखराणि वेश्या गणनारेखा इव वहन्ति।।इति च्छाया।
२. हारिद्रफलस्नानप्रसाधितानां मध्ये सपत्नीनाम्।
आर्याया मज्जनानादरेण कथितमिव सौभाग्यम्।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रियापराधातिरिक्तहेतुजन्यः कोपः प्रणयमानः। द्वयोरिति कदाचिन्नायिकायाः कदाचिन्नायकस्येत्यर्थः।

आद्यो यथा—

पशुपइणो रोसारुणपडिमासङ्कंतगौरीमुहअन्दम्।
गहिअग्घपंकअंविअ संझासलिलंजलिं णमह[1]।।

द्वितीयो यथा—

अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः
सा हंसैः स्थिरकौतुका चिरमभूद्गोदावरीसैकते।
आयान्त्या परिदुर्मनायितमिव त्वां वीक्ष्य बद्धस्तया
कातर्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः।।

युगपद्यथा—

एकस्मिन् शयने पराङ्मुखतया वीतोत्तरं ताम्यतो-
रन्योन्यस्य हृदि स्थितेऽप्यनुनये संरक्षतोर्गौरवम्।
दम्पत्योः शनकैरपाङ्गवलनान्मिश्रीभवच्चक्षुषो-
र्भग्नो मानकलिः सहासरभसव्यासक्तकण्ठग्रहः।।

ईर्ष्यामानो यथा दर्पणे—

'पत्युरन्यप्रियासङ्गे दृष्टेऽथानुमिते श्रुते।
ईर्ष्यामानो भवेत्स्त्रीणां तत्र त्वनुमितिस्त्रिधा।।
तत्स्वप्नायितभोगाङ्कगोत्रस्खलनसम्भवा'।।

अपरस्त्रीदर्शनादिजन्योऽल्पयत्नसाध्यत्वात् लघुः। गोत्रस्खलनादिजन्यः कष्टसाध्यत्वान्मध्यमः। परस्त्रीसम्भोगजन्यो बहुप्रयाससाध्यत्वाद् गुरुः। अयं चोत्सर्गः। गोत्रस्खलनादिजन्यस्यापि क्वचिद्गुरुत्वात् परस्त्रीभोगजन्यस्यापि मुग्धादौ लघुत्वात्।

लघुर्यथा—

जो कहंवि मह सहीहिं छिद्दं लहिऊण पेसिओ हिअअम्।
सो माणो चोरिअकामुओव्व दिट्ठे पिए णठ्ठो[2]।।

---

१. पशुपते रोषारुणप्रतिमासङ्क्रान्तं गौरीमुखचन्द्रम्।
गृहीतार्घपङ्कजमिव सन्ध्यासलिलाञ्जलिं नमत।।इति च्छाया।

२. यः कथमपि मम सखीभिश्छिद्रं लब्ध्वा प्रवेशितो हृदयम्।
स मानश्चोरितकामुक इव दृष्टे प्रिये नष्टः।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्यो यथा—

अवलंबिअ माणं परमुहीअ एतस्स माणिणि पिअस्स।
पुट्ठिपुलउग्गमो तुह कहेइ समुहट्ठिअं हिअअम्[1]।।

गुरुर्यथा—

णेउरकोटिविलग्गं चिउरं दइअस्स पाअपडिअस्स।
हिअअं पउत्थमाणं उम्मोअन्तिच्चिअ कहेइ[2]।।

प्रत्यक्षं यथा—

विनयति सुदृशो दृशः परागं प्रणयिनि कौसुममाननानिलेन।
तदहितयुवतेरभीक्ष्णमक्ष्णोर्द्वयमपि रोषरजोभिरापुपूरे।।

स्वप्नायितं यथा—

एते लक्ष्मण! जानकीविरहिणं मां पीडयन्त्यम्बुदा
मर्माणीव विघट्टयन्त्यलममी क्रूराः कदम्बानिलाः।
इत्थं व्याहृतपूर्वजन्मचरितो यो वीक्षितो राधया
सेर्ष्यं शङ्कितया स वः सुखयतु स्वप्नायमानो हरिः।।

भोगाङ्कदर्शनं यथा—

तस्याः सान्द्रविलेपनस्तनतटप्रश्लेषमुद्राङ्कितं
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते।
इत्युक्ते क्व तदित्युदीर्य्य सहसा तत्सम्प्रमार्ष्टुं मया
सा श्लिष्टा रभसेन तत्सुखवशात्तस्याश्च तद्विस्मृतम्।।

गोत्रस्खलनं यथा—

मयि व्यक्तं गोत्रस्खलनमपराधं कृतवति
प्रसन्नैवास्यश्रीर्लवमपि न भेदं गतवती।
परं त्वस्या मन्युर्भयचकितदूतीविनिहितै-
रितः प्रत्यासन्नैरसरलदृगन्तैरभिहितः।।

---

१. अवलम्ब्य मानं पराङ्मुख्या एतस्य मानिनि! प्रियस्य।
पृष्ठपुलकोद्गमस्तव कथयति सम्मुखस्थितं हृदयम्।।इति च्छाया।
२. नूपुरकोटिविलग्नं चिकुरं दयितस्य पादपतितस्य।
हृदयं प्रोत्थितमानमुन्मोचयतीव कथयति।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रवणं यथा मम—

प्रणयरभसादाभासत्वस्पृशां परिशीलना-
त्पिशुनवचसामन्तः सञ्चिन्तनेन तदागसाम्।
सितकररुचामाविर्भावाल्लसत्कुसुमायुध-
स्फुरितरमणोत्कण्ठाः सम्पेदिरे मदिरेक्षणाः।।

माननिवृत्त्युपाया यथा—

साम भेदोऽथ दानं च नत्युपेक्षे रसान्तरम्।
तद्भङ्गाय पतिः कुर्य्यात् षडुपायानिति क्रमात्।।

तत्र प्रियवचः साम भेदस्तत्सख्युपार्जनम्।
दानं व्याजेन भूषादेः पादयोः पतनं नतिः।।

सामादौ तु परिक्षीणे स्यादुपेक्षावधीरणम्।
रभसत्रासहर्षादेः कोपभ्रंशो रसान्तरम्।।

साम यथा—

देसु अणुपसिअ एह्निं पुणोवि सुलहाइं रोसिअव्वाइं।
एसा मिअच्छि मिअलंछणुज्जला गलइ च्छणराई[1]।।

भेदो यथा—

मा कुण पडिवक्खसुहं अणुणेहि पइं पसाअलौहिल्लम्।
अइ गरुअगहिअमाणे णपुत्ति! रासिव्व छिज्जिहिसि[2]।।

दानं यथा—

न खलु वयममुष्य दानयोग्याः
पिबति च पाति च यासकौ रहस्त्वाम्।
विट! विटपममुं ददस्व तस्यै
भवति यतः सदृशोश्चिराय योगः।। (मा.स.४।५३)

१. पश्यानुप्रसीद इदानीं पुनरपि सुलभानि रोषितव्यानि।
एषा मृगाक्षि मृगलाञ्छनोज्ज्वला गलति क्षणदा।।इति च्छाया।
२. मा कुरु प्रतिपक्षसुखमनुनय पतिं प्रसादलुब्धम्।
अयि गुरुकगृहीतमाने न पुत्रि! रात्रिरिव क्षीणा भविष्यसि।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नतिर्यथा—

पाअपडिअं अहव्वे! किं दाणिं णोट्ठवेसि भत्तारम्।
एअंचिअ अवसाणं दूरंमि गअस्स पेम्मस्स[१] ।।

उपेक्षा यथा—

स्वचरणपीडानुमितत्वन्मौलिरुजाविनीतमात्सर्य्या।
अपराद्धा सुभग! त्वां स्वयमहमनुनेतुमायाता।।

रसान्तरं यथा—

विग्रहाच्च शयने पराङ्मुखी-
र्नानुनेतुमबलाः स तत्वरे।
आचकाङ्क्ष घनशब्दविक्लवा-
स्ताः स्वयं प्रविशतीर्भुजान्तरम्।। (र.वं.स.१९/३८)

असाध्यस्तु मानो रसाननुगुणत्वान्न प्रकृतोपयोगीति नात्रोपन्यस्तः। यथा—

तह माणो माणघणाइ एमेअ दूरमणुबद्धो।
जह से अणुणीअ पिओ एक्कग्गामेच्चिअपउत्थो[२] ।।

इह मुग्धा तावदेकैव। मध्या-प्रगल्भे धीरादिभेदेन षट्, ज्येष्ठा-कनिष्ठाभेदेन द्वादशेति त्रयोदश स्वीयाभेदाः। परोढा कन्यका चेति परकीयाद्वैविध्यम्। सामान्या एकैवेति षोडश भेदाः। तासां च वक्ष्यमाणैरष्टाभिर्भेदैरष्टाविंशत्यधिकशतं भेदाः। प्रत्येकमुत्तमादिभेदत्रयेण शतत्रयं चतुरशीतिश्च भेदा भवन्ति। तदुक्तं प्राचीनैः—

'त्रयोदशविधा स्वीया द्विविधा च पराङ्गना।
एका वेश्या पुनश्चाष्टाववस्थाभेदतो मताः।।
पुनस्तास्त्रिविधाः सर्वा उत्तमाधममध्यमाः।
इत्थं शतत्रयं तासामशीतिश्चतुरुत्तरा।।
जातिकालवयोऽवस्थाभावकन्दर्पनायकैः।
इतरा अप्यसङ्ख्याता नोक्ता विस्तरभीतितः'।।

---

१. पादपतितमभद्रे किमिदानीं नोत्थापयसि भर्तारम्।
एतावदेवावसानं दूरं गतस्य प्रेम्णः।।इति च्छाया।

२. तथा मानो मानधनाया एवमेव दूरमनुबद्धः।
यथाऽस्या अनुनीय प्रिय एकग्राम एव प्रोषितः।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यादिभेदास्तु न सम्भवन्ति। दिव्यत्वादेर्यावद्द्रव्यभावित्वेन अवस्थात्वाभावात्। अवस्थाभेदादेव भेदस्य शास्त्रकारैः परिगणितत्वात्। तद्व्यवहारोल्लङ्घने च दिव्यत्वादिव्याप्यविद्याधरत्वादिनापि भेदापत्तावुन्मत्तकलहप्रसङ्गात्।

ननु मुग्धायास्तथाविधज्ञानसामग्रीविरहाद्धीरादिभेदानुपपत्तिः। अत एव वक्ष्यमाणभेदाष्टकमध्येऽपि केचिद्भेदा अनुपपन्ना इति चेत्, सत्यम्, नवोढायां तदुपपत्तेः।

केचित्तु—परस्त्रियौ कन्यकोढे सङ्केतात्पूर्वं विरहोत्कण्ठिते पश्चाद्विदूषकादिभिः सहाभिसरन्त्यावभिसारिके कुतोऽपि सङ्केतस्थानमप्राप्ते नायके विप्रलब्धे इति त्रिविधे एव। तयोरस्वाधीनप्रिययोरवस्थान्तरानुपपत्तेरित्याहुः। तन्न, खण्डितादिभेदानामपि वक्ष्यमाणरीत्योपपत्तेः सख्यादिद्वारा प्रियागमनादिनिश्चये बाधकाभावादिति दिक्।

अष्टभेदानाह भगवान् भरतः—

तत्र वासकसज्जा च विरहोत्कण्ठितापि वा।
स्वाधीनभर्त्तृका वापि कलहान्तरितापि वा।।
खण्डिता विप्रलब्धा वा तथा प्रोषितभर्तृका।
तथाभिसारिका चैव इत्यष्टौ नायिकाः स्मृताः।।

वाशब्दः समुच्चयार्थः। प्रियसमागमननिश्चयजन्यसम्भोगसामग्रीसम्पादनपरा **वासकसज्जा**। तदुक्तं मुनिना—

'उचिते वासके या तु रतिसम्भोगलालसा।
मण्डनं कुरुते हृष्टा सा वै वासकसज्जिका'।।

अत्रोक्तनिश्चयजन्यानन्दवत्त्वं लक्षणम्। मण्डनादिकं तु चेष्टेति रहस्यम्।

मुग्धा वासकसज्जा यथा मम—

मुग्धाक्ष्या दयितागमस्य दिवसं निर्णीय मानान्तरा-
न्मन्दाक्षातिशयात्प्रसाधनविधौ साक्षादपर्याप्तया।
पश्यत्येव सखीजने सुमनसामाकाङ्क्षया कैतवा-
त्कुञ्जान्तर्गमनादनायि वसनालङ्कारमुत्सारणम्।।

मध्या यथा मम—

सन्धत्ते श्रुतिसीम्नि गन्धफलिकां गण्डस्थलालम्बिनीं
पिण्डालक्तककर्दमेन चरणावारञ्जयत्यञ्जसा।
हैमान्याभरणानि कुङ्कुमरसार्द्रायां तनौ यच्छति
प्राप्याहर्दयितागमाधिकरणत्वेनावबुद्धं वधूः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रगल्भा यथा श्रीरुद्रचन्द्रदेवानाम्—

स्नात्वा वारिणि चन्दनैः सुरभिते धूपाकुले मालती-
पुष्पाणि प्रतिमुच्य केशनिचये कण्ठेऽपि पुष्पस्त्रजः।
भाले कुङ्कुमपत्रकं सुवसना कृत्वा स्थिता वासके
कान्तस्यानयनाय सौरभततीमादिश्य दूतीमिव।।

परकीया यथा मम—

निर्णीय प्रतिवेशिनां श्रुतिवशादभ्यागमं प्रेयसो
नन्दिन्या सहसा विधाय कलहारम्भं विना हेतुना।
वारेऽपि प्रतिसुभ्रुवो गृहपतेः सस्नेहमात्मीयता-
मध्यारोप्य सुमध्यया तनुलतासंस्कार आरभ्यते।।

सामान्या यथा मम—

धत्ते लोभमिव प्रसृत्वरतरं रत्नांशुजालं तनौ
दत्ते चाटुमिवातिरञ्जनकरं काश्मीरपङ्कद्रवम्।
गृह्णीते शठतामिवानुपहतां जातीप्रसूनस्त्रजं
तत्रैवाहनि वारवामनयना विज्ञाय कान्तागमम्।।

सङ्केतस्थाने प्रियानागमनहेतुचिन्ताव्याकुला **विरहोत्कण्ठिता**। अत्र तदनागमजन्यदुःखवत्त्वं लक्षणं तद्धेतुचिन्तादिकं तु चेष्टितमिति विवेकः। तदुक्तम्—

'अनेककार्यव्यासङ्गाद्यस्या नागच्छति प्रियः।
तस्यानागमदुःखार्त्ता विरहोत्कण्ठिता मता'।।

विरहस्तु समानदेशस्थत्वे सति सम्भोगाभावः। सत्यन्तं प्रवासेऽतिव्याप्ति-वारणार्थम्। न च सोऽपि लक्ष्य एवेति वाच्यम्। प्रोषितभर्तृकाया विरहोत्कण्ठितायाश्च भिन्नत्वेन मुनिना परिगणितत्वात्।

मुग्धा विरहोत्कण्ठिता यथा मम—

अबिभ्रत्यासत्तिं हृदयदयिते नूतनवधू-
रतः स्यादन्यस्यामिति परिकलय्य प्रतिपदम्।
न धत्ते निःश्वासं न च वहति वाष्पं नयनयो-
र्विधोर्बिम्बं वैभातिकमिव मुखं किन्तु बिभृते।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्या यथा—

अन्यत्र व्रजतीति का खलु कथा नाप्यस्य तादृक् सुहृ-
द्यो मां नेच्छति नागतश्च सहसा कोऽयं विधेः प्रक्रमः।
इत्यल्पेतरकल्पनाकवलितस्वान्ता निशान्तान्तरे
बालाऽऽवृत्तविवर्त्तनव्यतिकरा नाप्नोति निद्रां निशि।।

प्रगल्भा यथा मम—

कामिन्याः सति बाधकस्य विरहे यावाननेहा प्रिय-
प्रत्यासत्तिधिया प्रतीक्षितुमभूदर्हो गते तावति।
अम्लायच्छ्वसितैः स्रजः सुमनसां धारा दृशोरम्भसां
प्रामार्जन् घुसृणं कपोलतलतश्चुक्षोभ वक्षोरुहः।।

परकीया यथा—

एहिसितुमंति णिमिसम्ब जग्गिअ जामिणीअ पढमद्धम्।
सेसं सन्तावपरव्वसाइ वरिसंव चोल्लीणम्[१]।।

सामान्या यथा मम—

नोपयातः किमिति स भवेदित्थमालोचयन्ती
रूपाजीवा वदनमरुतं सन्दधे चात्यजच्च।
अर्थस्योपस्थितिमथ सखीभाषिताद्वल्लभाच्च
प्रत्यादिक्षन्मुखमनुशयं मानसे च न्यधत्त।।

स्वसन्निधानत्यागेच्छाविरहविशिष्टवल्लभा **स्वाधीनभर्त्तृका**। स्वपदं नायिका-परम्। तदुक्तम्—

'सुरतातिशयैर्बद्धो यस्याः पार्श्वगतः प्रियः।
सामोदगुणसम्पन्ना भवेत्स्वाधीनभर्तृका।।
विचित्रोज्ज्वलनेत्रान्तः प्रमोदोद्योतिताननाः।
उदीर्णशोभातिशया कार्य्या स्वाधीनभर्तृका।।'

मुग्धा स्वाधीनभर्तृका यथा—

'श्यामा विलोचनहरी बालेयं मनसि सज्जन्ती।
लुम्पति पूर्वकलत्रं धूमलता भित्तिचित्रमिव।।'

१. एष्यसि त्वमिति निमिषमिव जागरितं यामिन्याः प्रथमार्धम्।
शेषं सन्तापपरवशया वर्षमिव चोन्नतिम्।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्या यथा—

पुंसां दर्शय सुन्दरि! मुखेन्दुमीषत्त्रपामपाकृत्य।
जायाजित इति रूढा जनश्रुतिर्मे यशो भवतु।।

प्रगल्भा यथा—

अण्णमहिलाप्पसङ्गं हे देव्व करेसु अह्मदइअस्स।
पुरिसा एकंतरसा णहु दोसगुणेवि आणन्ति[१]।।

परकीया यथा—

अस्तु म्लानिर्लोको लाञ्छनमपदिशतु हीयतामोजः।
तदपि न मुञ्चति स त्वां वसुधाच्छायामिव सुधांशुः।।

सामान्या यथा—

कृत्रिमकनकेनेव प्रेम्णा मुषितस्य वारवनिताभिः।
लघुरिव वित्तविनाशक्लेशो जनहास्यता महती।।

प्रियानुनयानभ्युपगमजनितदुःखवती **कलहान्तरिता**। तदुक्तम्—

ईर्ष्याकलहसन्तप्तो यस्या नागच्छति प्रियः।
सामर्षवशसन्तप्ता कलहान्तरिता भवेत्।।

अमर्षोऽत्र प्रियानुनयप्रत्याख्यानजन्यः स्वविषयको ग्राह्यः।

मुग्धा कलहान्तरिता यथा मम—

प्रत्यादिश्य रुषां वशादनुनयं भर्तुर्मरुत्यावह-
त्यामोदस्पृशि सिन्दुवारसुमनःसन्दोहदोलायितैः।
मुग्धाक्ष्यानुशयानयापि नवया न त्वन्यदातन्यते
श्वासेनागमि पद्मरागदलवन्मालिन्यमेवाधरः।।

मध्या यथा मम—

आदर्शं समयेन दर्शितवति प्रातर्वयस्याजने
बह्वायस्यति यास्यतो विशदतां श्वासस्य रोधाय सा।
प्राणेशस्य तथा गिरामनुररीकारान्निधत्ते परं
हेलामन्थरतारकाः प्रतिफलत्यात्मन्यजस्रं दृशः।।

---

१. अन्यमहिलाप्रसङ्गं हे दैव कुरु अस्मद्दयितस्य।
पुरुषा एकान्तरसा न खलु दोषगुणौ विजानन्ति।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रगल्भा यथा मम—

पचेलिमरसोदयं विदुषिचेलि! मिथ्याग्रहा-
द्वहेलितवती तथा मदनहेलितप्तं प्रियम्।
चलेऽलिकगतालका स्वकरकेलिपाथोरुह-
प्रमेलितमुखी मृषा क्षितिमये! लिखस्युन्मनाः।।

परकीया यथा मम—

शीलं साधु मिमील यत्प्रणयतो लज्जा ममज्जाखिला
मर्यादाप विपर्ययं बहुमतो दुर्वारगुर्वादरः।
आसीच्चापलमेव नापलपितं सोऽनुग्रहार्थं नम-
न्नापातप्रतिभासया बत मया पापेन नापेक्षितः।।

सामान्या यथा मम—

साकूतं करवाणि पाणिकमले माणिक्यजं कङ्कणं
मानं स्रंसय हंसकं पदयुगे संसज्जयानि स्वयम्।
वक्षोजे निदधानि दाम जनितं षाण्मासिकैर्मौक्तिकै-
रेवं सोऽनुनयन्मया हतधिया केलिं विना हेलितः।।

अन्यसम्भोगचिह्नविशिष्टनायकदर्शनजन्यदुःखवती **खण्डिता**। तदुक्तम्—

'व्यासङ्गादुचिते यस्या वासके नागतः प्रियः।
तदनागमनार्ता तु खण्डितेत्यभिसंज्ञिता'।।

व्यासङ्गो नायिकान्तरसम्भोगप्रसक्तिः। तत्पदम् अन्यसम्भोगाभावविशिष्टनायकपरम्। तस्यानागमनम् = अन्यसम्भोगचिह्नाभावविशिष्टप्रियागमनाभावः। स च सम्भोगचिह्नाभावरूपं यद्विशेषणं तदभावप्रयुक्त एव ग्राह्यः। आगमनस्यापि स्वरूपतो दुःखजनकत्वानुपपत्त्या आगमनदर्शनजन्येत्युक्तौ चागमनपदवैयर्थ्यात् सम्भोगचिह्नविशिष्टप्रियदर्शनजन्यदुःखवत्त्वं लक्षणं पर्यवसन्नम्। यथाश्रुतमुनिवचनव्याख्याने विरहोत्कण्ठितायामतिव्याप्तिरिति रहस्यम्।

स्यादेतत्। पराङ्गनासङ्गजन्यमानवत्याः खण्डितायाश्च कथं भेद इति चेत्, अत्र केचित्—हेतुदर्शनकाले खण्डिता तज्जन्यसम्भोगानुमितिकाले मानवतीत्याहुः। तन्न। तत्रापि सम्भोगानुमित्यैव ईर्ष्योत्पत्तेः। तस्मान्मानवती न भेदान्तरम्। षोडशानां प्रेमगर्विता सौन्दर्यगर्विता मानवतीति त्रैविध्यस्याभियुक्तैरनुक्तत्वात्; किन्तु उक्तभेदाष्टकस्यैवोदाहृतत्वात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुग्धा खण्डिता यथा मम—

वीक्ष्य प्रियस्य रदनच्छदमन्यनारी-
विश्राणितं रदपदं दधतं विदूरात्।
सन्तप्तमीक्षणयुगं करकाधियेव
नासाग्रमौक्तिकमधि न्यपतत्प्रियायाः।।

मध्या यथा मम—

नेतुर्नखक्षतमुदीक्ष्य कपोलभूमौ
किं नाम कुञ्चयसि सुभ्रु! दृगञ्चलं त्वम्।
तत्तावकीनवदनाम्बुरुहस्थमेव
वैशद्यतः प्रतिफलत्प्रतिभाति तत्र।।

प्रगल्भा यथा—

संवाहणसुहरसतोसिएण देतेण तुह करे लक्खम्।
चरणेन विक्कमाइव्वचरिअमणुवट्टिअं तिस्सा[1]।।

परकीया यथा मम—

पश्यन्त्या सहजारुणं प्रणयिनो बिम्बाधरं सुभ्रुवा
प्रत्यूषेऽभिमुखस्य कज्जलतमोलेखाकलङ्काकुलम्।
वैमुख्यं सहसैव हन्त विहितं सावेगमुत्कम्पितं
प्रादुर्भावसमानकालिकतिरोभावं तु वाष्पं कृतम्।।

सामान्या यथा मम—

प्रातः प्रवालमणिना मणिमालया च
वीक्ष्य प्रसाधिततनुं तमुपेयिवांसम्।
तस्यापरावयववर्तिभिरर्द्धचन्द्रै-
र्वाराङ्गनाहृदयगा व्यगमंस्तदाशाः।।

---

१. संवाहनरसतोषितेन ददता तव करे लाक्षाम् (लक्षम्)।
चरणेन विक्रमादित्यचरितमनुवर्तितं तस्याः।।इति च्छाया।
अत्र लक्खमिति पदं श्लेषेण लाक्षां सङ्ख्याविशेषं च प्रतिपादयति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दत्तसङ्केतप्रियानवाप्तिजन्यदुःखवती **विप्रलब्धा**। तदुक्तम्—

यस्या दूतीं प्रियः प्रेष्य दत्त्वा सङ्केतमेव वा।
नागतः कारणेनेह विप्रलब्धा तु सा स्मृता।।

मुग्धा विप्रलब्धा यथा मम—

वयस्याभिर्नीता कथमपि निकुञ्जं नववधू-
रनायाते तस्मिन्नयनविषयत्वं प्रियतमे।
दधाने राजीवभ्रममनुसरत्यास्यमलिना
कलापे निःशङ्कं दिशति विकृतामालिषु दृशम्।।

मध्या यथा मम—

सङ्केतगोचरमुपेत्य विलोचनस्य
सीमासु वल्लभतमं न निभालयन्ती।
श्वासं श्रमाभिनयनेन विजृम्भमाण-
व्याजेन वाष्पविसरं विदधाति बाला।।

प्रगल्भा यथा मम—

वानीरवने वल्लभविरहिणि पाणौ कपोलमुपधाय।
तद्वृत्तीन् पुलकानिव वामभ्रूरश्रुबिन्दुभिरमार्क्षीत्।।

परकीया यथा—

आअण्णअइ अडअणा णिउंजहेट्ठम्मि दिण्णसङ्केआ।
अग्गपअपेल्लिआणं मम्मरअं जुण्णपत्ताणम्[१]।।

सामान्या यथा मम—

दीर्घत्वमागतवतो बहुजीवनस्य
मूलायितानविरतं हृदि धार्यमाणान्।
अप्रेक्ष्य वारयुवती दयितं निकुञ्जे
श्वासानिव व्यरहयद्द्रविणाभिलाषान्।।

प्रियप्रवासज्ञानजन्यदुःखवती **प्रोषितभर्तृका**। तदुक्तम्—

'गुरुकार्यान्तरवशाद्यस्यास्तु प्रोषितः प्रियः।
सा रुक्षालककेशान्ता भवेत्प्रोषितभर्तृका'।।

---

१. आकर्णयति स्वैरिणी निकुञ्जमध्ये दत्तसङ्केता।
अग्रपदप्रेरितानां मर्मरकं जीर्णपत्राणाम्।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रोषितेति क्तप्रत्ययार्थो भूतत्वमतन्त्रम्। प्रवासस्य स्वरूपतो दुःखानुपपादकत्वात्। प्रवासज्ञानस्यैव तथात्वात्। भूतभविष्यत्प्रवासज्ञानस्यापि तदुपपत्तेः। तदुक्तं **काव्यप्रदीपे**—'वर्तमानवत्स्यर्न्तावपि स्वज्ञानद्वारा विप्रलम्भप्रयोजकाविति नाव्याप्तिः। प्रवासपदेन तज्ज्ञानलक्षणाद्वा' इति। अन्यथा प्रवसत्पतिका प्रवत्स्यत्पतिकयोर्भेदान्तरत्वापत्तेः। न चेष्टापत्तिर्मुनिवचनविरोधात्।

मुग्धा प्रोषितभर्तृका यथा—

हत्थेसुअ पाएसु अ अंगुलिगणणाहि उअगआ दिअहा।
एह्णिंउण केण गणिज्जउत्ति भणिउं रुअइ मुद्धा[१]।।

मध्या यथा मम—

विश्लेषतस्तव परिश्लथमम्बुजाक्ष्या
वक्षो विभिद्य विविशुर्मलयानिलाः किम्।
यस्मात्तदव्यवहितोत्तरकालमेव
प्रादुर्भवन्ति नवनिःश्वसितप्रवाहाः।।

प्रगल्भा यथा—

भवद्भवनमागतं भ्रमितमीक्षिता नैव सा
कलामयकलावती कुतुकमेतदालोकितम्।
विधुर्वलति पल्लवे तडिदलिन्दमालम्बते
पतत्यचलयोस्तले कमलयोश्च मुक्तावलिः।।

परकीया यथा मम—

आयातेऽपि महोत्सवे रतिपतेः पत्यौ मुखप्रेक्षकेऽ-
प्यावेशात्प्रतिवेशिनीषु विहितोत्साहासु भूषाविधौ।
आलीभिर्विहितो बलादपि परिष्कारः कुरङ्गीदृशो
दूरस्थे दयितेऽनुकल्पविधिमत्काम्यप्रयोगायते।।

सामान्या यथा मम—

अन्येन प्रहितं विटेन सरसं रायोऽतिबंहीयसो
दानस्याभ्युपपत्तिगर्भितमियं लेखं दृशोः कुर्वती।
दूरस्थप्रथमप्रियान्तिकमुपायातुं जनस्येच्छतो
वाष्पैराविलितं व्यनक्ति वदनं वेश्या गवाक्षाद्बहिः।।

१. हस्तेषु च पादेषु च अङ्गुलिगणनाभिरुपगता दिवसाः।
इदानीं पुनः केन गण्यतामिति भणित्वा रोदिति मुग्धा।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रियसमीपगमनोद्यमवती **अभिसारिका**। तदुक्तम्—

हित्वा लज्जां समाकृष्य मदेन मदनेन वा।
अभिसारयते कान्तं सा भवेदभिसारिका।।

णिजर्थोऽत्र न विवक्षितः। 'कान्तार्थिनी तु या याति सङ्केतं साभिसारिका' **इत्यमरोक्तेः**। तद्व्याख्यायां यथोक्तवाक्यस्यैव **क्षीरस्वामिनो**पन्यासाच्च।

'वेश्यायाः कुलटाया वा प्रेष्याया वा प्रयोक्तृभिः।
एभिर्भावविशेषैस्तु कर्त्तव्यमभिसारणम्।।

समदा मृदुचेष्टा च तथा परिजनान्विता।
नानाभरणचित्राङ्गी गच्छेद्वेश्याङ्गनाशतैः।।

संलीना स्वेषु गात्रेषु लज्जासन्नमितानना।
अवगुण्ठनसंवीता गच्छेत्तु कुलजाङ्गना।।

मदस्खलितसंलापा विभ्रमोत्फुल्ललोचना।
आविद्धगतिसञ्चारा गच्छेत्प्रेष्याङ्गना तथा'।।

इति **भरतेनोक्त**त्वात्।

'कान्ताभिसरणोद्युक्ता स्मरार्त्ता साभिसारिका'।

इति **विद्यानाथोक्ते**श्च।

'या वल्लभागमनकालमपारयन्ती
सोढुं स्मरज्वरभरार्त्तिपिपासितेव।
निर्याति वल्लभजनाधरपानलोभात्
सा कथ्यते कविवरैरभिसारिकेति'।।

इति **भोजराजोक्ते**श्च।

न च स्वीयाया अभिसारानुपपत्तिः, सपत्न्यादिभयादुपपत्तेः।

मुग्धाभिसारिका यथा मम—

विधाय वरवर्णिनीमभिनवां कथञ्चित्सखी-
जनैः सह कृतः कृतप्रियतमाभिसारोत्सवाम्।
ह्रिया हृदि तिरस्कृतः स्पृशति तत्प्रतीपायित-
श्रमापनयनेच्छया बहिरिव प्रसूनाशुगः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्या यथा—

उपविश मृदुतल्पे कल्पिते पल्लवौघै-
विरचय कचभारं स्रस्तमंसस्थलीषु।
इह हि मलयजन्मा मारुतो मन्दमन्दं
पिबतु तव कपोलालम्बिनः स्वेदबिन्दून्।।

प्रगल्भा यथा मम—

बन्धभ्रंशस्खलदलकभूनिर्गलद्वारिबिन्दु-
व्याजाल्लाजाञ्जलिमिव तडित्यातवह्नौ क्षिपन्ती।
वक्त्रं भर्त्तुर्ध्रुवमनिमिषं प्रेक्षमाणा मृगाक्षी
कुञ्जस्यान्तर्लसति पुनरारब्धपाणिग्रहेव।।

परकीया यथा मम—

एता जाग्रति यातरोऽत्यवहितास्त्वत्पादरोपादरा
मिथ्यैव स्वपिति प्रतीपमहिला दीपः पुरो दीप्यते।
हृद्वृत्त्या कृतमित्वरि! त्वरितया किञ्चित्प्रमाद्यत्वरि-
व्रातः कातरता मृषा तरलता किं वा तदातन्यते[१]।।

सामान्या यथा मम—

अपद्मा श्रीरेषा प्रतिहतमनङ्गस्य ललितं
कुलस्त्रीणां शोको मदनवरवृक्षस्य कुसुमम्।
सलीलं गच्छन्ती रतिसमयलज्जाप्रणयिनी
रतिक्षेत्रैरङ्गैः प्रियपथिकसार्थैरनुगता।।

अन्धकाराभिसारिका यथा—

'गन्तुं यदि व्यवसितासि घनान्धकारे
नीलाञ्चलेन तनुमावृणु मुग्धशीले!।
विद्युल्लता यदि पथि प्रतिरोधिनी स्या-
दप्रावृतैव कनकद्रवगौरि! गच्छेः।।

ज्योत्स्नाभिसारिका यथा मम—

अवदातवेषवत्यां वरवर्णिन्यामभिसरन्त्याम्।
समजनि निशीथसमयेऽप्यौषसिकीवाखिला ज्योत्स्ना।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिवाभिसारिका यथा—

सायं स्नानमुपासितं मलयजेनाङ्गं समालेपितं
यातोऽस्ताचलमौलिमम्बरमणिर्विश्रब्धमत्रागतिः।
आश्चर्यं तव सौकुमार्यमभितः क्लान्तासि येनाधुना
नेत्रद्वन्द्वममीलनव्यतिकरं शक्नोति तेनासितुम्॥

एताः सर्वा अप्युत्तममध्यमाधमभेदेन त्रिधा। तदुक्तं भरतेन—

सर्वासामेव नारीणां त्रिविधा प्रकृतिः स्मृता।
उत्तमा मध्यमा चैव तृतीया चाधमा स्मृता॥

उत्तमा यथा—

या विप्रियेऽपि तिष्ठन्तं न वदत्यप्रियं प्रियम्।
न चिरं कोपमायाति दोषान्प्रच्छादयत्यपि॥इत्यादि।

यथा मम—

प्रियान्यव्यावृत्तिः परिजनभयं स्वस्य विभुता
गुणा भासन्तेऽमी सखि! यदपि माने बहुविधाः।
तथापि प्रारब्धप्रणयपरिपाटीषु विषया-
न्तराणां सञ्चारोऽनुपममपकर्षं ध्वनयति॥

मध्यमा यथा—

ईर्ष्यातुरा वा निभृता क्षणक्रोधा च गर्विता।
क्षणप्रसादना चैव सा नारी मध्यमा स्मृता॥

यथा—

दृष्टे लोचनवन्मनाङ्मुकुलितं पार्श्वस्थिते वक्त्रवद्
न्यग्भूतं बहिरासितं पुलकवत्संस्पर्शमातन्वति।
नीवीबन्धवदासितं श्लथतया सम्भाषमाणे ततो
मानेनापसृतं ह्रियेव सुतनोः पादस्पृशि प्रेयसि॥

अधमा यथा—

अस्थानपरुषा या तु दुःशीला चातिमानिनी।
परुषा प्रतिकूला च दीर्घरोषाधमा स्मृता॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयमेव चण्डीत्युच्यते। यथा मम—

अनुनयति प्रेयसि यन्मानातिशयस्त्वया कृतश्चण्डि!।
इदमेव शान्तिकर्मणि वेतालाभ्युदयमनुहरति।।

स्त्रीत्वे सति अनुकूला **सखी**। अनुकूलत्वं स्वनिष्ठप्रणयनायिकानिष्ठ-प्रणयविषयत्वम्। तस्याः कर्म मण्डनोपालम्भशिक्षापरिहासादि।

मण्डनं यथा—

प्रभाते पृच्छन्तीरवरहसवृत्तं सहचरी-
र्नवोढा न व्रीडामुकुलितमुखीयं सुखयति।
लिखन्तीनां पत्राङ्कुरमनिशमस्यास्तु कुचयो-
श्चमत्कारं गूढं करजपदमासां कथयति।।

उपालम्भो यथा—

सा सर्वतोऽनुरक्ता रागं गुञ्जेव न तु मुखे वहति।
वचनपटोस्तव रागः केवलमास्ये शुकस्येव।।

शिक्षा यथा मम—

मुग्धे! कृत्रिमतद्व्यतिक्रमशतोपन्यासवैज्ञानिकै-
र्वाग्गुम्फान्परिकल्पितान् श्रवणयोस्त्वं माध्वनीनान् कृथाः।
एते प्रेमभराभिचारमनवो विश्रम्भविस्त्रंसनाः
स्वोत्कर्षच्छिदुरा विपक्षरमणीसौभाग्यजन्माङ्कुराः।।

परिहासो यथा—

स्मरशास्त्रमधीयाना शिक्षितासि मयैव यम्।
अगोपि सोऽपि कृत्वा किं दाम्पत्यव्यत्ययस्त्वया।।

प्रसङ्गात्प्रियपरिहासो यथा—

नक्तं रत्नमयूखपाटलमिलत्काकोलकोलाहल-
त्रस्यत्कौशिकमुक्तकन्दरतमाः सोऽयं गिरिः स्मर्यते।
यत्राकृष्टकुचांशुके मयि रुषा वस्त्राणि पत्राणि ते
चिन्वत्या वनदेवतास्तरुलतामुच्चैर्व्यधुः कौतुकात्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रियापरिहासो यथा—

कस्त्वं शूली मृगय भिषजं नीलकण्ठः प्रियेऽहं
केकामेकां कुरु पशुपतिर्नैव दृष्टे विषाणे।
स्थाणुर्मुग्धे! न वदति तरुर्जीवितेशः शिवाया
गच्छाटव्यामिति हतवचाः पातु वः शूलपाणिः।।

सङ्गमादिकुशला **दूती**। तथा च **भरतेनोक्तम्—**

प्रातिवेश्या सखी दासी कुमारी कारुशिल्पिनी।
धात्री पाखण्डिका चैव दूत्यः स्त्रीक्षणिका तथा।।

कारुपदं रजक्यादिपरम्। शिल्पिनी चित्रकारस्त्री। तथा—

तया प्रोत्साहनं कार्यमनुरागानुकीर्तनम्।
कुलभोगधनाधिक्यं कार्यं चैवाविकत्थनम्।। इत्यादि।

सङ्गमनं यथा—

पुरश्चक्षूरागस्तदनु मनसोऽनन्यपरता
तनुग्लानिर्यस्य त्वयि समभवद्यत्र च तव।
युवा सोऽयं प्रेयानिह सुवदने! मुञ्च जडतां
विधातुर्वैदग्ध्यं फलतु च सकामोऽस्तु मदनः।।

विरहनिवेदनं यथा—

आलिङ्गनानि वचनामृतसेचनानि
वामाशयेन विधिनैव निवारितानि।
आलोकनेऽपि यदि गोकुलनाथ! बाधा
राधा कथं हृदयसौष्ठवमादधातु।।

कुलभोगाद्याधिक्यकथनं यथा—

मन्दाकिनीनन्दनयोर्विहारे देवे वरे देवरि माधवे च।
श्रेयः श्रियां यातरि यच्च सत्यां तच्चेतसा भामिनि! भावयस्व।।

।। इति नायिकानिरूपणं समाप्तम्।।

नायिकानिष्ठरतौ विषयत्वान्नायकनिष्ठरतावाश्रयत्वाच्च नायकोऽपि निरूप्यते। स त्रिविधः, पत्युपपति-वैशिकभेदात्। विवाहजन्यसंस्कारवान् **पतिः**। न च स्वीयायामतिव्याप्तिः, पुंस्त्वे सतीत्यभिधेयत्वात्। यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं वनी घनीभूतकुशाङ्कुरकरम्बिता।
शिथिलं धेहि वैदेहि! मदर्पितपदे पदम्।।

तद्भिन्नत्वे सत्यनुरागविषय **उपपतिः**। यथा—

प्राङ्गणकोणेऽपि निशापतिः सन्तापं सुधामयो हरति।
यदि मां रजनिज्वर इव सखि! स न निरुणद्धि गेहपतिः।।

वेश्योपभोगरसिको **वैशिकः**। यथा—

णन्देउ सुरअसतिह्णापराहाइं सअलल्लोअस्स।
बहुकइअवमग्गविणिम्मिआईं वेस्साण पेम्माइं[1]।।

यत्तु—

धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च।
धीरप्रशान्त इत्ययमुक्तः प्रथमं चतुर्भेदः।।

इत्यन्यत्रोक्तम्, तदिह प्रकृतानुपयोगान्नोपन्यस्तम्। पतिश्चतुर्द्धा, अनुकूल-दक्षिण-धृष्ट-शठभेदात्। तन्मात्रविषयकानुरागवाननुकूलः। यथा—

इयं गेहे लक्ष्मीरियममृतवर्त्तिर्नयनयो-
रहस्यस्याः स्पर्शो वपुषि बहलश्चन्दनरसः।
अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः।।

अनेकविषयकतुल्यानुरागवान् दक्षिणः। यथा—

स्नाता तिष्ठति कोशलाधिपसुता वारोऽङ्गराजस्वसु-
र्द्यूते रात्रिरियं जिता कमलया देवी प्रसाद्याद्य च।
इत्यन्तःपुरसुन्दरीः प्रति मया विज्ञाय विज्ञापिते
देवेनाप्रतिपत्तिमूढमनसा द्वित्राः स्थितं नाडिकाः।।

स्वतिरस्कारयुक्तलज्जाशून्यत्वे सत्यनुरक्तो धृष्टः। यथा—

केदाव किआ अहवा करोसि काएसि सुहअ एदाहिं।
अवराहा णअ लज्जिअसाहसुत्तआ खमिज्जन्तु[2]।।

१. नन्देयुः सुरतसतृष्णापराधानि सकललोकस्य।
बहुकैतवमार्गविनिर्मितानि वेश्यानां प्रेमाणि।।इति च्छाया।
२. के तावत्कृता अथवा करोषि कार्यसे सुभग! एताभिः।
अपराधा न च लज्जितसाहसोत्तराः क्षम्यन्ताम्।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रतिकपटशील: शठ:। यथा—

कान्ते सागसि शायिते प्रियसखीवेषं विधायागते
भ्रान्त्यालिङ्ग्य मया रहस्यमुदितं तत्सङ्गमाकाङ्क्षया।
मुग्धे! दुष्करमेतदित्यतितरामुन्मुक्तहासं बला-
दालिङ्ग्य च्छलितास्मि तेन कितवेनाद्य प्रदोषागमे।।

एते भेदा उपपतेरपि बोध्या:। चतुरादिभेदा अपि मुनिनोक्ता:।

पुनरेव तु पुरुषगुणान् कामिततन्त्रे प्रवक्ष्यामि।
चतुरोत्तमौ च मध्यस्तथाधमः सम्प्रवृत्तकश्चैव।।

स्त्रीणां प्रयोगविषये ज्ञेयाः पुरुषास्त्विमे पञ्च।
दुःखक्लेशसहिष्णुः प्रियवाग्दाता प्रसादने कुशलः।।

रत्युपचारनिपुणो दक्षश्चतुरस्त्वसौ बोध्यः।
यो विप्रियं न कुरुते धीरोदात्तः प्रियंवदो मानी।।

अज्ञातहृदयतत्त्वः स्मृतिमात्रज्ञेयः स तु ज्येष्ठः।
सर्वार्थं मध्यस्थो भावग्रहणं करोति नारीणाम्।।

किञ्चिद्दोषं दृष्ट्वा विरज्यते मध्यमः पुरुषः।
काले दाता ह्यपमानितोऽपि न क्रोधमतितरामेति।।

दृष्ट्वा व्यलीकमात्रं विरज्यते मध्यमोऽयमपि।
अपमानितोऽपि नार्या निर्लज्जं समुपसर्पति तथैव।।
अन्यनरे सङ्क्रान्तामारूढस्नेहभावनया।
अभिनवकृते व्यलीके प्रत्यक्षं रज्यते दृढतरं यः।।

सुहृदापि वार्यमाणो विज्ञेयः सोऽधमो नाम।
अविगणितभयामर्षो मूर्खः सततं प्रसक्तहासश्च।।

एकान्तदृढग्राही निर्लज्जः कामतन्त्रेषु।
रतिकलहसम्प्रहारे सुकर्कशः क्रीडनीयकः स्त्रीणाम्।
एवंविधो विधिज्ञैः प्रवृत्तको नाम विज्ञेयः।।

इहाद्यन्तयोर्द्वितीयचतुर्थान्तर्भावादुत्तममध्यमाधमेति त्रैविध्यमेव पुरस्कृतमभियुक्तैः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्तमो यथा—

तच्छ्रमस्तमदिदीक्षत क्षणं तालवृन्तचलनाय नायकम्।
तद्विधा हि भवदैवतं प्रिया वेधसोऽपि विदधाति चापलम्।।

मध्यमो यथा—

लज्जाविदा सीलंअ खण्डिअं असईघोसणा दिण्णा।
जस्स कए णं सहअरि! सजेव्व जणो अजणो जाओ[1]।।

अधमो यथा—

चतुरिमकलाकण्ठच्छेदो मनोभववञ्चनं
दृषदि मधुनो लिप्सा लोके विडम्बनमात्मनः।
उपरि परितः सङ्कल्पानां शिलाशतपातनं
सहचरि! परीतापस्थानं जडे हृदयार्पणम्।।

मानिनो मध्यमे चतुरस्य च उत्तमेऽन्तर्भावः।

मानी यथा—

विरहविषमः कामो वामस्तनुं कुरुते तनुं
दिवसगणनादक्षः सोऽयं व्यपेतघृणो यमः।
त्वमपि वशगो मानव्याधेर्विचिन्तय नाथ हे
किसलयतनुर्जीवत्येवं कथं प्रमदाजनः।।

चतुरो द्विधा—वचनव्यङ्ग्यसमागमश्चेष्टाव्यङ्ग्यसमागमश्चेति।

आद्यो यथा—

उद्देशोऽयं सरसकदलीश्रेणिशोभातिशायी
कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः।
किं चैतस्मिन् सुरतसुहृदस्तन्वि! ते वान्ति वाता
एषामग्रे सरति कलिताकाण्डकोपो मनोभूः।।

---

१. लज्जापिता शीलं च खण्डितमसती घोषणा दत्ता।
यस्य कृते ननु सहचरि! स एव जनोऽजनो जातः।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयो यथा मम—

अवाप्यावस्थानं कथमपि मृगीचक्षुषि पुरो
गुरूणां दृग्भङ्ग्या मिलनसमयं जातु मनसि।
अपह्नुत्य प्रेयान्किल किमपि सामाजिकजनान्
दृगम्भोजद्वन्द्वं परिमुकुलयन्नुत्तरितवान्।।

यथा वा—

आघ्रातं कमलं प्रियेण सुदृशा स्मृत्वापनीतं मुखं
दत्तं विद्रुमकन्दुके नखपदं सीत्कृत्य गूढौ स्तनौ।
दत्ता चम्पकमालिकोरसि तया प्रोद्भिन्नरोमाञ्चया
मीलल्लोचनमासितं चतुरयोर्दूरेऽपि पूर्णो रसः।।

अनभिज्ञस्तु नायको नायकाभासः। यथा मम—

साकूतं ग्रथिता दृशोः पथि यथाशोभं दृशोर्भङ्ग्यो
मन्दं कन्दलितं रदच्छदनयोरानन्दनं स्पन्दनम्।
निन्याते कुचकोरकौ विशदतां विन्यासवैचित्र्यतो
वैचित्र्यं न तथापि चेत्तदितरा रीतिर्विरीवर्त्ति किम्।।

स्यादेतत्। अवस्थाभेदादपि नायकभेदोऽस्त्विति चेत्, न, स्वभावादेव तद्भेदाङ्गीकारात्। प्रोषितप्रियाकत्वादेरनौचित्यसञ्जनकत्वात्। अत एव प्रोषितत्वं नायकभेदप्रयोजकतया अङ्गीकृतम्। तस्य नायिकाभेदत्वेनागणितत्वात्।

प्रोषितपतिर्यथा—

रात्रौ वारिभरालसाम्बुदरवोद्विग्नेन जाताश्रुणा
पान्थेनाथ वियोगदुःखपिशुनं गीतं तथोत्कण्ठया।
आस्तां जीवितहारिणः प्रवसनालापस्य सङ्कीर्त्तनं
मानस्यापि जलाञ्जलिः सरभसं लोके न दत्तो यथा।।

उपपतिर्यथा मम—

अप्रादुर्भवदस्त्रवारि कुचयोरीषत्परिस्पन्दन-
प्रत्येयप्रकृतातिरिक्तनियतश्वासावसीदद्गलम्।
लोकत्रासनियन्तृतान्तरपरावृत्तस्खलत्तारकं
दृग्भङ्गं सुतनोः प्रतस्थुषि मयि ध्यायामि नायामिनम्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा वा—

तीर्णा वाष्पपरम्परैव सरितां पूरेषु कः सम्भ्रमः
सोढा कातरदृष्टिरेव कियती वज्राभिघातव्यथा।
श्वासा एव नतभ्रुवो न गणिताः के नाम झंझानिलाः
प्रेमैवायमपेक्षितो ननु सखे! प्राणेषु को नो ग्रहः।।

वैशिको यथा मम—

असङ्कुचितलोचनाञ्चलमनन्तरायीकृत-
स्तनावरणनीविकानिरसनप्रयत्नोदयम्।
तरङ्गितमनङ्गभूविविधभङ्गिविच्छित्तिभिः
स्मृतं सदपि रञ्जयज्जयति वारनारीरतम्।।

एषां सहायश्चतुर्द्धा। पीठमर्द-विट-चेटक-विदूषकभेदात्। तथा च विद्यानाथः —

किञ्चिदूनः पीठमर्द एकविद्यो विटः स्मृतः।
सन्धाननिपुणश्चेटो हास्यप्रायो विदूषकः।।

केचित्तु पीठमर्द्दस्यान्यत्रोपयोगो न शृङ्गारे। तदुक्तं **दर्पणे**—

दूरानुवर्त्तिनि स्यात्तस्य प्रासङ्गिकेतिवृत्ते तु।
किञ्चित्तद्गुणहीनः सहाय एवास्य पीठमर्द्दाख्यः।।
(प.३, का.३९)

यथा रामादीनां सुग्रीवादयः।

शृङ्गारेऽस्य सहाया विटचेटविदूषकाद्याः स्युः।
भक्ता नर्मसु निपुणाः कुपितवधूमानभञ्जनाः शुद्धाः।।
(प.३, का.४०)

आदिपदान्मालाकाररजकताम्बूलिकगान्धिकादयः।

सम्भोगहीनसम्पद्विटस्तु धूर्त्तः कलैकदेशज्ञः।
वेशोपचारकुशलो वाग्मी मधुरोऽथ बहुमतो गोष्ठ्याम्।।
(प.३, का.४१)

चेटः प्रसिद्धः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुसुमवसन्ताद्यभिधः कर्मवपुर्वेशभाषाद्यैः।
हास्यकरः कलहरतिर्विदूषकः स्यात्स्वकर्मज्ञः।।इति।(प.३, का.४२)

अन्ये तु पीठमर्दः स्वकल्पितवाग्भिः स्त्रियं समाधत्ते, विटस्तु **कामशास्त्रो**पायेनेत्याहुः। एतेषां नायकानुकूलाचरणं व्यापारः। व्यापारो यथा **श्रीरुद्रचन्द्रदेवानाम्**—

मानं त्यक्ष्यसि कान्तमेष्यसि पुनः सम्भावयिष्यस्यलं
भूषाः, पास्यसि वारुणीं रतिकलाकेलिं समारोक्ष्यसि।
किञ्च त्वां विनिवेदयामि सरले! मन्दानिलोल्लासिता
प्रालेयांशुकृतोदया मधुनिशा हस्तं गता हार्य्यते।।

विटो यथा—

तरुणजनसहायश्चिन्त्यतां वेशवासो
विगणय गणिकात्वं मार्गजाता लतेव।
वहसि हि धनहार्य्यं पण्यभूतं शरीरं
सममुपचर भद्रे! सुप्रियं वाऽप्रियं वा।।

अयं च सामान्यवनितायामपि सहायः। यथा—

भवति वसन्तसेने!

साटोपकूटकपटानृतजन्मभूमेः शाठ्यात्मकस्य रतिकेलिकृतालयस्य।
वेश्यापणस्य सुरतोत्सवसङ्ग्रहस्य दाक्षिण्यपुण्यसुखनिष्क्रयसिद्धिरस्तु।।

चेटो यथा—

दूईकज्जाअण्णपडिरोहं मा करेउ अअमत्ति।
उत्तंभे इव तुरिअं तिस्सा कण्णुप्पलं पुलहो[१]।।

विदूषको यथा मम—

परिशिथिलय ग्रन्थीस्तावत् क्रुधो हृदयस्थिता-
निति विनयवत्याचक्षाणे तदा दयितां मयि।
लघु परिमृषन्नात्मीयस्योपवीतगुणस्य तान्
विहसितमुखीं तामाधत्त क्षणेन विदूषकः।।

।। इति नायकनिरूपणम्।।

---

१. दूतीकार्यकर्णनप्रतिरोधं मा करोत्वयमिति।
उत्तम्भयतीव त्वरितं तस्याः कर्णोत्पलं पुलकः।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ननु कोऽयं रसो नाम? यदालम्बनमेतन्निरूपितमिति। तदुच्यते—अर्थोपस्थितिहेतुः पदस्य पदार्थेन सह सम्बन्धो वृत्तिः। सा त्रिविधा—शक्तिर्लक्षणा व्यञ्जना च। तत्रास्मात्पदादयमर्थो बोध्य इत्याकारकेच्छात्मकः सङ्केतः शक्तिः। स च गवादिपदे ईश्वरीयः। आधुनिकचैत्रादिपदे तत्तत्पुरुषीय इति नैयायिकाः। पदार्थान्तरं शक्तिरिति मीमांसकाः। शक्त्याः प्रतिपादकः शब्दः शक्त इत्युच्यते। स त्रिविधः—रूढो यौगिको योगरूढश्च। रूढो यथा—गवादावर्थे गौरित्यादिः। गमेर्डोरित्यौणादिकप्रत्ययस्य शक्त्यनङ्गीकारात्। अवयवार्थस्य तत्रानवबोधात्। यौगिको यथा—दण्डी पाचक इत्यादिः। प्रकृतिप्रत्ययार्थमर्यादया दण्डविशिष्ट-पाककर्त्रादिबोधात्। योगरूढो यथा—पङ्कजादिः। स हि अवयवशक्त्या पङ्कजनिकर्तृत्वेन रूपेण रूढ्या च पद्मत्वेन पद्मं बोधयति। तेन शैवाले स्थलकमले वा न तस्य मुख्यप्रयोगः; किन्तु लक्षणैव। अन्ये तु योगरूढपदात् क्वचिद्रूढ्यर्थमात्रबोधः क्षीराम्भोधिरित्यादौ। तत्राम्भोधिपदात्समुद्रत्वरूपेणैवान्वय-बोधात् क्षीरनीरयोरभेदान्वयानुपपत्त्या निराधारत्वरूपेणान्वयबुद्धेरभावात्। क्वचिदवयवार्थमात्रबोधः। यथा कह्लारं पङ्कजमित्यादौ। तत्र पद्मत्वजातेरभावाद् योगार्थस्यैवान्वय इत्याहुः। केचित्तु रूढयौगिकमपि चतुर्थभेदमाहुः, यथा—मण्डपादि। तद्धि कदाचिद्रूढ्यर्थमेव गृहविशेषमुपस्थापयति। कदाचिद्योगार्थमेव मण्डपानकर्त्तारं पुरुषमिति। रूढियोगार्थयोरभेदान्वयानर्हत्वात्। शक्तिग्राहकं च व्याकरणादि। तदुक्तम्—

शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।

व्याकरणाद्यथा 'भू सत्तायाम्' इत्यादौ। उपमानात्—'गोसदृशो गवय-पदवाच्य' इत्यादौ। कोषात्—'इन्द्रो मरुत्वान्मघवा' इत्यादौ। आप्तवाक्यात्—'अयं गवय' इत्यादौ। व्यवहारतः—'घटमानय' इत्यादावव्युत्पन्नस्य व्युत्पन्नवृद्ध-कृतस्य कम्बुग्रीवादिमद्व्यक्तेर्देशान्तरसंयोगादेर्ज्ञानात्। वाक्यस्य शेषात्—'यवमयश्चरुर्भवति' इत्यादौ। म्लेच्छानां यवशब्दस्य कङ्गुषु व्यवहारेऽपि—

वसन्ते सर्वसस्यानां जायते पत्रशातनम्।
मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः।।

इत्यादेर्दीर्घशूके। विवरणात्—पचति पाकं करोतीत्यादेः पचादेः पाकादौ। सिद्धपदसान्निध्यात्—'इह सहकारतरौ मधुरं पिको रौति' इत्यादौ बोध्यम्।

शक्यसम्बन्धो लक्षणा। 'मुखं चन्द्र' इत्यादौ गौण्यां चन्द्रपदशक्यस्य चन्द्रस्य मुखे सम्बन्धः। गङ्गायां घोष इति शुद्धायां गङ्गापदशक्यस्य प्रवाहस्य तीरे संयोगः। सा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्विविधा—निरूढा प्रयोजनवती च। निरूढा यथा—'नीलः पट' इत्यादौ लाघवाद् गुणमात्रशक्तानां नीलादिपदानां समवायसम्बन्धेन नीलादिमत्परत्वात्। द्वितीया द्विविधा—गौणी शुद्धा च। शक्यस्य सादृश्यात्मकः सम्बन्धो गौणी, तदन्यसम्बन्धः शुद्धा। गौणी द्विविधा—सारोपा साध्यवसाना च। आद्या उपमानोपमेययोरुपादाने 'मुखं चन्द्र' इत्यादौ। द्वितीया उपमेयस्यानुपादाने 'चन्द्रोऽयम्' इत्यादौ। तत्राद्ये रूपकालङ्कारः, द्वितीये त्वतिशयोक्तिभेद इति विवेकः। तदुक्तं **काव्यप्रकाशे**—

सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा।
विषय्यन्तः कृतेऽन्यस्मिन् भवेत्साध्यवसानिका।।

(उ.२, का.११)

यस्मिन्नारोप्यते तद्विषयः, यदारोप्यते तद्विषयीति बोध्यम्। यथा 'चन्द्रो मुखम्' इत्यत्र चन्द्रो मुखे आरोप्यत इति चन्द्रो विषयी मुखं विषय इति विषयिविषययोः पृथङ्निर्दिष्टयोरभेद आरोपः। अप्रयुक्ते विषये विषय्यभेदस्त्वध्यवसानमिति विशेषः। आरोपे ताद्रूप्यं प्रतीयते, अध्यवसाने तु मुखत्वादिवैधर्म्यानुपस्थित्या सर्वथैवाभेद इति विवेकः। शुद्धा पञ्चविधा—जहत्स्वार्था, अजहत्स्वार्था, जहदजहत्स्वार्था, सारोपा, साध्यवसाना चेति। जहत्स्वार्था यथा—गङ्गायां घोष इत्यादौ शक्यप्रवाहसंयोगिनस्तीरस्यैव इतरपदार्थान्वयेन प्रवाहरूपस्वार्थान्वयबहिर्भावात्। अत्र तीरस्य पावनत्वप्रतीतिः फलम्। एवम् 'उपकृतं बहु तत्र किमुच्यते' इत्यादौ अपकारिणि उपकृतमित्यनन्वयात्स्वार्थविरुद्धस्यापकारादेर्विरोधसम्बन्धेन प्रतीतेः। अत्र स्वसाधुत्वप्रतीतिः फलम्। अजहत्स्वार्था यथा—'कुन्ताः प्रवेश्यन्ताम्' इत्यादौ। भोजनाद्यर्थप्रतीतेः कुन्तादीनामनन्वयात्कुन्तादिपदस्य कुन्तादिमत्सु पुरुषेषु लक्षणा, पुरुषादेर्भोजनाद्यर्थप्रतीतेः पुरुषसाहित्येन कुन्तादेरपि क्रियान्वय इत्यजहत्स्वार्था। अत्र तेषां निर्दयप्रहर्तृत्वं फलम्। जहदजहत्स्वार्था यथा—पटैकदेशदाहे पटो दग्धः, पुष्पितं वनमित्यादौ। एकदेशरूपस्वार्थपरित्यागेन एकदेशान्तररूपस्वार्थपरत्वात्। अत्र भूयस्त्वादिप्रतीतिः फलम्। सारोपा यथा—आयुर्घृतमित्यादौ। अत्र जनकत्वं सम्बन्धः, इतरवैलक्षण्यप्रतीतिः फलम्। साध्यवसाना यथा—आयुरेवेदमित्यादौ। आयुर्जनकत्वाव्यभिचारप्रतीतिः फलम्। तदेवं सप्तविधा फललक्षणेति सङ्क्षेपः।

गङ्गाया घोष इत्यादौ लक्षणया तीरादिबोधेऽपि शैत्यादिप्रतीतेस्तदसाध्यत्वात्। यया तत्प्रतीतिः सा व्यञ्जना। तदुक्तं काव्यप्रकाशे—

यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते।
फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया।।इति। (उ.२, का.१४)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतद्बोध्यश्चार्थो ध्वनिरित्युच्यते। स द्विविधः—शक्तिमूलो लक्षणामूलश्च। शक्तिमूलो विवक्षितान्यपरवाच्यः, लक्षणामूलस्तु अविवक्षितवाच्य इत्युच्यते। आद्योऽसंल्लक्ष्यक्रमः संल्लक्ष्यक्रमश्चेति द्विविधः। असंल्लक्ष्यक्रमो रसादिः। संल्लक्ष्यक्रमस्तु वस्त्वलङ्काररूपभेदाद् द्विविध इति शब्दशक्तिमूलस्य त्रैविध्यम्। लक्षणामूलस्तु द्विविधः—अविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्च। यत्र वाच्योऽप्यर्थो रूपान्तरेण संल्लक्ष्यते स आद्यः। यत्र वाच्यस्य केनापि रूपेणान्वयप्रवेशः स द्वितीयः। एषां भेदान्तराण्यग्रे वक्ष्यामः।

ननु रसादेरसंल्लक्ष्यक्रमत्वं कथमिति चेत्, उच्यते। न हि विभावादय एव रसाः; किन्तु रसस्तैर्निष्पद्यत इत्यस्ति क्रमः। तत्क्रमसत्त्वेऽपि क्रमानवबोधात्। अत्र **भरतसूत्रम्**—'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति।

अत्र **भट्टलोल्लटादयः**—स्थायिनां रत्यादीनां विभावेन सह जन्यजनकभाव उद्दीप्योद्दीपकभावश्च, अनुभावेन ज्ञाप्यज्ञापकभावः, व्यभिचारिभिः पोष्यपोषकभावः सम्बन्धः। निष्पत्तिस्तु क्रमेणोत्पत्तिरभिव्यक्तिः पुष्टिश्चेत्यर्थः। तथा हि ललनादिभिरालम्बनैर्जनित उद्दीपनविभावैश्चन्द्रादिभिरुद्दीपितः कटाक्षादिभिरनुभावैः प्रतीतियोग्यः कृतो निर्वेदादिभिर्व्यभिचारिभिः पोषितो रामादावनुकार्ये स्थितो रत्यादिरूपो रसः। स तुल्यरूपत्वान्नटे आरोप्यमाणः सामाजिकानां चमत्कार-हेतुरित्याहुः।

श्रीशङ्कुकस्तु विभावादिभिः सह स्थायिनः संयोगाद् व्याप्यव्यापक-रूपात्सम्बन्धाद्रसस्य निष्पत्तिरनुमितिरित्यर्थः। 'राम एवायम्' इत्ययोग्यव्यवच्छेदः, 'अयमेव राम' इत्यन्ययोगव्यवच्छेद इति नियमविषया सम्यग्बुद्धिः। यस्यां समनन्तरमेवाप्रामाण्यं गृह्यते सा मिथ्याधीः। यथा 'रामोऽयम्' इति ज्ञानानन्तरं 'नायं राम' इति बाधावतारे 'रामोऽयम्' इति पूर्वज्ञानम्। 'रामोऽयं न वा' इति विरुद्धोभयकोटिकबुद्धिः संशयः। 'रामसदृशोऽयम्' इति सादृश्यधीः। एताभ्यो लोकसिद्धाभ्यो विलक्षणया चित्रे तुरगोऽयमितिवद् रामोऽयमिति बुद्ध्या प्रथमं पक्षभूतो नटो विषयीक्रियते, तेनाभ्यासातिशयवशाद् रोमाञ्चादिप्रदर्शने रतिव्याप्यत्वं गृहीतवतां सामाजिकानां रत्याद्यनुमितिः। रोमाञ्चादीनां कृत्रिमत्वेनाज्ञानात्। न च नटे रत्यभावाद्बाधः, रत्यभावनिश्चयाभावात्। न चानुमित्या चमत्कारो न स्यात्, साक्षात्कारस्य चमत्कारत्वादिति वाच्यम्। विषयसौन्दर्यस्यैव तन्नियामकत्वात्। घटादिसाक्षात्कारस्याचमत्कारतया रतिसाक्षात्कारात्कथं चमत्कार इत्याशङ्कायां त्वयापि तथैव वाच्यत्वादित्याह।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भट्टनायकस्तु स्थायिनो विभावादीनां च भोज्यभोजकभावसम्बन्धाद्रसस्य निष्पत्तिर्भोग इति सूत्रार्थः। तथा हि काव्यस्य त्रयो व्यापाराः—अभिधा भावकत्वं भोगकर्तृत्वं च। अभिधा द्विविधा—निरन्तरार्थनिष्ठा सान्तरार्थनिष्ठा च। आद्या शक्तिरेव। द्वितीया लक्षणेति विवेकः। अभिधाभिन्नं व्यापारद्वयं नाट्येऽपि। काव्येऽभिधया पदार्थोपस्थितिः, नाट्येऽभिनयेनेति विशेषः। तथोक्तरीत्या पदार्थोपस्थितिः। द्वितीयेन भावकत्वाख्यव्यापारेण सीतादीनां कान्तात्वादिरूपेणावस्थानम्। अभिधाजन्यायाः सीतात्वादिप्रकारकोपस्थितेः रसाननुगुणत्वात्। आराध्यत्वज्ञानस्य तद्विरोधित्वात्। एवं साधारणीकरणेन भावकत्वनिवृत्तौ तृतीयस्य भोगकर्तृत्वव्यापारस्य प्रभावाद् रजस्तमसोरभिभवे सत्त्वोद्रेके च प्रकाशमाना आनन्दमयी या संवित् तत्र विगलितवेद्यान्तरत्वेन स्थितिरूपा या विश्रान्तिस्तत्स्वरूपेण साक्षात्कारेण विषयीक्रियमाणो रत्यादिस्थायिभावो रसः। स्थायिनो भावकत्वव्यापारेण साधारणीकृतत्वात् सत्त्वादीनां त्रयाणामुद्रेके सुखदुःखमोहाः क्रमात्प्रकाशन्ते। उद्रेकश्च स्वेतरद्वयाभिभव[1] इति साङ्ख्यसिद्धान्तादिति व्याचख्यौ।

अभिनवगुप्तपादाचार्यास्तु व्यङ्ग्यव्यञ्जकभावरूपसम्बन्धपरतया व्याचख्युः। लोके कटाक्षादौ रतिव्याप्यत्वज्ञानवतां सामाजिकानामन्तःकरणे वासनारूपतया रत्यादिः प्रत्यवतिष्ठते, स स्थायी। लोके रत्यादिकारणानि प्रमदादीनि, तत्कार्याणि कटाक्षादीनि, निर्वेदादीनि सहकारीणि। तेषामेव काव्यादौ क्रमेण विभावानुभावव्यभिचारिशब्दैर्व्यवहारः। न चैवं नामभेदमकिञ्चित्करमिति वाच्यम्। विभावनानुभावनसञ्चारणव्यापारभेदस्वीकारात्। तेषां च ईषत्स्फुटस्फुटतरप्रकाशरूपत्वात्। तदुक्तम्—

विभावा अनुभावाश्च तथैव व्यभिचारिणः।
प्रतीयमानाः प्रथमं खण्डशो यान्त्यखण्डताम्।।

लोके सम्बन्धिविशेषीयत्वेन गृह्यमाणे कान्तादौ कटाक्षादिलिङ्गकरत्यनुमितौ न चमत्कारः, काव्यादौ वाक्यार्थबोधानन्तरं चमत्कारविशेष इत्यनुभवसिद्धत्वात्। एतेन शकुन्तलादीनां सामाजिकैरसम्बन्धात् कथं तेषां रसोद्बोध इति निरस्तम्। काव्यादौ तेषां साधारणीकरणमिति स्वीकारात्। 'ता एव परिहृतविशेषा रसहेतवः' इति सूत्रकारोक्तेः। एवं हि स्थायिनोऽपि तद्बोध्यम्। प्रमातृविशेषनिष्ठत्वेन प्रतीयमानस्वरूपपरिमितत्वे रसस्वरूपानुपपत्तेः। स्वगतत्वेन रसादिप्रतीतौ सभ्यानां व्रीडाभयाद्यापत्तेः। परगतत्वेनानास्वाद्यत्वप्रसङ्गात्। साधारणस्वीकारेणैव सर्वदोषपरिहारात्। एवं हि सति विभावादिभिः स्थायिन्यभिव्यज्यमाने चैतन्यानन्दस्वरूप आत्मा भासते। वेदान्तिमते ज्ञानमात्रे तद्भानस्वीकारात्। न च घटादिज्ञानेऽप्यानन्दो-

१. बलवद्विजातीयसंवलितत्वमभिभवः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्बोधापत्तिः, तत्र आनन्दांशे आवरणभङ्गाभावात्, अत्र सहृदयत्वविशेषस्यैव तद्भङ्गहेतुत्वात्। तथा च रत्याद्यवच्छिन्नं चैतन्यमावरणभङ्गादानन्दरूपतया प्रकाशमानं रसपदार्थः। विभावादिचर्वणाया रसव्यञ्जकत्वात्तन्निष्ठयोरावरणभङ्गनिष्ठयोर्वा उत्पत्तिविनाशयोरारोपाद्रस उत्पन्नो रसो नष्ट इत्यादिव्यवहारः। चैतन्यस्यात्मरूपतया उत्पत्तिविनाशानर्हत्वात्। चर्वणानिवृत्तौ च प्रकाशस्यावृतत्वाद्विद्यमानस्यापि स्थायिनो न प्रकाशः। तदुक्तं **काव्यप्रकाशे**—'विभावादिचर्वणावधिः' इति। चर्वणा तु आवरणभङ्गो रत्याद्याकारान्तःकरणवृत्तिविशेषो वेति बोध्यम्। सत्यां वाभिव्यक्तौ विभावादिरपि विषयः। पानकरसन्यायेन चर्व्यमाण इत्युक्तेः। स चायं न कार्यः, विभावादिज्ञाननाशेऽपि रसानुभवप्रसङ्गात्। निमित्तनाशे कार्यनाशानङ्गीकारात्। रत्यवच्छिन्नचैतन्यस्य रसत्वात्। चैतन्यस्य कार्यत्वशङ्कानवताराच्च। नापि ज्ञाप्यः, विभावादिजन्याभिव्यक्तिविशिष्टरसादेरेव सत्त्वात्। तस्य च विभावादिव्यक्तिपूर्वमसत्त्वात्। पूर्वसत एव घटादेरालोकादिनाभिव्यक्तिदर्शनात्। तद्ग्राहकं न निर्विकल्पकम्। विभावादिज्ञानस्य रसनिर्विकल्पकजननायोग्यत्वात्। निर्विकल्पकस्य जन्यज्ञानाजन्यत्वनियमात्। नापि सविकल्पकम्। विभावादिसमूहालम्बनस्य रसत्वात्तेषां सम्बन्धग्रहाभावात्। न च स्वभिन्ननिर्विकल्पकाग्राह्यत्वेऽपि[1] स्वप्रकाशकत्वात्स्वाविषयकत्वात्। इदं च युक्तयोगिज्ञानाद्विलक्षणम्, तस्यासन्मात्रविषयकत्वात्। अस्य च गुणालङ्काराद्यधिकविषयत्वात्। युञ्जानयोगिज्ञानादपि तथा, तस्य भेदावगाहित्वात्। लौकिकरत्यादिज्ञानादपि तथा, अस्य गुणालङ्काराद्यधिकविषयत्वात्। ननूभयग्राह्यत्वनिषेधे ग्राह्यत्वमेव न स्यादिति चेत्, सत्यम्, लोकोत्तरत्वादभिव्यक्तेरिति दिक्। ननु—

रजनिरजनि चन्द्रिकावदाता मलयजसौरभमेदुरः समीरः।
कलमिह कलयन्ति चञ्चरीकास्तदनुनयः परिहारि मा प्रियस्य।।

इत्यादावालम्बनविभावमात्रस्य,

शरकाण्डपाण्डुगण्डस्थलेयमाभाति परिमिताभरणा।
माधवपरिणतपत्रा कतिपयकुसुमेव कुन्दलता।।

इत्यादावनुभावमात्रस्य,

स्तिमितकुसुमितानामुल्लसद्भ्रूलतानां
मसृणमुकुलितानां प्रीतिविस्तारभाजाम्।
प्रतिनयननिपाते किञ्चिदाकुञ्चितानां
विविधमहमभूवं पात्रमालोकितानाम्।।

१. अत्र किञ्चित् त्रुटितं प्रतिभाति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यादौ सञ्चारिमात्रस्य सत्त्वेऽपि रसानुभवाद्विभावादीनां प्रत्येकं रसाभिव्यञ्जकत्वात्सूत्रे द्वन्द्वे मिलितानामुपादानं कथमिति चेत्, सत्यम्। तत्राप्यन्तरेण द्वयोराक्षेपात् प्रत्येकमात्रस्य रसान्तरसाधारण्यात्। रतिर्यत्र स्थायी स शृङ्गारः। रतिश्च स्त्रीपुंसयोरन्योन्यालम्बनप्रेमाख्यश्चित्तवृत्तिविशेष इति **रसगङ्गाधरः**।

सजातीयविजातीयैरतिरस्कृतमूर्त्तिमान्।
यावद्रसं वर्त्तमानः स्थायी भाव उदाहृतः।।

भरतः—

यथा नराणां नृपतिः शिष्याणां गुरवो यथा।
तथैव सर्वभावानां स्थायी भावो महानिह।।

स द्विविधः—सम्भोगो विप्रलम्भश्च। तदुक्तम्—

अनुरक्तौ निषेवेते यत्रान्योन्यविलासिनौ।
दर्शनस्पर्शनादीनि स सम्भोगो मुदान्वितः।।
यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ।

(सा.द.प.३, का.२१०,१८७)

सम्भोगो यथा—

गाढालिङ्गनपूर्वमेव मनसा द्यूते जितं चुम्बनं
तत्किञ्चित्परिरभ्य दत्तममुना प्रत्यर्पितं चानया।
नैतत्तादृगिदं न तादृशमिति प्रत्यर्पणव्यग्रयो-
र्यूनोश्चुम्बनमेकमेव बहुधा रात्रिर्गता तन्वतोः।।

यथा वा—

मुक्ताः पतन्ति भूमौ बालाः कलयन्ति केवलां मुक्तिम्।
चुम्बत्यम्बरमवनीं विपरीते किं न विपरीतम्।।

विप्रलम्भो यथा—

क्षामक्षामकपोलमाननमुरः काठिन्यमुक्तं स्तनं
मध्यः क्लान्ततरः प्रकामविनतावंसौ छविः पाण्डुरा।
शोच्या च प्रियदर्शना च मदनक्लिष्टेयमालक्ष्यते
पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयमभिलाषहेतुकः। पूर्वसङ्गमस्यानुपजातत्वात्। सङ्गमोत्तरकालीनो यथा—

अज्ज मए तेण विणा अणुहूअसुहाइं सम्भरन्तीए।
अहिणवमेहाण रवो णिसामिओ वज्झपडहव्व[1]।।

देवादिविषया रतिः प्राधान्येन व्यञ्जितो व्यभिचारी च भावः।

देवविषया रतिर्यथा—

अहं त्वकामस्त्वद्भक्तस्त्वं स स्वाम्यनपाश्रयः।
नान्यथेहावयोरर्थो राजसेवकयोरिव।।

मुनिविषया यथा—

भवत्सम्भावनोत्थाय परितोषाय मूर्च्छते।
अपि व्याप्तदिगन्तानि नाङ्गानि प्रभवन्ति मे।।

पुत्रविषया यथा—

आलक्ष्य दन्तमुकुलाननिमित्तहासै-
रव्यक्तवर्णरमणीयवचःप्रवृत्तीन्।
अङ्काश्रयप्रणयिनस्तनयान्वहन्तो
धन्यास्तदङ्गरजसा मलिनीभवन्ति।।

एवं राजादिविषयत्वेऽप्युदाहार्यम्।

व्यभिचारी यथा—

शिलष्टः कण्ठे किमिति न मया मूढया प्राणनाथ-
श्चुम्बत्यस्मिन्वदनविहृतिः किं कृता किं न दृष्टः।
नोक्तः कस्मादिति नववधूरन्तरालोचयन्ती
पश्चात्तापं वहति तरुणी प्रेम्णि जाते रसज्ञा।।

एत एवानौचित्यप्रवृत्त्या **आभासाः।**

रसाभासो यथा—

शस्त्रीकृतस्तरुवरो हरिपुङ्गवेन
लङ्केन्द्रवक्षसि मृणालमृदुः पपात।
तत्र स्थितैस्तु कुसुमैः कुसुमेषुरेनं
सीतावियोगविधुरं दृढमाजघान।।

---

१. अद्य मया तेन विना अनुभूतसुखानि स्मरन्त्या।
अभिनवमेघानां रवो निशामितो वध्यपटह इव।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भावाभासो यथा—

मुखं यदि किमिन्दुना यदि चलाञ्चले लोचने
किमुत्पलकदम्बकैर्यदि तरङ्गभङ्गी भ्रुवोः।
किमात्मभवधन्वना यदि सुसंयताः कुन्तलाः
किमम्बुरुहडम्बरैर्यदि तनूरियं किं श्रिया।।

अत्र स्मरणमनौचित्यप्रवृत्तम्। एवं भावशान्तितदुदयसन्धिभावशबलानामप्यलक्ष्यक्रमत्वं बोध्यम्।

'रसभावतदाभासभावशान्त्यादिरक्रमः' (उ.४, का.२६) इति **काव्यप्रकाशोक्तेः**।

।। इत्यसंल्लक्ष्यक्रमध्वनिः ।।

संल्लक्ष्यक्रमध्वनिस्त्रिविधः—शब्दशक्तिमूलोऽर्थशक्तिमूल उभयशक्तिमूलश्च। तदुक्तम्—

'अनुस्वानाभसंल्लक्ष्यक्रमव्यङ्ग्यक्रमस्तु यः।
शब्दार्थोभयशक्त्युत्थस्त्रिधा स कथितो ध्वनिः।।

(का.प्र.,उ.४, का.३७)

आद्यो द्विविधः, व्यङ्ग्यस्य वस्त्वलङ्कारत्वभेदात्।

'अलङ्कारोऽथ वस्त्वेव शब्दाद्यत्रावभासते।
प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा' ।। इत्युक्तेः।

(का.प्र.,उ.४, का.३८)

द्वितीयस्त्वष्टविधः। व्यञ्जकार्थस्यालङ्कारत्ववस्तुमात्रत्वरूपेण द्विविधस्यापि लोकसिद्धत्वकविप्रौढोक्तिमात्रकल्पितत्वाभ्यां द्वैविध्येन चातुर्विध्यम्। व्यङ्ग्यस्यापि वस्त्वलङ्कारत्वभेदेन द्वैविध्यमिति विभागात्। यस्तु कविनिबद्धवक्तृप्रौढोक्तिसिद्धत्वेनापि वस्त्वलङ्कारयोर्भेद उक्तः, सोऽत्र न पुरस्कृतः। कविनिबद्धवक्तृनिबद्धवक्तृप्रौढोक्तिसिद्धत्वादिना भेदापत्तेः। तस्यापि कविनिबद्धत्वमविशिष्टमित्युक्तौ तु प्रथमस्यापि कविनिबद्धवक्तुर्लोकोत्तरवर्णनानिपुणत्वेन कवित्वानपायात्। तत्कल्पितस्यापि कविप्रतिभाकल्पितत्वदुर्वारत्वात्।

शब्दशक्तिमूलोऽलङ्कारध्वनिर्यथा—

लंकालआणं पुत्तअ वसन्तमासेक्कलद्धपसराणम्।
आपीतलोहिताणं वेहेइ जणो पलासाणम्[१] ।।

१. लङ्कालयानां पुत्रक! वसन्तमासैकलब्धप्रसराणाम्।
आपीतलोहितानां बिभेति जनः पलाशानाम्।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र पलाशादिपदानां राक्षसादिरूपद्वितीयार्थप्रतिपादकत्वमसङ्गतं मा भूदित्यतः किंशुकपुष्पे राक्षसोपमा व्यज्यते, रूपकापेक्षया प्रथमप्रतीतिकत्वात्। न च व्यङ्ग्यस्य प्राधान्यादलङ्कारत्वानुपपत्तिः, तस्य परोपकारकस्वरूपत्वादिति वाच्यम्। रसापेक्षया गुणीभावेऽपि वाच्यापेक्षयैव प्राधान्याङ्गीकारात्।

तादृशवस्तुध्वनिर्यथा—

यामि विधावभ्युदिते पुनरेष्यामीति यत्त्वया कथितम्।
जानात्युदन्तमात्रं नेदं तत्त्वेन मुग्धवधूः।।

अत्र प्रवासोद्यमान्निवर्त्तस्वेति वस्तुरूपोऽर्थस्तच्छब्दमात्रगम्यः। स शब्दशक्तिमूलः, दैवादिपदोपादाने यथोक्तार्थानवबोधात्। तदर्थकपदान्तरप्रयोगेऽपि यो गम्यते, सोऽर्थशक्तिमूल इति विवेकः।

अथार्थशक्तिमूलानामुदाहरणम्। तेषु स्वतःसम्भविना वस्तुना वस्तुध्वनिर्यथा—

राज्याभिषेकसलिलक्षालितमौलेः कथासु कृष्णस्य।
गर्वभरमन्थराक्षी पश्यति पदपल्लवं राधा।।

इह मामेव प्रणंस्यतीति व्यज्यते। तेनैवालङ्कारस्य यथा—

णीससिउक्वंपपुलइएहिं जाणंति णच्चिउं धण्णा।
अह्मारिसिहिं दिट्ठे पिअम्मि अप्पावि वीसरिओ[1] ।।

अत्र ता अधन्याः, अहं तु धन्येति व्यतिरेकः। तादृशालङ्कारेण वस्तुनो यथा—

सा तइ सहत्थदिण्णं अज्जवि रेसुहअ गन्धरहिअंवि।
उव्वसिअणअरघरदेवएव्व णोमालिअं वहइ[2] ।।

अत्र नगरदेवतेवेत्युपमया तस्या अवश्यादरणीयत्वम्। तेनैवालङ्कारस्य यथा—

एकैकशो युवजनं विलङ्घमानाक्षनिकरमिव तरला।
विश्राम्यति सुभग! त्वामङ्गुलिरासाद्य मेरुमिव[3] ।।

---

१. निःश्वसितोत्कम्पपुलकितैर्जानन्ति नर्तितुं धन्याः।
अस्मादृशीभिर्दृष्टे प्रिये आत्मापि विस्मृतः।।इति च्छाया।

२. सा त्वया स्वहस्तदत्तामद्यापि रे सुभग! गन्धरहितामपि।
उद्वसितनगरगृहदेवतेव नवमालिकां वहति।।इति च्छाया।

३. अत्र युवजनपदेन स्पृहणीयत्वं द्योत्यते। अक्षाणां=मालामणीनां निकरं समुदायमिव एकैकशः=प्रत्येकं युवजनं विलङ्घमाना=गणयन्ती पक्षे उल्लङ्घयन्ती तरला अङ्गुलिः मेरुं=मालाप्रान्तमणिमिव हे सुभग! त्वामासाद्य न विश्राम्यति नोल्लङ्घयिष्यतीत्यर्थः। एतादृशनायिकासक्तिर्न भाग्यं विनेति व्यज्यते। मेरोरुल्लङ्घनं न कार्यमिति जापकसम्प्रदायः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रोपमया युवान्तरापेक्षया तद्व्यतिरेकः। कविप्रौढोक्तिसिद्धेन वस्तुना वस्तुनो यथा—

लक्ष्मीनिःश्वासानलपिण्डीकृतदुग्धजलधिसारभुजः।
क्षीरनिधितीरविहगा यशांसि गायन्ति राधायाः।।

अत्रोक्तार्थस्य कविमात्रकल्पितत्वात्तेन सपत्नीसौभाग्यं स्त्रीणामतिदुःसहमिति वस्तु। तेनैवालङ्कारस्य यथा—

सा तुज्झ वल्लहा तं सि मज्झ वेसोसि तीअ तुज्झ अहं।
बालअ फुडं भणामो पेम्मं किल बहुविआरंत्ति[१]।।

अत्र सा तव वल्लभा त्वं मम वल्लभो द्वेष्योऽसि तस्यास्तवाहं द्वेष्या इति वस्तुना मयि त्वदनुरक्तायामपि न तवानुराग इति विशेषोक्तिस्तस्यां त्वदनुराग-हीनायामपि त्वदनुराग इति विभावना च। तादृशेनालङ्कारेण वस्तुनो यथा मम—

आथर्वणीमुपनिषद्विद्यामिव लब्धुमेष त्वाम्।
शिरसा वहति भवत्पदनूपुररक्तोत्पलकलापम्।।

तेनैवालङ्कारस्य यथा मम—

उत्तंसितं किसलयं श्रवणाभरणारुणमणीनाम्।
मिलनात्प्रथममशोकः पदपरिरम्भेण पुष्पितः पश्चात्।।

अत्र हेत्वलङ्कारेण रक्तमणीनामशोकतादात्म्येन रूपकम्। यत्र केचिच्छब्दाः परिवृत्तिसहाः केचित्तदसहाः स उभयशक्त्युत्थः। यथा मम—

पीताम्बरेण चपलान्तरात्मना घनतमालनीलेन।
भवतामिव व्रतक्षतिरारम्भि न नाम कासां वा।।

अत्र तमालनीलेत्येतत्पदं परिवृत्तिसहं न त्वन्यानि। अयं भेदो वाक्यमात्रे। अन्ये तु पदे वाक्ये चेति विशेषः। एवं सङ्क्षिप्य प्रसङ्गादुक्ता ध्वनिविशेषाः। भेदान्तराण्याकरेषु द्रष्टव्यानि। विस्तरभयान्नात्र प्रपञ्चितानीति दिक्।

लक्षणामूलध्वनिद्वये **अविवक्षितवाच्यो यथा—**

एकच्चि अधूआ गहवइस्स महिलत्तणं समुव्वहइ।
अणिमिसणअनो सकलो जीए देव्वीकओ ग्गामो[२]।।

१. सा तव वल्लभा त्वमसि मम द्वेष्योऽसि तस्यास्तवाहम्।
बालक! स्फुटं भणामः प्रेम किल बहुविकारमिति।।इति च्छाया।

२. एकैव युवती गृहपतेर्महिलात्वं समुद्वहति।
अनिमिषनयनः सकलो यया देवीकृतो ग्रामः।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र महिलापदस्य प्रशस्तमहिलात्वेन रूपेण महिलायां लक्षणा लोकोत्तररूपवत्त्वं व्यङ्ग्यम्।

अत्यन्ततिरस्कृतवाच्यो यथा—

आम असइह्म अह्मे पइवएण तुह मलिणिअं गोत्तम्।
किं उण जणस्स जाएव्व चंडिलं ताण काममो[१]।।

अत्र पतिव्रतापदं तद्विरुद्धमसतीत्वं लक्षयति। त्वया मम दोषोद्भावनेऽपि मया तव दोषो नोद्भाव्यत इति स्वसाधुत्वं व्यङ्ग्यम्। यद्यप्युत्तरार्द्धे तद्दोष उद्भावितस्तथापि जनजायात्वरूपसामान्यधर्मपुरस्कारेणैवेति न दोषः। अयमत्र सङ्ग्रहः—

द्वौ शाब्दी शक्तिरष्टार्थी द्व्युत्थैकं भेदमञ्चति।
द्वौ लक्षणेत्यमी भेदाः प्राधान्येन त्रयोदश।। इति सङ्क्षेपः।

विप्रलम्भे दशावस्था **हरिहरेणो**क्ताः—

प्रथमे त्वभिलाषः स्याद्द्वितीये चिन्तनं भवेत्।
अनुस्मृतिस्तृतीये तु चतुर्थे गुणकीर्त्तनम्।।
उद्वेगः पञ्चमे प्रोक्तो विलापः षष्ठ उच्यते।
उन्मादः सप्तमे ज्ञेयो भवेद्व्याधिस्तथाष्टमे।।
नवमे जडता चैव मरणं दशमे भवेत्।।

तद्विषयकोत्कटेच्छा **अभिलाषः**। यथा—

मनसि सन्तमिव प्रियमीक्षितुं नयनयोः स्पृहयान्तरुपेतयोः।
ग्रहणशक्तिरभूदिदमीययोरपि न सम्मुखवस्तुनि वास्तुनि।।

यथा वा—

सम्भूयैव सुखानि चेतसि परं भूमानमातन्वते
यत्रालोकपथावतारिणि रतिं प्रस्तौति नेत्रोत्सवः।
यद्बालेन्दुकलोदयादवचितैः सारैरिवोत्पादितं
तत्पश्येयमनङ्गमङ्गलगृहं भूयोऽपि तस्या मुखम्।।

तत्समागमोपायपर्यालोचनं **चिन्ता**। फलेच्छानन्तरमुपायेच्छोत्पत्तेरावश्यकत्वात्। तदुक्तम्—

केनोपायेन सम्प्राप्तः कथं वा स भवेन्मम।
दूतीनिवेदितैर्भावैरिति चिन्तां विनिर्द्दिशेत्।।

१. आम् असत्यः स्म वयं पतिव्रतेन तव मलिनितं गोत्रम्।
किं पुनर्जनस्य जायेव चण्डित्वं तन्न कामयामः।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आकेकरार्द्धविप्रेक्षितानि रसनावलयपरामर्षः।
नीवीनाभ्योः सन्दर्शनं च कार्यं द्वितीये तु।।

इदं पुरुषव्यापारस्याप्युपलक्षणम्। यथा—

किं तंवि तुइ ण णाअं जह सा आसंदि आसदिआणं बहुआणम्।
काऊण उच्चवचिअं तुह दंशणलेहला पडिआ।।

यथा वा—

त्वत्प्रापकात्त्रस्यति नैनसोऽपि त्वय्येव दास्येऽपि न लज्जते यत्।
स्मरेण बाणैरतितक्ष्य तीक्ष्णैर्लूनः स्वभावोऽपि कियान्किमस्य।।

तद्विषयकसंस्कारजन्यं ज्ञानं स्मृतिः। तदुक्तम्—

मुहुर्मुहुर्निःश्वसितैर्मनोरथविवर्त्तनैः।
प्रद्वेष्या अन्यकार्याणामनुस्मृतिरुदाहृता।।

यथा—

पिअसंमरणपलोट्टंतवाहविणिवाअभीआए।
दिज्जइ वंकग्गीआइ दीवओ पहिअजाआए[१]।।

यथा वा—

लीनेन प्रतिबिम्बितेव लिखितेवोत्कीर्णरूपेव च
प्रत्युप्तेव च वज्रलेपघटितेवान्तर्निखातेव च।
सा नश्चेतसि कीलितेव विशिखैश्चेतोभुवः पञ्चभि-
श्चिन्तासन्तततन्तुजालनिबिडस्यूतेव लग्ना प्रिया।।

तद्गुणानामुत्कर्षप्रतिपादनं गुणकीर्त्तनम्। यथोक्तम्—

अङ्गप्रत्यङ्गलीलाभिर्वाक्चेष्टाहसितेक्षणैः।
नास्त्यन्यः सदृशस्तेनेत्येतत्स्याद्गुणकीर्त्तनम्।।

यथा—

तदद्य विश्रम्य दयालुरेधि मे
दिनं निनीषामि भवद्विलोकिनी।
नखैः किलाख्यायि विलिख्य पत्रिणा
तवैव रूपेण समः स मत्प्रियः।।

१. किं तदपि त्वया न ज्ञातं यथा सा आसन्दिकानां बहूनाम्।
कृत्वा उच्चावचिकां तव दर्शनलालसा पतिता।।इति च्छाया।
२. प्रियसंस्मरणप्रवर्तमानवाष्पविनिपातभीतया।
दीयते वक्रग्रीवया दीपकः पथिकजायया।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा वा—

सा रामणीयकनिधेरधिदेवता वा
सौन्दर्यसारसमुदायनिकेतनं वा।
तस्याः सखे! नियतमिन्दुसुधामृणाल-
ज्योत्स्नादिकारणमभून्मदनश्च वेधाः।।

विषयेष्वरतिः **उद्वेगः**। तदुक्तम्—

आसने शयने वापि न तिष्ठति न हृष्यति।
नित्यमेवोत्सुका च स्यादुद्वेगस्थानमेव तत्।।

यथा—

अपसारय घनसारं कुरु हारं दूर एव किं कमलैः।
अलमलमालि! मृणालैरिति वदति दिवानिशं बाला।।

यथा वा—

परं जोह्ला उह्ला गरलसरिसो चन्दनरसो
खदक्खारो हारो रअणिपवणा देहतवणा।
मुणाली वाणाली जलदि अ जलद्दा तणुलदा
वरिट्ठा जं दिट्ठा कमलवअणा दीहणअणा[१]।।

तदनुध्यानजन्यो वचनव्यापारो **विलापः**। तदुक्तम्—

इह स्थित इहासीत इह चोपगतो मया।
इति तैस्तैर्विलपितैर्विलापं सम्प्रयोजयेत्।।
उद्विग्नात्यन्तमौत्सुक्यादरत्या च विलापिनी।
ततस्ततश्च भ्रमति विलापस्थानमाश्रिता।।

यथा—

अमअमअ गअणसेहर रअणीमुहतिलअ चंद दे छिवसु।
छित्तो जेहि पिअअमो ममंवि तेहिं च्चिअ करहिं[२]।।

१. परं ज्योत्स्ना उष्णा गरलसदृशश्चन्दनरसः
क्षतक्षारो हारो रजनिपवना देहतपनाः।
मृणाली बाणाली ज्वलति च जलार्द्रा तनुलता
वरिष्ठा यद्दृष्टा कमलवदना दीर्घनयना।।इति च्छाया।
२. अमृतमय! गगनशेखर! रजनीमुखतिलक! चन्द्र! त्वं स्पृश।
स्पृष्टो यैः प्रियतमो ममापि तैरेव करैः।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा वा—

उन्मीलन्मुकुलकरालकुन्दकोषप्रश्च्योतद्धनमकरन्दगन्धबन्धो!।
तामीषत्प्रचलविलोचनां नताङ्गीमालिङ्गन्पवन! मम स्पृशाङ्गमङ्गम्।।

प्रियभावनाजन्यव्यापार **उन्मादः**। तदुक्तम्—

तत्संश्रयां कथां युङ्क्ते सर्वावस्थागतोऽपि हि।
प्रद्वेतिचापरान् पुंसो यत्रोन्मादः स उच्यते।।
तिष्ठत्यनिमिषदृष्टिर्दीर्घं निःश्वसिति गच्छति ध्यानम्।
रोदिति विहारकाले नाट्यमिदं स्यात्तथोन्मादे।।

स द्विधा। कायिक-वाचिकभेदात्।

आद्यो यथा—

माजूर पिआलिङ्गणसुण्णब्भमिरीण बाहुलइआणम्।
तुह्लीअं कुरु ण्णेहं इमेण माणंसिणिमुहेण[१]।।

यथा वा—

बिभेति रुष्टासि किलेत्यकस्मात्स त्वां किलोपैति हसत्यकाण्डे।
यान्तीमिव त्वामनु यात्यहेतोः पृष्टस्त्वय्येव प्रतिवक्ति मोघम्।।

द्वितीयो यथा—

त्रिभागशेषासु निशासु च क्षणं निमील्य नेत्रे सहसा व्यबुध्यत।
क्व नीलकण्ठ! व्रजसीत्यलक्ष्यवागसत्यकण्ठार्पितबाहुबन्धना।।

यथा वा—

हृत्तस्य यन्मन्त्रयते रहस्त्वां तद्व्यक्तमामन्त्रयते मुखं यत्।
तद्वैरिपुष्पायुधमित्रचन्द्रसख्यौचिती सा खलु तन्मुखस्य।।

मदनपीडाजनितसन्तापादिविकारो **व्याधिः**। तदुक्तम्—

सामदानादिसंयोगैः काम्यैः सम्प्रेक्षणैरपि।
सर्वैर्निराशीकरणाद्व्याधिः समुपजायते।।

---

१. मा खिद्यस्व प्रियालिङ्गनशून्यभ्रमणयोर्बाहुलतिकयोः।
तूष्णीकं कुरु स्नेहमनेन मनस्विनीमुखेन।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा—

णीसासा हारवल्लीसरिसपसरणा चन्दणुव्वेअकारी
चण्डो (दीहो) देहस्स दाहो सुमिरणसरणा हाससोहामुहम्मि।
अंगाणं पण्डुभावो दिअहससिकलाकोमलो किञ्च तीए
णिच्चं वाहप्पवाहा सुहअ तुह कए होंति कुल्लाहितुल्ला[१]।।

यथा वा—

यदिन्दावानन्दं प्रणयिनि जने वा न भजते
व्यनक्त्यन्तस्तापं यदयमतिधीरोऽपि विषमम्।
प्रियङ्गुश्यामाङ्गप्रकृतिरपि वा पाण्डुमधुरं
वपुः क्षामक्षामं वहति रमणीयश्च भवति।।

जडता हीनचेष्टत्वमङ्गानां मनसस्तथा। इति दर्पणः।

तथा च भरतः—

पृष्टा न किञ्चिद्ब्रूते च न शृणोति न पश्यति।
हा कष्टवाक्सतूष्णीका जडतायां गतस्मृतिः।।

अकाण्डदत्तहुङ्कारा तथा प्रशिथिलाङ्गिका।
श्वासग्रस्तानना चैवं जडताभिनये भवेत्।।

यथा—

वअणे वअणे अ चलन्तसीससुण्णावहाणहुङ्कारम्।
सहि! देंती णीसासन्तरेसु कीस ह्म दूमेसि[२]।।

दर्पणे—

रसविच्छेदहेतुत्वान्मरणं नैव वर्ण्यते।
जातप्रायं तु तद्वाच्यं चेतसाकाङ्क्षितं तथा।।

---

१. निःश्वासा हारवल्लीसदृशप्रसरणाश्चन्दनोद्वेगकारी
चण्डो (दीर्घो) देहस्य दाहः स्मरणशरणा हासशोभा मुखे च।
अङ्गानां पाण्डुभावो दिवसशशिकलाकोमलः किञ्च तस्या
नित्यं वाष्पप्रवाहाः सुभग! तव कृते भवन्ति कुल्याभिस्तुल्याः।।इति च्छाया।

२. वचने वचने च चलच्छीर्षशून्यावधानहुङ्कारम्।
सखि! ददती निःश्वासान्तरेषु कुतोऽस्मान्दूनयसि।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आद्यं यथा—

अधिकः सर्वेभ्यो यः प्रियः प्रियेभ्यो हृदि स्थितः सततम्।
स लुठति विरहे जीवः कण्ठेऽस्यास्त्वमिव सम्भोगे।।

यथा वा—

सव्यापसव्यत्यजनाद्‌द्विरुक्तैः पञ्चेषुबाणैः पृथगर्जितासु।
दशासु शेषः खलु तद्दशा या तया नभः पुष्प्यतु कोरकेण।।

द्वितीयं यथा—

अनलभावमियं स्वनिवासिनो न विरहस्य रहस्यमबुद्ध्यत।
प्रशमनाय विधाय तृणान्यसून् ज्वलति तत्र तदुज्झितुमैहत।।

यथा वा—

यदि प्रियावियोगेऽपि खिद्यते दीनदीनकम्।
तदिदं दग्धमरणमुपयोगं क्व यास्यति।।

अज्ञाते विषये इच्छानुदयात् शाब्दं चाक्षुषं वा प्रियज्ञानम्। तदुक्तम्—

श्रवणाद्दर्शनाद्वापि मिथः संरूढरागयोः।
दशाविशेषो योऽप्राप्तौ पूर्वरागः स उच्यते।।
श्रवणं तु भवेत्तत्र दूतवन्दीसखीमुखात्।
इन्द्रजाले च चित्रे च साक्षात्स्वप्नेऽपि दर्शनम्।।

श्रवणं यथा श्रीरुद्रचन्द्रदेवानाम्—

यस्याकर्णनमात्रतोऽपि भवतोऽवस्थेयमीदृग्विधा
येनाङ्गे मलयानिलोऽपि भवति प्रायः करीषानलः।
हंहो मानस! बालिश! प्रतिपदं प्रत्याशमुद्ग्रीविकां
कुर्वन् तं नयनातिथिं पुनरहो कर्त्तुं किमाकाङ्क्षसि।।

इन्द्रजाले दर्शनं यथा मम—

स्मेरस्वर्णसरोजकेसरशिखासन्दोहसन्देहकृ-
द्भासा वार्षिकवारिवाहशकलश्रीमानसीमाहरः।
तारुण्याधिगमोत्तरातिपतितानात्यन्तिकद्राघिमा-
नेहस्को नयनस्य सेवननतां सख्याः समासादयत्।।

इह रुक्मिण्या इन्द्रजाले श्रीकृष्णस्य।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चित्रे यथा—

शनैरशृण्वन्नवदन्नपश्यंश्चैव किञ्चन।
तन्मयीभूय चित्रस्थ इव सोऽप्यभवच्चिरम्।।

अत्र तापस्या लिखिताया मन्दारवत्याः सुन्दरसेनस्य।

तस्थौ चित्रपटन्यस्तनिश्चलोत्फुल्ललोचना।
अधिष्ठितेव सुप्तेव विनिद्रं लिखितेव च।।

अत्र तल्लिखितस्य मन्दारवत्याः।

साक्षाद्यथा—

भूयो भूयः सविधनगरीरथ्यया पर्यटन्तं
दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्था।
साक्षात्कामं नवमिव रतिर्मालती माधवं यद्
गाढोत्कण्ठालुलितलुलितैरङ्गकैस्ताम्यतीति।।

स्वप्ने यथा—

तदाकर्ण्य वचस्तस्य तत्कन्यारूपदर्शने।
अतृप्त एव सहसा प्रबुद्धोऽस्मि निशाक्षये।।

मुक्ताफलध्वजस्य पूर्वजन्मानुभूतां पद्मावतीं स्वप्ने दृष्टवत इयमुक्तिः। प्रसङ्गाद्रसान्तराण्युदाह्रियन्ते। हासस्थायिभावो **हास्यः**। यथा—

मम मअणमणंगं मम्महं वड्ढअन्ती-
शिशिअशअणके मे णिद्दअं पक्खिवंती।
पसलसि भअभीदा पक्खलन्ती खलन्ती
मम वशमनुजादा लावणस्सेव कुन्ती[१] ।।

अत्र यद्व्यापाराद्धासोत्पत्तिः स आलम्बनम्। अधरस्पन्दादिरनुभावः —

ग्लानिः शङ्का ह्यसूया च श्रमश्चपलता तथा।
सुप्तं निद्रावहित्थं च हास्ये भावाः प्रकीर्तिताः।।

इति व्यभिचारिणः।

स्मितमथ हसितं विहसितमुपहसितापहसितातिहसितमिति।
द्वौ द्वौ भेदौ स्यातामुत्तममध्याधमप्रकृतेः।।

१. मम मरणमनङ्गं मन्मथं वर्द्धयन्ती
शिशिरशल्लके मे निद्रया प्रक्षिपन्ती।
प्रसरसि भयभीता प्रस्खलन्ती स्खलन्ती
मम वशमनुयाता रावणस्येव कुन्ती।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ईषद्विकसितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः।
अलक्षितद्विजं धीरमुत्तमानां स्मितं भवेत्।।
उत्फुल्लाननेत्रं गण्डैर्विहसितैरथ।
किञ्चिल्लक्षितदन्तं च हसितं तद्विधीयते।।

आकुञ्चिताक्षिगण्डं यत्सस्वनं मधुरं तथा।
कालागतं सास्यरागं तद्वै विहसितं भवेत्।।

उत्फुल्लनासिकं यत्तु जिह्मदृष्टिनिरीक्षितम्।
निकुञ्चिताङ्गकशिरं तच्चोपहसितं भवेत्।।

अस्थानहसितं यच्च साश्रुनेत्रं तथैव च।
उत्कम्पिताङ्गकशिरं तच्चापहसितं भवेत्।।

शोकस्थायिभावः **करुणः।**

स्त्रीनीचप्रकृतिर्ह्येष शोकव्यसनसम्भवः।
धैर्येणोत्तममध्यानां नीचानां रुदितेन च।।

यथा—

जोच्चिअ जेऊण जमं दिठ्ठो इछासुहं तुए जमलोओ[1]।
दछिहसि कहं णु पत्थिअ! एह्निं तं च्चेअ सेसअणसामण्णम्।।

अत्र रावण आलम्बनम्। तद्दशाविशेषदर्शनमुद्दीपनम्। परिदेवनादिरनुभावः।

निर्वेदश्चैव चिन्ता च दैन्यं ग्लान्यस्त्रमेव च।
जडता मरणं चैव व्याधिश्च करुणे स्मृताः।।

इति व्यभिचारिणः।

क्रोधस्थायिभावो **रौद्रः।**

इति रौद्ररसो दृष्टो रौद्रवागङ्गचेष्टितः।
शस्त्रप्रहारभूयिष्ठ उग्रकर्मक्रियात्मकः।।

---

१. य इव जित्वा यमं दृष्ट इच्छासुखं यमलोकः।
द्रक्ष्यसि कथं नु पार्थिव! इदानीं तमेवाशेषजनसामान्यम्।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा—

देशः सोऽयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः
क्षत्रादेव तथाविधः परिभवस्तातस्य केशग्रहात्।
तान्येवाहितशस्त्रघस्मरगुरूण्यस्त्राणि भास्वन्ति मे
यद्रामेण कृतं तदेव कुरुते द्रौणायनिः क्रोधनः।।

अत्रापकारक आलम्बनम्। तदपराधज्ञानमुद्दीपनम्। नेत्रारुण्यादिरनुभावः।

गर्वोऽसूया तथोन्माद आवेगो मद एव वा।
क्रोधश्च जडता हर्षो रौद्रे तूग्रत्वमेव च।।

इति व्यभिचारिणः।

उत्साहस्थायिभावो वीरः।

उत्साहाध्यवसायादविषादत्वादविस्मयामोहात्।
विविधादर्थविशेषाद्वीररसो नाम सम्भवति।।

स्थितिशौर्यवीर्यधैर्यैरुत्साहपराक्रमप्रभावैश्च।
वाक्यैश्चाक्षेपकृतैर्वीररसः सम्यगभिनेयः।।

एष दानदयायुद्धधर्मरूपाणामुत्साहोपाधीनां भेदाच्चतुर्द्धा।

आद्यो यथा—

जीवतावधि वनीपकमात्रैरर्थ्यमानमखिलैः सुलभं यत्।
अर्थिने परिवृढाय सुराणां किं वितीर्य परितुष्यतु चेतः।।

द्वितीयो यथा—

स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्त्तयितुं प्रसीद।
दिनावसानोत्सुकबालवत्सा विमुच्यतां धेनुरियं महर्षेः।।

तृतीयो यथा मम—

स्थितः सोऽहं मैत्रावरुणिकुशिकापत्यवशगः
प्रतीपस्य त्वादृश्यपि नृपदिलीपस्य कुलभूः।
चिरादस्माभिः किं न भवदवदानं श्रुतचरं
मनोऽध्यक्षीकर्त्तुं तव विभवमुत्कण्ठितमतः।।

श्रीरामस्य खरं प्रत्युक्तिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुर्थो यथा—

यत्किञ्चनेदं वित्तमस्यां पृथिव्यां यद्देवानां त्रिदशानां परं यत्।
प्राजापत्यं त्रिदिवं ब्रह्मलोकं नाधर्मतः सञ्जय! कामयेऽहम्।।

अत्र तत्तद्विषया आलम्बनानि, अनुभावाः स्पष्टाः।

असम्मोहस्तथोत्साह आवेगो हर्ष एव च।
अमर्षप्रतिबोधश्च क्रोधोऽसूया धृतिस्तथा।
गर्वश्चैव वितर्कश्च मतिश्चैव तथोग्रता।
अमर्षोऽथ मदश्चैव वीरे भावा भवन्ति हि।।

इति व्यभिचारिणः।

रौद्रे क्रोधः स्थायी, अत्र तु व्यभिचारीति भेदः। न च विनिगमकाभावः, प्ररूढत्वाप्ररूढत्वयोस्तथात्वात्। तत्त्वं च बह्वल्पविभाजकत्वमित्यभियुक्ताः। तथा च मुनिनोक्तम्—

सर्वेषां समवेतानां रूपं यस्य भवेद्बहु।
स मन्तव्यो रसस्थायी शेषाः सञ्चारिणो मताः।।

रत्नाकरेऽप्युक्तम्—

रत्यादयः स्थायिभावाः स्युर्भूयिष्ठविभावजाः।
स्तोकैर्विभावैरुत्पन्नास्त एव व्यभिचारिणः।।

एवमन्यत्राप्यूह्यम्।

भयस्थायिभावो **भयानकः**।

यथा—

घोरां नारकपालकुण्डलवतीं विद्युच्छटां दृष्टिभि-
र्मुञ्चन्तीं विकरालदृष्टिमनलज्वालापिशङ्गैः कचैः।
दंष्ट्राचन्द्रकलाङ्कुरान्तरललज्जिह्वां महाभैरवीं
पश्यन्त्या इव मे मनः कदलिकेवाद्याप्यहो वेपते।।

इह भयहेतुरालम्बनं ग्रहणोद्यमादिरुद्दीपनं मुखशोषादयोऽनुभावाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चरणहृदयकम्पैः स्तम्भनजिह्वाविलेहमुखशोषैः।
स्रस्तसविषाणगात्रैरस्याभिनयः ससन्त्रासैः।।

स्वेदश्च वेपथुश्चैव रोमाञ्चो गद्गदस्तथा।
त्रासश्च मरणं चैव वैवर्ण्यं च भयानके।।

इति व्यभिचारिणः।

जुगुप्सास्थायिभावो **बीभत्सः**। यथा—

अन्त्रैः कल्पितमङ्गलप्रतिसराः स्त्रीहस्तरक्तोत्पल-
व्यक्तोत्तंसभृतः पिनद्धशिरसो हृत्पुण्डरीकस्रजः।
एताः शोणितपङ्ककुङ्कुमजुषः सम्भूय कान्तैः पिब-
न्त्यस्थिस्नेहसुराः कपालचषकैः प्रीताः पिशाचाङ्गनाः।।

अनभिमतदर्शनेन च गन्धरसस्पर्शशब्ददोषैश्च।
उद्वेजनैश्च बहुभिर्बीभत्सरसः समुद्भवति।।

मुखनेत्रविकूणनया नासाप्रच्छादनावनमितास्यैः।
अव्यक्तपादपतनैर्बीभत्सः सम्यगभिनेयः।।

अपस्मारस्तथोन्मादो विषादो मद एव च।
मृत्युर्व्याधिभयं चैव भावा बीभत्ससंश्रिताः।।

इति व्यभिचारिणः।

विस्मयस्थायिभावोऽ**द्भुतः**। यथा—

आक्षिप्तो जयकुञ्जरेण तुरगान्निर्वर्णयन्वल्लभान्
सङ्गीतध्वनिना हृतः क्षितिभृतां गोष्ठीषु तिष्ठन् क्षणम्।
सद्यो विस्मृतसिंहलेन्द्रविभवः कक्षाप्रदेशेऽप्यहो
द्वाःस्थेनैव कुतूहलेन महता ग्राम्यो यथाहं कृतः।।

अत्र विभावादयः स्पष्टाः।

यत्त्वतिशयार्थयुक्तं वाच्यं शिल्पं च कर्मरूपं च।
तत्सम्बद्धैरर्थै रसोऽद्भुतो नाम विज्ञेयः।।

स्पर्शग्रहणोल्लासितैर्हाहाकारैश्च साधुवादैश्च।
वेपथुगद्गदवचनैः स्वेदाद्यैरभिनयस्तस्य।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तम्भः स्वेदोऽथ मोहश्च रोमाञ्चो विस्मयस्तथा।
आवेगो जडता हर्षो मूर्च्छा चैवाद्भुताश्रयाः।।

इति व्यभिचारिणः।

काव्ये **शान्तो**ऽपि रसोऽनुभवसिद्धत्वात्। तत्र निर्वेदः स्थायिभावः। तदुक्तम्—

न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा।
रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु शमप्रधानः।।

अत एवायं नाट्ये न सम्भवति गीतवाद्यादेस्तद्विरोधित्वात्, अन्ये तु नाट्येऽपि स युक्तः। तद्गीतवाद्यादेस्तद्विरोधित्वानङ्गीकारात्। विषयचिन्तासामान्यस्य तद्विरोधित्वे पुराणश्रवणादेस्तद्विरोध्युद्दीपनस्यापि विरोधित्वप्रसङ्गात्। यत्तु—

शान्तस्य शमसाध्यत्वान्नटे च तदसम्भवात्।
अष्टावेव रसा नाट्ये न शान्तस्तत्र युज्यते।। इति।

तदप्यनुपयुक्तम्। नटे रसाभिव्यक्तेरनङ्गीकारात्। सामाजिकानां शमवत्त्वे तदभिव्यक्तौ बाधकाभावात्। नटे भयक्रोधाद्यभावेऽपि तल्लिङ्गानामिव शिक्षाभ्यासपाटवेन शान्तरसलिङ्गानामप्यभिनयोपपत्तेः। न चास्य रसत्वे सूत्रकारानुमतेरभावः, निर्वेदस्यामङ्गलप्रायस्य प्रथमनिर्देशो मुख्यत्वेन स्थायित्वलाभार्थ इति **काव्यप्रकाश**कारादिभिरुक्तत्वात्।

ननु निर्वेदस्य स्वावमाननरूपस्य स्थायित्वानुपपत्तिः, शान्तस्य सर्वविषयपरिहारजनितात्ममात्रविश्रामानन्दरूपत्वात्।

यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम्।
तृष्णाक्षयसुखस्यैते कलां नार्हन्ति षोडशीम्।।

इत्युक्तेः। एतेन सर्ववृत्तिविरामोऽस्य स्थायीत्यपि निरस्तम्। अभावस्य तदयोगात्। न च चित्तव्यापारनिवृत्तिरूपत्वाच्छमस्यापि कथं स्थायित्वमिति वाच्यम्। निरीहावस्थायामात्मविश्रान्तेरेवात्र शमपदार्थत्वादिति **काव्यप्रदीपादि**भिर्निरूपितत्वात्। एवञ्च कथं सूत्रसम्मतिलाभ इति चेत्, सत्यम्। तत्र निर्वेदो नाम दारिद्र्यन्यक्कारव्याध्यपमानोत्क्रुष्टक्रोधताडनेष्टजनवियोगतत्त्वज्ञानादिभिर्विभावैरुत्पद्यत इति सूत्रकारेणोक्तत्वात्, नित्यानित्यवस्तुविवेकरूपतत्त्वज्ञानजन्यस्य च निर्वेदस्य शृङ्गारादौ व्यभिचारित्वानुपपत्त्या तत्स्थायित्वस्य तदनुमतत्वात्। तदुक्तम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थायी स्याद्विषयेष्वेव तत्त्वज्ञानाद्भवेद्यदि।
इष्टानिष्टवियोगाप्तिकृतस्तु व्यभिचार्यसौ।। इति।

विषयेष्वनुपादेयज्ञानस्य च निर्वेदपदार्थत्वात् 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात्' इति श्रुत्यादिसिद्धत्वात्। रागाभावमात्रस्य तथात्वे सुषुप्त्यादौ निर्विण्णत्वव्यवहारप्रसङ्गात्। आत्मनिर्विकल्पकस्य च काव्याद्यनुपपाद्यत्वात्। रसस्य विभावादिसमूहालम्बनरूपतायाः सर्वसिद्धत्वात्। यथा—

अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः
क्वचित्पुण्येऽरण्ये शिव शिव शिवेति प्रलपतः।।

केचित्तु निवृत्तौ शान्त इव प्रवृत्तौ मायारसोऽपि युक्तः। तत्र रसोत्पत्तिर्नेति दुर्वचत्वात्। ननु स रतिरेवेति चेत्, मैवम्। स न तावत् शृङ्गार-हास्य-रौद्राणां व्यभिचारी, तद्वैरिणां बीभत्सकरुणाद्भुतानां तत्र सत्त्वात्। नापि बीभत्स-करुणाद्भुतानां तद्वैरिणां शृङ्गारहास्यरौद्राणामपि तत्र सत्त्वात्। न च माया सामान्यरसस्तद्विशेषास्त्वन्य इति वाच्यम्। शान्तस्य बहिर्भावापत्तेः; किन्तु प्रबुद्धमिथ्याज्ञानवासना रसः। मिथ्याज्ञानं स्थायिभावः, भोगार्जकधर्माधर्मा विभावाः, पुत्र-कलत्र-विजय-साम्राज्यादयोऽनुभावाः, विद्युद्वत्कादाचित्कप्रकाशा रत्यादयोऽष्टौ भावास्तत्र व्यभिचारिणः। यथा—

वाटी लाटीदृगम्भोरुहरभसकरी वापिका कापि कान्ता
तल्पं चन्द्रानुकल्पं प्रकटयति मिथः कामिनां कामिनीतम्।
रूपं कामानुरूपं मणिमयभवनं बन्धुरं बन्धुरङ्के
लोके लोकेश! कस्य त्वमसि न भुवने सर्वदा सर्वदाता।।

इत्याहुः। तच्चिन्त्यम्। शान्तरसस्याप्यविद्यातत्कार्यान्यतरविषयकत्वेन बहिर्भावस्य शङ्कितुमनर्हत्वात्। मिथ्याज्ञानवासनायाश्च सर्वदापि प्रबुद्धत्वात्। काव्यादिभ्यो जायमानस्य विषयज्ञानमात्रस्य रसत्वापत्तेश्च। तत्र चमत्कारस्याननुभूयमानत्वात्। व्यभिचारिस्थायिभावानां व्यवस्थानुपपत्तेश्चेति दिक्।

अथ व्यभिचारिणो निरूप्यन्ते। विविधमाभिमुख्येन रसान् प्रति चरन्तीति व्यभिचारिणः। स्थाय्यनुकूलत्वे सति विभावानुभावभिन्नत्वं लक्षणम्। अनुकूलत्वं तु रसव्यञ्जकत्वे सति रसप्रतीतिविषयत्वम्। अतो रसकाव्यवाक्ये भावनायां वा नातिव्याप्तिः। ते च त्रयस्त्रिंशत्। तदुक्तम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्वेदग्लानिशङ्काख्यास्तथासूया मदः श्रमः।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः।।

व्रीडाचपलताहर्षा आवेगो जडता तथा।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च।।

सुप्तं विबोधोऽमर्षश्च अवहित्थं तथोग्रता।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च।।

त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामभिः।।

त्रयस्त्रिंशदिति आधिक्यनिरासार्थम्। तेन मात्सर्योद्वेगदम्भेर्ष्याविवेकनिर्णयक्लैव्यक्षमाकुतुकोत्कण्ठाविनयसंशयधार्ष्ट्यानामाधिक्यमनाशङ्क्यम्। मात्सर्यस्यासूयायामुद्वेगस्य त्रासे दम्भस्यावहित्थे ईर्ष्याया अमर्षे विवेकनिर्णययोर्मतौ क्लैब्यस्य दैन्ये क्षमाया धृतौ कुतुकोत्कण्ठयोरौत्सुक्ये विनयस्य लज्जायां संशयस्य तर्के धार्ष्ट्यस्य चापले चान्तर्भावात्। एतेन छलस्य व्यभिचार्यन्तरत्वमिति निरस्तम्। अवहित्थकुक्षावन्तर्भावात्। अवान्तरभेदस्य सतोऽप्यनादरणीयत्वात्। विभागे शास्त्रकारेच्छाया एव नियामकत्वात्।

तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननम्।

तदुक्तम्—

इष्टजनविप्रयोगाद्दारिद्र्याद्व्याधितस्तथा शोकात्।
परवृद्धिं दृष्ट्वा वा निर्वेदो नाम सम्भवति।।

वाष्पपरिप्लुतनयनः पुनः पुनः श्वासदीनमुखनेत्रः।
योगीव ध्यानपरो भवति हि निर्वेदवान्पुरुषः।।

यथा—

सन्तापो हृदये स्मरानलकृतः सम्प्रत्ययं सह्यतां
नास्त्येवोपशमो हि सम्प्रति पुनः किं त्वं मुधा ताम्यसि।
यन्मूढेन मया तदा कथमपि प्राप्तो गृहीत्वा चिरं
विन्यस्तस्त्वयि सान्द्रचन्दनरसस्पर्शो न तस्याः करः।।

रत्यायासकलाभ्यासाद्ग्लानिर्निष्प्राणतेव या।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आधिव्याधिजन्यबलहानिजन्यो दुःखविशेष इवशब्दार्थः। एतेन बलहानिरेव ग्लानिरित्यपास्तम्। नाशस्य भावत्वानुपपत्तेः। न चायं श्रम एवेति वाच्यम्, तद्धेत्वभावादिति **रसगङ्गाधरादयः**। यथा—

अतितमां समपादि जडाशयं स्मितलवस्मरणेऽपि तदाननम्।
अजनि पङ्गुरपाङ्गनिजाङ्गणभ्रमिकणेऽपि तदीक्षणखञ्जनः।।

चिन्तावैक्लव्यजनिका शङ्कानिष्टसमुन्नयः।

उन्नय उत्प्रेक्षा। तदुक्तम्—

द्विविधा शङ्का कार्या आत्मसमुत्था च परसमुत्था च।
या तत्र परसमुत्था सा ज्ञेया दृष्टिचेष्टाभिः।।

कश्चित्प्रवेपिताङ्गस्तथोन्मुखो वीक्षते च पार्श्वानि।
उरुसज्जमानकण्ठः श्यानास्यः शङ्कितः पुरुषः।।

यथा मम—

पुलककुलकञ्चुकवृतं कपोलफलकं विलोकने तस्य।
मुग्धे! संवृणु वसनाञ्चलेन दृगवेक्षणेन कृतम्।।

परोत्कर्षाक्षमाऽसूया गर्वदौर्जन्यमन्युजा।

तदुक्तम्—

परसौभाग्येश्वरतामेधालीलासमुच्छ्रयं दृष्ट्वा।
अभिनेतव्याऽसूया कृतापराधा भवेयुश्च।।

भ्रुकुटिकुटिलोत्कटमुखैः सेर्ष्याक्रोधपरिवर्त्तनैश्चित्रैः।
गुणनाशनविद्वेषैस्तस्याः कार्यः सदाभिनयः।।

यथा—

तच्चापमीशभुजपीडितसारमेव
प्रागप्यभज्यत भवांस्तु निमित्तमात्रम्।
राजन्यकप्रधनसाधनमस्मदीय-
माकर्ष कार्मुकमिदं गरुडध्वजस्य।।

सम्मोहानन्दसम्भेदः स्खलदङ्गवचोगतिः।
मधुपानादिजो ज्ञेयो मदो विविधभावकृत्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदुक्तम्—

त्रिविधस्तु मदः कार्यस्तरुणो मध्यस्तथापकृष्टश्च।
करणं पञ्चविधं स्यात्तस्याभिनये प्रयोगविदाम्।।
कश्चिन्मत्तो गायति रोदिति कश्चित् तथा हसति कश्चित्।
परुषवचनाभिधायी कश्चित्कश्चित्तथा स्वपिति।।
उत्तमसत्त्वः शेते हसति च गायति च मध्यमप्रकृतिः।
परुषवचनाभिधायी रोदित्यपि वाधमप्रकृतिः।।
स्मितमधुरवचनरागो हृष्टतनुः किञ्चिदाकुलितवाक्यः।
स्वप्रचारविरुद्धगतिस्तरुणमदस्तूत्तमप्रकृतिः।।
स्खलिताघूर्णितनयनः स्त्रस्तव्याकुलितगात्रविक्षेपः।
कुटिलव्याविद्धगतिर्मध्यमदो मध्यमप्रकृतिः।।
नष्टस्मृतिर्हतगतिश्छर्दितहिक्कादिकैः सुबीभत्सः।
गुरुसज्जमानकण्ठो निष्ठीवति चाधमप्रकृतिः।। इत्यादि।

यथा—

देइ विलासवईणं सुहे अ दुःक्खे अ पाअपडिअसब्भावा।
अणवेक्खिअलज्जाइं सहिव्व वीसत्थजंपिआइं पसण्णा[१]।।

श्रमः खेदोऽध्वगत्यादेर्निद्राश्वासादिकृन्मतः।

तदुक्तम्—

अध्वगतिव्यायामान्नरस्य सञ्जायते श्रमो नाम।
निःश्वासदर्शनस्वेदैस्तस्याभिनयः प्रयोक्तव्यः।।

अस्य बलसत्त्वेऽपि जायमानत्वाच्छरीरव्यापारजत्वाच्च न ग्लानावन्तर्भावः।

यथा—

स्त्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणाद्
अद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः।
बद्धं कर्णशिरीषरोधि वदने घर्माम्भसां जालकं
बन्धे स्त्रंसिनि चैकहस्तयमिताः पर्याकुला मूर्द्धजाः।।

---

१. ददाति विलासवतीनां सुखे च दुःखे च पादपतितसद्भावा।
अनपेक्षितलज्जानां सखीव विश्रब्धजल्पितानि प्रसन्ना।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रमादिजन्यमालस्यं पुरुषार्थेष्वनादरः।

क्रियासु द्वेष इत्यर्थः। असामर्थ्याभावाद्विवेकशून्यत्वाभावाच्च ग्लानिजडताभ्यां भेदः। यथा—

प्रबुद्धायाः प्रातर्लसदलसदोर्वल्लिवलयं
गलन्मल्लीदाम्नः शिथिलकबरीबन्धसमये।
प्रियालोके घूर्णन्नयनमसृणस्निग्धमधुरो
मुखे जृम्भारम्भो जयति भृशमम्भोरुहदृशः।।

दौर्गत्यादेरनौजस्यं दैन्यं मलिनतादिकृत्।

यथा—

वेगं करोति तुरगस्त्वरितं प्रयातुं
प्राणव्ययान्न चरणास्तु तथा वहन्ति।
सर्वत्र यान्ति पुरुषस्य चलाः स्वभावाः
खिन्नास्ततो हृदयमेव पुनर्विशन्ति।।

ध्यानं चिन्ता हिताप्राप्तेः सन्तापादिकरी मता।

तदुक्तम्—

सोच्छ्वसितैर्निःश्वासैः सन्तापैश्चैव शून्यहृदयतया।
अभिनेतव्या चिन्ता मुदा विहीनैरधृत्या च।।

यथा—

मालत्याः प्रथमावलोकदिवसादारभ्य विस्तारिणो
भूयः स्नेहविचेष्टितैर्मृगदृशो नीतस्य कोटिं पराम्।
अद्यान्तः खलु सर्वथास्य मदनायासप्रबन्धस्य मे
कल्याणं विदधातु सा भगवती नीतिर्विपर्येतु वा।।

न चायं वितर्क एवेति वाच्यम्। किं भविष्यतीति चिन्तायाः पूर्वं पश्चाद्वा तदुपपत्तेः। 'वितर्कोऽस्याः पूर्वक्षणे पाश्चात्त्ये वोपजायते' इत्यभियुक्तोक्तेः।

मोहो विचित्तताभीतिदुःखावेगानुचिन्तनैः।

तदुक्तम्—

अस्थाने तस्करान्दृष्ट्वा त्रासनैर्वा पृथग्विधैः।
तत्प्रतीकारशून्यस्य मोहः समुपजायते।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यसनाभिघातपूर्ववैरानुस्मरणजो भवति मोहः।
सर्वेन्द्रियसम्मोहात्तस्याभिनयः प्रयोक्तव्यः।।

वस्तुतत्त्वानवधारिणी चित्तवृत्तिर्मोहः। शून्यताव्यवहिता सेति केचित्। यथा—

निवृत्तिः प्रत्येकं भवति करणानां स्वविषया-
त्तथा सर्वाण्यत्र स्मृतिजनकतामेव दधति।
अतस्मिंस्तद्भावं भजति च समस्तं त्वपरथा
कथङ्कारं सर्वं परिणमति कान्तामयमिदम्।।

स्मृतिः पूर्वानुभूतार्थविषयं ज्ञानमुच्यते।

तदुक्तम्—

अन्यतत्त्वमतिक्रान्तं यथामति विभावितम्।
विस्मृतं च यथावृत्तं स्मरेयुः प्रीतमानसाः।।

स्वास्थ्याभ्याससमुत्था श्रुतिदर्शनसम्भवा स्मृतिर्निपुणैः।
शिर उद्वाहनकम्पैर्भ्रूक्षेपैश्चाभिनेतव्या।।

यथा—

ण ट्ठाणाहि तिलन्तरं विचलिआ सुत्था णिअंवत्थली
थोउव्वल्लवलीतरङ्गमुअरं कण्ठोतिरिच्छट्ठिओ।
वेणीए उण आणणेन्दुबलणे लद्धं थणालिङ्गणं
जादा तीअ चउव्विहा तणुलदा तं संचलन्तीअ मे[1]।।

अभीष्टार्थस्य सम्प्राप्तौ स्पृहापर्याप्तता धृतिः।
सौहित्यवदनोल्लाससहासप्रतिभादिकृत्।।

तदुक्तम्—

प्राप्तानामुपभोगः शब्दरसस्पर्शगन्धानाम्।
अप्राप्तानामनुशोचनं च न भवेद् धृतिः सा तु।।

---

१. न स्थानाद्धि तिलान्तरं विचलिता सुस्था नितम्बस्थली
स्तोकोद्वेलबलीतरङ्गमुदरं कण्ठोऽतितिर्यक्स्थितः।
वेण्या पुनराननेन्दुवलने लब्धं स्तनालिङ्गनं
जाता तस्याश्चतुर्विधा तनुलता तत् सञ्चरन्तीव मे।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विज्ञानशौचसमुद्भवश्रुतिशक्तिसमुद्भवा धृतिः सद्भिः।
भयशोकविषादाद्यै रहिता तु सदा प्रयोक्तव्या।।

यथा—

मुहपेच्छओ पई से सावि हु सविसेसदंसणुम्मत्ता।
दोवि कहत्था पुहइं अमहिलपुरिसं व मण्णन्ति[१]।।

सङ्कोचश्चेतसो व्रीडा वैवर्ण्याधोमुखत्वकृत्।

तदुक्तम्—

लज्जाधोगूढमुखो भूमिं च लिखन्नखांश्च परिकृन्तन्।
वस्त्राङ्गुलीयकानां संस्पर्शं व्रीडितः कुर्यात्।।

यथा—

णिहुअणसिप्पं तह सारिआइ उल्लाविअह्म गुरुपुरओ।
जह तं वेलं माए ण आणिमो कहं वच्चामो[२]।।

वाक्पारुष्यकरी चित्तस्यावस्था चापलं मता।

वाक्पारुष्यमिति वधबन्धनादेरप्युपलक्षणम्। तदुक्तम्—

अविमृष्टं यत्कार्यं पुरुषोऽज्ञानात्समाचरति।
अविनिश्चितकारित्वात्स तु खलु चपलो बुधैर्ज्ञेयः।।

यथा—

कामस्तु बाणावसरं प्रतीक्ष्य पतङ्गवद्वह्निमुखं विविक्षुः।
उमासमक्षं हरबद्धलक्ष्यः शरासनज्यां मुहुराममर्श।।

मनःप्रसादो हर्षः स्यादिष्टावाप्तिस्तवादिभिः।

यथा—

स्मृतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि सुमुखि! त्वम्।
उपरागान्ते शशिनः समुद्गतो रोहिणीयोगः।।

आवेगो राजविद्रावरत्यादेः सम्भ्रमो मतः।
तत्र विस्मरणं स्तम्भः स्वेदः कम्पः स्खलद्गतिः।।

---

१. मुखप्रेक्षकः पतिस्तस्याः सापि खलु सविशेषदर्शनोन्मत्ता।
द्वावपि कृतार्थौ पृथिवीममहिलापुरुषामिव मन्येते।।इति च्छाया।

२. निधुवनशिल्पं तथा सारिकयोल्लापिता स्म गुरुपुरतः।
यथा तस्यां वेलायां मातर्न जानीमः कथं वर्तामहे।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

तदुक्तम्—

इत्येषोऽष्टविधो ज्ञेय आवेगः सम्भ्रमात्मकः।
स्थैर्य्येणोत्तममध्यानां नीचानां चोपसर्पणात्।।

अष्टविधः, उत्पातवातवर्षाग्निकुञ्जरोद्भ्रमणप्रियश्रवणाप्रियश्रवणव्यसनभेदात्। एवञ्च सिंहाभियोगादेरप्युपलक्षणम्। यथा—

अस्थानगामिभिरलङ्करणैरुपेता भूयः पदस्खलितनिह्नुतिरप्रसन्ना।
वाणीव कापि कुकवेर्मधुपानमत्ता गेहान्निपातबहुलैव विनिर्जगाम।।

अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः।
अनिमिषनयननिरीक्षणतूष्णीम्भावादयस्तत्र।।

मोहे चाक्षुषादेरनुत्पत्तिरेव। इह तु तदुत्पत्तावपि प्रकारविशेषावगाहनं बाहुल्याभावश्चेति विशेषः। यथा—

पेछइअ लद्धलक्खं दीहं णीससइ सुण्णअं हसइ।
जह जंपइअ फुडत्थं तह से हिअअट्ठिअं किंपि[१]।।

गर्वोऽभिजनलावण्यधनैश्वर्यादिभिर्मतः।
सविलासाङ्गवीक्षाविनयावज्ञादिकृत्तु सः।।

यथा—

धृतायुधो यावदहं तावदन्यैः किमायुधैः।
यद्वा न सिद्धमस्त्रेण मम तत्केन सेत्स्यते।।

प्रारब्धकार्यासिद्ध्यादेर्विषादः सत्त्वसङ्क्षयः।
निःश्वासोच्छ्वासहृत्तापसहायान्वेषणादयः।।

तदुक्तम्—

कार्यानिस्तरणकृतश्चौर्याभिग्रहणराजदोषाद्यैः।
दैवादिष्टो योऽर्थस्तदसम्प्राप्तौ विषादः स्यात्।।

यथा—

मम प्राणाधिके तस्मिन्नङ्गानामीश्वरे हते।
उच्छ्वसन्नपि लज्जेऽहमाश्वासे तात! का कथा।।

---

१. प्रेक्षते लब्धलक्षं दीर्घं निःश्वसिति शून्यं हसति।
यथा जल्पति स्फुटार्थं तथास्या हृदयस्थितं किमपि।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालाक्षमत्वमौत्सुक्यं रम्येच्छारतिसम्भ्रमैः।
तत्रोच्छ्वासत्वराश्वासहृत्तापस्वेदविभ्रमाः।।

यथा—

श्वस्तस्याः प्रियमाप्तुमुद्धुरधियो धीराः सृजन्त्या रया-
न्नम्रोन्नम्रकपोलपालिपुलकैर्वेतस्विनीरश्रुणः।
चत्वारः प्रहराः स्मरार्त्तिभिरभूत्सा या क्षपा दुःक्षपा
तत्तस्याः कृपयाखिलैव विधिना रात्रिस्त्रियामा कृता।।

मनःसम्मीलनं निद्रा चिन्तालस्यश्रमादिभिः।
तत्र जृम्भाङ्गभङ्गाक्षिमीलनोच्छ्वसनादयः।।

तदुक्तम्—

आलस्याद्दौर्बल्यात्क्लमाच्छ्रमाच्चिन्तनात्स्वभावाच्च।
रात्रौ जागरणादपि निद्रा पुरुषस्य सम्भवति।।

तां मुखगौरवगात्रप्रविलोलनयननिमीलनजडत्वैः।
जृम्भणगात्रविमर्द्दैरनुभावैरभिनयेत्प्राज्ञः।।

यथा—

निःश्वासोऽस्य न शङ्कितः सुविशदस्तल्पान्तरे वर्त्तते
दृष्टिर्गाढनिमीलिता न विकला नाभ्यन्तरे चञ्चला।
गात्रं स्त्रस्तशरीरसन्धि शिथिलं शय्याप्रमाणाधिकं
दीपं वापि न धर्षयेदभिमुखं स्याल्लक्ष्यसुप्तं यदि।।

मनःक्षेपस्त्वपस्मारो भूतावेशादिसम्भवः।

तदुक्तम्—

भूतपिशाचग्रहणानुस्मरणोच्छिष्टशून्यगृहगमनात्।
कालान्तरातिपातादशुचेश्च भवत्यपस्मारः।।

सहसा भूमौ पतनं प्रवेपनं वदनफेनमोक्षश्च।
निःसंज्ञस्योत्थानं रूपाण्येतान्यपस्मारे।।

न च व्याधित्वादेवास्य सङ्ग्रहे पृथगुपादानवैयर्थ्यमिति वाच्यम्। बीभत्सभयानकयोरेवास्य व्यभिचारित्वमित्येतदर्थत्वात्। यथा मम—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेगादुत्पत्य भूमौ विहितनिपतनाः पाण्डुरत्वं वहन्त्यः
फेनैर्विस्फार्यमाणैर्ध्वनिभिरनिभृतैर्भीतिमुद्भावयन्त्यः।
तिर्यक्पश्चात्पुरस्तादपि पवनवशादव्यवस्थं व्रजन्त्यः
सद्यो नद्यो दुरीक्षाघनसमयमयोद्भूतभूताभिभूताः।।

स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः।
कोपावेगभयग्लानिसुखदुःखादिकारकः।।

यथा श्रीरुद्रचन्द्रदेवानाम्—

पान्थः स्वप्नदशां गतः प्रियतमामालिङ्ग्य वक्त्रासवं
पातुं यावदियेष तावदसमैर्मेघस्वनैर्बोधितः।
प्रागङ्के शयने ततोऽवनितले पर्येषयन्प्रेयसीं
भूतावेशमितः किलेति [1]समयासीनैर्जनैः स्तम्भितः।।

निद्रापगमहेतुभ्यः प्रबोधश्चेतनागमः।
जृम्भाङ्गभङ्गनयनोन्मीलनाङ्गावलोककृत्।।

तदुक्तम्—

आहारापरिणामाच्छब्दस्पर्शादिभिश्च सम्भूतः।
प्रतिबोधस्त्वभिनयो जृम्भणपरिवेदनाक्षिपरिमर्दैः।।

यथा—

प्रत्यग्रोन्मेषजिह्मा क्षणमनभिमुखी रत्नदीपप्रभाणा-
मात्मव्यापारगुर्वी जनितजललवा जृम्भणैः साङ्गभङ्गैः।
नाङ्गाङ्गं मोक्तुमिच्छोः शयनमुरुफणाचक्रवालोपधानं
निद्राच्छेदाभिताम्रा चिरमवतु हरेर्दृष्टिराकेकरा वः।।

अधिक्षेपापमानादेरमर्षोऽभिनिविष्टता।
तत्र स्वेदशिरःकम्पनेत्ररागाङ्गविक्रिया।।

तदुक्तम्—

आक्षिप्तानां सभामध्ये विद्यैश्वर्यबलाधिकैः।
नृणामुत्साहसम्पन्नो ह्यमर्षो नाम जायते।।

---

१. समयासीनैः समीपोपविष्टैरित्यर्थः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्साहाध्यवसानाभ्यामधोमुखविचिन्तनैः।
शिरःप्रकम्पस्वेदाद्यैस्तं प्रयुञ्जीत नाट्यवित्।।

यथा—

पितुर्मूर्ध्नि स्पृष्टे ज्वलदनलभास्वत्परशुना
कृतं यद्रामेण श्रुतिमुपगतं किन्न भवताम्।
किमद्याश्वत्थामा तदरिरुधिरासारविघसं
न कर्म क्रोधान्धः प्रभवति विधातुं रणमुखे।।

लज्जाद्यैर्विक्रियायोगादवहित्थात्मविक्रिया।
व्यापारान्तरसङ्गित्ववदनानमनादिकृत्।।

तदुक्तम्—

धार्ष्ट्यजैह्माादिसम्भूतमवहित्थं भयात्मकम्।
तच्चाङ्गाभिनयैः कार्यं याति चोत्तरभाषणात्।।

यथा—

स्निग्धं वीक्षितमन्यतोऽपि नयने यत्प्रेषयन्त्या तया
यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव।
मा गा इत्यवरुद्धया यदपि सा सासूयमुक्ता सखी
तत्सर्वं किल मत्परायणमहो कामी स्वतां पश्यति[1]।।

अधिक्षेपावमानाद्यैश्चेतश्चण्डत्वमुग्रता।
अत्र स्वेदशिरःकम्पतर्जनाताडनादयः।।

यथा—

निर्वीर्यं गुरुशापभाषणवशात्किं मे तवेवायुधं
सम्प्रत्येव भयाद्विहाय समरं प्राप्तोऽस्मि किं त्वं यथा।
जातोऽहं स्तुतिवंशकीर्त्तनविदां किं सारथीनां कुले
क्षुद्रारातिकृताप्रियं प्रतिकरोम्यस्त्रेण नास्त्रेण किम्।।

श्रान्तिच्छेदोपदेशाभ्यां शास्त्रादेस्तत्त्वधीर्मतिः।
स्मेरता धृतिसन्तोषौ बहुमानस्तथात्मनि।।

१. अत्र शकुन्तलानिष्ठमवहित्थं न तु राजनिष्ठम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा—

भव हृदय सावधानं सम्प्रति सन्देहनिर्णयो जातः।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम्।।

विरहादेर्मनस्तापो व्याधिर्दुःस्थाङ्गतादिकृत्।

ज्वरोऽत्र सशीतः सदाहश्च। काव्येषु द्वितीय एव। तस्य शीताभिलाषादयोऽनुभावाः। यथा—

विसव्व विसकन्दली विसहरव्व हारच्छडा
विसग्गिमिव अप्पणा किरइ तालवेंटाणिलो।
तहाअ करणिग्गअं जलइ जंतधाराजलं
न चंदणमहो सही हरइ देहदाहं अ मे[1]।।

सन्निपातग्रहादिभ्य उन्मादश्चित्तविभ्रमः।

तदुक्तम्—

इष्टजनविभवनाशादभिघाताद्वातपित्तकफकोपात्।
विविधाच्चित्तविकारादुन्मादो नाम सम्भवति।।
अनिमित्तहसितरुदितोपविष्टगीतप्रधावितोत्क्रुष्टैः।
अन्यैर्विकारजातैरुन्मादं सम्प्रयुञ्जीत।।

अस्य व्याधित्वेऽपि पृथगुपादानं व्याध्यन्तरापेक्षया वैचित्र्यविशेषसूचनार्थम्। यथा—

अवलंवह मासंकह माइगहलंघिआ परिब्भमइ।
अत्तत्थगज्जिउब्भंतसुण्णहिअआ पहिअजाआ[2]।।

रोगादिभिः प्रागवस्था मरणस्य मृतिर्भवेत्।

---

१. विषमिव विषकन्दली विषधर इव हारच्छटा
विषाग्निमिवात्मना किरति तालवृन्तानिलः।
तथा च करनिर्गतं ज्वलति यन्त्रधाराजलं
न चन्दनमहो सखि! हरति देहदाहं च मे।।इति च्छाया।

२. अवलम्बत माशङ्कत मातृग्रहलङ्घिता परिभ्रमति।
अत्यर्थगर्जितोद्भ्रान्तशून्यहृदया पथिकजाया।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुख्यस्य भावत्वानुपपत्तेः। यथा—

सञ्जीवणोसढं विअ सुहस्स रक्खइ अणण्णवावारा।
सासूणवब्भदंसणकंठट्ठिअजीविअं सोह्णम्[1] ।।

केचित्तु अत्र करुणं पठन्ति। तदयुक्तम्। दुष्टप्रहाणेच्छारूपतया चित्तवैक्लव्यरूपेण शोकेनैव गतार्थत्वाद् दयावीरे स्थायित्वाच्च। न चान्यत्र सञ्चारित्वदर्शनार्थमत्रोपादानमिति वाच्यम्। रत्यादेरपि तथात्वात्।

शृङ्गारवीरयोर्हासो वीरे क्रोधस्तथा मतः।
शान्ते जुगुप्सा कथिता व्यभिचारितया पुनः।।

इति **काव्यप्रदीपादयः**।

औत्पातिकैर्मनःक्षोभस्त्रासः कम्पादिकारकः।
पूर्वापरविचारोत्थं भयं त्रासात्पृथग्भवेत्।।

यथा—

रेणुर्बाधां विधत्ते तनुरपि महतीं नेत्रयोरायतत्वा-
त्कम्पोऽल्पोऽप्यत्र पीनस्तनभरित उरः क्षिप्तहारं दुनोति।
ऊर्वोः स्तम्भेऽपि जाते पृथुजघनभराद्वेपथुर्वर्द्धतेऽस्या
वात्या खेदं मृगाक्ष्याः सुचिरमवयवैर्दत्तहस्ता करोति।।

तर्को विचारः सन्देहाद्भ्रूशिरोऽङ्गुलिनर्त्तकः।

यथा—

भक्त्या नन्दकुलानुरागदृढया नन्दान्वयालम्बिना
किं चाणक्यनिराकृतेन कृतिना मौर्येण सन्धास्यते।
स्थैर्यं भक्तिगुणस्य वा विगणयन् किं सत्यसन्धो भवे-
दित्यारूढकुलालचक्रमिव मे चेतश्चिरं भ्राम्यति।।

एवं चित्तवृत्तिविशेषरूपान् रसविशेषव्यवस्थितान् व्यभिचारिणो निरूप्य शारीराः सर्वसाधारणाः सात्त्विका निरूप्यन्ते।

ये त्विमे सात्त्विका भावा नानाभावसमाश्रयाः।
रसेषु तेषु सर्वे ते विज्ञेया नाट्ययोक्तृभिः।।

---

१. सञ्जीवनौषधमिव सुखस्य रक्षत्यनन्यव्यापारा।
साश्रुनवाभ्रदर्शनकण्ठस्थितजीवितं सोष्णम्।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति मुनिनोक्तत्वात्। ते चाष्टभेदाः। तदुक्तम्—

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका मताः।।

एवञ्च जृम्भितस्य नवमभेदत्वमनुपादेयम्। महर्षिकृतविभागविरोधात्। अन्यथा कटाक्षादीनामपि तदापत्तेः। यत्तु जृम्भायाः पुरुषेच्छानधीनत्वाद्वैषम्यमिति, तच्चिन्त्यम्। रसभावादिदृष्टीनामपि मनोविकारमात्रसाध्यत्वात्। तत्र—

हर्षभयरोगविस्मयविषादमदरोषसम्भवः स्तम्भः।
निश्चेष्टो निष्प्रकम्पश्च स्थितशून्यजडाकृतिः।
निःसंज्ञः स्तब्धगात्रश्च स्तम्भं त्वभिनयेद्बुधः।।

यथा—

स्तम्भस्तथालम्भितमां नलेन भैमीकरस्पर्शमुदः प्रसादः।
कन्दर्पलक्ष्यीकरणार्पितस्य स्तम्भस्य दम्भं स चिरं यथाऽऽपत्।।

श्रमादिना दृश्यतामापन्नं गात्रजलं स्वेदः।
व्यजनग्रहणैर्वापि स्वेदापनयनेन च।
स्वेदस्याभिनयो योज्यस्तथा वाताभिलाषतः।।

यथा—

प्रारब्धनिधुवनैव स्वेदजलं कोमलाङ्गि! किं वहसि।
ज्यामर्पयितुं नमिता कुसुमास्त्रधनुर्लतेव मधु।।

स्पर्शभयगीतहर्षक्रोधाद्रोगाच्च रोमाञ्चः।
मुहुः कण्टकितत्वेन तथाङ्गाकुञ्चनेन च।
रोमाञ्चस्त्वभिनेयोऽसौ गात्रसंस्पर्शनेन च।।

यथा—

जे णअस्स तिहुस्णस कंटआ जे कदंबकुसुमस्स केसरा।
अज्ज तुज्झ करफंससङ्गिणो ते हुवंति मह अंगणिग्गदा[१]।।

---

१. ये नलस्य तीक्ष्णस्य कण्टका ये कदम्बकुसुमस्य केशराः।
अद्य तव करस्पर्शसङ्गिनस्ते भवन्ति मम अङ्गनिर्गताः।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वरभेदः—

भयहर्षक्रोधजरारौक्ष्यरोगमदजनितः।
स्वरभेदस्तथा चैव भिन्नगद्गदविस्वरैः।।

यथा मम—

निपीतवत्या मधु सन्दधानः प्रसूनधन्वानममन्दभावः।
क्षणेन मन्दाक्ष इवेन्दुमुख्याः स्वरोऽपि भङ्गं विभराम्बभूव।।
शीतभयहर्षरोगस्पर्शजरासम्भवः कम्पः।
वेपनात्स्फुरणात्कम्पाद्वेपथुं सम्प्रयोजयेत्।।

वेपनमवयवैकदेशस्य परिस्पन्दः, स्फुरणं निरवच्छिन्नोऽवयवस्पन्दः, कम्पः सकलशरीरस्पन्द इति भेदः। यथा—

तूलेन तस्यास्तुलना मृदोस्तु कम्पास्तु सा मन्मथबाणवातैः।
चित्रीयितं तत्तु नलो यदुच्चैरभूत्स भूभृत्पृथुवेपथुस्तैः।।
शीतक्रोधभयश्रमरोगक्लमतापजं च वैवर्ण्यम्।
मुखवर्णपरावृत्त्या नाडीपीडनयोगतः।
वैवर्ण्यमभिनेतव्यं प्रयत्नादङ्गसंश्रयम्।।

यथा—

कुसुमचापजतापसमाकुलं कमलकोमलमैक्ष्यत तन्मुखम्।
अहरहर्वहदभ्यधिकाधिकां रविरुचिग्लपितस्य विधोर्विधाम्।।

नेत्रजलमश्रु। स्वेदलक्षणे नेत्रभिन्नत्वमवयवे विशेषणं बोध्यम्।

आनन्दामर्षाभ्यां धूमाञ्जनजृम्भणाद्भयाच्छोकात्।
अनिमेषप्रेक्षणतः शीताद्रोगाद्भवेदस्रम्।।

यथा—

वाष्पाम्भसा मृगदृशो विमलः कपोलः
प्रक्षाल्यते सपदि राजत एव यस्मिन्।
गण्डूषपेयमिव कान्त्यमृतं पिपासु-
रिन्दुर्निवेशितमयूखमृणालदण्डः।।

चेष्टानिरोधः प्रलयः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चेष्टा च प्रयत्नवदात्मसंयोगजन्या शरीरक्रिया। वाय्वादिसंयोगजन्यायां मृतशरीरक्रियायामतिव्याप्तिनिरासाय जन्यान्तम्। ऊर्ध्वज्वलनादिरूपाग्न्यादिक्रियावारणाय शरीरेति। यथा—

वावारविसम्वाअं सअलावअवाण कुणइहअ लज्जा।
सवणाण उणो गुरुअणपुरोवि ण णिरुंभइ णिओओ[१]।।

।। इति सात्त्विकभावनिरूपणम्।।

प्रसङ्गाद्यौवनकालीनभावा अपि निरूप्यन्ते। तत्र **भरतः**—

देहात्मकं भवेत्सत्त्वं सत्त्वाद्भावः समुत्थितः।
भावात्समुत्थितो हावो हावाद्धेला समुत्थिता।।

अनभिव्यक्तो मानसो विकारो भावः, किञ्चिदभिव्यक्तो हावः, स्फुटतरमभिव्यक्तो हेलेति विवेकः।

बाह्यार्थालम्बनो यस्तु विकारो मानसो भवेत्।
भाव इत्युच्यते सद्भिस्तस्योत्कर्षो रसः स्मृतः।।

इति **हलायुधोक्तेः**,

रसाभिज्ञानयोग्यत्वं भाव इत्यभिधीयते।
ईषद्दृष्टविकारः स्याद्भावो हावः प्रकीर्त्तितः।।
सुव्यक्तविक्रियो भावो हेलेति परिकीर्त्यते।।

इति **विद्यानाथोक्तेश्च**। हावजन्यचेष्टाविशेषाश्च तदनुमापकतया हावशब्देनोच्यन्ते। तदुक्तम्—

लीलाविलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम्।
मोट्टायितं कुट्टमितं विव्वोको ललितं तथा।।
विहृतं चेति सम्प्रोक्ता दश स्त्रीणां स्वभावजाः।'

तत्र भावो यथा—

कथाप्रसङ्गेषु मिथः सखीमुखात्तृणेऽपि तन्व्या नलनामनि श्रुते।
द्रुतं विधूयान्यदभूयतानया मुदा तदाकर्णनसज्जकर्णया।।

१. व्यापारविसंवादं सकलावयवानां करोतीह च लज्जा।
श्रवणयोः पुनर्गुरुजनपुरोऽपि न निरुध्यते नियोगः।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हावो यथा—

निराकूतैरेव प्रियसहचरीणां शिशुतया
वचोभिः पाञ्चालीमिथुनमधुना सङ्गमयितुम्।
उपादत्ते नो वा रहयति न वा केवलमियं
कपोलौ कल्याणी पुलकमुकुलैर्दन्तुरयति।।

हेला यथा—

विवृण्वती शैलसुतापि भावमङ्गैः स्फुरद्बालकदम्बकल्पैः।
साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन।।

चेष्टासु आद्यचतुष्टयं नवमं च शारीराणि, षष्ठसप्तमाष्टमदशमान्यान्तराणि, पञ्चममुभयसङ्कीर्णमिति विवेकः।

वागङ्गालङ्कारैः श्लिष्टैः प्रीतिप्रयोजितैर्मधुरैः।
इष्टजनस्यानुकृतिर्लीला ज्ञेया प्रयोगज्ञैः।।

यथा मम—

निर्मायाभरणं मृणालवलयानाशीविषाणां गणा-
न्मूर्द्धन्यप्युपधाय केतकदलं खण्डं सुधादीधितेः।
आलेपं हिमबालुकाभिरुररीकृत्याभितो भूतिभि-
स्तन्वानात्मनि नीललोहिततुलां देवी प्रदेयान्मुदम्।।

स्थानासनगमनानां हस्तभ्रूनेत्रकर्मणां चैव।
उत्पद्यते विशेषो यः श्लिष्टः स तु विलासः स्यात्।।

यथा मम—

कर्णोत्तंसपरिभ्रमन्मधुकरव्यासेधलक्ष्योल्लस-
त्पाणिव्यापृतिजन्यकर्मजमिथोयोगक्वणत्कङ्कणा।
हासारम्भभवद्विभागमधुरं मन्दं दशन्ती रदैः
श्रोत्रोपान्तविजृम्भमाणनयनं धन्यं वधूर्वीक्षते।।

माल्याच्छादनभूषणविलेपनानामनादरन्यासः।
स्वल्पोऽपि परां शोभां जनयति यः सा तु विच्छित्तिः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा मम—

बाले! किं वलयैरलं कुवलयैर्माल्यत्वमापादितैः
को वा स्यादनया गुणो रसनया तारेण हारेण किम्।
नीतेन श्रवणावतंसपदवीमेव प्रवालेन ते
सर्वत्रावयवे शिरीषजनुषा कान्तिर्निरीषत्कृता।।

विविधानामङ्गानां वागङ्गाहार्यसत्त्वयुक्तानाम्।
मदरागहर्षजनितो व्यत्यासो विभ्रमः प्रोक्तः।।

यथा—

सितं वसनमर्पितं वपुषि नीलचोलभ्रमा-
न्मया मृगमदाशया मलयजद्रवः सेवितः।
करेण परिबोधितः स्वजनशङ्कया दुर्जनः
परं परमपुण्यतः सखि! न लम्बिता देहली।।

स्मितहसितरुदितभयरोषमोहदुःखश्रमाभिलाषाणाम्।
सङ्करकरणं हर्षादसकृत्किलकिञ्चितं प्रोक्तम्।।

यथा—

आज्ञा काकुर्याञ्चाक्षेपो हसितं च शुष्करुदितं च।
इति निधुवनपाण्डित्यं तस्या ध्यायन्न तृप्यामि।।

इष्टजनस्य कथायां लीलाहेलाभिदर्शने चापि।
तद्भावभावनाकृतमुक्तं मोट्टायितं नाम।।

यथा—

मत्प्रस्तावमकुर्वति प्रियसखीवृन्देऽपि मन्दायते
प्रस्तावे सति निन्दिकैव पुलकप्राचुर्यपर्याकुला।
ध्यायत्येव हि मां रहः पुनरहो दृष्टापि नालोकते
बाले! मानकलां बिभर्त्ति विपुलां प्रेमा तु हेमाचलः।।

केशस्तनाधरग्रहणेष्वतिहर्षसम्भ्रमोत्पन्नम्।
कुट्टमितं विज्ञेयं सुखेऽपि दुःखोपचारेण।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा—

पाणिरोधमविरोधितवाञ्छं भर्त्सनाश्च मधुरस्मितगर्भाः।
कामिनः स्म कुरुते करभोरुर्हारि शुष्करुदितं च रतेषु।।
इष्टानां भावानां प्राप्तावभिमानगर्भसम्भूतः।
स्त्रीणामनादरकृतो विव्वोको नाम विज्ञेयः।।

यथा—

असम्मुखालोकनमाभिमुख्यं निषेध एवानुमतिप्रकारः।
प्रत्युत्तरं मुद्रणमेव वाचो नवाङ्गनानां नव एव पन्थाः।।
करचरणाङ्गन्यासः सभ्रूनेत्रौष्ठसंयुक्तः।
सुकुमारविधानेन स्त्रीभिरितीदं स्मृतं ललितम्।।

यथा श्रीरुद्रचन्द्रदेवानाम्—

धम्मिल्ले कुसुमोत्करं श्रवणयोः प्रत्यग्रफुल्लाम्बुजं
भाले कुङ्कुमपत्रकं च सरसं कण्ठे च मल्लीस्रजः।
गात्रे पद्मपरागशोभि वसनं विन्यस्य मीनेक्षणा
चित्तं क्षोभयति स्मरस्य पुरतो यान्ती पताकेव नः।।
प्राप्तानामपि वचसां क्रियते यदभाषणं ह्रिया स्त्रीभिः।
व्याजात्स्वभावतो वाप्येतत्समुदाहृतं विहृतम्।।

यथा—

पटालग्ने पत्यौ नमयति मुखं जातविनया
हठाश्लेषं वाञ्छत्यपहरति गात्राणि निभृतम्।
न शक्नोत्याख्यातुं स्मितमुखसखीदत्तनयना
ह्रिया ताम्यत्यन्तः प्रथमपरिहासे नववधूः।।

अथ स्वाभाविकगुणाः—

शोभा कान्तिश्च दीप्तिश्च तथा माधुर्यमेव च।
धैर्यं प्रागल्भ्यमौदार्यमित्येते स्युरयत्नजाः।।

तत्र—

रूपयौवनलावण्यैरुपभोगोपबृंहितैः।
अलङ्करणमङ्गानां शोभेति परिकीर्त्तितम्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूपलावण्ययोर्लक्षणमन्यत्रोक्तम्—

अङ्गान्यभूषितान्येव कङ्कणाद्यैर्विभूषणैः।
येन भूषितवद्भान्ति तद्रूपमिति कथ्यते।।
मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा।
प्रतिभाति यदङ्गेषु तल्लावण्यमिति श्रुतम्।।

काव्यप्रदीपादयस्तु—अवयविनः संस्थानसौष्ठवं लावण्यमित्याहुः। यथा—

तहा रमणवित्थरो जह ण माइ कंचीलदा
तहा सिहिणतुङ्गिमा जह ण एह दिठ्ठी पअम्।
तहा णअणवड्ढिमा जह ण किंवि कण्णुप्पलं
तहा अ मुहमुज्जलं दुससिणी जहा पुण्णिमा[1]।।
विज्ञेया च तथा कान्तिः शोभैवापूर्वमन्मथा।

यथा—

मंजिठ्ठीओठ्ठमुद्दा घणघसणसुवण्णुज्जला अंगलच्छी
दिठ्ठी बालिन्दुलेहाधवलिमजइणी कुन्तला कज्जलाहा।
इत्थं विण्णाणलेहा विहरइ हरिणीचंचलच्छीअ तीए
कंदप्पोजीअदप्पो जुअजणजअणे वद्धलक्खो विभादि[2]।।
कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते।

यथा मम **श्रृङ्गारमञ्जर्याम्**—

धावइ पुरओ पुरओ मुहजोह्लाए तुह पवाहो।
वअणावरणणिअंसणमज्झिममग्गप्पणालेण[3]।।

---

१. तथास्ति नितम्बविस्तरो यथा न माति काञ्चीलता
तथा स्तनतुङ्गना यथा नैति दृष्टिः पदम्।
तथा नयनवृद्धिता यथा न किमपि कर्णोत्पलं
तथा च मुखमुज्ज्वलं द्विशशिकी यथा पूर्णिमा।।इति च्छाया।

२. माञ्जिष्ठी ओष्ठमुद्रा घनघर्षणसुवर्णोज्ज्वला अङ्गलक्ष्मी-
र्दृष्टिर्बालेन्दुलेखाधवलिमजयिनी कुन्तलाः कज्जलाभाः।
इत्थं विज्ञानलेखा विहरति हरिणीचञ्चलाक्ष्याश्च तस्याः
कन्दर्पो जीवदर्पो युवजनजयने बद्धलक्ष्यो विभाति।।इति च्छाया।

३. धावति पुरतः पुरतो मुखज्योत्स्नायास्तव प्रवाहः।
वदनावरणनिरसनमध्यममार्गप्रणालेन।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वावस्थाविशेषेषु दीप्तेषु ललितेषु च।
अनुल्वणत्वं चेष्टाया माधुर्यमिति संज्ञितम्।।

यथा—

भ्रूभङ्गे सहसोद्गतेऽपि वदनं नीतं परां नम्रता-
मीषन्मां प्रति भेदकारि हसितं नोक्तं वचो निष्ठुरम्।
अन्तर्बाष्पजडीकृतं प्रभुतया चक्षुर्न विस्फारितं
कोपश्च प्रकटीकृतो दयितया मुक्तश्च न प्रश्रयः।।

धैर्यं यथा—

चत्तरघरिणी पिअदंसणा अ तरुणी अ पडत्थपइआ अ।
असईसहरिआ दुग्गआ अ ण हु खण्डिअं सीलम्[१]।।

यथार्हप्रतिभानं प्रागल्भ्यम्। यथा—

वृथा परीहास इति प्रगल्भता न नेति च त्वादृशि वाग्विगर्हणा।
भवत्यवज्ञा च भवत्यनुत्तरादतः प्रदित्सुः प्रतिवाचमस्मि ते।।

स्थूललक्ष्यत्वमौदार्यम्। यथा—

प्रातर्वर्णनयानया निजवपुर्भूषाः प्रसादानदा-
द्देवी वः परितोषितेति निहितामान्तःपुरिक्या पुरः।
सूता मण्डनमण्डलीं परिदधुर्माणिक्यरोचिर्मय-
क्रोधावेशसरागलोचनरुचा दारिद्र्यविद्राविणीम्।।

श्रीमन्महीमहिततत्तदसीमधीम-
न्मूर्द्धन्यताकलनसङ्गतधन्यताकः।
लक्ष्मीधरोऽयमुदसूत मुदं प्रसूतां
विश्वेश्वरस्य कृतिरस्य चिरस्य लोके।।

।।इति श्रीपण्डितप्रकाण्डविश्वेश्वरपाण्डेयविरचिता
रसचन्द्रिका समाप्ता।।

●

---

१. चत्वरगृहिणी प्रियदर्शना च तरुणी च प्रोषितपतिका च।
असतीसहचरी दुर्गता च न खलु खण्डितं शीलम्।।इति च्छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमं परिशिष्टम्

श्लोकार्द्धानुक्रमणिका

❁ ❁ ❁

अकाण्डदत्तहुङ्कारा	४९	अपस्मारस्तथोन्मादो	५५
अङ्गप्रत्यङ्गलीलाभि:	४६	अप्रतिपत्तिर्जडता स्याद्	६४
अङ्गान्यभूषितान्येव	७६	अप्रादुर्भवदस्रवारि	३२
अज्ज मए तेन विणा*	४१	अबिभ्रत्यासत्तिं	१७
अज्ञातहृदयतत्त्व:	३०	अभीष्टार्थस्य सम्प्राप्तौ	६२
अणुणअ णाहं*	७	अमअमअ गअणसेहर*	४७
अण्णमहिलाप्पसङ्गं*	१९	अमार्कपातश्रवणै:	३
अतितमां समपादि जडाशयं	५९	अलङ्कारोऽथ वस्त्वेव	४२
अधिक: सर्वेभ्यो य:	५०	अलससिरमणी*	१०
अधिक्षेपापमानादे०	६६	अवदातवेषवत्यां	२५
अधिक्षेपावमानाद्यै:	६७	अवलंबिअ माणं*	१३
अध्वगतिव्यायामान्	६०	अवलंवह मासंकह*	६८
अनभिमतदर्शनेन च	५५	अवाप्यावस्थानं	३२
अनलभावमियं	५०	अविमृष्टं यत्कार्यं	६३
अनाहूतैवैत्य	८	असङ्कुचितलोचना.	३३
अनिमित्तहसितरुदितो०	६८	असम्मुखालोकनमाभिमुख्यं	७५
अनुनयति प्रेयसि	२७	असम्मोहस्तथोत्साह	५४
अनुरक्तौ निषेवेते	४०	अस्तु म्लानिर्लोको	१९
अनुस्वानाभसंल्लक्ष्य०	४२	अस्थानगामिभिरलङ्करणै.	६४
अनेककार्यव्यासङ्गाद्	१७	अस्थानपरुषा या तु	२६
अन्यै: कल्पितमङ्गल०	५५	अस्थानहसितं यच्च	५२
अन्यतत्त्वमतिक्रान्तं	६२	अस्थाने तस्करान् दृष्ट्वा	६१
अन्यत्र व्रजतीति का	१८	अस्मिन्नेव लतागृहे	१२
अन्यनरे सङ्क्रान्ताम्	३०	अहौ वा हारे वा	५७
अन्येन प्रहितं विटेन	२३	अहं त्वकामस्त्वद्भक्त:	४१
अपद्मा श्रीरेषा प्रतिहत०	२५	आअण्णअइ अडअणा*	२२
अपसारय घनसारं	४७	आकुञ्चिताक्षिगण्डं	५२

* (*)चिह्नाङ्कितश्लोका: 'रसचन्द्रिकाया:' मूल एव प्राकृतरूपेणोपनिबद्धा: सन्ति, येषां संस्कृतच्छाया तत्र तत्र टिप्पण्यामुल्लिखिताऽस्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आकेकरार्द्धविप्रेक्षितानि ४६
आक्षिप्तानां सभामध्ये ६६
आक्षिप्तो जयकुञ्जरेण ५५
आघ्रातं कमलं प्रियेण ३२
आज्ञा काकुर्याञ्चाक्षेपो ७४
आणासआइ देन्ती* ४
आथर्वणीमुपनिषद्विद्याम् ४४
आदर्शं समयेन १९
आनन्दामर्षाभ्यां धूमाञ्जन॰ ७१
आम असइह्म अह्मे* ४५
आयातेऽपि महोत्सवे २३
आरोपिता शिलायाम् १०
आलक्ष्य दन्तमुकुलान् ४१
आलक्ष्यैव विपक्ष॰ ६
आलस्यादौर्बल्यात् ६५
आलिङ्गनानि वचना॰ २८
आवेगो राजविद्राव॰ ६३
आसने शयने वापि ४७
आहारापरिणामात् ६६
इति रौद्ररसो दृष्टो ५२
इत्येषोऽष्टविधो ज्ञेय ६४
इयं गेहे लक्ष्मी॰ २९
इयं वनीं घनीभूत॰ २९
इष्टजनविप्रयोगाद् ५८
इष्टजनविभवनाशाद् ६८
इष्टजनस्य कथायां ७४
इष्टानां भावानां प्राप्ता॰ ७५
इह स्थित इहासीत ४७
ईषद्विकसितैर्गण्डै: ५२
ईर्ष्याकलहसन्तप्तो १९
ईर्ष्यातुरा वा निभृता २६
उचिते वासके या तु १६
उत्तमसत्त्व: शेते ६०
उत्तंसितं किसलयं ४४
उत्फुल्लनासिकं यत्तु ५२
उत्फुल्लाननेत्रं ५२
उत्साहाध्यवसानाभ्याम् ६७
उत्साहाध्यवसायाद् ५३
उदयद्यौवना मुग्धा ४
उदास्ते सुरते तत्र ५
उद्देशोऽयं सरसकदली॰ ३१
उद्विग्नात्यन्तमौत्सुक्याद् ४७
उद्वेग: पञ्चमे प्रोक्तो ४५
उन्मीलन्मुकुलकराल॰ ४८
उपविश मृदुतल्पे २५
उर:स्थलमदन्तुरं २
एकच्चि अधूआ* ४४
एकत्रासनसंस्थिति: ६
एकस्मिन् शयने १२
एकान्तदृढग्राही ३०
एकैकशो युवजनं ४३
एता जाग्रति यातरो॰ २५
एते लक्ष्मण! जानकी॰ १३
एवंविधो विधिज्ञै: ३०
एहिसितुमंति णिमि॰* १८
औत्पातिकैर्मन:क्षोभ: ६९
क उव्वरिया के* ११
कथाप्रसङ्गेषु मिथ: सखी॰ ७२
करचरणाङ्गन्यास: ७५
कर्णोत्तंसपरिभ्रमन् ७३
कश्चित्प्रवेपिताङ्ग: ५९
कश्चिन्मत्तो गायति ६०
कस्त्वं शूली मृगय २८
कान्ताभिसरणोद्युक्ता २४
कान्तिरेवातिविस्तीर्णा ७६
कान्ते सागसि शायिते ३०
कामस्तु बाणावसरं प्रतीक्ष्य ६३
कामिन्या: सति बाधकस्य १८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कार्यानिस्तरणकृत: ६४
कालाक्षमत्वमौत्सुक्यं ६५
किञ्चिदून: पीठमर्द ३३
किञ्चिद्दोषं दृष्ट्वा ३०
किं तंवितइणणा* ४६
किं रुअसि ओणअमुही* १०
कुसुमचापजतापसमाकुलं ७१
कुसुमवसन्ताद्यभिध: ३४
कृत्रिमकनकेनेव १९
केदाव किआ अहवा* २९
केनोपायेन सम्प्राप्त: ४५
केशस्तनाधरग्रहणे॰ ७४
कोपात्कोमललोल॰ ६
क्षामक्षामकपोल॰ ४०
खण्डिता विप्रलब्धा वा १६
गन्तुं यदि व्यवसितासि २५
गर्वमसम्भाव्यमिमं ११
गर्वश्चैव वितर्कश्च ५४
गर्वोऽभिजनलावण्य॰ ६४
गर्वोऽसूया तथोन्माद ५३
गहवइ गओह्म॰* ९
गाढालिङ्गनपूर्वमेव ४०
गात्रं पूर्णावयवं २
गुप्ताविदग्धाकुलटा॰ ८
गुरुकार्यान्तरवशाद् २२
ग्रामतरुणं तरुण्या १०
ग्लानि: शङ्का ह्यसूया च ५१
घोरां नारकपालकुण्डलवतीं ५४
चतुरिमकलाकण्ठ॰ ३१
चत्तरघरिणी पिअदंसणा* ७७
चत्वार: प्रहरा: स्मरार्त्तिभि॰ ६५
चरणहृदयकम्पै: ५५
चिन्तावैक्लव्यजनिका ५९
जडता हीनचेष्टत्वम् ४९
जयति यथाजातानां १
जाणइ जाणावेउं* ६
जाता कुहूरुतरवा ३
जातिकालवयोऽवस्था॰ १५
जीवितावधि वनीपक॰ ५३
जे णअस्स तिहुस्णस* ७०
जो कहंवि मह* १२
जोच्चिअ जेऊण जमं* ५२
जं जं सो णिज्झा॰* ४
ण ङ्णाणाहि तिलन्तरं* ६२
णन्देउ सुरअसतिह्ना॰* २९
णवि तह अणालवंती* ७
णिहुअणसिप्पं तह* ६३
णीससिउक्वंपपुलइ॰* ४३
णीसासा हारवल्ली॰* ४९
णेउरकोटिविलग्गं* १३
तच्चापमीशभुज॰ ५९
तच्छ्रमस्तमदिदीक्षत ३१
तत्त्वज्ञानापदीर्ष्यादि॰ ५८
तत्र प्रियवच: साम १४
तत्र वासकसज्जा च १६
तत्संश्रयां कथां युङ्क्ते ४८
तत्स्वप्नायितभोगाङ्क॰ १२
तदद्य विश्रम्य दयालु॰ ४६
तदाकर्ण्य वचस्तस्य ५१
तया प्रोत्साहनं कार्यम् २८
तरुणजनसहाय: ३४
तर्को विचार: सन्देहाद् ६९
तर्जयेत्ताडयेदन्या ५
तस्थौ चित्रपटन्यस्त॰ ५१
तस्या: सान्द्रविलेपन॰ १३
तह माणो माणघणाइ* १५
तहा रमणवित्थरो* ७६
तां मुखगौरवगात्र॰ ६५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिर्यक्पश्चात्पुरस्तादपि ६६
तिर्यङ्मात्रप्रवणनयनो॰ १
तिष्ठत्यनिमिषदृष्टि॰ ४८
तीर्णा वाष्पपरम्परैव ३३
तूलेन तस्यास्तुलना ७१
तेण ण मरामि* ५
ते धीरा चाप्यधीरा च ५
त्रयोदशविधा स्वीया १५
त्रासश्चैव वितर्कश्च ५८
त्रिभागशेषासु निशासु ४८
त्रिविधस्तु मदः कार्यः ६०
त्वत्प्रापकात्त्रस्यति ४६
दिट्ठीअजं ण दिट्ठो* ९
दीर्घत्वमागतवतो २२
दूईकज्जाअण्ण*॰ ३४
दूरानुवर्तिनि स्यात्तस्य ३३
दृष्टिं हे प्रतिवेशिनि ९
दृष्टे लोचनवन्मनाङ् २६
दृष्ट्वा व्यलीकमात्रं ३०
देइ विलासवईण्णं* ६०
देशः सोऽयमराति॰ ५३
देसु अणुपसिअ एह्लिं* १४
देहात्मकं भवेत्सत्त्वं ७२
दौर्गत्यादेरनौजस्यं ६१
द्विविधा शङ्का कार्या ५९
द्वौ शाब्दी शक्तिरष्टार्थी ४५
धत्ते लोभमिव प्रसृत्वर॰ १७
धन्यासि या कथयसि ५
धम्मिल्ले कुसुमोत्करं ७५
धाष्टर्यजैह्मादिसम्भूतम् ६७
धावइ पुरओ पुरओ* ७६
धीराऽधीरा तु रुदितै॰ ५
धीरोदात्तो धीरोद्धतः २९
धृतायुधो यावदहं ६४
ध्यानं चिन्ता हिताप्राप्तेः ६१
नक्तं रत्नमयूख॰ २७
न खलु वयममुष्य १४
न यत्र दुःखं न सुखं ५६
नवमे जडता चैव ४५
नष्टस्मृतिर्हतगतिः ६०
नाथेऽनिशं निजनिवास॰ ९
नाथो मे विपणिं गतो ९
निद्रापगमहेतुभ्यः ६६
निपीतवत्या मधु सन्दधानः ७१
निराकूतैरेव प्रिय॰ ७३
निर्णीय प्रतिवेशिनां १७
निर्मायाभरणं मृणाल॰ ७३
निर्वीर्यं गुरुशापभाषणवशात् ६७
निर्वेदग्लानिशङ्काख्या॰ ५८
निर्वेदश्चैव चिन्ता च ५२
निवृत्तिः प्रत्येकं भवति ६२
निःशेषच्युतचन्दनं ११
निःश्वासोऽस्य न शङ्कितः ६५
निःसंज्ञः स्तब्धगात्रश्च ७०
नीता प्राणसमेन ४
नेतुर्नखक्षतमुदीक्ष्य २१
नोपयातः किमिति स १८
पचेलिमरसोदयं २०
पटालग्ने पत्यौ ७५
पतिप्रियहिते युक्ता २
पत्युरन्यप्रियासङ्गे १२
परसौभाग्येश्वरता॰ ५९
परिशिथिलय ग्रन्थीन् ३४
परोत्कर्षाक्षमाऽसूया ५९
परं जोह्ला अह्ला* ४७
पलाशकुसुमानि ते ५
पशुपइणो रोसा॰* १२
पश्यन्त्या सहजारुणं २१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाअपडिअं अहत्वे*	१५	बाले किं वलयैरलं	७४
पाणिरोधमविरोधितवाञ्छं	७५	बाह्यार्थालम्बनो यस्तु	७२
पान्थः स्वप्नदशां गतः	६६	बिभेति रुष्टासि किले॰	४८
पिअविरहो अप्पिअ.*	७	भक्त्या नन्दकुला॰	६९
पिअसंमरणपलोट्टंत॰*	४६	भयहर्षक्रोधजरा॰	७१
पितुर्मूर्ध्नि स्पृष्टे ज्वलद॰	६७	भवत्सम्भावनोत्थाय	४१
पीताम्बरेण चपला॰	४४	भवद्भवनमागतं	२३
पीनोरुगण्डजघन॰	२	भव हृदय सावधानं	६८
पुनरेव तु पुरुषगुणान्	३०	भूतपिशाचग्रहणा॰	६५
पुनस्तास्त्रिविधाः सर्वा	१५	भूयो भूयः सविधनगरी॰	५१
पुरश्चक्षूरागस्तदनु	२८	भ्रुकुटिकुटिलोत्कटमुखैः	५९
पुलककुलकञ्चुकवृतं	५९	भ्रूभङ्गे सहसोद्गतेऽपि	७७
पुसिआ कण्णाह॰*	७	मत्रस्तावमकुर्वति	७४
पुंसां दर्शय सुन्दरि!	१९	मदस्खलितसंलापा	२४
पृथिवी तावत्त्रिकोणा	१०	मनःक्षेपस्त्वपस्मारो	६५
पृष्टा न किञ्चिद् ब्रूते	४९	मनःप्रसादो हर्षः स्याद्	६३
पेच्छइअ लद्धलक्खं*	६४	मनःसम्मीलनं निद्रा	६५
प्रणयरभसादाभासत्व॰	१४	मन्दाकिनीनन्दनयो॰	२८
प्रत्यग्रोन्मेषजिह्मा	६६	मम प्राणाधिके तस्मिन्	६४
प्रत्यादिश्य रुषां	१९	मम मअणमणंगं*	५१
प्रथमे त्वभिलाषः स्याद्	४५	मयि व्यक्तं गोत्रस्खलन॰	१३
प्रबुद्धायाः प्रातर्लसदलसदो॰	६१	मा कुण पडिवक्खसुहं*	१४
प्रभाते पृच्छन्ती॰	२७	माजूर पिआलिङ्गण॰*	४८
प्राङ्गणकोणेऽपि निशा॰	२९	मानं त्यक्ष्यसि कान्त॰	३४
प्रातर्वर्णनयाऽनया निज॰	७७	मानः कोपः स तु द्वेधा	११
प्रातिवेश्या सखी दासी	२८	मालत्याः प्रथमावलोक॰	६१
प्रातः प्रवालमणिना	२१	माल्याच्छादनभूषण॰	७३
प्राप्तानामपि वचसां	७५	मुक्ताफलेषु च्छायायाः	७६
प्राप्तानामुपभोगः	६२	मुक्ताः पतन्ति भूमौ	४०
प्रारब्धकार्यासिद्ध्यादे॰	६४	मुखनेत्रविकूणनया	५५
प्रारब्धनिधुवनैव स्वेद॰	७०	मुखवर्णपरावृत्त्या	७१
प्रियान्यव्यावृत्तिः	२६	मुखं यदि किमिन्दुना	४२
प्रेम्णः कुटिलगामित्वात्	११	मुग्धाक्ष्या दयितागमस्य	१६
बन्धभ्रंशस्खलदलक॰	२५	मुग्धे कृत्रिमतद्व्यति॰	२७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुहपेच्छओ पई से* ६३
मुहुर्मुहुर्निःश्वसितैः ४६
मुहुः कण्टकितत्वेन ७०
मोहो विचित्तताभीति॰ ६१
मंजिट्ठीओट्ठमुद्दा घणघसण॰* ७६
यच्च कामसुखं लोके ५६
यत्किञ्चनेदं वित्तमस्यां ५४
यत्त्वतिशयार्थयुक्तं ५५
यत्र तु रतिः प्रकृष्टा ४०
यथा नराणां नृपतिः ४०
यदिन्दावानन्दं ४९
यदि प्रियावियोगेऽपि ५०
यस्य प्रतीतिमाधातुं ३६
यस्याकर्णनमात्रतोऽपि ५०
यस्या दूतीं प्रियः प्रेष्य २२
यामि विधावभ्युदिते ४३
या वल्लभागमन॰ २४
या विप्रियेऽपि तिष्ठन्तं २६
ये त्विमे सात्त्विका भावा ६९
रजनिरजनि चन्द्रिका॰ ३९
रत्यादयः स्थायिभावाः ५४
रत्यायासकलाभ्यासाद् ५८
रत्युपचारनिपुणो ३०
रसविच्छेदहेतुत्वान् ४९
रसाभिज्ञानयोग्यत्वं ७२
राज्याभिषेकसलिल॰ ४३
रात्रौ वारिभरालसा॰ ३२
रूपयौवनलावण्यैः ७५
रेणुर्बाधां विधत्ते ६९
रोगादिभिः प्रागवस्था ६८
रोमाञ्चस्त्वभिनेयोऽसौ ७०
लक्ष्मीनिःश्वासानल॰ ४४
लज्जाद्यैर्विक्रियायोगाद् ६७
लज्जाधोगूढमुखो ६३
लज्जाविदा सीलंअ* ३१
लीनेन प्रतिबिम्बितेव ४६
लीलाविलासो विच्छित्ति॰ ७२
लंकालआणं पुत्तअ* ४२
वअणे वअणे अ* ४९
वयस्याभिर्नीता कथमपि २२
वसन्ते सर्वसस्यानां ३५
वाक्पारुष्यकरी चित्त॰ ६३
वागङ्गालङ्कारैः श्लिष्टैः ७३
वावारविसम्वाअं* ७२
वाटी लाटीदृगम्भोरुह॰ ५७
वानीरवने वल्लभ॰ २२
वाष्पपरिप्लुतनयनः ५८
वाष्पाम्भसा मृगदृशो ७१
वाहित्ता पडिवअणं* १०
वाहोल्लफुरि॰* ६
विग्रहाच्च शयने १५
विचित्रोज्ज्वलनेत्रान्तः १८
विज्ञानशौचसमुद्भव॰ ६३
विज्ञेया च तथा कान्तिः ७६
विधाय वरवर्णिनीम् २४
विनयति सुदृशो दृशः १३
विभावा अनुभावाश्च ३८
विरहविषमः कामो ३१
विरहादेर्मनस्तापो ६८
विविधानामङ्गानां वागङ्गा॰ ७४
विवृण्वती शैलसुतापि ७३
विश्लेषतस्तव परि॰ २३
विसव्व विसकन्दली* ६८
विहतं चेति सम्प्रोक्ता ७२
वीक्ष्य प्रियस्य रदन॰ २१
वृथा परीहास इति ७७
वेगादुत्पत्य भूमौ ६६
वेगं करोति तुरगः ६१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेश्यायाः कुलटाया वा	२४	सन्धत्ते श्रुतिसीम्नि	१६
व्रीडाचपलताहर्षा	५८	सन्निपातग्रहादिभ्य	६८
व्यजनग्रहणैर्वापि	७०	समदा मृदुचेष्टा च	२४
व्यसनाभिघातपूर्ववैरा॰	६२	सम्भूयैव सुखानि चेतसि	४५
व्यासङ्गादुचिते यस्या	२०	सम्भोगहीनसम्पद्	३३
व्युत्तिष्ठन्ते हृदयगतयो	३	सम्मोहानन्दसम्भेदः	५९
शक्तिग्रहं व्याकरणोपमान॰	३५	सर्वावस्थाविशेषेषु	७७
शनैरशृण्वन्नवदन्	५१	सर्वासामेव नारीणां	२६
शरकाण्डपाण्डुगण्ड॰	३९	सर्वेषां समवेतानां	५४
शस्त्रीकृतस्तरुवरो	४१	सव्यापसव्यत्यजनाद्	५०
शान्तस्य शमसाध्यत्वान्	५६	सहसा भूमौ पतनं	६५
शीतक्रोधभयश्रम॰	७१	साकूतं करवाणि	२०
शीतभयहर्षरोग॰	७१	साकूतं ग्रथिता दृशोः	३२
शीलं साधु मिमील	२०	साटोपकूटकपटा॰	३४
शृङ्गारवीरयोर्हासो	६९	सा तइ सहत्थदिण्णं*	४३
शृङ्गारेऽस्य सहाया	३३	सा तुज्झ वल्लहा*	४४
शोभा कान्तिश्च दीप्तिश्च	७५	सामदानादिसंयोगैः	४८
श्यामा विलोचनहरी	१८	साम भेदोऽथ दानं च	१४
श्रमादिजन्यमालस्यं	६१	सामादौ तु परिक्षीणे	१४
श्रमादिना दृश्यताम्	७०	सायं स्नानमुपासितं	२६
श्रमः खेदोऽध्वगत्यादेः	६०	सा रामणीयकनिधे॰	४७
श्रवणादर्शनाद्वापि	५०	सारासारविचारैक॰	१
श्रवणं तु भवेत्तत्र	५०	सा सर्वतोऽनुरक्ता	२७
श्रान्तिच्छेदोपदेशाभ्यां	६७	सारोपान्या तु यत्रोक्तौ	३६
श्रीमन्महीमहिततत्तदसीमधीम॰	७७	सा सुहअ अहिअ॰*	८
श्लिष्टः कण्ठे किमिति	४१	सितं वसनमर्पितं वपुषि	७४
श्वस्तस्याः प्रियमाप्तु॰	६५	सुधायाः सध्रीची	३
सङ्केतगोचरमुपेत्य	२२	सुप्तं विबोधोऽमर्षश्च	५८
सङ्कोचश्चेतसो व्रीडा	६३	सुरतातिशयैर्बद्धो	१८
सजातीयविजातीयैः	४०	सुव्यक्तविक्रियो भावो	७२
सञ्चारो रतिमन्दिरा॰	१	सुहृदापि वार्यमाणो	३०
सञ्जीवणोसढं विअ*	६९	सोच्छ्वसितैर्निःश्वासैः	६१
स त्वं मदीयेन शरीरवृत्तिं	५३	संलीना स्वेषु गात्रेषु	२४
सन्तापो हृदये स्मरानलकृतः	५८	संवाहणसुहरस॰*	२१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्खलिताघूर्णितनयन: ६०
स्तम्भस्तथालम्भितमां ७०
स्तम्भ: स्वेदोऽथ मोहश्च ५६
स्तम्भ: स्वेदोऽथ रोमाञ्च: ७०
स्तिमितकुसुमितानाम् ३९
स्त्रीणां प्रयोगविषये ३०
स्त्रीनीचप्रकृतिर्ह्येष ५२
स्थानासनगमनानां ७३
स्थायी स्याद्विषयेष्वेव ५७
स्थितिशौर्यवीर्यधैर्यैः ५३
स्थित: सोऽहं मैत्रावरुणि॰ ५३
स्नाता तिष्ठति कोशला॰ २९
स्नात्वा वारिणि चन्दनै: १७
स्निग्धं वीक्षितमन्यतोऽपि ६७
स्पर्शग्रहणोल्लासि॰ ५५
स्पर्शभयगीतहर्ष॰ ७०
स्मरमन्दीकृतव्रीडा ४
स्मरशास्त्रमधीयाना २७
स्मितमथ हसितं ५१
स्मितमधुरवचनरागो ६०
स्मितहसितरुदितभय॰ ७४
स्मृतिभिन्नमोहतमसो ६३
स्मृति: पूर्वानुभूतार्थ॰ ६२
स्मेरस्वर्णसरोजकेसर॰ ५०
स्रस्तांसावतिमात्र॰ ६०
स्वचरणपीडानुमित॰ १५
स्वप्नो निद्रामुपेतस्य ६६
स्वास्थाभ्याससमुत्था ६२
स्वेदश्च वेपथुश्चैव ५५
हत्थेसुअ पाएसु अ* २३
हर्षभयरोगविस्मय॰ ७०
हल्लफलल्हाण॰* ११
हस्तस्वस्तिकगोपित॰ ४
हिअअम्मि वससि* ७
हित्वा लज्जां समाकृष्य २४
हृत्तस्य यन्मन्त्रयते ४८
हंसै: शैवलमञ्जरीति ८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयं परिशिष्टम्

ग्रन्थ-ग्रन्थकारनामानुक्रमणिका

अभिनवगुप्तपादाचार्यः ३८
अमरकोशः २४
कामशास्त्रम् २, ३४
काव्यप्रकाशः ३६, ३९, ४२, ५६
काव्यप्रदीपः २३, ५६, ६९, ७६
क्षीरस्वामी २४
भट्टनायकः ३८
भट्टलोल्लटः ३७
भरतः २, १६, २४, २८, ४९, ७२
भरतसूत्रम् ३७
भोजराजः २४
योगीश्वरः २
रतिरहस्यम् २
रत्नाकरः ५४
रसगङ्गाधरः ४०, ५९
रुद्रचन्द्रदेवः १७, ३४, ५०, ६६, ७५
विज्ञानेश्वरः २
विद्यानाथः ४, २४, ३३, ७२
शङ्कुकः ३७
शङ्खस्मृतिः २
शृङ्गारमञ्जरी ७६
साहित्यदर्पणः ५, ३३, ४०, ४९
स्कन्दपुराणम् २
हरिहरः ४५
हलायुधः ७२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

५६ वर्षे	मार्गशीर्ष-फाल्गुन-पूर्णिमे, वि.सं. २०५८	३-४ अङ्कौ

संस्कृते प्राविधिकविज्ञानम्[१]

मिश्रोऽभिराजराजेन्द्रः

कुलपतिः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयः

वाराणसी (उ.प्र.)

❋ ❋ ❋

देववाण्यां संस्कृते न विद्यन्ते प्राविधिकविज्ञानविषया (Technical Science Subjects) इति वक्तुं न समीचीनं प्रतिभाति। संस्कृतं न केवलं काव्यविच्छित्ति-सम्पोषणपरं वाङ्मयम्। वस्तुत आऋग्वेदमन्त्रसमवायेभ्य एकादशं ख्रिस्ताब्दं यावत् संस्कृतभाषया शतमिताः सहस्रमिता वा कृतयो विविधप्राविधिकविज्ञानसम्बद्धाः प्रणीय प्रस्तुताः, या अतिरिच्यन्ते काव्यग्रन्थेभ्यः। दार्शनिकसम्प्रदायानां नाट्यकाव्यकाव्यशास्त्रादीनां मूलस्रोतांसीव सर्वेषां प्राविधिकविज्ञानानामपि मूलस्रोतांसि केवलमृग्वेद एवान्वेष्टुं शक्यन्ते। वृत्रनमुचिशम्बरबलरौहिण-वृङ्गदादिभिरसुरैस्सह देवराजस्येन्द्रस्य तुमुलसङ्गरसन्दर्भ एव प्राक्तनी युद्धकला सविस्तरं निरूपिता दृश्यते वज्रधनुरादिविविधायुधप्रयोगसहकृता। धेनुचौराणां पणीनां स्थितिपरिज्ञानाय पुरन्दरो देवशुनीं सरमां प्रणिधिं नियुङ्क्ते। सरमामुखादेव पणिस्थितिं सम्यग् विज्ञायासौ शत्रूणां नवनवतिमितान् लौहदुर्गान् भिनत्ति। किञ्च, दाशराज्ञयुद्धेऽपीन्द्रः सुदासस्य साहाय्यं विधत्ते[२]।

१. Technical Science in Sanskrit Literature.

२. शतमश्मन्मीयानां पुरमिन्द्रो व्यास्यत् दिवोदासाय दाशुषे। (ऋ.सं. ४.३०.२०) प्रति यदस्य वज्रं वाह्वोर्धुर्हत्वो दस्यून् पुर आयसीर्नि तारीत्। (ऋ.सं. २.२०.८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथर्ववेदस्यौषधीयं महत्त्वमपि न शक्यते प्रत्याख्यातुम्। अरण्यवासिनोऽस्माकमृषयो महर्षयश्च प्रत्येकं वनस्पतेरौषधीयान् गुणान् सुष्ठु ज्ञातवन्तः। अत एव ते साफल्यमवापुरायुर्विज्ञानप्रतिष्ठासन्दर्भे। सा खल्वायुर्वेदीयोपचारपद्धतिरद्यापि महीयते सर्वोत्तमतया स्वीयया।

शतपथब्राह्मणो मेघाङ्गभूतानि धूमज्योतिस्सलिलमरुदादीनि विवृणोति, वार्षुकजलधराणां लक्षणानि च प्रस्तौति। अधिमेघदूतं 'धूमज्योतिस्सलिलमरुतां सन्निपातः क्व मेघः' इति प्रतिपादयन् कविकुलगुरुः कालिदासोऽपि धूमनिर्मितिसिद्धान्तं शतपथब्राह्मणादेवाऽदत्त इति प्रतीयते।

किञ्च, वेदमन्त्रेभ्य एव काश्चनान्या अपि सूचना ग्रहीतुं शक्यन्ते, याः प्राविधिकविज्ञानस्य प्रत्नत्वं साधयितुं क्षमाः। ऋग्वेदो भुज्योर्नावं परिचाययति या खलु गभीरजलराशौ शतसंख्यैररित्रैः प्रवर्तयितुं शक्यते स्म—'शतारित्रां नावम्' इति (ऋग्वेदः १.११६.५)। ऋग्वेदयुगीना भारतीया विमानस्यापि नित्यप्रयोक्तार आसन्। तुग्रुनामा नरपतिः स्वतनयं भुज्युनामानं केनचिदन्तरिक्षगविमानेन प्रहिणोति यत्खलु नियन्त्रितमासीदश्विनीकुमाराभ्याम्। ऋग्वेदस्यैवापरस्मिन् मन्त्रे (१.३४.२ संख्यके) अश्विनीकुमारयोः कश्चिद्रथो वर्ण्यते य आसीत् त्रिचक्रात्मकस्त्रिस्तम्भात्मकश्च। अश्वविरहितोऽयमासीद्रथो यो हि वायुमण्डले निर्विघ्नं तर्तुमशकत्।

महर्षिभरद्वाजप्रणीतस्य यन्त्रसर्वस्वस्य सम्पादकः स्वामी ब्रह्ममुनिवैमानिकप्रकरणस्य स्वोपज्ञोपोद्घाते प्रकाशयतीदं रहस्यं यद् भरद्वाजस्य कृतिरियं वेदमन्त्राणां प्रामाण्येनैव प्रणीता वर्तते। तथ्यमिदं वेदमन्त्रोद्धरणैः पुष्टिमानीयते तेन। सत्यव्रतसामश्रमीमहोदयोऽप्येवम्मानी यत्प्रायेण सर्वाण्यपि प्राविधिकविज्ञानानि बीजरूपेण वेदमन्त्रेष्वेव प्रतिष्ठितानि, किञ्च सूक्ष्मरूपेण परोक्षशैल्या वा। अमरीकादेशस्य लेखिका ह्वीलरविलेक्सनाम्नी स्वोपज्ञग्रन्थे **'सब्लाइमिटी ऑफ दि वेदाज़'** इत्याख्ये स्फुटं प्रतिपादयति यद् भारतीया ऋषयो वैमानिके, नौकायने, विद्युत्तन्त्रे, सूक्ष्मतरङ्गविज्ञाने च दक्षा आसन्।

इदमपि सुविदितमैतिहासिकं तथ्यं यत् तलपदेबन्धवो भारताभिजना १८९५ मिते खिस्ताब्द एव स्वोपज्ञं विमानं प्रस्तोतुं साफल्यमवापुः। राइटबन्धुभ्योऽष्टवर्षपूर्वमेवेदं वृत्तं घटितम्; परन्तु भारतीयानामस्माकं पारतन्त्र्यवशादेवेदं श्रेयस्तलपदेबन्धुभ्यो न दत्तम्। अद्यापि सडिण्डिमनादमिदमेवोद्घोष्यते समौढ्यं यद्विमानमिदम्प्रथमतया निर्मितं राइटबन्धुभ्यामेव १९०३ मिते खिस्ताब्दे।

परमार्थतो विमाननिर्माणज्ञानमवाप्तवान् श्रीशिवजी-बापूजी-तलपदेमहोदयो विपश्चित्तल्लजमहर्षिसुब्बारायशास्त्रिकृपया। स खलूवास मुम्बय्यां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुक्करवाडीसमीपस्थे चिडाबाजारनाम्न्यग्रहारे। पश्चाच्चासौ स्वतनयेन विनायकेन सहैव मलडनाम्न्युपनगरे स्थानान्तरित:। विनायकस्य मृत्युर्विंशशताब्द्याः षष्ठदशकेऽभवत्। तलपदेमहाभागस्य धर्मपत्न्यपि महाविदुषी संस्कृतज्ञा चासीत्। तादृग्गुणविशिष्टायाः पत्न्या अनुजस्य च साहाय्येन तलपदेमहोदयः स्वकीयं विमानं घटयति स्म। मुम्बय्यास्सागरतटवर्तिनि चौपाटीक्षेत्रे पञ्चकलावधि तलपदेघटितमिदं विमानं १५०० फुटमिततुङ्गतामारोह्य समुड्डयनं विदधे। बी. जयकरः, एन्. रानाडे, लालजी-नारायणजी, बडौदामहाराजस्सयाजीरावगायकवाड: सहस्रशोऽन्ये च समुपस्थिता जना ऐतिहासिकवृत्तमिदं प्रत्यक्षीकृतवन्तः। हिन्दुस्तान-एरोनाटिक्ससंस्थया तस्य विमानस्य मूलशरीरावयवसंस्थानमिदानीमपि सुरक्षितं तिष्ठति ऐतिह्यगौरवदृष्ट्या।

वेदेषु पुराणेषु च विमानानामष्टप्रकारा वर्णिताः सन्ति, येषां षष्ठं पुष्पकमिति, अष्टमञ्चापि मरुत्सखेति समुच्येते। तलपदेनिर्मितं विमानमनयोरेव द्वयोर्विमानप्रकारयोः समन्वितरूपमासीत् प्रविधिदृष्ट्या[1]।

वेदोल्लिखितं वैमानिकसाक्ष्यजातं पौराणिके वाङ्मये भूयस्त्वेन चरितार्थतां भजते। वाल्मीकिरामायणोपलब्धं पुष्पकविमानप्रकरणं तु सर्वविदितम्। स्वतश्चालितमासीदिदं विमानं कामगञ्च। विमानस्यासौ प्रविधिः (Technique) विमानतन्त्रैतिह्येऽद्याप्यविकसित एव परिलक्ष्यते। श्रीमद्भागवतपुराणेऽपि साक्ष्यद्वयमुपलभ्यते विमानसन्दर्भस्य। तत्र शाल्वराजस्य सौभाख्यविमानसन्दर्भः प्रथमः। महर्षिकर्दमकल्पितविमानसन्दर्भो द्वितीयः। शाल्वस्य सौभाख्यं विमानन्तु विध्वंसककोटिक(Cruiser)मासीत्। सान्द्रमेघघटामपि स्रष्टुमिदं क्षमते स्म आत्मानं परितो येन तस्यास्तित्वमपि प्राच्छाद्येत। महर्षिकर्दमकल्पितं विमानमपि सर्वर्तुसौख्यसम्पन्नमासीत्। विमानवातायनोत्कीर्णाः पारावता निजया सजीवतया साङ्गोपाङ्गतया च वन्यानपरिचितान् पारावतानपि निर्भयं सङ्गमयितुमामन्त्रयामासुः। इदं विमानमपि कामगं चालकरहितञ्चैवासीत्[2]।

सम्प्रति, प्राचीनभारते विज्ञानस्य प्रविधेश्च समुन्नतिं प्रदर्शयितुमुपलब्धं प्रमाणजातमेकैकशः परीक्षिष्ये। तत्रापि ज्यौतिषं खगोलविज्ञानं गणितशास्त्रञ्च मिथस्समन्वितानि स्वीक्रियन्ते। भारतीयं खगोलशास्त्रन्तु प्रत्नत्वदृष्ट्याऽसंशयमेव संस्पृशति वैदिकं वाङ्मयम्। यतो हि निगदति ऋषिः कस्मिंश्चिन्मन्त्रे—

'येनोदितेन दिनमस्तमितेन रात्रिः' इति।

१. टाइम्स ऑफ इण्डिया, ६.९.९५ मितोऽङ्कः।
२. श्रीमद्भागवतम्, पञ्चमदशमस्कन्धौ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदितप्रायो रविर्दिनमानयति रात्रिञ्च पश्चात्कृत्य निलीयते। इदमप्यासीद् वेदर्षिचिन्तनं यत्सान्ध्यकाले मार्तण्डोऽधिसागरजलं निमज्जति, समुदयति च शैलशिखरादन्येद्यु:। यथाह तैत्तिरीयब्राह्मणम्—

'य उदगान्महतोऽर्णवाद् विभ्राजमान सलिलस्य मध्यात्'।। (२.१)

क्षीयमाणा वर्धमानाश्च कलाश्चन्द्रमसो मासस्य द्वयो: पक्षयो: क्रमेण, समीक्षितास्तिष्ठन्ति ऋषिभि: स्वानुभवप्रमाणपुरस्सरम्। तद्यथा—

'नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम्।
भागं देवेभ्यो विदधाति आयन् प्रचन्द्रमास्तिरते दीर्घमायु:'।।

(ऋग्वेदे-१०.८५.१९)

यद्यपि मन्त्रोऽयं सर्वथाऽऽलङ्कारिक एव प्रतिभाति निसर्गतस्तथाप्युत्तरवर्तिनो भाष्यकारा अस्य निर्गलिताभिप्रायं खगोलतथ्यपरं विवृण्वन्त्येव। एवमेव, मन्त्रान्तराणि बहून्यपि महनीयानि वैज्ञानिकतथ्यानि प्रकाशयन्ति। उदाहरणार्थम्—

अन्तरिक्षं नाम पक्षिमार्ग: (ऋग्वेदे-१.२५.७)।
सूर्य: द्युलोके सर्वोच्च: (तत्रैव-१.५७.११)।
चन्द्र: नक्षत्रमण्डले सञ्चरति (तै.सं. ७.५.२३.१)।
पृथ्वी लघुतमा विश्वमपारम् (ऋग्वेदे-१.५२.११)।
ऋतून् प्रशासद् विदधौ सूर्य: (तत्रैव-१.९५.३)।

गीर्वाणसुधापत्रिकायां प्रकाशिते स्वनिबन्धे श्री एस्. बी. वेलणकरमहोदयो वैदिकखगोलविद्याया: साङ्गोपाङ्गं विवरणं प्रकाशयति[1]। वैदिकशुल्बसूत्रोपलब्धा ज्यामिति:, दशमलवसंवलिता संख्यापद्धति:, बीजगणितादीनि च भारतीय-खगोलविद्याया गणितस्य च प्राचीनतां साधयन्त्येव। लगधप्रणीतं वेदाङ्गज्यौतिषं वैदिकपारम्परिकखगोलयोर्मध्ये तिष्ठति। किञ्च, परवर्तिन: खगोलशास्त्रिण: खगोलविद्याधिगमक्षेत्रे विधातृसूर्यवसिष्ठमनुसूर्यसोमलोमशमरीचिव्यासनारदाङ्गिर-श्शौनकभृगुच्यवनगर्गकश्यपपराशरप्रभृतिप्रत्नर्षीणां प्रामाण्यं प्रायेण समुद्धरन्ति, तथापि काश्चन एव प्राचीना: संहिता: सम्प्रत्युपलभ्यन्ते, यथा—नारदसंहिता, पराशरसंहिता, काश्यपसंहितेति। एवं सत्यपि, भारतीयप्राविधिकविज्ञानानां ख्रिस्तपूर्वं वैभवं साङ्गोपाङ्गत्वञ्च सम्यगनुमातुं शक्येते।

---

१. गीर्वाणसुधा, अक्टूबर-नवम्बर, १९९५ मितोऽङ्क:। प्राचीनभारते खगोलशास्त्रज्ञानम्—श्री एस्. बी. वेलणकर:।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतदनन्तरमेव समवाप्यते, खगोलविदां गणितज्ञानां च काप्यनवच्छिन्ना परम्परा। आर्यभटीयकार आर्यभट: प्रथम: (४७६ खिस्ताब्दीय:), बृहज्जातककारो वराहमिहिर: (खैस्तषष्ठशतकीय:), महाभास्करीयकारो भास्कराचार्य: प्रथम: (खैस्तषष्ठशतकान्तोत्पन्न:), ब्रह्मस्फुटसिद्धान्त-खण्डखाद्ययोश्च प्रणेता ब्रह्मगुप्त: (६२८ खिस्ताब्दीय:), सिद्धान्तशिरोमणि-लीलावतीकारो भास्कराचार्यो द्वितीय: (द्वादशशतकीय:), ग्रहलाघवरचयिता गणेशदैवज्ञश्च सर्वेऽप्येते प्रतिभाधुरीणा भारतीयां खगोलविद्यां समृद्धां विदधिरे। यद्यपि सर्वमपि योगदानं तेषामत्र समीक्षितुमशक्यं तथापि महनीयानि तथ्यानि कानिचन समुद्ध्रियन्ते। यथा—

१. सिद्धान्तशिरोमणेर्गोलाध्याये भास्कराचार्यो द्वितीय **आकर्षणसिद्धान्तं** सम्यक्तया प्रतिपादयति—

'आकृष्टशक्तिश्च मही'। (गोला.३.६)

अत्रेदमवधेयं यदस्य सिद्धान्तस्य मिथ्याप्रचारित आविष्कारको न्यूटन: षोडशशतके खैस्ते समुत्पन्न:।

२. आर्यभट: प्रथम: सिद्धान्तयति यत् पृथ्वी सूर्यं परित: परिभ्रमति। सूर्यस्तु सर्वथा स्थिर एव; परन्त्विदमेव सत्यं गैलीलियोमहोदय: सप्तदशशतके खैस्ते ज्ञातवान्।

३. आचार्यो ब्रह्मगुप्त एव चतुर्विंशत्यध्यायात्मके स्वोपज्ञे ब्रह्मस्फुटसिद्धान्ते यन्त्राध्यायं प्रास्तावीत्। स्वनिर्मितायां वेधशालायां ब्रह्मगुप्तो विविधानि यन्त्राणि स्थापितवान्, ग्रहाणां नक्षत्राणां सूर्यचन्द्रग्रहणयोश्च गतिपरिज्ञानार्थम्।

ब्रह्मगुप्तस्यैव परम्परामनुसरन् भास्कराचार्योऽपि ताम्रघटी-शङ्कु-यष्टि-चक्र-चक्रार्धयन्त्राणां प्राविधिकं संविधानकं (Technical Structure) विशदीचकार। धीयन्त्रमसौ सर्वयन्त्रोपरि प्रतिष्ठापितवानित्यपि विशेषोऽत्र। वस्तुतो मानवबुद्धिरेव (Human mind) श्रेष्ठतमं यन्त्रमित्यत्र न कोऽपि सन्देह:। भास्कराचार्यो यन्त्रजातमिदमभिलक्ष्य साङ्गोपाङ्गमेकं पृथग्ग्रन्थं सर्वतोभद्राभिधं प्रणिनाय। परवर्तिनि काले महेन्द्रसूरिप्रणीते यन्त्रराजे, पद्मनाभकृते ध्रुवभ्रमयन्त्रे, चक्रधरप्रणीते यन्त्रचिन्तामणौ, गणेशदैवज्ञाविष्कृते प्रतोदयन्त्रे, चिन्तामणिदीक्षितप्रणीते च गोलानन्दे भास्कराचार्यस्यैव यन्त्रसिद्धान्ता उत्तमर्णीकृत्य सङ्गहीता दृश्यन्ते।

परन्तु सर्वाण्यपीमानि यन्त्राणि चिरकालं यावद् ग्रन्थेष्वेव सीमितान्यासन्। आमेरशासको महाराजजयसिंह एवेदम्प्रथमतया १७३० मिते खिस्ताब्दे जयपुरनगरेऽभिनवां वेधशालां निर्मितवान् यत्र सम्राड्यन्त्र-नाडीवलय-दिगंशभित्ति-शङ्कुयन्त्राणां स्थापना जाता। तानि यन्त्राण्यद्यापि तत्राक्षतानि तिष्ठन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रहणप्रक्रियामवलम्ब्य साङ्गोपाङ्गं विवरणमुपलभ्यते भास्कराचार्यप्रणीतस्य सिद्धान्तशिरोमणेरष्टमेऽध्याये। सूर्यग्रहणं चन्द्रग्रहणं वा न खलु केतुहेतुकं राहुहेतुकं, यथा वर्णितं पुराणेषु। वस्तुतस्सूर्यग्रहणं घटते चन्द्रे समागते सति पृथ्वीसूर्ययोर्मध्ये। इदमेवोच्यते सूर्यग्रहणम्। यथाऽऽह भास्कराचार्यः—

पश्चाद्भागाद् जलदवदधः संस्थितोऽभ्येत्य चन्द्रो
भानोर्बिम्बं स्फुरदसितयाऽऽच्छादयत्यात्ममूर्त्या।
पश्चात्स्पर्शो हरिदिशि ततो मुक्तिरस्याऽत एव
क्वापि च्छन्नः क्वचिदपिहितो नैष कक्षान्तरत्वात्।।

(गोलाध्यायः-८.१)

एवं हि, शतमिताः सहस्रमिता वा विषया व्याख्यातास्तिष्ठन्ति भारतीयखगोलगणितशास्त्राभ्याम्। ख्रिस्तीयपञ्चमशताब्दीतोऽष्टादशतमशतकं यावद् भारतीयं खगोलशास्त्रमभिनवाविष्कारक्षेत्रे खगोलीयानुसन्धानक्षेत्रे वा परां काष्ठामधिरूढं रेजे। हन्त! तथाप्यात्मसम्मानभावाभाववशाद् राजनैतिक-पारवश्यवशाच्च समुचितं श्रेयो भारतीयेभ्यो वैज्ञानिकेभ्यो न प्रदत्तं पाश्चात्यैः। व्यंसकाः सन्तोऽपि त एवाग्रेसरीभूता गण्यन्ते।

खगोलशास्त्रं गणितञ्चेत्युभयमपि वृक्षस्यैकस्यैव शाखाद्वयम्। अद्यतनं गणितशास्त्रं प्राचीनकाले राशिविद्या-धूलिकर्म-परिलेखादिसंज्ञाभिः प्रत्यभिज्ञायते स्म। भास्कराचार्यो द्वितीयः सर्वप्रथमं गणितशास्त्रं त्रेधा विभाजितवान्—गणितं बीजगणितं पाटीगणितञ्चेति। आर्यभटेन प्रथमेन ख्रैस्तेऽब्दे पञ्चम एव गणितसूत्राणि घटितानि। बहुविस्तरे सत्यपि गणितेऽङ्कविद्याऽङ्कगणितमेव ज्यौतिषजीवातुभूततया प्रख्यातं जातमनेकैः कारणैः—

यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद् वेदाङ्गशास्त्राणां गणितं मूर्ध्नि संस्थितम्।।

आचार्यवराहमिहिरोऽपि ज्योतिश्शास्त्रं सिद्धान्तहोरासंहिताभिर्विभाजयति। कालमानो ग्रहसञ्चारस्सूर्यचन्द्रोपरागश्चेति सर्वमपि सिद्धान्तेऽन्तर्भवति। होरास्कन्धस्तावज्जातकसम्बद्धः। अनेन जातकस्य लग्नचक्रं शुभाशुभग्रहदशा जीवनचक्रञ्चेति त्रितयं परिज्ञायते। संहितास्कन्धस्यैव नामान्तरं मुहूर्तस्कन्ध इति। अनेन स्कन्धेनाचार्यो व्याख्याति विविधान् योगान्, मुहूर्तानां शुभाशुभपरिणामांश्च। नारदसंहितायां स्कन्धत्रयमिदं वेदचक्षुस्त्वेनाङ्गीकृत्य महनीयतामापादितम्। तद्यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिद्धान्तसंहिताहोरारूपस्कन्धत्रयात्मकम्।
वेदस्य निर्मलं चक्षुः ज्योतिश्शास्त्रमनुत्तमम्।।

वराहमिहिरोऽप्यनुवदति तदेव शब्दान्तरैः—

गणितं जातकं शाखां यो वेत्ति द्विजपुङ्गवः।
त्रिस्कन्धज्ञो विनिर्दिष्टः संहितापारगश्च सः।।

भास्कराचार्यस्तावद् विवृणोति गणितस्य स्वरूपद्वयं व्यक्तमव्यक्तञ्च। तद्यथा—

द्विविधगणितमुक्तं व्यक्तमव्यक्तयुक्तं तदवगमननिष्ठः शब्दशास्त्रे पटिष्ठः।
भवति यदि तदेदं ज्यौतिषं भूरिभेदं प्रपठितुमधिकारी सोऽन्यथा नामधारी।।

यदि कोऽपि ज्योतिर्विद् गणितशास्त्रे वैचक्षण्यं न धत्ते, तर्हि कथमसौ व्याख्यातुं शक्नुयाद् नक्षत्रप्रभावरहस्यं मानवानां व्यवहारसन्दर्भे? गणितज्यौतिषन्तु सर्वात्मना गणितीययोगानवलम्बते। एतज्ज्ञानविरहिता दैवज्ञाः सत्यमेव विडम्बयन्ति दैवज्ञत्वम्। ते सन्ति नामधारिण एवेत्याचार्यो ब्रूते।

यथोक्तं मया प्रागेव यदार्यभटः प्रथमो बहूनि गणितसूत्राणि जघटे। वर्णमूलाहरणपद्धतिस्तेषामन्यतमा—

भागं हरेदवर्गान्नित्यं द्विगुणेन वर्गमूलेन।
वर्गाद् वर्गे शुद्धे लब्धे स्थानान्तरे मूलम्।।

इदमेकं निदर्शनम्। त्रिकोणचतुष्कोणाऽऽयत-कर्ण-विकर्णाऽसमकोणचतुर्भुज-क्षेत्रफल-योगह्रासगुणित-विभाजन-निषेधसंख्याशून्य-दशमलवादिसन्दर्भेऽप्येवमेव प्राक्तनभारतीयगणितज्ञैः प्रदत्तमद्भुतं योगदानमद्यापि तिष्ठत्यनतिक्रान्तमेव। पाइथागोरसनाम्ना प्रसिद्धा गणितस्य सिद्धान्ता अपि प्रतिष्ठापिता बोधायनेन प्रभूतकालपूर्वमेव। बीजगणितीयसमीकरणानां क्षेत्रेऽपि ब्रह्मगुप्त-भास्कर-पृथूदकस्वामि-माधव-नारायणादीनां भारतीयाचार्याणां योगदानं सर्वथाऽविस्मरणीयं प्रतिभाति।

भवतु नाम। भारतीयगणितस्य मूलं तु खगोलशास्त्रस्य मूलमिव वेदमन्त्रेष्वेवान्वेषणीयमस्माभिः। यज्ञभूमिकाया निर्माणार्थं विविधोपायान् समुपदिशत् शुल्बसूत्रन्तु निखिलेऽपि भूमण्डले विज्ञात आदिमो गणितग्रन्थ इत्यत्र न कापि संशीतिः।

कथन्नु भारतीयं गणितशास्त्रं निसर्गत एव माहात्म्यं प्रभविष्णुताञ्च भजते, कथञ्चेदं पूर्ववर्तितामुपगच्छतीति तथ्यं विवरणैरधोनिर्दिष्टैः सिद्ध्यतितराम्। एतत्सर्वं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मया सकार्तज्ञ्यं गृह्यते डॉ. कोटावेङ्कटाचलरावमहोदयानामालेखात्। यूरोपमहाद्वीपे गणितशास्त्रीयान् पुनराविष्कारानवलम्ब्य डॉ. रावमहोदयो लिखति—

१. ग्रेगरीमहोदयः (१६७१ A.D.) माधवोपज्ञां (चतुर्दशे ख्रैस्तेऽब्दे) दशसंख्यापद्धतिं (O) = २ पुनराविष्करोति।

२. मूलरः (१७३२ A.D.) फर्मेटमहोदयस्य (१६५७ A.D.) समस्यामेकां समादधाति; परन्तु समस्येयं भास्कराचार्येण (११५० A.D.) प्रागेव समाहिताऽऽसीद् भारतवर्षे। समस्येयमिदानीं पेलसमीकरणनाम्ना प्रत्यभिज्ञायते।

३. ल्हीलरमहोदयः (१७८२ A.D.) अर्धव्याससन्दर्भे पाप्मेश्वरस्य (१४३० A.D.) सिद्धान्तमेकं पुनराविष्करोति।

४. स्नेलमहोदयः (१६९० A.D.) ब्रह्मगुप्तस्य (सप्तमशतकीयः) प्रमेयमेकं चतुर्भुजस्य कर्णविकर्णविषयकं पुनस्समीक्षते।

५. हेरीगोनमहोदयः (१६३४ A.D.) महावीरस्य (नवमशतकीयः) समीकरणमेकं पुनराविष्करोति।

सम्प्रति प्राक्तनीं भारतीयभैषज्यपद्धतिमभिलक्ष्य प्रस्तूयते किञ्चिद्वाचिकम्। विविधैरन्तर्बाह्यसाक्ष्यैः प्रमाणितमिदं तथ्यं यदथर्वसंहिता वेदस्य भैषज्यवेदनाम्नाऽपि प्रत्यभिज्ञायते। प्राक्तनयुगादेव भारतराष्ट्रमिदं रसायनप्रविधेः कर्मशालेव स्वीक्रियते स्म। मोहञ्जोदारो-हडप्पास्थलयोरुत्खननेनापि पुरातात्त्विकं तथ्यमिदं सिद्ध्यत्येव। एवं हि सिन्धुसभ्यतावधावपि (२५०० वर्षपूर्व ख्रिस्तात्) तत्रत्या जना न केवलं विविधरसायननिर्माणेऽपि तु विविधौषधघटनेऽपि दक्षा आसन्। एते खलु इष्टिका-जलघट-मल्लक-भृङ्गार-धातुपात्र-नाममुद्रा-रञ्जितपात्र-मासृण्योपलिप्तकलश-काच-पात्राऽऽभूषणादीनां निर्माणे सर्वथा पारङ्गता आसन्। कांस्यताम्रादिधातुप्रयोगेऽपि ते निपुणा आसन्। आभूषणनिर्माणे ते रजतं सुवर्णञ्चापि प्रयुक्तवन्तः। तथ्यमिदं स्मारयत्यस्मान् सुष्ठु कृष्णयजुर्वेदमन्त्रमिमम्—

> 'अश्मा च मे, मृत्तिका च मे, गिरयश्च मे, पर्वताश्च मे, सिकताश्च मे, वनस्पतयश्च मे, हिरण्यञ्च मेऽयश्च मे, सीसञ्च मे, त्रपुश्च मे, श्यामं च मे, लोहं च मे' इत्येवमादि।

तस्मादेव छान्दसाद् रसायनौषधप्रभवबिन्दोर्भारतीयमौषधिविज्ञानं विकसितं जातम्। प्राचीनग्रन्थेषु शास्त्रमिदं रसविद्याभिधया ख्यातं परिलक्ष्यते, पश्चाच्चायुर्वेद-प्रख्यामवाप। रसरत्नसमुच्चयनाम्नि ग्रन्थे पूर्णविकसिताया रसशालाया वर्णनमवाप्यते। तस्यामौषधीयप्रयोगशालायां विविधानि रसायनान्यौषधानि च निर्मीयन्ते स्म। तद्यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसशालां प्रकुर्वीत सर्वबाधाविवर्जिताम्।
सर्वौषधिमये देशे रम्ये कूपसमन्विते।।
पदार्थसङ्ग्रहः कार्यो रससाधनहेतुकः।
सत्त्वपातनकोष्ठीञ्च सुराकोष्ठीं सुशोभनाम्।।
भूमिकोष्ठीं चलत्कोष्ठीं जलद्रोण्योऽप्यनेकशः।
भस्त्रिकायुगलं तद्वन्नलिके वंशलोहयोः।।
स्वर्णाऽयोघोषशुल्वाश्मकुड्यश्चर्मकृतां तथा।
करणानि विचित्राणि द्रव्याण्यपि समाहरेत्।।
कण्डनी पेषणी खल्वा द्रोणीरूपाश्च वर्तुलाः।
आयसास्तप्तखल्वाश्च मर्दकाश्च तथाविधाः।।
सूक्ष्मच्छिद्रसहस्राढ्या द्रव्यगालनहेतवे।
चालनी च कटत्राणि शलाका हि च कुण्डली।।

(रसरत्न., अ. ७)

औषधनिर्माणशालाया एतान्युपकरणानि वस्तुतो व्याख्यामपेक्षन्ते। कस्योपकरणस्य क उपयोग इत्यपि कश्चिन्निपुणो वैद्य एव वक्तुं शक्नोति, तथापि विवरणेनानेन भारतीयौषधनिर्माणशालायाः समृद्धिः प्रकटीभवति। रसरत्नसमुच्चये विविधानि यन्त्राण्यपि समुपदिष्टानि दृश्यन्ते, यथा—कोष्ठीयन्त्रम्, तिर्यक्पातनयन्त्रम्, ढेकीयन्त्रमित्येवमादि। रससाधकाः (औषधनिर्मातारः) कीदृग्गुणविशिष्टाः स्युः, कीदृशाश्च तत्र नियुक्ताः सेवका इत्यपि रसरत्नसमुच्चये सम्यक्तयोपदिष्टम्। तद्यथा—

रसस्य चिन्तका वैद्या निघण्टुज्ञाश्च वार्तिकाः।
सर्वदेशजभाषाज्ञाः सङ्ग्राह्यास्तेऽपि साधकैः।।
यमिनः पथ्यभोक्तारो योजनीया रसायने।
तत्तदौषधनामज्ञाः शुचयो वञ्चनोज्झिताः।।
शुचीनां सत्यवाक्यानामास्तिकानां मनस्विनाम्।
सन्देहोज्झितचित्तानां रसः सिद्ध्यति सर्वदा।।
सोद्यमाः शुचयः शूरा बलिष्ठाः परिचारकाः।।

अनेन वर्णनेन रससाधकवैद्यानां तत्साहाय्यं विदधतां परिचारकाणां च विशिष्टाऽर्हता स्फारीभवति। चरकसुश्रुतसंहितयोस्तु न केवलं विविधरोगाणां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदौषधपथ्यादीनाञ्चातिसूक्ष्मं विवरणमुपलभ्यते, प्रत्युत रोगाणां समेषामाध्यात्मिक-समीक्षणमपि संलक्ष्यते। कर्मविपाकजन्या भवन्ति रोगा इति चरकः। पूर्वजन्माचरितानि पापान्येव रोगीभूय शातयन्ति जीवमिति निर्गलितार्थः। मनोवाक्कर्मणामयोगाऽतियोगमिथ्यायोगा एव रोगस्य कारणमिति प्रतिपादयति चरकाचार्यः। तदेवापाकृत्य रोगमुक्तिः सम्भाव्यते। विलक्षणेयं रोगमीमांसा प्रतिभाति।

चरकसुश्रुतान्तरं प्रायेण पञ्चाशन्मिता महनीयाः कृतय औषधविज्ञानसम्बद्धाः सम्प्राप्यन्ते याभिर्भारतीयाऽऽयुर्वेदपरम्परा परां पुष्टिमेति। अनया परम्परयाऽऽयुर्वेदस्योत्तरोत्तरविकासोऽपि परिलक्ष्यते। तत्र वाग्भटप्रणीतो रसरत्नसमुच्चयोऽष्टाङ्गहृदयञ्च, रसरत्नाकरः, रसार्णवकल्पः, रसराजमृगाङ्कः, रसरत्नप्रदीपः, रसदर्पणः, रसराजमहोदधिः, रसयोगमुक्तावलीति प्रामुख्यं भजन्ते। वस्तुत औषधविज्ञानसम्बद्धं विपुलं वाङ्मयं वर्तते, यदधुनापि प्रासङ्गिकं परिलक्ष्यते[१]।

प्राचीनभारतीयप्राविधिकवाङ्मयस्य सन्त्यन्याश्चापि बह्व्यः शाखाः। तद्यथा—स्थापत्यशास्त्रम्, मुद्राभिलेखशास्त्रम् (Numismatics & Epigraphy), विधिशास्त्रम् (Indian Jurisprudence), पर्यावरणं सामाजिकविज्ञानं च (Environment and Social Sciences), ललितकलाशास्त्रम् (Fine Arts), लोकसंस्कृतिः (Folk Culture) इत्येवमादि। एते सर्वेऽपि विषया बृहतीं समीक्षामपेक्षन्ते, यदत्र न सम्भवति लघुकलेवरे निबन्धे। किञ्च—

दृश्यते नैव तच्छास्त्रं यत्प्रणीतं न भारते।
तस्माद्धि निखिलं विश्वं सततं भारतोन्मुखम्।। इति

१. द्रष्टव्यम् : 'इण्डियन ट्रेडीशन ऑफ केमिस्ट्री ऐण्ड केमिकल टेक्नालोजी' शीर्षक आलेखः। प्रो. ए. आर. वासुदेवमूर्तिः प्रसूनकुमारमिश्रश्च। संस्कृतभारती, बंगलोर १९९९ मितोऽङ्कः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्यख्यात्यनिर्वचनीयख्यात्योर्विमर्शः

प्रो॰ पारसनाथद्विवेदी
आचार्योऽध्यक्षश्च
वेदान्तविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी

* * *

ख्यातिपदार्थः

ख्यातिर्मानम्। प्रमा भ्रमो वा। विवेकख्यातिरित्यत्र ख्यातिः प्रमा, अनिर्वचनख्यात्यादिप्रयोगे ख्यातिर्भ्रमः। ख्या-प्रकथने (अ. १०६०) धातोर्भवे कर्मणि वा 'स्त्रियां क्तिन्' इति सूत्रेण क्तिन्प्रत्ययः। ख्यानं ख्यातिः, ख्यायत इति वा ख्यातिः। अथवा चक्षिङ्-व्यक्तायां वाचि दर्शनेऽपि पठ्यते अदादौ। तस्मादुक्तार्थे क्तिन्प्रत्ययः। 'चक्षिङः ख्याञ्' (पा.सू.२।४।५४) इति सूत्रेण चक्षिङः ख्याञादेशः।

यद्यपि ख्यातिशब्दः प्रमायामपि प्रयुज्यते, तथापि भ्रमात्मकमेव ज्ञानमत्र ख्यातिपदेन विवक्ष्यते। भ्रमविषयोऽपि कर्मव्युत्पत्त्या ख्यातिः। पुरोवर्त्तिनि शुक्तिशकले यद् रजतादिज्ञानं तत् ख्यातिरुच्यते। तत्र प्राधान्येन पञ्चख्यातयः परिगणिताः—

आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा।
तथानिर्वचनख्यातिरित्येतत्ख्यातिपञ्चकम्।।
योगाचारो माध्यमिकास्तथा मीमांसकोऽपि च।
नैयायिकोऽद्वैतिनश्च ख्यातीरेताः क्रमाज्जगुः।।

एतदतिरिक्तं तु—

सांख्यास्तु सदसत्ख्यातिं माध्वा अभिनवादन्यथा।
ख्यातिं प्राहुरन्यख्यातिं वाल्लभाः शास्त्रकोविदाः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं संक्षेपेण वक्तुं शक्यते—सत्ख्यातिः, असत्ख्यातिरनिर्वचनख्यातिरिति त्रिधा।

सत्ख्यातिवादिनः—सदेव रजतं ख्यायते तत्र गतमन्यत्र गतं वेति तार्किकाः, माध्वाः, विशिष्टाद्वैतिनः, भाट्टाः, प्राभाकराः, वाल्लभाः, योगाचाराः, सांख्याः।

सदसत्ख्यातिः—अख्यातिरन्यख्यातिरित्येतदपि अत्रान्तर्भवन्त्येव। असदेव रजतं ख्यायत इति माध्यमिका असत्ख्यातिवादिनः। अनिर्वचनीयमेव रजतं ख्यायत इति वदन्त्यद्वैतिनः। एतच्च प्रसङ्गादुक्तम्।

अन्यख्यातिः

तत्र वाल्लभा इदं रजतमित्यादिस्थले अख्यात्यन्यख्याती द्वे अधिकारिभेदात् स्वीकुर्वन्ति। तत्र ये पूर्णज्ञानयोगिनस्तेषां सर्वत्र सर्वप्रत्यक्षम् (अनागतमतीतञ्च, भा. १०।६१।२१) इति वाक्यात्। अतस्तेषां सर्वज्ञानस्य यथार्थत्वात् शुक्तिशकलेऽपि रजतज्ञानं यथार्थम्।

न च यथार्थज्ञानिनां कथमयथार्थज्ञानमिति वाच्यम्, सिद्धान्ते सर्वस्य सर्वत्र सम्भवात्, शुक्तिखण्डेऽपि रजतस्य सत्त्वात्, आविर्भावतिरोभावाभ्यां विशेषात्।

अन्येषामपूर्णज्ञानिनां तु पुरोवर्तिनि शुक्तिशकलेऽन्यख्यातिरेव। उक्तञ्च—

यन्मायया बहिः क्षिप्ता ख्यायते बुद्धिरर्थवत्।
निवर्तते च यद् बोधात् तं नमामि जनार्दनम्।।

(श्रीपुरुषोत्तमविरचिते ख्यातिवादे)

रजतादिसंस्कारप्राबल्याद् मायया भगवच्छक्तिरूपया मूढा बुद्धिरेव बहिः शुक्तिदेशे क्षिप्यत इति पुरोवर्त्तिनि रजतधर्माणामेव भानम्, न तु पुनः अनिर्वचनीयं रजतमुत्पद्यते। अतोऽन्यख्यातिरेव अन्यपदस्य सदृशवाचकत्वेन पूर्वानुभूतसदृशधर्माणामेव ख्यानादन्यख्यातिः।

अत्र मानम्—'ऋतेऽर्थं यत् प्रतीयेत' (भा. २।९।३३) इत्यादिभागवतव्याख्यानभूतं श्रीचरणभाष्यम्।

मायया = समानीतविषयया। अर्थेन तुल्यमर्थवदर्थाभावेऽपि अर्थवद् भासत इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ननु का बुद्धिः? उच्यते, आत्मा हि अन्यो निर्विषयज्ञानात्मकः। बुद्धिस्तु विशिष्टज्ञानाकारा तत्त्वान्तरम्। बुद्धिर्विज्ञानरूपिणी (भा. २।१०।३३) इति वाक्यात्। तार्किकमते बुद्धिर्ज्ञानम्। अत्र बुद्धिर्ज्ञानकरणमहङ्कारविशेषः। 'ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिः प्राणस्तु तैजसः' (भा. २।५।३१) इति वाक्यात् तैजसादहङ्काराद् बुद्धिजननश्रवणात्। तत्रैव पुरुषोत्तमाचार्याः—न ह्यस्मिन्मते बुद्धिर्ज्ञानं किन्तु ज्ञानशक्तिः। ज्ञानकरणत्वेन बुद्धिर्व्यपदिश्यते—सुबुद्धिरयं पदार्थान् जानातीति। कार्यकारणयोरभेदोपचाराच्च बुद्धिज्ञानयोः पर्यायत्वव्यवहारः। अत एव सा स्थिरा मूर्ता। अत एव तद्वृत्तेः बहिःक्षेपादिकं न दुर्घटम्।

अस्तु वा बुद्धिर्ज्ञानम्। ज्ञानमेव तर्हि मायया बहिः क्षिप्यत इति। ज्ञानमपि स्थायि, न तु क्षणत्रितयध्वंसप्रतियोगि। अतो मायया बहिः क्षिप्तं ज्ञानं बुद्धिर्वा अर्थाकारेण ख्यायते। न पुनः रजतमाविद्यिकं तत्रोत्पद्यते। तत्र सहकारिकारणं सादृश्यादृष्टसंस्कारप्राबल्यादि न पुनर्दोष इति। तथा प्रस्थानरत्नाकरे श्रीपुरुषोत्तमाचार्येणोक्तम्—

'अत्र बहवः ख्यातिवादाः। तत्र पूर्वोत्पन्नस्यानुभवस्य संस्कारात्मना स्थितस्य उद्बोधकैः प्राबल्ये मायिकार्थाकारवती बुद्धिवृत्तिर्मायया बहिः क्षिप्यते। तदा सा पुरोवर्त्तिनं सर्वतोऽशंतो वा आवृत्त्य बहिरवभासत इति मायिकस्यान्यस्यैव ख्यानाद् अन्यख्यातिरिति' (पृ. २५)। तत्रैव राजसे सविकल्पकज्ञानपञ्चविधत्वं संशयविपर्यासनिश्चयस्मृतिस्वापरूपं प्रतिज्ञाय विपर्यासस्तु सम्प्रयुक्तभिन्नार्थ-मात्रप्रतिपादकं बाह्यं ज्ञानम्। मात्रपदं संशयवारणाय। बाह्यमिति स्मृतिस्वापनिवृत्त्यर्थम्। अयं च विषयदोषात् करणदोषाद् भवति। यथा इदं रजतं पीतः शङ्ख इति।

वस्तुतस्तु आवश्यकत्वाल्लाघवाच्च करणदोषादेवेति निश्चयः। प्रमेयरत्नार्णवे बालकृष्णेनाप्युक्तम्—तत्र चक्षुःशुक्तिसंयोगे सामान्यज्ञानोत्तरं माया भगवतः शक्तिस्तमोगुणोद्भवेन बुद्धिं व्यामोहयति तदा इयं शुक्तिरिति बोधो न जायते। 'प्रमादमोहौ भवतोऽज्ञानमेव च' (गी. १४।१७) तथा च पदार्थयाथात्म्यस्फुरणाभावाद् मायामोहिता बुद्धी रजतसंस्कारप्राबल्यात् चाकचिक्यादिधर्मसादृश्यमादाय रजतं तत्र निर्माति।

तदिदं बौद्धमेव रजतं बुद्ध्या विषयीक्रियते, न तु सामान्यज्ञानमिव चक्षुर्विषयीभूतमिति विवेकः। विशेषज्ञानं तु बुद्धिकृतम्। बौद्धमेव रजतं बुद्धिविषयीभूतम्। उक्तञ्च—'अनुमितमन्तरा त्वयि विभाति मृषैकरसे'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(भा. १०।८४।३७)। अत्र सुबोधिन्यामुक्तम्—'रजतं तु तदनन्तरं बुद्ध्या जन्यते विषयीक्रियते च। तत्र सा बुद्धिरेव कारणम्। इन्द्रियार्थयोर्मध्ये यद् भाति तन्मृषेति निरूपितम्। अत एव प्रथमस्कन्धे तेजोवारिमृदा इत्यादिसुबोधिन्यां भ्रमविषयाणां बुद्धिजन्यतोक्ता। निश्चयात्मके ज्ञाने तु इन्द्रियार्थ एव बुद्ध्या गृह्यते, न तु बुद्धिपरिकल्पितोऽर्थः, इन्द्रियतदर्थयोर्मध्ये यद् बुद्धौ अन्यदेव भाति तन्मृषा। तादृशं ज्ञानं भ्रमात्मकम्। एवं च सति इन्द्रियेण गृह्यमाणादर्थात् शुक्तिरूपादन्यस्य रजतादेः ख्यातिरन्यख्यातिरुच्यते। तदिदं भ्रमात्मकं ज्ञानं बुद्धिवृत्तिरूपम्। विपर्यासशब्दवाच्यम्। (पृ. ८४)

अनिर्वचनीयख्यातिखण्डनम्

तत्रैव प्रमेयरत्नार्णवे (पृ. ८४) अनिर्वचनीयवादखण्डनमपि वर्णितम्। तथा हि—मायावादिनस्तु शुक्तिरूपाधिष्ठाने उत्पन्नेनानिर्वचनीयेन रजतेन चक्षुःसन्निकर्षे इदं रजतमिति भ्रमो भवेत्। न तत्र शुक्तिसामान्यज्ञानस्य प्रयोजनमित्याहुः। तन्मन्दम्, शुक्तेः चाकचिक्यादिधर्मान् विलोक्य तत्सादृश्यं रजते विमृश्य इदं रजतमिति बुद्धेरुत्पादितत्वात्। शुक्तिसामान्यज्ञानकारणताया निर्वचनीयत्वात्।

केचित्तु मायया अनिर्वचनीयमुत्पादितं रजतं चक्षुषोपलभ्यते, अतो न रजते अधिष्ठानसामान्यज्ञानस्य हेतुत्वमिति वदन्ति। तदपि अयुक्तम्, मायोत्पादित- रजतस्य विद्यमानत्वे तत्कृतशुक्तिज्ञानप्रतिबन्धात्। कदापि शुक्तिज्ञानं न स्यात्। रजतनाशहेतोरन्यस्याभावाद् इत्यादि (पृ. ८५) ख्यातिवादे च खण्डनप्रकार एवमुक्तः—

अनिर्वचनीयरजतोत्पत्तिर्व्यर्था। संस्कारप्राबल्येनोद्बोधकसामग्रीबलाद् मिथ्याख्यानस्याप्युपपत्तावनिर्वचनीयरजताद्युत्पत्तेर्गौरवात्, अप्रयोजकत्वाच्च। रजतोत्पत्तिं विनापि रजतभ्रमोपपत्तेस्तदुत्पत्तिर्व्यर्था। न च संस्कारस्य कथं बहिः-पदार्थोपस्थापकत्वमिति वाच्यम्, स्वप्ने त्वयापि तन्मात्रेणैव पदार्थोपस्थापकत्वात्। न च तत्स्मरणमेवेति वाच्यम्, स्वप्नसृष्टिविरोधात्।

न च संस्कारमात्रेण दोषं विना कथं स्मृतिभ्रमयोरुपपत्तिरिति वाच्यम्, उष्णस्पर्शप्राबल्याप्राबल्याभ्यां त्वग्दाहशीतनिवृत्त्योरिव संस्कारप्राबल्याप्राबल्याभ्यां भ्रमस्मृत्योरुभयोरुपपत्तिः। यदि दोषे स्पृहा तव तदा संस्कारप्राबल्यमेवान्तर्दोषं स्वीकुरु। एतादृशभ्रमेषु शुक्तिरजतादिषु बहिःकरणदोषाङ्गीकारस्तु घटपटादिप्रमोत्पत्त्या प्रत्यक्षविरुद्धत्वाद् जघन्य एव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्च निर्गमेण चैतन्याभेदाङ्गीकारोऽपि व्यापकात्मवादमात्मवादञ्च विरुणद्धीति दिक्।

अनिर्वचनीयख्यातिवादिमतम्

इदं रजतमित्यादिभ्रमस्थले सर्वत्र अनिर्वचनीयमेव रजतादिप्रातिभासिकमुत्पद्यते तज्ज्ञानञ्च। शङ्खः पीत इत्यादि-सोपाधिकेऽपि भ्रमे तथैव। तेषामियं प्रक्रिया—चक्षुःसन्निकृष्टे पुरोवर्त्तिनि शुक्तिखण्डे इन्द्रियप्रणालिकया तैजसमन्तःकरणं निःसृत्य विषयदेशं विद्रुतं गत्वा इदमाकारं चाकचिक्याकारं च भवति। अयं विषयाकारः परिणामो वृत्तिशब्देनोच्यते। यथा सरोवरजलं कुल्या निर्गत्य केदारं गतं तदाकारं भवति, तथा च इदमर्थावच्छिन्नचैतन्यमिदमाकारवृत्त्यवच्छिन्नं च चैतन्यमेकं भवति, तदा इदमिति प्रत्यक्षं सामान्यं ज्ञानं जायते। सिद्धान्ते यद्वृत्त्यवच्छिन्नचैतन्यस्य यद्विषयावच्छिन्नचैतन्येन सहैक्यं जायते तद्विषयांशे तस्य ज्ञानस्य प्रत्यक्षत्वं स्वीक्रियते। विभाजकयोरपि वृत्तिविषययोरुपाध्योरेकदेशस्थत्वेन उपधेयस्य चैतन्यस्य भेदाजनकत्वात्। यथा गृहावच्छिन्नाकाशस्य तदन्तर्वर्तिघटावच्छिन्नाकाशस्य चैक्यं भवति तद्वत्। अज्ञानात् पुरोवर्त्तिविशेषविज्ञानं न जायते।

तत्र इदमर्थावच्छिन्ने चैतन्ये स्थिता या शुक्तिविषयिणी अविद्या तूलाविद्यापदाभिधेया मूलाविद्यावयवशक्तिरूपा वा उद्भूतरजतसंस्कारसादृश्यागन्तुककाचादिदोषविशेषसहकृता रजताकारेण रजतगोचरवृत्त्याकारेण च परिणमति। तच्चाविद्यापरिणामभूतं रजतमिदमवच्छिन्नचैतन्याधिष्ठानेऽवतिष्ठते। सर्वं हि कार्यं स्वोपादानाविद्याधिष्ठानेऽवतिष्ठते। चैतन्यनिष्ठस्यापि रजतस्य न चैतन्यमात्रमधिष्ठानमपि तु इदमवच्छिन्नचैतन्यं तेन नान्यत्र रजतभ्रमः। इदमि तादात्म्येन रजतस्य सत्त्वात्। अत इदं रजतमिति तादात्म्यप्रत्यय उपपद्यते। तच्च रजतं न चक्षुषा गृह्यतेऽपि तु साक्षिभास्यम्, साक्षिणि अध्यस्तत्वात्। तथा हि उक्तस्थले इदमवच्छिन्नं चैतन्यस्य इदमाकारवृत्त्यवच्छिन्नचैतन्यस्यान्तःकरणोपहितचैतन्यस्य चैक्यात्। यथैव रजतं शुक्त्यवच्छिन्नचैतन्येऽध्यस्तं तथैवान्तःकरणोपहितचैतन्यरूपसाक्षिणि अध्यस्तमिति साक्षिसाक्षात् सम्बन्धाद् रजतं केवलसाक्षिभास्यम्। अत एव साक्षिप्रत्यक्षं रजतं न चाक्षुषम्। रजततादात्म्यापन्ने पुरोवर्त्तिनि चक्षुःसन्निकर्षादेव भवति प्रत्ययो रजतं पश्यामीति। तच्चाविद्यिकं रजतं न सत् त्रिकालाबाध्यरूपं नेदं रजतमित्यादिबाधात्। नापि क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यनर्हत्वरूपमसत्, प्रतीयमानत्वात्। नोभयरूपं विरोधात्। तथा च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्त्वेनासत्त्वेनोभयत्वेन वा निर्वक्तुमशक्यत्वाद् अनिर्वचनीयमेव तदुच्यते। स्वप्नादि-प्रपञ्चोऽपि अनिर्वचनीय एव मायया सृज्यते आत्मनि यथादृष्टमिति सङ्क्षेपः। तच्च रजतादिज्ञानं न स्मृतिः; किन्तु स्मृतिरूपमसन्निहितविषयत्वात्। उक्तञ्च स्मृतिरूपः परत्र पूर्वदृष्टावभासोऽध्यास इति भगवत्पादैः।

अनिर्वचनीयख्यातिप्रसङ्गेऽद्वैतवेदान्तदर्शनेऽन्यख्यातिचर्चा नास्ति। असदादिख्यातिनिरास एव महतीभिर्युक्तिभिः कृतः।

अत्र वल्लभग्रन्थे स्थाने स्थाने अन्याभिः ख्यातिभिः सह अनिर्वचनख्यातेरपि निरासः कृतोऽस्ति। तत्र वाल्लभैरनिर्वचनीयख्यातेः खण्डनं कृतम्। तत्र किञ्चिद् विचार्यते—

न तावद् वाल्लभैराचार्यैरनिर्वचनीयं मतं सम्यगुपपादितमनुदितम्। यत्तु बालकृष्णेनानुदितम्—रजतं चक्षुषा गृह्यत इति सामान्यज्ञानं न कारणमिति, तन्न युक्तम्, रजतादेः साक्षिभास्यत्वाङ्गीकारात्। सामान्येन ज्ञाते विशेषेणाज्ञाते धर्मिणि दोषादिसामग्रीवशाद् भ्रमाङ्गीकाराच्च। आविद्यिकस्य रजतादेरविद्यमानत्वात् चक्षुःसन्निकर्षाभावात्। न हि आविद्यिकं प्रतिभासमानं चक्षुर्गृह्णाति। सर्वत्रैव भ्रान्तं साक्षिभास्यमेव। न चोत्पन्नं रजतम् अविद्यापरिणामभूतं कथं न चक्षुगोचर इति वाच्यम्, तथापि मायिकं रजतं कथं न चक्षुगोचर इति समः प्रश्नः, न हि प्रातिभासिक इन्द्रियगोचरोऽपि व्यावहारिक इति। माया च द्विधामूलाविद्या तूलाविद्या च। मूलाविद्यापरिणामभूतं ब्रह्मेतरज्ञानाबाध्यतूलाविद्यापरिणामभूतं प्रतिभासमात्रशरीरं प्रमाणज्ञानबाध्यमिति विवेकः।

यच्च पुरुषोत्तमाचार्येणोक्तम्—मिथ्याख्यानेनोपपत्तावनिर्वचनीयरजतोत्पत्ति-र्व्यर्थेति तदपि न सम्यक्, विषयं विना विज्ञानानुपपत्तेः। साकारवादापत्तेश्च। पुरोवर्त्तिरजतं पश्यामीति प्रत्ययाच्च। तवापि मते आचार्यै रजतोत्पत्तेरङ्गीकारात्। तथा हि आचार्यवचनं 'रजतं तु तदनन्तरं बुद्ध्या जन्यते विषयीक्रियते च' इति। मायामोहिता बुद्धी रजतमुत्पाद्य तद् गोचरीकरोतीति बालकृष्णप्रभृतिभिराचार्यै-रसकृदुक्तेः। यदि बुद्धिमात्रं रजतं नोत्पन्नं तर्हि साकारवादापत्तेराचार्यवचन-विरोधश्च।

किञ्च रजतं वाल्लभमतेऽपि बुद्धिवृत्तिरेव। वृत्तिश्च परिणामः, बुद्धिश्च मायामोहिता। माया परमेश्वरशक्तिश्चिद्विलासो वा। माया तैरप्यङ्गीकर्त्तव्या एव, अन्यथा केवलबुद्धिवृत्तिर्भ्रमो न स्यात्। सा माया ईश्वरमोहात्मिका शक्तिः प्राकृतवस्तुष्वेव तत्सदृशान् पदार्थान् सृष्ट्वा गोचरयति। उक्तञ्च प्रमेयरत्नार्णवे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यामोहिका माया जीवं व्यामोह्य तदीयबुद्धौ प्रापञ्चिकसद्वस्तुसदृशं मायिकं पदार्थमुत्पाद्य पुरोऽवस्थितविषये प्रक्षिपति। तदा पदार्थग्रहणे तस्यापि ग्रहणात् तद्विशिष्टज्ञानं भ्रमात्मकं भवति। तथा सति वस्तुग्रहणे मायिकधर्माणामपि ग्रहणात्। यदिदं मनसा वाचा चक्षुर्भ्यां श्रोत्रादिभिर्नश्वरं गृह्यमाणं तद् विद्धि मायामनोमयमित्यादि भागवतवचनानि सार्थकानि भवन्ति। प्रपञ्चस्तु ब्रह्मात्मको भगवत्कार्यः, अविकृतपरिणामवादस्वीकारात्। अस्ति चाविर्भावतिरोभावशक्तिः परमेश्वरस्येति।

अत्रेमालोचनीयं मायासृष्टसद्वस्तुसदृशं मायिकं वस्तु ग्रहणे गृह्यते। तच्च ग्रहणमिन्द्रियेण, तर्हि मायिकरजतस्यापि चक्षुषा ग्रहणं प्रसज्येत। तथा च सिद्धान्तहानिः। यदि पुरोवर्त्तिवस्तुमात्रं चक्षुषा गृह्यते तर्हि तत्सदृशं मायिकं रजतं कथं गृह्येत। अथ न चक्षुषा अपि तु उत्पादिकयैव बुद्ध्या विषयीक्रियते, तदपि न विचारसहं बुद्धिर्ज्ञानभिन्ना अहङ्कारविशेषरूपा जडा कथं रजतं गोचरयिष्यति। अथ विज्ञानरूपैव तदा चिद्रूपत्वात् कथं रजतमुत्पादयिष्यति। मायामोहिता इति चेत्, तर्हि एवं वाच्यम्, मायामोहिता चिद्रूपा बुद्धी रजतमुत्पाद्य गोचरयतीति। तथा च सिद्धान्तहानिः, बुद्धेर्ज्ञानसाधनत्वाङ्गीकारात्। बुद्धिर्यदि भ्रमजनिका तर्हि प्रमाया उत्पत्तिर्न स्यात्, अतो मायैव मुख्यो भ्रमहेतुर्वक्तव्यः, अनिर्वचनीयवादेऽपि मायैव भ्रमहेतुः, रजतादिवृत्तिहेतुश्चाङ्गीक्रियते। माया च अज्ञानरूपा भावात्मिका परमेश्वराधिष्ठिता।

किञ्च यदिदं मनसा वाचेत्यादिभागवतवाक्यमद्वैतमते सुसङ्गतम्, सर्वस्यैव प्रपञ्चस्य मिथ्यात्वानिर्वचनीयत्वाङ्गीकारात्। वाल्लभमते तु चक्षुषा गृह्यमाणं पुरोवर्त्तिपदार्थोऽपि मिथ्या स्यात्, एवं घटपटादेरपि मिथ्यात्वापत्तेः। यदि उक्तवाक्यं वाल्लभमते तदा सङ्गतं स्यात्, यद्येवमुच्यते यदिदं बुद्ध्या गृह्यत इत्यादि, अतो जीवबुद्धिव्यामोहिका भगवच्छक्तिरूपा भगवद्बोधनाश्या मिथ्याभूता संसार-रचनापटीयसी तामसी भगवदिच्छयैव प्रवृत्ता या माया वाल्लभैः स्वीक्रियते संसारोपपादनाय तस्या मायावादिनामद्वैतिनां मायया को विशेषः। अथ जगदुपादानभूता नास्ति तदुपादानं तु परमेश्वर एवेति विशेषः, तर्हि अपि अभ्युपगमविशेषमात्रम्। वाल्लभा जगत्संसारयोर्भेदमभ्युपगच्छन्ति, मायावादिनस्तु नैवेति परमेश्वरसत्तातिरिक्तसत्ताकत्वाभावस्तु उभयोः परमेश्वरातिरिक्ते समानम्। जगत्परमेश्वररूपः, विषयी तदतिरिक्तः, संसारो मायिकः। इह तु शुद्धबुद्धमुक्त-चैतन्यमात्राद् घटादिप्रपञ्चोऽपि मायिक इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्च मायिकरजतादिसमुत्पादेऽपि परमेश्वरेच्छा कारणमिति वक्तव्यमेव, तदिच्छयैव व्यामोहोत्पादात्। अतो द्विधा सृष्टिकल्पनं गौरवग्रस्तं लाघवाद् मायैव ईश्वराधीना तदिच्छया जगन्निर्मातु। किञ्च अयं घटो ममेदं अहमिदमित्यादि-व्यावहारिकज्ञानात्। अथ च नेदं रजतं शुक्तिरियमित्यादिप्रमात्मकज्ञानाद् इदं रजतमित्यादिज्ञाने विशेषो वक्तव्यः। अन्यथा तेषामपि प्रमात्वं न स्यात्। ननु अस्त्येव विशेषः, मायाव्यामोहरहिता सात्त्विकी बुद्धिस्तादृशं प्रमात्मकं ज्ञानं जनयति, इदं ज्ञानं तु मायामोहितेति चेन्न, तेषां ज्ञानानां प्रमात्वाद् अबाधितविषयकत्वात् परमात्मनि घटत्वपटत्वादिभेदबुद्धयोऽपि मोक्षजनिकाः स्युः। तात्पर्यमिदं यद् व्यावहारिकः संसारः प्रातिभासिकसंसाराद् भिन्नोऽभ्युपगन्तव्यः, तत्र को हेतुः? माया तु प्रतिभासे हेतुः। यदि तत्रापि माया हेतुः, तर्हि एकस्या मायायाः कार्यवैविध्ये हेतुर्वक्तव्यः। तस्मान्नोपपद्यतेऽयं वादः।

यच्चोक्तं संस्कारप्राबल्यादेवोपपत्तौ दोषस्य भ्रमहेतुता नाङ्गीकर्त्तव्येति, तदपि न विचारसहम्। संस्कारप्राबल्यात् प्रबलस्मृतिरेव भवन्ती दृश्यते। अन्यथा प्रबलस्मृतिर्निर्हेतुका स्यात् संस्कारप्राबल्याद् भ्रम एव भवेत्, न दृढा स्मृतिः। तस्माद् यथानुभवं दोषोऽपि सहकारिकारणं वक्तव्यमन्यथा अदुष्टसाधनस्यापि भ्रमप्रसङ्गात्। किञ्च संस्कारप्राबल्यस्य दोषत्वमपि अन्यथाकरत्वरूपं प्रतिबन्धकत्वरूपं वा न सङ्घटते।

किञ्च व्यापकात्मवादविरोधश्चोदितः, अन्तःकरणनिर्गमपक्षे तदपि अनालोचितपराभिसन्धितामात्रम्। सर्वत्र व्यापकस्य चैतन्यरूपस्य ब्रह्मणः अन्तःकरणे वृत्तौ घटादौ च तदावरणस्याज्ञानशक्तिरूपस्य बहिर्देशे निर्गतवृत्त्या आवरणभङ्गमात्रं क्रियते। वस्तुतोऽभिन्नस्यापि चैतन्यस्य अन्तःकरणवृत्त्यादिभेदाद् भेदोपचारात्, तस्मान्नास्ति व्यापकात्मवादात्मवादविरोध इति।

किञ्च वाल्लभाचार्यैः पुरुषोत्तमैः स्पष्टमेव करणदोषस्य हेतुत्वमङ्गीकृतम्। किञ्च अन्यख्यातिपदेन यदि पुरोवर्त्तिनोऽन्यस्य ख्यातिरित्यर्थस्तर्हि को विशेषः, सर्वे ख्यातिवादिनः पुरोवर्त्तिपदार्थादन्यस्यैव ख्यातिं स्वीकुर्वन्ति। अतो नामापि न विशेषाभिधायकमस्ति। किञ्च मङ्गलश्लोके निवर्तते च यद्बोधात् तं नमामीत्युक्तम्।

तत् कथं सङ्गच्छेत? न हि भगवद्बोधादेव रजतं निवर्तते; अपि तु नेदं रजतं शुक्तिरियमित्यादिविशिष्टप्रमाज्ञानादपीति सर्वानुभवसिद्धम्। यदि च प्राकृतं जगत् सर्वं भगवत्स्वरूपमेवेति मन्यसे, तदापि न स्वरूपेण भगवद्रूपा शुक्ती रजतस्य निवर्त्तिका; अपि तु साक्षात्कृतैव। साक्षात्कृतापि शुक्तित्वेनैव न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भगवत्त्वेनैव। यद्विषयकमज्ञानं यदधिकरणकं यदवच्छिन्नं तादृशेनैव ज्ञानेन निवर्तेत। अन्यथा घटादिज्ञानादपि रजतज्ञानं निवर्तेत तस्यापि भगवद्विषयकत्वात्। तस्मात् शुक्तित्वेन रजताभावत्वेन वाधिष्ठानसाक्षात्कार एव निवर्तकः।

किञ्चान्यख्यातिवादिभिर्वक्तव्यं तद्रजतं किं सदसदुभयं वेति अनुपपद्यमानत्वात् त्रयोऽपि पक्षा न सम्भवन्ति। अतोऽनिर्वचनीयं रजतमिति मन्तव्यम्।

अत्रान्यख्यातिवादिनः—न हि संस्कारप्राबल्यमात्रादेव रजतबुद्धिर्भ्रमोऽपि तु सादृश्यादिसमवधानादिकमप्यपेक्षितमित्यदोषः।

रजतस्य मायिकत्वेऽपि उत्पन्नत्वेऽपि अनिर्वचनीयताया अस्वीकाराद् अस्ति विशेषः। न हि पुरोवर्त्तिनि अन्यत्र वा द्विधा सृष्टिः स्वीक्रियते, अपि तु इन्द्रियविषययोर्मध्ये मायिकबौद्धिकरजतादिप्रतीत्यन्यथानुपपत्त्या पुरोवर्त्तिनि विषये विषयता तावदङ्गीक्रियते। विषयतैव व्यामोहिकया मायया सृज्यते, न विषयः। विषयस्तु भगवद्रूप एव। तदा तु विषयोऽपि मायया सृज्यत इति विशेषः। अन्यथा रजतबुद्धिर्निर्विषया स्यात्। बहिः क्षिप्यत इत्यङ्गीकारात् साकारवादोऽपि निरस्तो वेदितव्यः। अन्यख्यातिरिति अन्यस्य पुरोवर्त्तिपदार्थाद् विषयतारूपस्य रजतस्य मायिकस्य ख्यातिर्भानमन्यख्यातिरिति ख्यात्यन्तरेभ्योऽस्ति विशेषः। एवमन्यख्यातिपक्षेऽपि वक्तुं शक्यते। मायाऽपि भगवच्छक्तिरूपा न निःस्वभावा अनिर्वचनीया अद्वैतवादिनामिवास्माकं सम्मता। व्यामोहिकाया मायाया भगवच्छक्तिविलासरूपायास्तमोगुणोद्भवेन जीवबुद्धिव्यामोहोऽपि भगवदिच्छया तल्लीलाविलास एव। अत इन्द्रियविषययोर्मध्ये मूढा बुद्धिर्विषयेषु विषयतां धर्मरूपां धर्मिरूपां वा सृजति। अन्यथानिर्विषया स्यात्। विषयता च विषयासम्बद्धः विषयनिष्ठो धर्मविशेषः। अन्यपदेन च तस्या एव ग्रहणाद् विशेष इति।

यदुक्तं निवर्तते च तद्बोधादिति, न हि परमात्मज्ञानादेव निवर्तते; अपि तु नेदं रजतमिति ज्ञानादपीति, तदपि न युक्तम्। परमात्मबोधात् पूर्णज्ञानिनो निवर्तते माया व्यामोहिका, अत एव तस्य अख्यातिरेव, यथार्थज्ञानोदयात्। अपरस्य चाज्ञानिनो नेदं रजतमित्यादिज्ञानेन तिरोभाव एव रजतादेरित्यर्थात्। तच्च रजतमसत्यं, नात्यन्तासत्यं वन्ध्यापुत्रवद् अप्रतीत्यापत्तेः।

मायया बुद्धिविषयताद्वयं सृज्यते धर्मरूपां धर्मिरूपाञ्च। भ्रमद्घटः पीतः शङ्ख इत्यादौ भ्रमपीतत्वादिधर्मरूपां विषयताम्। इदं रजतमित्यादौ च रजतादिधर्मिरूपां विषयतां सृजति। तत्रेदं रजतमित्यादिस्थले अन्यख्यातिः, पीतः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शङ्ख इत्यादिस्थले तु अन्यथाज्ञानमित्युच्यते। अन्यख्यातिर्भ्रमः, अन्यथाज्ञानं तु संशयविपर्ययादिभ्यो भिन्नं मायिकं ज्ञानान्तरमेवेत्यादि प्रपञ्चितं निर्णयार्णवे तृतीयतरङ्गे (पृ. १८४) बालकृष्णेन। मायाशब्देन सिद्धान्ते भगवतः सर्वभवनसामर्थ्यरूपा, व्यामोहिका च गृह्यते, ख्यातौ तु व्यामोहिका माया उपयुज्यते। व्यामोहिकापि माया पूर्वस्या एव मायाया रूपान्तरम्। तस्माद् माया भगवच्छक्तिरेव नानिर्वचनीया मिथ्या निःस्वभावा वेति बोध्यम्।

मम मते व्यामोहिका मायापि भगवद्रूपत्वात् सत्यैव बुद्धिरपि सत्येन अन्यख्यातेस्तात्पर्यम्, शुक्तौ तिरोहितस्यापि रजतादेरतिरोहित्वेन प्रादुर्भावनम्। शुक्तौ तिरोहितधर्मान्यस्य ख्यातिरिति व्युत्पत्तेरिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाणिनीया स्वरप्रक्रिया

डॉ० कपिलदेवपाण्डेय:

शास्त्रचूडामणि-प्राध्यापक:
साहित्य-विभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी

***

व्याकरणाध्ययनप्रयोजनानि प्रतिपादयन् भगवान् भाष्यकारो वेदरक्षारूपमन्यतमं प्रयोजनं प्रमुखप्रयोजनेष्वपि प्राथम्येनाभिदधाति— 'रक्षोहागमलघ्वसन्देहा: प्रयोजनम्' इति। वेदार्थज्ञानोपायतया षट्सु वेदाङ्गेष्वपि व्याकरणं मन्यते। भगवता पाणिनिनापि शब्दानुशासनपरायां स्वकृतौ अष्टाध्याय्यां लौकिकसंस्कृतशब्दै: सह वैदिकशब्दानामपि व्याकृतिर्विहिता। लौकिकशब्देभ्यो वैदिकशब्दभेद: क्वचिद् भवति, वाक्यप्रक्रियायां पौर्वापर्यकृत: पदानां क्रमभेदोऽपि दृश्यते। एतत्सर्वमष्टाध्याय्यां यथावसरमन्वाख्यातम्। वैदिकशब्दानां रूपव्युत्पादनेन सह तत्र तेषामुच्चारणप्रसङ्गे व्यवह्रियमाणानामुदात्तादिस्वराणामपि ग्रन्थग्रथन-योजनानुरोधेन स्वकृतं क्रममनुसृत्य विधानं कृतं महर्षिणा पाणिनिना। अस्मिन् लेखे पाणिनीयां प्रक्रियामनुरुध्यैव मया स्वविमर्श उपक्रम्यते।

यद्यपि स्वरशब्दो विविधेषु शास्त्रेषु वाग्वर्णविशेष–षड्जादिसप्तक–क्रुष्टादिसप्तक–सप्तसंख्या–प्राण–सूर्य–सोम–प्रजापति–पशु–श्री–प्रणव–उदात्तादि-वर्णधर्मप्रभृतिषु बहुष्वर्थेषु प्रयुक्तो वर्तते; किन्तु व्याकरणशास्त्रे द्वयोरेवार्थयो: अकारादिषु वर्णविशेषेषु उदात्तादिषु वर्णधर्मेषु प्रसिद्धिं प्रतिपादनार्हताञ्च भजते। अष्टाध्याय्यां तु स्वरशब्द उदात्तादिवर्णधर्मरूपेऽर्थ एव प्रयुक्तोऽस्ति। अकारादि-वर्णविशेषार्थकस्य स्वरशब्दस्य कृते तु वर्णसमाम्नायादधिगतां प्रत्याहारप्रणाली-माश्रित्य 'अच्'शब्दस्यैव प्रयोग: कृतोऽस्ति महर्षिणा।

स्वरूपपरिचय:—अष्टाध्याय्यां प्रथमाध्यायस्य द्वितीये पादे द्वादशभि: सूत्रै: उदात्त–अनुदात्त–स्वरितानामच्धर्माणां विषये साधारण: परिचयो दत्तो विद्यते। एतेषु सूत्रेषु पूर्वसूत्राद् अचोऽनुवर्तनाद् ज्ञायते यदिमे धर्मा अचामेव वर्णानां न तु हलाम्। ताल्वादिषु उच्चारणस्थानेषु उच्चैरुच्चार्यमाणो योऽच् स उदात्त:, नीचैर्निष्पद्यमानो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योऽच् सोऽनुदात्तः, यत्र च उदात्तत्वानुदात्तत्वरूपौ वर्णधर्मौ समाह्रियेते, सोऽच् स्वरितो भवति। सर्वेषु ह्रस्वदीर्घप्लुतेषु स्वरितेषु कियानंश उदात्तः कियान्वा अनुदात्त इति 'तस्यादित उदात्तमर्धह्रस्वम्' इति सूत्रेणाख्यातमस्ति। प्रतिवर्णं यथाविधान-मुदात्तादिभेदपूर्वकमुच्चारणं त्रैस्वर्यम्, उदात्तादिस्वराणामविभागो भेदतिरोधानमेक-श्रुतिः, तथा उच्चारणमैकश्रुत्यम्। साममन्त्रेषु ऐकश्रुत्यं वर्जितम्, अन्येषु त्रिषु वेदेषु पाक्षिकी व्यवस्थाऽस्ति। त्रैस्वर्यमपि विहितमस्ति ऐकश्रुत्यमपि। यज्ञकर्मणि मन्त्राणां पाठ ऐकश्रुत्येन विधीयते। सुब्रह्मण्यानाम्नि निगदे एकश्रुतिर्न भवति। लक्षणप्राप्तस्य स्वरितस्योदात्त आदेशो भवति। तत्रैव देवब्रह्मणोः स्वरितस्यानुदात्तो भवति। संहितायां स्वरितात् परेषामनुदात्तानामेकश्रुतिर्भवति; किन्तु उदात्तपरस्य स्वरितपरस्य वा अनुदात्तस्य अनुदात्ततर आदेशो भवति, न तु एकश्रुतिः।

प्रातिशाख्यानां प्रतिशाखीयत्वात् स्वरप्रतिपादनशैली भिन्ना, पाणिनेः सूत्रस्य कृतिर्भिन्ना विचित्रा च। अत्र मदीयं विवेचनं पाणिनीयप्रक्रियानुरोधेनैव प्रवर्तते। साधारण-प्रकृति-प्रत्यय-समास-तिङन्तेति पञ्चप्रकरणरूपः सिद्धान्तकौमुदी-कारक्रमोऽपि प्रायश उपेक्षित एव। अव्युत्पन्नपक्षे प्रवर्तमानानि अपाणिनीयानि फिट्सूत्राण्यपि नात्र प्रतिपादनविषयतां भजन्ते। अत्रैतदपि स्पष्टयितुमिच्छामि यद् वेदेषु प्रथितप्रयोगा उदात्तादयः स्वरास्त्रिधाऽभिव्यक्तिं भजन्ते—

१. हस्तमुद्राभिः—यथाविध्युच्चारणेन सह हस्तमुद्राभिरप्युदात्तादयः स्वराः प्रदर्शनीया भवन्ति—

ऋचो यजूंषि सामानि हस्तहीनानि यः पठेत्।
अनृचो ब्राह्मणस्तावद् यावत् स्वारं न विन्दति।।
हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम्।
ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति।।

वेदमन्त्रपाठकाले कथं हस्तमुद्रा प्रदर्शनीया कथञ्च हस्तसञ्चालनं कर्तव्यमिति सर्वं प्रातिशाख्यग्रन्थेभ्यः शिक्षाग्रन्थेभ्यश्च ज्ञातव्यम्। माध्यन्दिनशाखाध्यायिनां कृते तु श्रीमद्भिर्गोपालचन्द्रमिश्रमहाभागैर्विरचिता सम्प्रदायप्रबोधिनी शिक्षा अतीवोपकारिणी। एतत्सन्दर्भेऽत्राधिकं विवेचनीयं नास्ति।

२. स्वराङ्कनद्वारा—चतुर्णां वेदानां मन्त्रसंहितासु, तैत्तिरीयब्राह्मणे, शतपथ-ब्राह्मणे, तैत्तिरीयारण्यके, बृहदारण्यकोपनिषदि च स्वराङ्कनं दृश्यते। वैदिकवाङ्मये चत्वारो भिन्नाः प्रकाराः स्वराङ्कनस्य सन्ति—

(१) **ऋग्वेदीयः स्वराङ्कनप्रकारः**—अत्रोदात्तोऽनङ्कितस्तिष्ठति, अनुदात्तोऽधोरेखया निर्दिश्यते स्वरितश्चोर्ध्वरेखया। स्वरितात्परा अनङ्किता एकश्रुतयो भवन्ति। उदात्तस्वरितपरा जात्यक्षैप्रप्रश्लेषाभिनिहिताः स्वरिताः सकम्पमुच्चार्यन्ते। तत्र ह्रस्वः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वरित ऊर्ध्वाधोरेखाभ्यां सहितेनैकाङ्केन अङ्क्यते। दीर्घ: स्वरितोऽधोरेखया ऊर्ध्वाधोरेखायुतेन त्र्यङ्केनाङ्क्यते। शुक्लयजुर्वेदस्य माध्यन्दिन-शाखायामुदात्तानुदात्तैकश्रुतिसामान्यस्वरिता ऋग्वेदवदङ्किता भवन्ति; किन्तु अनुदात्तात्परा जात्यक्षैप्रप्रश्लेषाभिनिहिता: स्वरिता अधोभागे मिलिताभ्यामूर्ध्वाधो-रेखाभ्यां (आंगलभाषाया, ४ अक्षरसदृशाभ्यां) निर्दिश्यन्ते। उदात्तात्परास्त्विमे स्वरिता अधस्तात् त्रिशूलसदृशेन चिह्नेन (W) निर्दिश्यन्ते। तैत्तिरीयसंहिता-ब्राह्मणयो: स्वराङ्कनमृग्वेदवदेव भवति। शौनकशाखीयाथर्ववेदे उदात्तानुदात्त-साधारणस्वरिता: ऋग्वेदवन्निर्दिश्यन्ते; किन्तु जात्यक्षैप्रप्रश्लेषाभिनिहिता: स्वरिता अग्रेऽउच्छ्रिताव-ग्रहचिह्नेन अङ्क्यन्ते।

(२) **मैत्रायणीसंहितास्वराङ्कनप्रकार:**—अत्रोदात्तस्य शीर्षस्थोर्ध्वरेखया, अनुदात्तस्याध: सरलरेखया, उदात्तात्परस्य अन्त्यस्य एकश्रुतिपरस्य च स्वरितस्य अधो वक्ररेखया (L) अङ्कनं भवति। उदात्तात् परोऽनुदात्तपर: स्वरितस्त्रिशूलसदृशेन (W) चिह्नेन अङ्क्यते। अनुदात्तपरा: एकश्रुतिपराश्च जात्यक्षैप्रप्रश्लेषस्वरिता अधोऽर्धचन्द्राकारेण चिह्नेन (˘) निर्दिश्यन्ते। काठकसंहितायामपि मैत्रायणीसदृश: प्राय: स्वराङ्कनविधिरस्ति।

(३) **सामवेदस्वराङ्कनप्रकार:**—अत्र उदात्तस्वरितानुदात्ता: स्वरा: क्रमश उपरिष्टात् १,२,३ अङ्कैर्निर्दिश्यन्ते। एवं प्रतीयते यदनेन तारत्वक्रमो द्योत्यते। स्वरितपर उदात्त: सरेफेण एकाङ्केन (१र) निर्दिश्यते, अवसाने उदात्त: अनुदात्तपरश्चोदात्तो द्व्यङ्केन निर्दिश्यते। अनुदात्तपरेषु उदात्तेषु प्रथम उदात्त उकारसहितेन द्व्यङ्केन (२उ) अङ्क्यते। उदात्तपरा: क्षैप्रजात्यप्रश्लेषाभिनिहिता: स्वरा: प्लुता भवन्ति (३)। उदात्तपूर्वाश्चैतेऽनङ्कितास्तिष्ठन्ति। अनेकोदात्तात्पर: स्वरित: सरेफेण द्व्यङ्केन निर्दिश्यते। सरेफेषु परेषु स्वरितेषु अनुदात्त: सककारेण त्र्यङ्केन (३क) अङ्कितो भवति।

(४) **शतपथब्राह्मणस्वराङ्कनप्रकार:**—शतपथब्राह्मणे केवलमुदात्त: अधस्ताद् अधोरेखया ऋग्वेदस्यानुदात्तवद् निर्दिश्यते। एकाधिकेषु अव्यवहितेषूदात्तेषु अन्त्य एव अङ्क्यते। अत्र ॲ २००० ०० इत्यादीन्यनेकानि चिह्नानि प्रयुज्यन्ते; किन्तु निबन्धविस्तारभिया पूर्णं विवरणं न प्रस्तूयते। केवलं सामान्यान् जिज्ञासून् परिचाययितुमेव ममैष प्रयास:।

३. उच्चारणविधानानि—उदात्तादयो वैदिका: स्वरा: स्वरवर्णधर्मभूता: पाठावसरे हस्तसञ्चालनै:, लेखनावसरेऽङ्कनचिह्नैरभिव्यक्ता भवन्ति; किन्तु कुत्र उदात्तस्वरो भवति, कुत्र अनुदात्तस्वरो भवति, कुत्र स्वरितो भवति, कुत्र एकश्रुति: प्रचयो वा भवति? संहितायां स्वरेषु परिवर्तनं कथं जायते, समासस्थलेषु स्वराणां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

का व्यवस्था, पदेषु कानि सर्वानुदात्तानि, कानि द्व्युदात्तानि, कानि एकोदात्तानि, कानि च स्वरितमात्रस्वराणि? इत्येते प्रश्नाः धातु-प्रत्यय-प्रातिपदिकेति विभागविधया, अविद्यमानवद्भाव–पराङ्गवद्भावादिभिरुपायैः साधु विवेचिताः सन्ति पाणिनीयस्वरप्रक्रियायाम्। त एवात्र मयापि भवतां समक्षं सङ्क्षेपतः प्रस्तोतव्याः सन्ति।

अष्टाध्याय्याः प्रथमाध्यायस्य द्वितीयपादे द्वादशभिः सूत्रैर्महर्षिणा स्वराणां सामान्यः परिचयो दत्तः, त्रैस्वर्यस्य ऐकश्रुत्यस्य च प्रयोगक्षेत्रं प्रदर्शितमिति मया पूर्वमेव प्रतिपादितम्। द्वितीयाध्यायस्य प्रथमे पादे एकेन सूत्रेण तादात्म्यातिदेशरूपः पराङ्गवद्भावः कृतः। तेन 'दिवो दुहितः' इत्यत्र 'दिवः' पदस्य पराङ्गवद्भावेन द्वयोः पदयोरेकं समुदायं मत्त्वा पदद्वयवर्त्तिनां सर्वेषाम् अनुदात्तः स्वरो भवति। वार्तिककारमतेन पूर्वाङ्गवद्भावोऽपि भवति। तेन 'दुहितर्दिवः' 'पितर्महताम्' इत्यत्र च सर्वानुदात्तः स्वरः। अव्ययानां सुबन्तत्वेऽपि पराङ्गवद्भावो न भवति। तृतीयाध्यायस्य प्रथमे पादे प्रत्ययाधिकारे सूत्रद्वयेन प्रसङ्गप्राप्तस्य प्रत्ययस्वरस्य विधानं कृतमस्ति। तयोः समुदितं तात्पर्यमस्ति यत् सुप्प्रत्ययाः पितश्च प्रत्यया अनुदात्ता भवन्ति (यथा दृषदौ, पठति च)। अन्ये प्रत्यया आद्युदात्ता भवन्ति।

अतः परं षष्ठाध्यायस्य प्रथमे पादे अष्टपञ्चाशदधिकैकशततमेन सूत्रेण (अनुदात्तं पदमेकवर्जम्-६।१।१५८) स्वरविधानं प्रारभते। द्वितीयपादस्यान्तं यावद् गच्छति च। 'अनुदात्तं पदमेकवर्जम्' इति सूत्रं स्वरविज्ञानदृष्ट्या अतिमहत्त्वपूर्णम्। पदस्वरविषये औत्सर्गिकं सूत्रमेतत्। एकस्मिन् पदे वर्तमानाः सर्वेऽचोऽनुदात्ता भवन्ति, एकमचं वर्जयित्वा। यस्य उदात्तविधानं स्वरितविधानं स वर्ज्यः। तत्तल्लक्षणाभिनिर्वृत्तानां बहूनामुदात्तानां स्वरितानां वा समावेशनिवृत्तिरस्य प्रयोजनम्। परनित्यान्तरङ्गापवादैः स्वरैः, सतिशिष्टेन स्वरेण च व्यवस्था। यो हि यस्मिन् सति शिष्यते, स तस्य बाधको भवति। यथा—'<u>गो</u>पा<u>य</u>ति' इत्यत्र धातुस्वरापवादः प्रत्ययस्वरः, तेनैव धातुस्वरेण प्रत्ययान्तस्य धातोः सतिशिष्टत्वाद् बाध्यते। कस्मिंश्चिदपि पदे उच्चार्यमाणे तत्स्थे एकस्मिन्नेव वर्णे उच्चैस्त्वं भवितुमर्हतीत्युत्सर्गो नियमः। अस्यापवादो द्विविधः—(१) द्व्युदात्तरूपः (२) सर्वानुदात्तरूपश्च। यमेकमुदात्तं वर्जयित्वा अन्येऽचोऽनुदात्ता भवन्ति, तद्विधयो महर्षिणा प्रथमं विहिताः—

(१) अन्त उदात्तः—यथा धातोः, चितः, चित्तद्धितस्य, कित्तद्धितस्य क्रमशः उदाहरणानि—<u>ऊ</u>र्णोति॑, भा<u>सु</u>रः (स<u>र्व</u>कः), कौ<u>ञ्जा</u>य<u>नः</u>, ना<u>डा</u>य<u>न्</u> इत्यादीनि।

(२) उपोत्तमम्—अन्त्यमुत्तमम्, तत्समीपे यत् तदुपोत्तमम् उदात्तं भवति। प<u>ञ्च</u>भि॑ः। 'उपोत्तमं रिति' करणीयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(३) आदिरुदात्तः—यथा अभ्यस्तानाम्, सर्वस्य, ञिति निति च प्रत्यये, आमन्त्रितस्य, क्रमश उदाहरणानि—ददति, सर्वः, गार्ग्यः, वासुदेवकः (वुन्), देवदत्त!

(४) स्वरितम्—तित्प्रत्ययः स्वरितो भवति। यथा—चिकीर्ष्यम्, कार्यम्।

षष्ठाध्यायस्य प्रथमपादस्यान्ते 'समासस्य' इति सूत्रेण सामान्यतया समासस्य अन्तोदात्तं विदधता सूत्रकारेण समाससम्बन्धिनो विशेषा विधयो द्वितीये पादे न्यस्ताः। सामान्यं समासस्वरोदाहरणं यथा—राजपुरुषः, ब्राह्मणकम्बलः।

(१) प्रकृत्या पूर्वपदम्—बहुव्रीहौ यथा–पण्डितपुत्रः, चित्रश्रवस्तमः। द्विगौ यथा—पञ्चारत्निः। पञ्चकपालः। गतिर्यथा—प्रकृतः।

(२) पूर्वपदस्य आदिरुदात्तः—पूर्वपदस्य आदिरुदात्तो भवति। णिनिप्रत्ययान्ते उत्तरपदे परे पूर्वपदस्यादिरुदात्तो भवति, यथा—उष्णभोजी, पण्डितमानी, सोमयाजी।

(३) पूर्वपदस्य अन्त उदात्तः—गुणकात्स्न्र्ये वर्तमानस्य सर्वशब्दस्य पूर्वपदस्य अन्त उदात्तो भवति। यथा—सर्वश्वेतः।

(४) उत्तरपदस्य आदिरुदात्तः—यथा बहुव्रीहिसमासे वर्णलक्षणवाचि-पूर्वपदात् कर्णशब्दे उत्तरपदे सति उत्तरपदस्य आदिरुदात्तो भवति। यथा—शुक्लकर्णः।

(५) प्रकृत्या उत्तरपदम्—यथा गतिकारकोपपदात् कृदन्तमुत्तरपदं प्रकृत्या भवति। उदाहरणानि—प्रकारकः, पलाशशातनः, ईषत्करः।

(६) उभे पदे (पूर्वोत्तरपदे) प्रकृत्या—वनस्पत्यादिषु यथा—वनस्पतिः, बृहस्पतिः। देवताद्वन्द्वे यथा—इन्द्रावरुणौ द्यावापृथिव्यौ। अत्रेदमप्यवधेयं यदिमानि द्व्युदात्तस्य पदस्य उदाहरणानि। 'तवै चान्तश्च युगपत्' इति सूत्रेण तवैप्रत्ययान्त-पदमपि द्व्युदात्तं भवति। यथा—एतवै, अन्वेतवै।

(७) उत्तरपदस्य अन्त उदात्तः—यथा अवभृथः, काष्ठभेदः, कम्बलदः।

अष्टाध्याय्या अष्टमाध्यायस्य प्रथमे पादे एकेन सूत्रेण 'अनुदात्तं च' इत्यनेन आम्रेडितस्य सर्वानुदात्तत्वं विहितमस्ति। यथा—दिवे दिवे, मासि मासि, गृहे गृहे। अस्मिन्नेव पादे षोडशसूत्राद् एकसप्ततितमसूत्रं यावद् ऊनषष्टिसूत्रैर्विविधानां पदानां सर्वानुदात्तत्वविधानं कृतमस्ति।

(१) पदात्परम् अपादादौ स्थितम् आमन्त्रितं पदं सर्वानुदात्तं भवति। यथा—पठसि देवदत्त।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(२) पदात् पराणि अपादादौ स्थितानि युष्मदस्मदोः आदेशभूतानि पदानि—वाम्, नौ, वः, नः, ते, मे, त्वा, मा इति सर्वानुदात्तानि भवन्ति। यथा—जनपदो नौ स्वम्। नमो वः पितरः। पुनन्तु मा।

(३) अतिङन्तात् पदात् परं तिङन्तं पदं सर्वानुदात्तं भवति। यथा—त्वं पचसि। किन्तु लुडन्तं न सर्वानुदात्तं भवति। यथा—श्वः कर्ता।

अतः परम् एकेन सूत्रेण पूर्वं वर्तमानस्य आमन्त्रितस्य अविद्यमानवद्भावः, द्वितीयेन तत्प्रतिषेधः, तृतीयेन तद्विकल्पश्च विहितः। अत्र अष्टमाध्यायस्य प्रथमपादस्य समाप्तिश्च भवति। अविद्यमानवद्भावे कृते, तस्मिन् यत्कार्यं तत्र भवति। असति तस्मिन् यत्कार्यं तद्भवति। 'अग्न इन्द्र' इत्यत्र इन्द्रस्य सर्वानुदात्तत्वं न, पूर्वस्य अविद्यमानत्वेन पदात्परत्वाभावात्।

अष्टमाध्यायस्य द्वितीये पादे सूत्रत्रयेण द्वयोः स्वरयोर्मेलनेन जातः परिणामश्चिन्तितोऽस्ति। उदात्तस्य स्थाने यो यण् स उदात्तयण्, स्वरितस्य स्थाने यो यण् स स्वरितयण्।

उदात्तयण् + अनुदात्तः = स्वरितः, कुमारी + औ = कुमार्यौ।
स्वरितयण् + अनुदात्तः = स्वरितः, खलपू + आशा = खलप्वाशा।

यदा उदात्तेन सह अनुदात्तस्य एकादेशो भवति, तदा स उदात्तो भवति। यथा—अग्नि + औ = पूर्वसवर्णदीर्घ एकादेश उदात्तः, अर्थाद् अग्नी। तथैव वायू इति। अनुदात्ते पदादौ उदात्तेन सह य एकादेश स स्वरितो वा भवति उदात्तो वा। यथा सु + उत्थितः = सूत्थितः सूत्थितः।

एतदनन्तरमाष्टमिके चतुर्थे पादे उपान्तिमेन सूत्रद्वयेन उदात्तात्परस्य अनुदात्तस्य स्वरितादेशो विहितोऽस्ति, यदि ततः परमुदात्तस्वरः स्वरितस्वरो वा नास्ति। एवं प्रकारेण उदात्तस्य परवर्तिनि अनुदात्ते प्रभावो विचारितोऽस्ति।

यद्यपि अष्टाध्याय्यां मध्ये मध्ये यथावसरं स्वरप्रभावानालक्ष्यस्वराणां समुल्लेखोऽवलोक्यते, यथा—'लुङ्लङ्लृङ्क्ष्वडुदात्तः', 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' इत्यादिषु सूत्रेषु, तथापि क्रमबद्धा पाणिनीया स्वरप्रक्रिया प्रथमाध्यायद्वितीयपादादारभ्य अष्टमाध्यायस्य उपान्तिमं सूत्रं यावद् गत्वा सम्पन्नतामुपैति। पाणिनेः क्रमस्तु लौकिकवैदिकोभयप्रयोगसाधुत्वपरः लक्ष्यकात्स्न्यावगाही। अत एवात्र कोऽपि प्रकरणभेदो न कल्पितः। अस्मिन् स्वरप्रक्रियाविचारे बहवो विषया मया वैवश्येन परित्यक्ताः। यद्यत्र किमपि सम्यक्त्वं तत् पूर्वेषां, यदि त्रुटयस्तर्हि ममैवाल्पज्ञानोपहतमतेरिति विनिवेद्य विरमामि।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाकविभवभूतेः शब्दकोशपर्यालोचनम्

डॉ॰ बालकृष्णशर्मा
सहायकप्राध्यापकः
साहित्यविभागाध्यक्षश्च
शासकीयसंस्कृतमहाविद्यालयः, ग्वालियरनगरम्

***

शब्दार्थयोः स्पर्धाशालिमञ्जुलसहभावेन काव्यमस्तित्वं भजते। एतौ शब्दार्थौ काव्ये अन्यूनानतिरिक्तत्वरूपेण व्यवस्थितौ काञ्चिदलौकिकीं रमणीयतां जनयतः। अत एव काव्यप्रणयनावसरे समुचितललितपदावलीविन्यासनैपुण्यं भवति कवीनां प्रधानवैशिष्ट्यम्। एतस्मादेव कारणादलङ्कारशास्त्रनिबन्धेषु काव्यस्वरूप-निरूपणावसरे काव्यशास्त्रिभिः शब्दार्थयोः समानमहत्त्वं स्वीकृतम्, परमानन्दात्मनः काव्यस्य शरीरं शब्दार्थाविति बहुत्र विशदीकृतम्। केचनाचार्यास्तु तत्र शब्दस्यैव प्राधान्यमुररीकुर्वन्ति पदावलीमेव च काव्यत्वेन स्वीकुर्वन्ति। अतः काव्यरचनायां शब्दानां माहात्म्यं विसंवादरहितमस्ति। काव्यप्रणयनोद्यतकवीनां शेमुषी विशालशब्दकोशोन्मेषविशिष्टा भवति। काव्यरचनासमये एते शब्दाः कविप्रतिभायामहमहमिकया आयान्ति, येन 'नवसर्गगते माघे नवशब्दो न विद्यते' प्रभृतिवचनानि सहृदयेषु सुप्रथितानि जातानि। यथा मालाकारः समुचितरूपेण पुष्पचयनं कृत्वा मालां रचयति, तथैव कविः समाहितचेतसा शब्दचयनं कृत्वा काव्यं प्रणयति। यथाह काव्यालङ्कारकारभामहाचार्यः—

'एतद् ग्राह्यं सुरभिकुसुमं ग्राम्यमेतन्निधेयं
धत्ते शोभां विरचितमिदं स्थानमस्त्यैतदस्य।
मालाकारो रचयति यथा साधु विज्ञाय मालां
योज्यं काव्येष्ववहितधिया तद्वदेवाभिधानम्'[1]।।

अनेन प्रकारेण प्रतिभाति यत् शब्दव्युत्पत्तिः शब्दकोशो वा सर्वेषां कवीनां कृते परमावश्यको भवति। तथ्यमिदं मनस्यवधाय काव्यशास्त्रिभिः काव्ये

१. काव्यालङ्कारे-१।५९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समुचितशब्दप्रयोगौचित्यं विशदीकृतम्। औचित्यपूर्णपदविन्यासाय कवये विशाल-शब्दकोशाभिज्ञता अपेक्षिता भवति। अत एवोक्तं भामहाचार्येण—

'न स शब्दो न तद् वाच्यं न स न्यायो न सा कला।
जायते यन्न काव्याङ्गमहो भारो महान् कवेः'[१]।।

वस्तुत आनन्दवर्धननिरूपितपदध्वनिमाध्यमेन कुन्तकनिरूपितपदवक्रता-व्याजेन क्षेमेन्द्रनिरूपितपदौचित्यव्याजेन वा काव्ये समुचितपदप्रयोगमाहात्म्यमेव सूचितमस्ति, यस्याधानं विपुलशब्दकोशसद्भावेनैव सम्भवति। अस्मादेव कारणात् काव्यरचनायाः प्राक् प्रचुरशब्दज्ञानापेक्षत्वमुद्दिष्टमाचार्यैः। तद्यथा--

'शब्दाभिधेये विज्ञाय कृत्वा तद्विदुपासनाम्।
विलोक्यान्यनिबन्धांश्च कार्यः काव्यक्रियादरः'[२]।।

एवं प्रतीयते यत् सर्वेषां कवीनां भवति स्वस्वशब्दकोशः। अयं शब्दकोशः तस्य कवेर्विविधशास्त्राभिज्ञतां काव्यरचनापाटवं शब्दविन्यासनैपुण्यञ्च प्रमाणयति। कवेः शब्दकोशेऽस्मिन् काव्यप्रवृत्तयः लोकप्रवृत्तयो शास्त्रप्रवृत्तयश्च समाहिता भवन्ति, येनैतासां प्रवृत्तीनां परिज्ञानाय कविविशेषस्य शब्दकोशपरिशीलनमपेक्षितं भवति। अनेनैव विचारेण शोधनिबन्धोऽयं लिखितः। कस्यचित् कविविशेषस्य शब्दकोशविवेचनाय द्वौ आधारौ भवतः। प्रथमाधारः शब्दस्य प्रकृतिः, द्वितीयाधारश्च शब्दप्रयोगक्षेत्रम्। तत्र शब्दप्रकृत्याधारे नामाख्यातोपसर्गनिपातानां संज्ञासर्वनामविशेषणक्रियाव्ययानां वा समाहारो भवति। शब्दप्रयोगक्षेत्राधारे लोकशास्त्रकाव्यानां समाहारो भवति। काव्यरचनापटुर्महाकविः सर्वेभ्यः क्षेत्रेभ्यः शब्दानादाय स्वशब्दकोशञ्च निर्माय काव्ये शब्दप्रयोगचातुरीं प्रदर्शयति। समुचितपदप्रयोगमाहात्म्यं विशदीकुर्वन् क्षेमेन्द्र आह—

'तिलकं बिभ्रती सूक्तिर्भात्येकमुचितं पदम्।
चन्द्राननेव कस्तूरीकृतं श्यामेव चान्दनम्'[३]।।

एवमेव पर्यायवक्रतानिरूपणप्रसङ्गे कुन्तकाचार्योऽपि काव्ये समुचितपद-चयनमाहात्म्यं निरूपयन्नाह—

'अभिधेयान्तरतमस्तस्यातिशयपोषकः।
रम्यच्छायान्तरस्पर्शात्तदलङ्कर्तुमीश्वरः।।

१. काव्यालङ्कारे-५।४; २. तत्रैव-१।१०।
३. औचित्यविचारचर्चायाम्, का. ११।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वयं विशेषणेनापि स्वच्छायोत्कर्षपेशलः।
असम्भाव्यार्थपात्रत्वगर्भं यश्चाभिधीयते।।
अलङ्कारोपसंस्कारमनोहारिनिबन्धनः।
पर्यायस्तेन वैचित्र्यं परा पर्यायवक्रता'[1]।।

अन्यत्र कुन्तकाचार्यः स्पष्टमेव काव्ये विशिष्टशब्दप्रयोगव्यवहारमभिलक्ष्याभिदधाति। तद्यथा—

'शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।
अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः'[2]।।

एवं प्रकारेण प्रतिभाति यत् कवीनां शब्दकोशापेक्षामधिकृत्य काव्यशास्त्रनिबन्धेषु बहुविचारितमस्ति। अत्र भवभूतिप्रणीतरूपकाणां सन्दर्भे शब्दकोशविवेचनाय निबन्धोऽयमुद्दिष्टः। महाकविभवभूतिः पाण्डित्यवैदग्ध्योभयविभूषितसंस्कृतकविषु अन्यतमः। तस्य रूपकेषु प्रयुक्तानां शब्दानां क्षेत्रमतिविस्तीर्णमस्ति। क्वचित् स वैदिकसाहित्यसम्बद्धशब्दावलीमुपादत्ते क्वचिच्च शैवशाक्ततन्त्रसम्बद्धां शब्दावलीं गृह्णाति। एकत्र महाकविर्धर्मशास्त्रकर्मकाण्डप्रयुक्तपदानि गृह्णाति, अन्यत्र च सङ्गीतनृत्यनाट्यशास्त्रादिभ्यः पदान्यादाय विन्यस्यति। अनेनैव प्रकारेणानेकत्र स विविधदार्शनिकपदावलीमाददाति। स्थापत्यायुर्वेदहस्त्यायुर्वेदप्रभृतिशास्त्रेभ्योऽपि पदान्याहरति महाकविरसौ। छान्दसशब्दानां प्रयोगस्तु लभ्यत एव कवे रूपकेषु, देशजपदानामपि बहुत्र प्रयोगः प्राप्यते। देशकालपरिस्थितिसम्बद्धानि पदान्यपि बहुलतया लभ्यन्ते कवे रूपकेषु। परिणामतो वक्तुं शक्यते यद् भवभूतेः शब्दकोशो विपुलकायोऽस्ति। अस्मिन् सर्वेषां प्रयोगक्षेत्राणां शब्दाः समाहिताः सन्ति। अत्र समासेन महाकवेः केषाञ्चन प्रयोगाणां विवेचनं प्रस्तूयते।

देशजशब्दप्रयोगविवेचनम्

महाकविभवभूते रूपकेषु अनेके देशजशब्दाः प्रयुक्ताः सन्ति। तेषु केचनात्र विमृश्यन्ते। कविः स्वमालतीमाधवप्रकरणे एकत्र 'रल्लिः' इति पदस्य प्रयोगं करोति। तद्यथा—

'रल्लिगल्लूरणशब्दसन्दर्भपरिपूरितनभस्तलः.........'[3]।

१. वक्रोक्तिजीविते-२।१०-१२; २. तत्रैव-१।९।
३. मालतीमाधवतृतीयाङ्के, पृ. १६२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र प्रयुक्तं दीर्घमधुरार्थवाचकं रल्लिपदमिदं देशजमस्ति। अस्य पदस्य विवेचनेन भवभूतेर्देशकालपरिस्थितिषु नवप्रकाशसम्भाव्यता भविष्यति। एवमेव प्रकरणेऽस्मिन् कविरेकत्र कपोलवाचकतया 'गल्ल'पदप्रयोगं करोति। तद्यथा— 'पातालप्रतिमल्लगल्लविवरप्रक्षिप्तसप्तार्णवम्'[१]। कपोलवाचकं पदमिदं देशजमस्ति। प्रयोगोऽयमिदानीं लोकभाषायामुत्तरभारते प्रचलति। अत्रैव कविरेकत्र 'हिमाणहे' इति पदप्रयोगं सम्बोधनरूपे करोति। तद्यथा—'हिमाणहे! पश्यामीव निर्मलनिरन्तरोद्वृत्ततरवारिधाराप्रतिफलितेत्यादि'[२]।

भयहर्षद्योतकोऽयं शब्दः देशजोऽस्ति। अस्य शब्दस्य परिशीलनेनापि भवभूतेर्देशकालपरिस्थितीनामज्ञातपक्षाः प्रकाशिता भविष्यन्ति। मालतीमाधवप्रकरणे प्रयुक्तो देशोद्भवोऽन्य एकः शब्दोऽस्ति 'लडह' इति। तद्यथा—

'लवङ्गिका—कथं नाम नववधूविस्रम्भणोपायाभिज्ञं लडहं विदग्धं मधुरभाषिणमरोषणं ते भ्रातरं भर्तारमासाद्य न दुर्मनायिष्यते मे प्रियसखी'[३]।

अस्य पदस्य प्रयोगः सर्वप्रथमं गाथासप्तशत्यामुपलभ्यते। तद्यथा—

'ताविज्जन्ति असोएहिं लडहवणिआओ दइअविरहम्मि।
किं सहइ कोवि कस्स वि पाअपहारं पहुप्पन्तो'[४]।।

कुन्तकस्य वक्रोक्तिजीविते उदाहृते एकस्मिन् प्राकृतपद्ये पदस्यास्य प्रयोगः प्राप्यते। तद्यथा—

'अण्णं लडहत्तणअं अण्णं च्चिअ काइ वत्तणच्छाआ।
सामा सामण्णपआवइणो रेह च्चिअ ण होई'[५]।।

इत्थं प्रमाणितं भवति यत् 'लडह'पदं प्राकृतभाषापदमस्ति। अस्य संस्कृतभाषायां प्रयोगो भवभूतेर्देशजशब्दप्रयोगप्रवृत्तिं सूचयति। वस्तुतस्तु 'लडह'पदस्य संस्कृतरूपमस्ति 'लटभ' इति पदम्, यस्य प्रयोगः संस्कृतसाहित्ये बहुत्र प्राप्यते। तद्यथा—

'अतिक्रान्तः कालो लटभललनाभोगसुलभः'[६]।

---

१. मालतीमाधवे-५।२२;
२. तत्रैवाष्टमाङ्के, पृ. ३६४।
३. तत्रैव, सप्तमाङ्के, पृ. ३०५;
४. गाथासप्तशत्याम्-१।७।
५. वक्रोक्तिजीविते-१।९६;
६. भर्तृहरिवैराग्यशतके।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कश्मीरदेशीयो विक्रमाङ्कदेवचरितमहाकाव्यप्रणेता बिल्हणः पदमिदं स्वमहाकाव्ये चतुर्षु स्थानेषु प्रयुङ्क्ते। यथा—

'तस्याः पादनखश्रेणिभिः शोभते लटभभ्रुवः'[१]।

'किं वा वर्णनया समस्तलटभालङ्कारतामेष्यति'[२]।

'अनर्घ्यलावण्यनिधानभूमिर्न कस्य लोभं लटभा तनोति'[३]।

'केशबन्धविभवैर्लटभानां पिण्डतामिव जगाम तमिस्रम्'[४]।।

क्षेमेन्द्राचार्योऽपि 'लटभ'पदस्य प्रयोगं करोति[५]। एवं प्रतीयते यत् संस्कृतभाषायाः लटभपदं प्राकृतभाषायां 'लडह'रूपेण प्रयुक्तमस्ति। भवभूतिः प्राकृतरूपमेव संस्कृतभाषायां गृह्णाति, येन तस्य देशजशब्दग्रहणप्रवृत्तिः प्रमाणिता भवति। विवेचनेनानेन प्रतिभाति यद् महाकविभवभूतिः स्वरूपकेषु बहुत्र देशजशब्दानां प्रयोगं करोति, अतस्तस्य शब्दकोशे देशीयपदानामस्ति महत्त्वपूर्णं स्थानम्। अत्र स्थालीपुलाकन्यायेन समासेन केषाञ्चन पदानां विमर्शो विहितोऽस्ति विदुषां ध्यानाकर्षणाय।

विविधशास्त्रीयपदावलीप्रयोगविवेचनम्

महाकविभवभूतिः स्वरूपकेषु बहुत्र विविधशास्त्राणां पारिभाषिकपदानि प्रयुङ्क्ते, येन तस्य तत्तच्छास्त्राभिज्ञता तु प्रकटीभवत्येव, शब्दकोशक्षेत्रमपि विस्तारमाप्नोति। अनेनैव सह कवे रूपकेषु पदप्रयोगवैचित्र्यमप्यायाति। अत्र केषाञ्चन पदानां विमर्शो विधीयते। कविः स्वोत्तररामचरितनाटके एकत्र 'पुटपाक' इति पदं प्रयुङ्क्ते। तद्यथा—

'अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः।
पुटपाकप्रतीकाशो रामस्य करुणो रसः'[६]।।

पुटपाकपदमायुर्वेदशास्त्रीयमस्ति। श्लोकेऽस्मिन् या उपमा विन्यस्ताऽस्ति, तस्याः सम्पूर्णं चारुत्वं कवेः 'पुटपाक'पदप्रयोगे निहितमस्ति। येनाभिप्रायेण पदमिदं कविना प्रयुक्तमस्ति तस्याभिप्रायस्य द्योतकमेतदतिरिक्तमन्यत्पदं संस्कृतसाहित्ये नोपलभ्यते। अस्मिन्नेवाभिप्राये कविरन्यत्र 'कुकूल'पदस्य प्रयोगं करोति; परन्तु तत्र

१. विक्रमाङ्कदेवचरिते-८।६;
२. तत्रैव-८।८६।
३. तत्रैव-९।६८;
४. तत्रैव-११।१८।
५. औचित्यविचारचर्चायामवस्थौचित्योदाहरणे;
६. उत्तररामचरिते-३।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुटपाकपदप्रयोगेण तुल्यानन्दानुभूतिर्न जायते। तद्यथा—'कुकूलानां राशौ तदनु हृदयं पच्यत इव'[१]।

मालतीमाधवप्रकरणे एकस्मिन् स्थाने कविः 'कूटपाकल' इति पदस्य प्रयोगं करोति। यथा—

'अभिहन्ति हन्त कथमेष माधवं सुकुमारकायमनवग्रहः स्मरः।
अचिरेण वैकृतविवर्तदारुणः कलभं कठोर इव कूटपाकलः'[२]।।

एतस्मिन् श्लोकेऽपि विन्यस्त उपमालङ्कारः 'कूटपाकल'पदप्रयोगेण परां सौन्दर्यपदवीमधिरूढः। पदमिदं हस्त्यायुर्वेदशास्त्रीयमस्ति। अनेन प्रयोगेण कवेः पदविन्यासकौशलन्तु प्रमाणितं भवत्येव, काव्यसौन्दर्यपरिपाकः परां पदवीमधिरोहति, शब्दकोशश्च विस्तारमाप्नोति। उत्तररामचरितनाटके कविरेकस्मिन् स्थाने 'आलर्क' इति पदप्रयोगं विदधाति। तद्यथा—

'हा हा धिक्परगृहवासदूषणं यद्
वैदेह्याः प्रशमितमद्भुतैरुपायैः।
एतत्तत्पुनरपि दैवदुर्विपाकाद्
आलर्कं विषमिव सर्वतः प्रसृप्तम्'[३]।।

अस्य पदस्य विन्यासोऽपि कवेर्विपुलशब्दकोशाभिज्ञतां प्रमाणयति, तस्य लौकिकज्ञानमपि प्रकटीकरोति उपमानप्रयोगदक्षताञ्च निरूपयति। अस्मिन्नेव नाटके कविरेकस्मिन् स्थाने 'तौर्यत्रिक' इति पदस्य प्रयोगं विदधाति। तद्यथा—'लवः......। तं च स्वहस्तलिखितं मुनिर्भगवान् व्यसृजद् भगवतो भरतस्य मुनेस्तौर्यत्रिकसूत्रकारस्य'[४]। नृत्यगीतवाद्यसंवलितनाट्याय प्रयुक्तमिदं पदं कवेः शब्दप्रयोगचातुरीं ज्ञापयति।

महाकविभवभूतिः स्वरूपकेषु विविधदर्शनशास्त्रीयपदान्यपि नैकेषु स्थलेषु प्रयुङ्क्ते। तद्यथोत्तररामचरितनाटके 'अर्थवादः'[५]-'विवर्त्तः'[६]-'प्रत्यभिज्ञा'[७]-प्रभृतिपदानि प्रयुक्तानि सन्ति। एवमेव मालतीमाधवप्रकरणेऽपि 'गर्मक'[८]-'समानधर्मा'[९]-

---

१. उत्तररामचरिते-६।३८;
२. मालतीमाधवे-१।४०।
३. उत्तररामचरिते-१।४०;
४. तत्रैव चतुर्थाङ्के।
५. तत्रैव प्रथमाङ्के;
६. तत्रैव-३।४७।
७. तत्रैव षष्ठाङ्कनामकरणे;
८. मालतीमाधवे प्रथमाङ्के।
९. तत्रैव, प्रथमाङ्के।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'तत्त्वविनिश्चय'[१]-प्रभृतिपदानि प्रयुक्तानि सन्ति। एतैः प्रयोगैः कवेः शब्दकोशविपुलतया सह विविधदर्शनशास्त्राभिज्ञता अपि प्रकटीभवति। वस्तुतो रूपकेषु शास्त्रीयपदावलीप्रयोगनैपुण्ये भवभूतिरनुपमो वर्तते। कमनीयकाव्ये शास्त्रोचितपदान्यपि निपुणतया प्रयोक्तुं शक्यन्त इति भवभूतिशब्दप्रयोगैः साधु प्रतीयते। दार्शनिकपदावलीतुल्यं कविर्वास्तुशास्त्रीयाण्यनेकानि पारिभाषिकपदानि स्वरूपकेषु प्रयुङ्क्ते। 'भवन'[२]-'वलभी'[३]-'वातायन'[४]-'रथ्या'[५]-'गर्भभवन'[६]-'अलिन्द'[७]-'सञ्जवन'[८]-'प्रासाद'[९]-'सौध'[१०]-'गोपुर'[११]-प्रभृतिपदानि मालतीमाधव-प्रकरणे प्रयुक्तानि सन्ति। एतेषां प्रयोगाणां पर्यालोचनया कवेः स्थापत्यविद्याभिज्ञता प्रमाणिता भवति। एवमेव प्रकरणेऽस्मिन् 'प्रौढित्व'-'उदारता'-'अर्थगौरव'-'वैदग्ध्य'-'कविवर्णना'-'प्रबन्ध'-'रस'-सात्त्विकविकार-प्रभृतिकाव्यशास्त्रीय-पारिभाषिकपदानि प्रयुक्तानि सन्ति, यैः कवेः काव्यशास्त्रप्रचुरपरिशीलनं प्रमाणितं भवति। काव्यशास्त्रेण सहैव नाट्यशास्त्रीयाणि 'भूमिका'-'प्रकरण'-'नाटक'-'कुशीलव'-'भरत'-'प्रकरणनायक'-'वस्तु'-'नर्मसुहृद्'-'निसृष्टार्थदूती'प्रभृतिपदान्यपि मालतीमाधवप्रकरणेऽनेकत्र प्रयुक्तानि सन्ति। एकस्मिन्नेव श्लोके विविधदार्शनिक-काव्यशास्त्रीयनाट्यशास्त्रीयपदानां प्रयोगो द्रष्टव्योऽत्र—

'यद्वेदाध्ययनं तथोपनिषदां साङ्ख्यस्य योगस्य च
ज्ञानं तत्कथनेन किं नहि ततः कश्चिद् गुणो नाटके।
यत्प्रौढित्वमुदारता च वचसां यच्चार्थतो गौरवं
तच्चेदस्ति ततस्तदेव गमकं पाण्डित्यवैदग्धयोः'[१२]।।

एतेषां पदानां विन्यासेन कवेः पदप्रयोगक्षेत्रमतिविस्तृतं जातम्। 'निसृष्टार्थदूती'पदं प्रकरणेऽस्मिन् स्थानद्वये प्रयुक्तमस्ति[१३]। 'नर्मसुहृद्'[१४] पदप्रयोगोऽपि मालतीमाधवे विमर्शसापेक्षोऽस्ति। एते सर्वे प्रयोगा भवभूतेः पदविन्यासकौशलं शब्दकोशवैपुल्यञ्च सूचयन्ति।

---

१. मालतीमाधवे, प्रथमाङ्के; २-५. तत्रैव-१।१६।
६. तत्रैव प्रथमाङ्के; ७. तत्रैव द्वितीयपञ्चमाङ्कयोः।
८. तत्रैव द्वितीयाङ्के; ९. तत्रैव-७।५।
१०-११. तत्रैव-९।१; १२. मालतीमाधवे-१।८।
१३. तत्रैव प्रथमद्वितीयाङ्कयोः; १४. तत्रैव प्रथमाङ्के।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यशास्त्रनाट्यशास्त्राभ्यां तुल्यं धर्मशास्त्रेण सम्बद्धानि पदान्यपि भवभूते रूपकेषु सुप्रयुक्तानि चारुत्वोत्कर्षं साधयन्ति। 'पङ्क्तिपावन'[१]-'पञ्चाग्नि'[२]-'इष्ट'[३]-'पूर्त'[४]-'धृतव्रत'[५]-प्रभृतिधर्मशास्त्रीयपारिभाषिकपदानि कवे रूपकेषु प्रयुक्तानि सन्ति। मालतीमाधवप्रकरणे एकत्र 'निवापसलिल'पदस्य विन्यासः परमकमनीयतया कृतः कविना। तद्यथा—

'आजन्मनः सहनिवासितया मयैव
मातुः पयोधरपयोऽपि समं निपीय।
त्वं पुण्डरीकमुख बन्धुतया निरस्त-
मेको निवापसलिलं पिबसीत्ययुक्तम्'[६]।।

अत्र प्रयुक्तमिदं पदं परममार्मिकमौचित्यास्पदञ्चास्ति येन कवेः पदविन्यासनिपुणता शब्दकोशविपुलता च प्रमाणिते भवतः। एवमेव महावीरचरिते 'दायाद'पदप्रयोगः कवेरौचित्यास्पदपदचयनचातुर्यं प्रमाणयति। तद्यथा—

'तेषामिदानीं दायादो वृद्धः सीरध्वजो नृपः।
याज्ञवल्क्यो मुनिर्यस्मै ब्रह्मपारायणं जगौ'[७]।।

एवमेवोत्तररामचरिते 'आहिताग्नि'पदविन्यासः परमौचित्यावहः। तद्यथा—

'किन्त्वनुष्ठाननित्यत्वं स्वातन्त्र्यमपकर्षति।
सङ्कटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता'[८]।।

अनेन प्रकारेण भवभूतिप्रयुक्तविविधशास्त्रीयपदप्रयोगाणां समासेन विमर्शो विहितोऽत्र। एभिः पदविन्यासैर्महाकवेः शब्दकोशोपरि विमर्शस्यापेक्षा सम्यक्तया प्रमाणिता भवति। उद्देश्येनानेन निबन्धस्यास्य लेखने प्रवृत्तिर्जाता। वस्तुत एतेषां शब्दानां पर्यालोचनेन न केवलं भवभूतेः शब्दकोशविस्तारोऽनुमेयो भवत्यपि तु तस्य समुचितपदविन्यासकौशलमपि विशदीभवति।

अभिसन्धिमयशब्दविन्यासविवेचनम्

महाकविभवभूतिः स्वरूपकेषु बहुत्राभिसन्धिमयानि पदानि प्रयुङ्क्ते, येषामनुशीलनेन कवेर्देशकालपरिस्थितीनां परिचयः प्राप्यते, तस्य शब्दकोशव्यापकताऽपि च विशदीभवति। अत्र समासेन केषाञ्चित् प्रयोगाणां

१-५. मालतीमाधवे प्रथमाङ्के प्रस्तावनायाम्; ६. तत्रैव-९।४०।
७. महावीरचरिते-१।१४; ८. उत्तररामचरिते-१।८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निदर्शनत्वेन विमर्शः क्रियते। मालतीमाधवप्रकरणे 'उलप'-'अश्मन्तक' इति पदे क्षेत्रविशेषोत्पन्नतृणविशेषयोः कृते प्रयुक्ते स्तः कविना। तद्यथा—

'सैषा विभाति लवणा वलितोर्मिपङ्क्ति-
रभ्रागमे जनपदप्रमदाय यस्याः।
गोगर्भिणीप्रियनवोलपमालभारि-
सेव्योपकण्ठविपिनावलयो विभान्ति'[1]।।

श्लोकेऽस्मिन् प्रयुक्तम् 'उलप'पदं विवेचनसापेक्षमस्ति। अपि च—

'काश्मर्याः कृतमालमुद्गतदलं कोयष्टिकष्टीकते
तीराश्मन्तकशिम्बिचुम्बितमुखा धावन्त्यपः पूर्णिकाः।
दात्यूहैस्तिनिशस्य कोटरवतिस्कन्धे निलीय स्थितं
वीरुन्नीडकपोतकूजितमनुक्रन्दन्त्यधः कुक्कुभाः'[2]।।

अस्मिन् श्लोके विन्यस्तम् 'अश्मन्तक'पदमनुशीलनीयमस्ति। मालतीमाधवप्रकरणे एकस्मिन् स्थाने कविः 'कौमारवर्धकी'[3] इति पदप्रयोगं करोति। इदं पदमपशब्दकोटिमधिरोहति। यतो ह्यस्यार्थो निन्दामूलकोऽस्ति। अनेन प्रयोगेण कवेस्तदानीन्तनलोकव्यवहाराभिज्ञता प्रमाणिता भवति। अतः पदविन्यासोऽयं साभिप्रायः। एवमेवास्मिन् प्रकरणे एकस्मिन् प्रसङ्गे 'दन्तपाञ्चालिका'[4] पदं प्रयुक्तमस्ति। इदं पदमप्यभिसन्धिपूर्णमस्ति। कवेः सर्वेषु रूपकेषु प्रयुक्तं 'कालप्रिय'[5]-'उदुम्बर'[6] चेति पदद्वयं स्थानवाचकमस्ति। अनयोः 'कालप्रिय' इति स्थानस्य सूचना राजशेखरस्य काव्यमीमांसायां मिलति। तद्यथा—

'तथा हि यो वामनस्वामिनः पूर्वः स ब्रह्मशिलायाः पश्चिमः, यो गाधिपुरस्य दक्षिणः स कालप्रियस्योत्तर इति'[7]।

'उदुम्बर'पदस्य पाठः पाणिनेरष्टाध्याय्याः 'राजन्यादिभ्यो वुञ्'[8] इति सूत्र-सम्बद्धे गणपाठे उपलभ्यते। इदं स्थानं व्यासरावीनद्योर्मध्ये त्रिगर्तक्षेत्रे आसीत्। महाकविभवभूतेर्मूलस्थानमिदमेवासीत्। एतस्मादेव कारणात् स स्वकुलम् 'औदुम्बर'पदेन प्रस्तौति। अस्माकं देशे परिचयप्रसङ्गे मूलस्थानकथनस्येयं परम्परा

१. मालतीमाधवे-९।२;
२. तत्रैव-९।७।
३. तत्रैव सप्तमाङ्कारम्भे;
४. तत्रैव-१०।५।
५. त्रयाणां रूपकाणां प्रस्तावनायाम्;
६. तत्रैव।
७. काव्यमीमांसायाः सप्तदशाध्याये;
८. अष्टाध्यायी-४।२।५३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदानीं यावत् प्रचलति। मूलस्थानकथनेन विना व्यक्तेः परिचयो न पूर्णतामाप्नोति। कविर्भवभूतिरपि प्रयोजनेनानेन 'औदुम्बर'पदविन्यासं कृतवान् स्वकुलवर्णनप्रसङ्गे त्रिष्वेव रूपकेषु। मालतीमाधवप्रकरणे 'जवनिका'[१]पदप्रयोगोऽपि एकस्मिन् प्रसङ्गे उपलभ्यते। सार्थवाहवाचकः 'नैगमजन' इति शब्दोऽपि मालतीमाधवप्रकरणे प्रयुक्तोऽस्ति। पदेनानेन भवभूतेः काले सार्थवाहगमनागमने प्रमाणिते भवतः, येन तदानीन्तनी व्यापारस्थितिः प्रत्येया भवति। 'वरयात्रायाः' कृते 'जन्ययात्रा' इति पदस्य प्रयोगोऽपि मालतीमाधवप्रकरणे उपलभ्यते, येन तदानीन्तने समये विवाहप्रसङ्गे वरयात्रापरम्परा प्रमाणिता भवति। इदं पदमपि भवभूतेर्विशिष्टप्रयोगेषु गण्यते। अस्य विन्यासो मालतीमाधवप्रकरणे एवमस्ति—

'भो राजानश्चरमवयसामाज्ञया सञ्चरध्वं
कर्तव्येषु श्रवणसुभगं भूमिदेवाः पठन्तु।
चित्रं नानावचननिवहैश्चेष्ट्यतां मङ्गलेभ्यः
प्रत्यासन्नस्त्वरयतितरां जन्ययात्राप्रवेशः'[२]।।

रत्नावलीनाटिकातुल्यं मालतीमाधवप्रकरणमपि 'मदनमहोत्सव'पदप्रयोगेण समारोहस्यास्य समायोजनसूचनां ददाति तदानीन्तने समये। एवमेवात्र स्थाने एकस्मिन् 'मैरेय' इति पदं प्रयुक्तमस्ति। तद्यथा—

'तथा च प्रियसखि, मुहूर्तमुदूढविस्मयविसंस्थुलोद्वेल्लविस्तारिप्रान्तनाल-रक्तनेत्रपुण्डरीकताण्डवोद्भटप्ररूढमैरेयमदघूर्णनशीलम्..........'[३]। पेयविशेषवाचक-पदमिदं पाणिनेः समयेऽपि प्रचलितमासीत्। यतो हि तस्यैकस्मिन् सूत्रे पदमिदमुल्लिखितमस्ति। तद्यथा—'अङ्गानि मैरेये'[४]।

काशिकायां सूत्रस्यास्य निदर्शनत्वेन 'गुडमैरेयः', 'मधुमैरेयः' इति प्रयोगद्वयं प्रदत्तमस्ति। पेयस्यास्य विवरणं कौटिल्यः स्वार्थशास्त्रे ददाति। तदित्थमस्ति—

'मेषशृङ्गित्वक्क्वाथाभिषुतो गुडप्रतीवापः पिप्पलीमरिचसम्भारस्त्रिफलायुक्तो वा मैरेयः'[५]।

एवमत्र स्थालीपुलाकन्यायेन भवभूतिप्रयुक्तानि कानिचिदभिसन्धिमयानि पदानि विमृष्टानि। एते शब्दा अन्ये च सजातीयाः शब्दा भवभूतिरूपकेषु विन्यस्ता व्याख्यासापेक्षाः सन्ति। एतेषां प्रयोगाणां पर्यालोचनया कवेर्देशकालपरिस्थितीनां

---

१. मालतीमाधवे षष्ठाङ्के ; २. तत्रैव-६।२।
३. तत्रैव सप्तमाङ्के ; ४. अष्टाध्यायी-६।२।७०।
५. अर्थशास्त्रे-२।२५।२२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञाने तस्य रूपकाणां सांस्कृतिकपरिशीलने च सरलता जायते। अपि च भवभूतिशब्दकोशपरिशीलनाय पदानामेतेषां विवेचनमावश्यकमस्ति। यतो हि एते विशिष्टाः प्रयोगाः सन्ति महाकवेः।

अन्यविशिष्टपदप्रयोगविवेचनम्

भवभूतिरूपकेषु कतिपयान्यविशिष्टप्रयोगा अपि बहुत्र प्राप्यन्ते, येषां परिशीलनमावश्यकमस्ति। उदाहरणतयात्र वैदिकप्रयोगाणामपाणिनीयप्रयोगाणां ध्वन्यनुकरणमूलकप्रयोगाणां प्रेष्ठपदप्रयोगाणां च समाहारः कर्त्तुं शक्यते। मालतीमाधवप्रकरणे एकत्र कविः 'शिवतातिः' इति पदप्रयोगं करोति। तद्यथा—

'विधाता भद्रं नो वितरतु मनोज्ञाय विधये
विधेयासुर्देवाः परमरमणीयां परिणतिम्।
कृतार्था भूयासं प्रियसुहृदपत्योपनयतः
प्रयत्नः कृत्स्नोऽयं फलतु शिवतातिश्च भवतु'[१]।।

अन्यत्रापि—

'निर्माणमेव हि तदा तव लालनीयं
मा पूतनात्वमुपगाः शिवतातिरेव'[२]।।

अयं प्रयोगो वैदिकप्रयोगोऽस्ति। पाणिनिर्वैदिकशब्दनिष्पत्तिप्रकरणे 'शिवशमरिष्टस्य करे'[३] इति सूत्रं रचितवान्। अनेन सूत्रेण 'शिवताति' इति पदं निष्पद्यते। एवमेवान्यत्र महावीरचरितनाटके भवभूतिः 'अरिष्टतातिः'[४] इति पदं प्रयुङ्क्ते। इत्थमेव 'कल्याणताति', 'शुभताति' इति पदे अपि स्तः। एते सर्वे वैदिकप्रयोगाः सन्ति, येषामनुशीलनेन कवेर्वैदिकपदप्रयोगकुशलता प्रमाणिता भवति। वैदिकप्रयोगैस्तुल्यमपाणिनीयप्रयोगमपि करोति भवभूतिः। तद्यथोत्तर-रामचरिते 'विश्राम' इति पदप्रयोगो विचारणीयः। अयं प्रयोग ईदृशोऽस्ति—

'अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः।
कालेनावरणात्ययात्परिणते यत्स्नेहसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्राप्यते'[५]।।

---

१. मालतीमाधवे-६।७; २. तत्रैव-९।५१।
३ अष्टाध्यायी-४।४।१४३; ४. महावीरचरिते प्रथमाङ्के।
५. उत्तररामचरिते-१।३९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाणिनीयव्याकरणानुसारेण 'विश्रमः' इति पदं निष्पद्यते; परन्तु बोपदेवस्य मुग्धबोधव्याकरणानुसारेण 'विश्रामः' इति पदमपि विकल्पेन निष्पद्यते। प्रयोगेऽस्मिन् भवभूतिर्बोपदेवमनुसरति। एवं कवेः शब्दकोशपरिशीलनेन तस्यान्यव्याकरणपद्धतीनामभिज्ञताऽपि प्रमाणिता भवति। एभिः प्रयोगैः सहैव भवभूतेर्ध्वन्यनुकरणमूलकप्रयोगाणामपि चर्चा करणीया। 'उद्बुद्बुद'-'टङ्कार'-'घणत्कार'-'घूत्कार'-'गद्गदनदद'-'झञ्झणत्'-प्रभृतिप्रयोगाः प्रसङ्गेऽस्मिन्नुल्लेखनीयाः सन्ति। एवमेव शब्दकोशपठितानां विरलप्रयुक्तानां 'वैकन्तक'-'शुण्डार'-'खुरली'-'काण्डीर'-'काण्डपृष्ठ'-'धवित्र'-'निकुरुम्ब'-'कोयष्टिक'-'दात्यूह'-'आकेकर'-'वैशस'-'कडार'-'आरकूट'-'प्रचलाकिन्'-'प्रतिसूर्यक'-'अनोकह'-'हायन'-'कुट्टाक'-प्रभृतिशब्दानां प्रयोगं यथावसरं विदधाति स्वरूपकेषु महाकविभवभूतिः। एभिः प्रयोगैः कवेः शब्दकोशविपुलतानुमितिस्तु भवत्येव, तस्य पदविन्यासदक्षताऽपि प्रकटीभवति। 'डम्बर'प्रभृतीनि कानिचित् पदानि भवभूतये भृशं रोचन्ते, येनैतेषां शब्दानां भूयोभूयः प्रयोग उपलभ्यते तस्य रूपकेषु। एते कवेः प्रेष्ठप्रयोगाः सन्ति, येषामनुशीलनं सहृदयैर्विज्ञैः करणीयं भवभूतिशब्दकोशपर्यालोचनेच्छुभिः।

एवं समासेन महाकविभवभूते रूपकेषु शब्दविन्यासमधिकृत्य विचारो विहितः। वस्तुतो एष कविः 'वश्यवाक्', 'शब्दब्रह्मविद्', 'प्राज्ञश्च' आसीत्। अतोऽस्य रचनासु शब्दविन्यासकौशलं परां पदवीमधिरूढं पदे पदे विमर्शमपेक्षते। शब्दविन्यासस्य कलायां नैपुण्याय विशालशब्दकोशापेक्षा भवति कवेः कृते। यतो हि भवभूतेः शब्दकोशो विपुलकायो वैविध्यपूर्णश्चास्ति, अतस्तस्य रूपकेषु शब्दविन्यासोऽतिशयाह्लादकारकः सञ्जातः। पारमार्थिकरूपेण वक्तुं शक्यते यद् भवभूतौ शक्तिव्युत्पत्त्यभ्यासरूपकाव्यहेतूनां सम्यक्सद्भावोऽस्ति। अतस्तस्य कृतिषु व्युत्पत्तिसापेक्षपदानां प्रयोगः प्राचुर्येण प्राप्यते। इयं महाकविभवभूतेः शब्दकोशस्य परमा विशिष्टा इति शम्।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिपुरुषवादे पुरुषसम्प्रत्ययः

डॉ॰ राममूर्तिचतुर्वेदी
प्राध्यापकः
वेदविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये, वाराणसी

***

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।। (गीता-४।७-८)

इति गीतोक्तभगवद्वचनानुसारं वैदिकसनातनधर्मस्य यदा यदा ह्रासो भवति, तदा तदा भगवान् स्वयमेव केनचिद् रूपेण वेदोदितस्य सनातनवैदिकधर्मस्य संस्थापनाय आत्मानमवतारयति। इह पृथिवीतले वैदिकधर्मोद्धाराय भगवतोऽवतरणमवतारः कथ्यते। एतस्मिन्नेव क्रमे पूज्यचरणानां विद्यावाचस्पतीनां 'पण्डितश्रीमधुसूदन-ओझा'महोदयानामपीह भारतभूमौ भगवत्तेजोंऽशरूपेणावतरणं वस्तुतो वेदविद्याबोधनपुरस्सरं वैदिकविज्ञानाख्यधर्मप्रतिष्ठापनाय सञ्जातमित्युक्तौ नास्ति मनागपि संशीतिलेशः।

प्रायशो जानन्ति सर्वे यत्काश्यां निवसन्तो जगत्प्रसिद्धाः स्वनामधन्या महामहोपाध्यायाः पण्डितश्रीशिवकुमारशास्त्रिवर्या एतेषामोझामहाभागानां पूज्या गुरव आसन्। तदानीं पाश्चात्त्यैः कैश्चिद् विद्वद्भिस्तदनुयायिभिः कैश्चिद् भारतीयविद्वद्भिश्च वेदविद्याया यथेच्छमसङ्गतमर्थाविष्करणमवलोक्य चेखिद्यमानमानसाः श्रीशास्त्रिपादाः स्वशिष्यं वेदादिशास्त्रेषु कृतभूरिपरिश्रममप्रतिमप्रतिभासम्पन्नं श्रीओझामहाभागं सप्रमाणं वेदानां परमं प्रतिपाद्यं प्रकाशयितुं सम्प्रैरयन्। तेषामेव गुरुचरणानां प्रेरणया आदेशेन च प्रेरिता आदिष्टाश्च पं॰ओझामहोदया वेदविद्याया यथार्थविवेचने प्रवृत्ता अभवन्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्मब्रह्मणोरेव जिज्ञास्यत्वम्

वेदस्य परमं प्रतिपाद्यं किमिति जिज्ञासायां भारतीयषड्दर्शनानुरोधेनेदं वक्तुं शक्यते यद् वस्तुतो वेदस्य द्वयमेव प्रतिपाद्यं विद्यते, तत्र प्रथमं धर्मः, द्वितीयं ब्रह्म इति। अत एव वेदभाष्यकारः सायणाचार्यः ऋग्वेदभाष्यभूमिकायां वेदाध्ययनस्य परमं प्रयोजनं निरूपयन् ब्रूते, यत्—'वेदे पूर्वोत्तरकाण्डयोः क्रमेण धर्मब्रह्मणी विषयः, तयोरनन्यलभ्यत्वात्। तथा च पुरुषार्थानुशासने सूत्रितम्—'धर्मब्रह्मणी वेदैकवेद्ये' इति। 'धर्मो विश्वस्य जगतः प्रतिष्ठा', 'तस्माद्धर्मं परमं वदन्ति' (तै॰आ॰ १०।६३।७), 'नावेदविन्मनुते तं बृहन्तम्' (तै॰ब्रा॰ ३।१२।९।७), 'ब्रह्मविद् ब्रह्मैव भवति' (मुण्ड॰ ३।२।९) इत्यादिभिः श्रुतिभिरनन्यलभ्यत्वाद् अस्ति धर्मब्रह्मणोर्वेदविषयत्वम्। तदुभयज्ञानं वेदस्य साक्षात् प्रयोजनमिति।

अत एव षड्दर्शनेषु केवलं पूर्वोत्तरमीमांसयोरेव क्रमशः प्रतिज्ञा वाक्यरूपेण धर्मे ब्रह्मणि च जिज्ञासा क्रियते, तद्यथा मीमांसादर्शने 'अथातो धर्मजिज्ञासा' (मीमांसादर्शने-१।१।१), वेदान्तदर्शने 'अथातो ब्रह्मजिज्ञासा' (वेदान्तदर्शने-१।१।१) इति। दर्शनान्तराणि तु प्रमाण-प्रमेय-निरूपणव्याजेन जागतिकं पदार्थजातं प्रथमतो निरूप्य तत्तत्त्वज्ञानान्निःश्रेयसाधिगमं प्रसाधयन्ति। तदेतत्तेषां प्रतिज्ञावाक्यदर्शनेनैव स्फुटं जायते। तद्यथा न्यायदर्शने 'प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभासच्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः' (न्यायदर्शने-१।१।१), वैशेषिकदर्शने 'अथातो धर्मं व्याख्यास्याम' (वै.द. १।१।१), सांख्यदर्शने 'अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः' (सां.द. १।१), योगदर्शने 'अथ योगानुशासनम्' (यो.द. १।१।१) इति।

ब्रह्मैव वेदस्य परमं प्रतिपाद्यम्

कर्मोपासनाज्ञानमिति वेदानां काण्डत्रयाभिप्रायेण तदेव विषयत्रयं वेदस्य प्रतिपाद्यमस्तीति केचन विद्वांसोऽभिप्रयन्ति; परन्तु तत्र कर्मोपासनयोर्धर्मे पर्यवसानाद् धर्मस्यैव पूर्वोत्तरभावरूपत्वाद् धर्म एव प्रतिपाद्यो भवति, अतो न विषयत्रयं वेदस्य प्रतिपाद्यम्; अपि तु धर्मो ब्रह्म चेति द्वयमेव प्रतिपाद्यं पर्यवस्यति, तत्रापि धर्मस्य प्रथमोपात्तत्वाद् धर्मज्ञानानन्तरं ब्रह्मज्ञानमेव वेदस्य परमं प्रतिपाद्यं पर्यवस्यति, अत एव भगवान् कृष्णो गीतायामुपदिशति—'वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद् वेदविदेव चाहम्' (गीता-१५।१५)। एतदर्थमेव वेदस्य तदेव परमं प्रतिपाद्यं ब्रह्माख्यं ज्ञानमधिगन्तुमेव समेषां देवर्षिमानवानां प्रवृत्तिर्जायते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पं॰ ओझामहोदयपरिशीलितं वेदविज्ञानम्

तदेव वेदस्य परमं प्रतिपाद्यं ब्रह्माख्यं ब्रह्मज्ञानं वा अधिकृत्य आचार्यवर्यैः श्री-ओझामहाभागैश्चत्वारिंशद्वर्षाणि यावद् रात्रिन्दिवं समग्रं वैदिकवाङ्मयं परिशीलितं गवेषितञ्च प्राक्तनं वैदिकं विज्ञानम्। तदेव साम्प्रतं चतुर्धा प्रकाशितं प्राप्यते, तत्र प्रथमं ब्रह्मविज्ञानं द्वितीयं यज्ञविज्ञानं तृतीयं पौराणिकं विज्ञानं चतुर्थं वेदाङ्गविज्ञानमिति। वैदिकविज्ञानस्य एषु चतुर्धा विभागेषु आचार्यचरणैः शताधिका ग्रन्थाः प्रणीताः सन्ति, तेषां नामग्राहपूर्वकं परिगणनं कर्तुं न शक्यते, अतः प्रकृतमनुसरामः।

तत्र वैदिकविज्ञानस्य ब्रह्मविज्ञानविभागान्तर्गतम् 'उक्तवैराज'नामके शीर्षके श्रीचरणैः ऋग्वेदीयनासदीयसूक्तमधिकृत्य दशसु वादेषु सृष्टिकारणानि सम्यक्तया निरूपितानि, तद्यथा—१. सदसद्वादः २. रजोवादः, ३. व्योमवादः, ४. अपरवादः, ५. आवरणवादः, ६. अम्भोवादः, ७. अमृतमृत्युवादः, ८. अहोरात्रवादः, ९. दैववादः, १०. संशयस्तदुच्छेदवाद इति।

एषु सर्वेषु वादेषु तदेवमेव ब्रह्म अनुस्यूतं भवतीति धिया श्रीचरणैः 'ब्रह्मसिद्धान्त' इति नाम्ना एकः पृथग्वादो निरूपितः, यत्र समेषां दशवादानामन्तर्भावः समन्वयश्च दृश्यते, तदनुसारमेवात्र प्रकृतविषयो विमृश्यते, तमेवाधिकृत्यात्र त्रिपुरुषवादः, तत्र चाव्ययपुरुषस्य सम्प्रत्ययो यथोपलब्धसामग्र्याधीत-ज्ञानद्वारा निरूपयितुं प्रयत्यते।

एकस्यैव ब्रह्मणश्चतुर्धा पञ्चधा वा रूपाख्यानम्

वेदविद्याया याथातथ्यनिरूपणावसरे ब्रह्माख्यं परमतत्त्वं गवेषयद्भिः श्रीचरणैस्तत्तद्वेदानां ब्राह्मणभागेषु विभिन्नैः पारिभाषिकशब्दैर्ब्रह्मतत्त्वाख्यानमवलोक्य निश्चिताभिधानाभिप्रायेण 'रसो वै सः' इति तैत्तिरीयश्रुतिमनुसृत्य सृष्टिकारणभूतस्य निर्विशेषस्य ब्रह्मणः 'रस' इत्यभिधानं कृतम्। तस्यैव रसाख्यस्य ब्रह्मणश्चतुर्धा रूपाख्यानं परात्परमव्ययमक्षरं क्षरमित्यभिधानेन कृतम्। एतेषु परात्परं स्वरूपन्तु सविशेषं ब्रह्म इति निरूप्यते, तथा अव्ययमक्षरं क्षरमिति स्वरूपत्रयं 'पुरुष'संज्ञाभिधानेन अग्रे निरूपयिष्यते।

दार्शनिकदृष्ट्या 'परात्पर'सविशेषब्रह्मणोऽपि ऊर्ध्वमेकमपरं 'निर्विशेष'नाम्ना ब्रह्मतत्त्वं मन्यते, तदेवात्र 'रस' इत्यभिधानेन श्रीचरणैः स्वीक्रियते। तदेतत् सर्वं पञ्चप्रकारकं ब्रह्मतत्त्वं 'ब्रह्मविज्ञान'नामके ग्रन्थे सप्रमाणं निरूपितं प्राप्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रजापतिरेव निर्विशेषं ब्रह्म

वेदेषु—

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते।
तस्य योनिं परिपश्यन्ति धीराः तस्मिन् ह तस्थुर्भुवनानि विश्वा।।
(शु॰यजु॰ ३१।१९)

तदित्थं 'षोडशकलः प्रजापतिः, षोडशकलं वा इदं सर्वम्' (कौ॰ब्रा॰ १६।४), 'यो वै सः संवत्सरः प्रजापतिः षोडशकलः। आत्मैवास्य षोडशी कला' (श॰ब्रा॰ १४।१।३।२३) इत्यादिश्रुतिभिः प्रजापतिरेव निर्विशेषं ब्रह्म प्रतिपाद्यते, अस्यैव प्रजापतेः सविशेषं स्वरूपं परात्परादिब्रह्मरूपेण निरूप्यते। अतोऽयं प्रजापतिर्निर्विशेषस्वरूपतया अनिर्वचनीयः, सविशेषस्वरूपतया च निर्वचनीयो भवति।

श्रीचरणैरपि ब्रह्मसिद्धान्ते अनिरुक्तनिरुक्तभेदेन प्रजापतिर्द्विविधो निरूपितः। तत्र तदनुसारं रसाख्यं निर्विशेषं ब्रह्म अनिरुक्तः प्रजापतिः, तथा परात्परादि क्षरं यावद् निरुक्तः प्रजापतिः कथ्यते। वस्तुतस्तु निरुक्तानिरुक्तयोरुभयोरपि प्रजापतिब्रह्मणोरभिन्नतया एकत्वमेव पर्यवस्यति तथापि, दिग्देशकालाद्यवच्छिन्नतया तस्यैवैकस्य ब्रह्मणो विभिन्नरूपतया निरुक्त-प्रजापतिरूपता उक्ता, तथा दिग्देशकालाद्यपरिच्छिन्नतया तस्यैवैकस्य ब्रह्मणोऽनिरुक्तप्रजापतिरूपता उक्ता। शब्दान्तरेण वक्तुं शक्यते यद् यत्किमपि निश्चयेन वक्तुं द्रष्टुं वा शक्यते, तदेव निरुक्तं ब्रह्म, यन्नैव वक्तु न वा द्रष्टुं शक्यते, तदेव अनिरुक्तं ब्रह्म उच्यते।

पुनस्तदेव ब्रह्म शास्त्रान्तरेषु शान्तं समृद्धञ्चेति भेदेन द्विधा निरूपितं दृश्यते, तत्र समृद्धं ब्रह्म निरुक्तप्रजापतिरूपम्, तस्य मूलभूतं शान्तं ब्रह्म अनिरुक्तप्रजापतिरूपमुच्यते। निर्विशेषाख्ये शान्ते ब्रह्मणि कर्मशक्त्या समृद्धं ब्रह्म सविशेषं समुद्भूयते। अत्र श्रीचरणानुसारेण रसाख्यमेव ब्रह्म निर्विशेषं शान्तं चोच्यते, तदेव बलाख्यशक्त्यां सविशेषं समृद्धञ्च ब्रह्म जायते।

ज्ञानकर्मणोरैक्यमेव रसाख्यं निर्विशेषं ब्रह्म

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते।। (गीता-७।२)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनः—

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्।। (गीता-९।१)

इति भगवद्गीतोक्तवचनेषु विज्ञानसहितं ज्ञानं यन्निर्दिष्टं तदतीव गुह्यतममस्ति, अपि च तज्ज्ञानानन्तरमन्यत् किमपि ज्ञातव्यं नावशिष्यत इत्यप्युच्यते। अत्रैतदेव गुह्यतमं ज्ञानमधिकृत्य श्रीचरणैः ओझामहोदयैः वेदविदां पुरस्तात् वैदिकविज्ञानमुपन्यस्तम्। तदनुसारं ज्ञानं नाम 'रसाख्यं' निर्विशेषं ब्रह्म केवलमेकम्; परन्तु विज्ञानं नाम तस्यैवैकस्य सविशेषेणानेकभवनमुच्यते। एतावता एकस्माद् अनेकभवनं विज्ञानम्, तथा अनेकस्मादेकभवनं ज्ञानमिति वक्तु शक्यते। अत्र यया शक्त्या एकस्यैव ज्ञानस्य विभिन्नं ज्ञानं जायते, तस्याः शक्तेर्नाम कर्म अथवा बलमुच्यते श्रीचरणैः। यद्यपि शक्तिरियं ज्ञानात्मकस्य ब्रह्मणोऽभिन्नाऽस्ति, तथापि तस्यैवेच्छया उद्बुद्धा सती कर्मणा बलेन वा तस्मिन्नेव निर्विशेषे ब्रह्मणि सविशेषत्वमापादयति।

शब्दान्तरेणेदं वक्तुं शक्यते यत् पुरोदृश्यमानेषु जागतिकपदार्थेषु मूलतत्त्वरूपेण कस्यचिदेकस्य तत्त्वस्यानुभवो ज्ञानमुच्यते, तस्यैव मूलतत्त्वस्य विभिन्नेषु पदार्थेषु परिणमनं विज्ञानमुच्यते, तस्यैकस्य ज्ञानस्य कर्माख्येन 'वि' इत्युपसर्गबलेन विशिष्टं ज्ञानं विविधं वा ज्ञानं विभिन्नं वा ज्ञानं इत्यादिना अवगन्तुं शक्यते। एतदेव वैदिकं प्राक्तनं विज्ञानं नैव नूतनं विज्ञानं श्रीचरणैः स्वग्रन्थेषु सप्रमाणं सयुक्तिकं प्रमाणीकृतमुपलभ्यते।

तदनुसारेणात्र ज्ञानपदेन रसाख्यं ब्रह्म गृह्यते, तथा 'कर्म'पदेन अत्र बलाख्या शक्तिरेव गृह्यते। शक्तिशक्तिमतोरभेदेन एकमेव तत्त्वं निर्विशेषं रसाख्यं ब्रह्म अवशिष्यते, भेदेन तु द्विधा भेदात्मकसत्ता अनुभूयते, तदेवात्र 'रस'नाम्ना 'बल'नाम्ना चाभिधीयते। वस्तुतो रसस्य कर्म शक्तिर्वा बलमुच्यते, तेन बलेन विशिष्टो रस एकतोऽनेकत्वमापद्यते, अतो ज्ञानमेव विशेषेण विज्ञानं जायते, तयोर्मूलं ज्ञानकर्मणोरैक्यं रसाख्यं निर्विशेषं ब्रह्म एव परिचीयते।

त्रिसत्यस्य सृष्टिमूलत्वम्

त्रिसत्यं नाम वस्तुत्रयस्य सत्यतास्वीकरणम्, तद् वस्तुत्रयमत्र रसो, बलम्, अभ्व इति तत्त्वत्रयमुच्यते। अत्र रसोऽमृतरूपः, अभ्वः मृत्युरूपः, उभयोर्मध्ये बलम् उभयात्मकमुभयनिष्ठं प्राणरूपमुच्यते। रसात्मा एव सद् अमृततत्त्वमुच्यते, बलं सदसद् उभयनिष्ठत्वादेकं सदपि असत्सहकारेण अनन्तमभ्वरूपतामापद्यते,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभ्वतत्त्वन्तु नाम-रूप-कर्मणां सङ्घातरूपं विश्वं मृत्युरूपञ्चोच्यते। वस्तुतोऽसदपि अभ्वतत्त्वं बलसहकारेण सद्वत् प्रतिभाति। अत्र रसाख्यं ब्रह्म एव 'आभु'पदेन व्यपदिष्टं, तथा बलोपहितस्य तस्य रसस्य रूपानन्त्यमेवात्र 'अभ्व'पदेन व्यपदिष्टं जायते। अतो रसो बलं तदुभयात्मकमभ्वमित्येतत् त्रयमेव सृष्टेर्मूलतत्त्वमिति सिद्धान्त:।

रसाख्यस्य ब्रह्मणोऽद्वैतसत्ता

दर्शानान्तरेषु यद्यपि सत्तात्रयमपि प्रतिपाद्यते, तद्यथा वेदान्तदर्शने जगद्रूपेण व्यावहारिकसत्ता, मायोपहितचैतन्यरूपेण प्रातिभासिकसत्ता, अद्वैतब्रह्मरूपेण पारमार्थिकसत्ता निरूप्यते; परन्त्वत्र श्रीचरणै: ओझामहोदयैरेकस्यैव रसाख्यस्य ब्रह्मणोऽद्वैतसत्ता प्रतिपाद्यते, तत्रादौ सत्ताद्वयं सत्तात्रयञ्चापि प्रतिपाद्यते। तदनुसारं निर्विशेषस्य ब्रह्मणो यद्यपि नास्ति किमपि लक्षणम्, तथापि नाम-रूप-कर्मणां द्रष्टा दृश्यं दर्शनमिति त्रितयं जगतो रूपं संवीक्ष्य तस्य सत्ता अनुमीयते। सा च प्रथमतो द्विविधा अनुमीयते, सामान्या विशेषा च। तत्र 'अणोरणीयान् महतो महीयान्' इति श्रुत्या निर्विकारस्य परब्रह्मण: सत्ता सामान्या, तस्यैव सविशेषस्य ब्रह्मणो दिग्देशकालाश्रयत्वाद् अव्ययादिपुरुषत्रयरूपेण सत्ता विशेषा प्रतिपाद्यते।

अत्र निर्विशेषस्य रसाख्यस्य ब्रह्मण: पर:, अक्षर:, क्षर इति त्रितयं पुरुषाख्यं स्वरूपं विशेषसत्तारूपमुच्यते। अस्यैव सामान्यविशेषरूपस्य सत्ताद्वयस्य केचन आचार्या: शब्दान्तरेण अस्तिसिद्ध-भातिसिद्धरूपाभ्यां स्वरूपं निरूपयन्ति। तत्र अस्तिसिद्धसत्ता सामान्या तथा भातिसिद्धसत्ता विशेषा इत्युच्यते।

सत्ता, चेतना, आनन्दश्चेति त्रितयं स्वरूपं यद्यपि एकस्यैव सामान्यसत्ताकस्य ब्रह्मणो विद्यते, तथापि यत्र सामान्यसत्ताकस्य निर्विशेषे ब्रह्मणि सत्ता-चेतना-आनन्दश्चेति त्रितयं स्वरूपं सविशेषेण परिलक्ष्यते, तत्र तदेव निर्विशेषं ब्रह्म सच्चिदानन्दात्मकं सविशेषं स्वरूपमाधत्ते, एतदेव अव्ययाख्यं परं ब्रह्म पुरुषोत्तमादिपदेनापि व्यपदिश्यते।

अत्र श्रीचरणानामयमभिप्राय: प्रकटितो यद् वस्तुतो बलयुक्तस्य रसाख्यस्य ब्रह्मण एकैव सत्ता वरीवर्ति, तस्मिन्नेव रसे तच्छक्तिरूपं बलमुत्पद्यते, तद् बलमेव रसे विभिन्नं बलान्तरमुत्पाद्य सविशेषं ब्रह्म विश्वञ्चोत्पादयति, तथा यथाकालं तस्मिन्नेव रसे सर्वमुत्पाद्य लयं नयति। अतो हेतोरिदं वक्तुं शक्यते यद् रस-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बलयोः परस्परं सम्मेलनेनैव जगदुत्पत्तिर्जायते, पुनस्तस्मिन्नेव रसाख्ये ब्रह्मणि बलं तदुत्पन्नं जगच्च विलीयते, अतः केवलं रसाख्यं ब्रह्म एव निर्विकारतया परिशिष्यते। यद्यपि रसे समुद्भूते बलं न रसात् पृथक् सत्तामाधत्ते, तथापि समुद्बुद्धबलं ब्रह्म निर्विशेषात् सविशेषं स्वरूपमाधते, तत्रापि एकस्यैव रसाख्यस्य ब्रह्मणोऽद्वैतसत्ता परिलक्ष्यते।

सविशेषब्रह्मणः पुरुषत्रयरूपत्वम्

'एतन्मयो वा अयमात्मा वाङ्मयो मनोमयः प्राणमयश्चेति' (श०ब्रा० १४।४।३।१०) इति शतपथब्राह्मणानुसारं रसाख्यं निर्विशेषं ब्रह्म यदा प्रोक्तबलत्रयेण युक्तं सविशेषं जायते, तदा स्वात्मानमेव अव्ययमक्षरं क्षरमिति पुरुषत्रयरूपेणाविर्भावयति। तत्र वस्तुतो रसनिष्ठं बलं स्वात्मनो बलान्तरमुत्पाद्य तेन बाह्याभ्यन्तरं कोशपञ्चकमुत्पादयति, तदपि बलपञ्चकाभिधानेनात्र प्रतिपाद्यते। तद्यथा—

आनन्दमयः, विज्ञानमयः, मनोमयः, प्राणमयः, वाङ्मय (अन्नमयः) इति पञ्चकोशा बलशक्तेरवान्तरबलान्युच्यन्ते। अत्राप्यानन्दमयं विज्ञानमयं मनोमयमिति बलत्रयमाभ्यन्तरबलमुच्यते। पुनः मनोमयं प्राणमयं वाङ्मयम् (अन्नमयम्) इति बलत्रयं बाह्यं बलमुच्यते। आभ्यन्तरबाह्यबलयोः सङ्घातेन यद्यपि षड् बलानि भवन्ति, तथापि मनोमयस्य बलस्योभयात्मकत्वाद् बाह्याभ्यन्तरयोरेकबलेन परिगणनात् पञ्चैव बलानि जायन्ते। इदमेव बलपञ्चकं कोशपञ्चकरूपेण दर्शनान्तरेषु व्यपदिश्यते, तत्र इयान् विशेषो यद् वाङ्मयं बलमन्नमयकोशरूपेण परिगण्यते। पुरुषस्य आविर्भावे बलत्रयमेव कारणं भवति, तत्र आनन्दमयं विज्ञानमयं मनोमयमिति बलत्रयं यदा रसाख्यस्य निर्विशेषस्य ब्रह्मण आभ्यन्तरमुत्पद्यते, तदा 'अव्ययाख्यः' पुरुष आविर्भवति, पुनरिदमेव बलत्रयं यदा बाह्याभ्यन्तरोभयविधं सविशेषस्वरूपमापद्यते, तदा 'अक्षराख्यः' पुरुषो व्यपदिश्यते, अथ च यदा मनोमयं बलं प्राणवाग्बलाभ्यां सह केवलं बाह्यरूपेण सविशेषतामापद्यते, तदा 'क्षराख्यः' पुरुषोऽभिधीयते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषत्रयात् सृष्टिः

एतस्मादेव पुरुषत्रयाज्जगतः सृष्टिर्जायते, तत्र चैतस्याः सृष्टेरालम्बनमधिष्ठानं वा अव्ययः पुरुषः, निमित्तमक्षराख्यः पुरुषः, तथोपादानं क्षराख्यः पुरुषो भवति। दर्शनान्तरेषु अयमव्ययपुरुषः सृष्टेरधिष्ठानमक्षरपुरुषः सृष्टेर्ग्रहणं क्षरपुरुषः सृष्टेरारम्भणमुच्यते। तत्र क्रमेण अव्ययपुरुषेऽक्षरपुरुषः, अक्षरे पुरुषे क्षरपुरुषः, क्षरपुरुषे क्षणिक आनन्दः (भोगः) सन्निविष्टो भवति। तत्र त्रिष्वपि पुरुषेषु आनन्दरूपो रसो नितरामनुस्यूतो भवति। अपि च अव्ययाख्यः पुरुषोऽक्षराख्यश्च पुरुषः अव्यक्तौ भवतः, क्षरपुरुषो व्यक्तो भवति। ऋग्वेदीय-अस्यवामीयसूक्तेषु अव्ययपुरुषः 'पर'शब्देन, अक्षरपुरुषः 'परावर'शब्देन तथा क्षरपुरुषः 'अवर'शब्देनापि समाम्नातः। तत्र सर्वमिदं जगदवरशब्देन तत्कर्तृब्रह्म-'पर'शब्देन तथा उभयोः सेतुभूतो जीवात्मा 'परावर'शब्देनाप्यभिधीयते।

सृष्टिप्रादुर्भावे रसाख्यमेवैकं मूलतत्त्वम्

आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किञ्चनास' (ऋ. १०।१२७।२) इति ऋग्वेदीयनासदीयसूक्तमन्त्रेण तथ्यमिदमुद्भाव्यते यत् सृष्ट्यग्रे एकमेव मूलतत्त्वम् 'आनीत्' प्राणनं कुर्वद् आसीत्। सत्कार्यवादसिद्धान्तानुसारं स्वान्तःस्थितमेव जगत् परतत्त्वं यदा बहिः प्रकाशयति, तदेवात्र प्राणनमुच्यते; परन्त्विदं प्राणनं विना वायुसहकारेण—अवातमेवासीत्। लौकिकप्राणने यथा अन्तःस्थितस्य वायोर्बहिर्निःसरणपूर्वकं पुनरन्तःप्रवेशनं जायते, तथा अत्र नास्ति, यतो हि मन्त्रे 'अवातम्' इति पदेन प्राणनव्यापारे वायोर्व्यावृत्तिः कृता। अपि च तस्मिन् प्राणने हेतुभूता शक्तिर्मन्त्रे 'स्वधा'शब्देनोक्ता।

आचार्यचरणा अत्र वायुं विना प्राणनं कुर्वतस्तदेकस्य तत्त्वस्य 'रस'नाम्ना तथा प्राणनशक्तिभूतायाः स्वधाया 'बल'शब्देनाभिधानं कुर्वन्ति, तथा बलात्मिकायाः शक्ते रसाख्यस्य शक्तिमतो भिन्नतया न परिगणनं कुर्वन्ति। एतावता श्रुत्युक्तं ब्रह्मणोऽद्वैतभावं समर्थयन्ति, तद्यथा ब्रह्मसिद्धान्ते—

ब्रह्मश्रुतौ तद् रस इत्युदीरितं परास्य शक्तिर्बलमित्युदीर्यते।
बलं रसाद् भिन्नमिदं न गण्यते न श्रौतमद्वैतमसौ विरुध्यते।।
(ब्र.सि. १३)

'रसो वै सः' इति तैत्तिरीयश्रुत्या ब्रह्मणो 'रस' इत्यभिधानं श्रीचरणैः कृतमित्युक्तं पुरस्तात्। ब्रह्मणः शक्तिः श्रुतौ 'बल'शब्देनाप्यभिहिता प्राप्यते, अत

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एव श्रीचरणैरपि रसाख्यस्य ब्रह्मणः शक्तेर्नाम बलमिति गृहीतम्। एतदर्थं तैः श्वेताश्वतरोपनिषच्छ्रुतेः प्रामाण्यमुपन्यस्तम्, तद्यथा—

न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।।

(श्वेता. ६।८)

अत्र शक्तिः, बलं, क्रिया इति शब्दत्रयस्य एक एवार्थोऽभिप्रेतः। ब्रह्मणः स्वापदशायामर्थात् सृष्टेः प्राणदशायां सैव शक्तिर्बलमित्युच्यते, जाग्रद्दशायां सैव कुर्वद्रूपा शक्तिरित्युच्यते, तथा सृष्टिपरिणामदशायां सैव शक्तिः क्रियारूपतामादधाति। एतदेवाग्रिमे पद्ये श्रीचरणैः प्रतिपाद्यते, तद्यथा—

सुप्तं बलं जागरिता तु शक्तिः क्रिया तदीयः परिणाम इत्थम्।
प्रोच्यन्त एकस्य बलस्य नूनं भिन्नैः पदैस्तिस्त्र इमा अवस्थाः।।

जगत्सृष्टेः पूर्वं महाप्रलयदशायां ब्रह्मणः शक्तिस्तस्मिन्नेव ब्रह्मणि प्रसुप्ता भवति। सैवात्र 'बल'शब्देनाभिहिता, इयमेव बलरूपा शक्तिः श्वेताश्वतरश्रुतौ 'कर्म'शब्देनाभिहिता, तथा पृथिव्यादिपञ्चमहाभूतास्तद्विविवर्तरूपाश्चोक्ताः। तद्यथा—

येनावृतं नित्यमिदं हि सर्वं सः कालकालो गुणी सर्वविद्यः।
तेनेशितं कर्म विवर्तते ह पृथिव्यप्तेजोऽनिलखानि चिन्त्यम्।।

(श्वेताश्वतरोप. ६।२)

अत्र ब्रह्मणः शक्त्यपरपर्यायस्य कर्मणोऽतिसूक्ष्मावस्थायां बलशब्देन निर्देशो युक्त एव। अपि च 'ब्रह्म शंसितं वीर्यं बलम्' (शतपथब्रा. ६।६।३।१४), 'बाह्वोरेव बलं धत्ते' (शतपथब्रा. १३।३।२।५)इत्यादि श्रुतौ अकुर्वद्रूप-शक्तिवाचको 'बल'शब्दः समाम्नातः। 'इन्द्रो बलम्' (श.ब्रा. ११।१४।३।३) इति श्रुतौ प्राणरूपस्येन्द्रस्य बलमित्यभिधानं विहितम्। अत्र प्राण एव ब्रह्मणो मुख्या शक्तिरिति मुख्यशक्तौ 'बल'शब्दप्रयोगो युक्त एव।

वेदेषु रसबलयोरनेकानि नामानि

वेदेषु रसाख्यस्य ब्रह्मणः कृते भूयांसि नामानि प्राप्यन्ते, तथा तद्वैपरीत्येन बलाख्यायास्तच्छक्तेरपि नामानि दृश्यन्ते। तदिह वर्गद्वयेनोपस्थाप्यन्ते। तद्यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसनामानि	बलनामानि
सत्	असद्
विद्या	अविद्या
पवित्रम्	पाप्मा
आभुः	तुच्छम्
स्थितम्	यत्
अमृतम्	मृत्युः
पूर्णम्	शून्यम्
अकर्म	कर्म

एवंरूपेण रसस्य ब्रह्मणः कस्मिंश्चिदपि देशे कस्मिंश्चिदपि काले अभावो न जायते, अतस्तद्देशकालादिपरिच्छेदशून्यं मुख्यं तत्त्वमुच्यते, अपि च एतदेव श्रुतौ विभुसमानार्थकत्वाद् व्यापकत्वाच्च 'आभु'पदेनापि व्यपदिश्यते, बलं तु तस्मिन्नेव रसात्मके आभौ सदा सर्वदा तिष्ठति, अतः अभ्वमुच्यते। एतदेव क्षणिकत्वात् 'तुच्छ'शब्देनाप्यभिधीयते। रस एव उत्पद्यते विलीयते च तरङ्ग इव जले, अतो रसात् पृथक् सत्ता बलस्य न जायते।

बलमायाशब्दयोरेकार्थकत्वम्

वस्तुतो भारतीयदर्शनेषु ब्रह्मणः शक्तिरूपेण या माया प्रतिपादिता वर्तते, सैवात्र 'बल'शब्देनोच्यते, माया यथा दर्शनान्तरेषु सदसद्भ्यामनिर्वचनीयत्वेन प्रतिपाद्यते, तथैवात्र बलमपि कुत उत्पद्यते, कुत्र च विलीयते? विरुद्धधर्मकं बलं रसात् कथं जायते, कथं वा तत्र तिरोधीयत इत्यादिकमुपपादयितुं न शक्यते, अतो बलमेव मायापदेनापि व्यपदिश्यते। 'माया'शब्दो 'माङ्-माने'-धातोः निष्पन्नत्वात् परिमाणे परिच्छेदे मितौ चार्थे प्रयुज्यते, तद्वद् बलं स्वयं मितं सत् स्वसम्बन्धादमिते रसेऽपि मितिं भासयति। जलतरङ्गवद्रसे या मितिर्भासते, सा मात्रा एव मायापदेन व्यपदिश्यते। तादृशमात्राबलेन रसस्य यद् परिच्छिन्नं रूपं दृश्यते, तदेव पुरुषपदेनाभिधीयते। तदित्थं येन बलेन रसे मितिर्भासते सामान्येन तत् 'माया' पदेनोच्यते, तथा येन बलान्तरेण रसे नाम रूपं कर्मेति त्रितयं रूपमुद्भाव्यते, तद्बलं 'महामाया'पदेनोच्यते। इयमेव तत्त्वद्वयस्य योगकरणाद् 'योगमाया'शब्देनापि व्यपदिश्यते, इयमेव योगमाया आत्मस्वरूपं रसमत्यन्तमावृणुते, न हि मनागपि मूलतत्त्वं प्रतीयते, अत एव गीतायामस्या आवरकत्वमुक्तम्। तद्यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाहं प्रकाशः सर्वस्य योगमायासमावृतः।
मूढोऽयं नाभिजनाति लोको मामजमव्ययम्।।

(गीता-७।२५)

आगमशास्त्रेऽपि माया, महामाया, योगमायेत्यादिशब्दैर्ब्रह्मणः शक्तिरेव विवेचिता दृश्यते, तत्र बलमेव परिभाषाभेदेन अनेकधा परिलक्ष्यते, नास्त्यत्र तद्व्याख्यानप्रसङ्गः।

रसबलयोः परस्परं सम्बन्धः

लौकिकपदार्थद्वयसम्बन्धवद्रसबलयोः सम्बन्धो न भवति, लोके हि संयोगादिः सम्बन्धो द्विष्ठो भवति, तत्र द्वावपि पदार्थौ परस्परं संयुज्येते, तत्रोभयोः पदार्थयोः सम्बन्धः क्वचित् खगवृक्षयोरिव एकतरक्रियाजन्यः, क्वचिद् द्वयोर्मेषयोरिव उभयक्रियाजन्यो भवति। इह रसबलयोस्तु नास्ति सम्बन्धः क्रिया-जन्यः। यतो हि रसे नास्ति क्रिया, बलं तु क्रियारूपमेव, तत्रोभयोः सम्बन्धाय नैव क्रियान्तरमपेक्ष्यते। बलमेवात्र रसेन सम्बध्यते, न तु रसो बलेन सम्बध्यते, बलं हि रसाश्रितमेव विभिन्नं स्वरूपमाधत्ते, न तु पृथग् रसात् किमपि स्वरूपं तस्य विद्यते। रसस्य तु न सम्बन्धापेक्षा, स तु सदा स्वतन्त्र एव, बलं हि तत्र रसे उत्पद्यते विलीयते च। रसस्य तु न बलोत्पादेन कश्चिदुपचयः, न वा लयेन काचिद् हानिर्दृश्यते, अतोऽयं रसो निर्विशेषो निरञ्जनश्चोच्यते। एवं रीत्या रसबलयोः सम्बन्धो नोभयनिष्ठः; अपि तु एकनिष्ठ एव। तत्र संसर्गो वियोगो वा बलस्यैव जायते, रसस्तु तटस्थ एव भवति।

पुरुषशब्दनिरुक्तिः

बलविशिष्टस्य रसस्यैव 'पुरुष'पदेन व्यवहारो जायत इत्युक्तं पुरस्तात्। तत्र नैव सर्वथा भिन्नयो रसबलयोः परस्परं विशेष्य-विशेषणभावोऽवगन्तव्यः; अपि तु एकस्मिन्नेव रसे तदुभयोस्तत्त्वयोर्धर्मधर्मिभावो मन्तव्यः। तत्र यदा बलं रसेन सह धर्मरूपेण सम्बध्यते, तदा बलेन धर्मेण रसो धर्मी जायते, सोऽयं धर्मी बलविशिष्टो रसः 'पुरुष'पदेनाभिधीयते। ननु 'पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्' (शु.य. ३१।२) इत्यादिश्रुतौ पुरुषस्यैव सर्वात्मकतया नित्यत्वमभिव्यज्यते; परन्त्वत्र पुरुषस्य जन्यत्वमङ्गीक्रियते चेत्, तत्कथं श्रुतिसमन्वयः स्यादिति जिज्ञासायामुच्यते, यत् तयोः रसबलयोः सम्बन्धोऽ-व्यतिरेकनित्यः, उभयोरभिन्नत्वात् नित्यमेवैते सम्बद्धे भवतः। शब्दार्थनित्यत्ववद्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसबलयोर्नित्यत्वाद् बलविशिष्टस्य पुरुषस्य नित्यत्वमेव सिद्ध्यति। अतो रसस्य बलस्य तत्सम्बन्धस्य च नित्यत्वात् पुरुषनित्यत्वेऽपि न कश्चित् श्रुतिविरोधः।

'पुरुष'शब्दं निर्वदता ग्रन्थकारेण ब्रह्मसिद्धान्तग्रन्थे पद्यत्रयेण विभिन्ना निरुक्तयः प्रदर्शिताः। तदत्र किञ्चिद् विव्रियते, तत्र पुरु + ष इति शब्दसमाधौ पुरु-पुरुधा = बहुधा, स्यति-व्यवस्यति इति पुरुषः। अत्र व्यवसायो नाम क्रिया, सर्वतः प्रथमं क्रिया अत्रैव प्रवर्तते, सा च बहुधा विभिन्ना, अतो पुरुषशब्दो निष्पद्यते। अथवा पुरु + ष इत्यत्र 'षो'धातोः गतिरेवार्थः, तेन बहुधा गच्छति, स्वत एव अनेकरूपतां गच्छतीति पुरुषः कथ्यते।

पुनः पु+रुष इति सन्धिविग्रहे 'ष्' हिंसायामिति दिवादिधातोरमितस्य मितिकरणं हिंसा इत्यर्थेन, पुरा-सर्वतः प्रथमं रुष्यति हिनस्ति रसमिति पुरुषः, अनेकरूपतया भासनमेव स्वस्य हननमित्यपि द्वितीया निरुक्तिः। अथवा पुर्षु–पुरेषु रुष्यते वध्यतेऽसौ पुरुष इति तृतीया निरुक्तिः। पुर् + रुष इति विग्रहेण 'पूरुष'-शब्दो मुख्यरूपेण श्रुतौ बहुत्र आम्नातः। पुरे-शरीरे वसतीति 'पुरुष'शब्दस्य चतुर्थी निरुक्तिः। अत्र पुरे बले वासाद् रस एव पुरुषशब्देन व्यपदिश्यते।

पुरुषत्रयम्

बलविशिष्टाद्रसादेव अव्ययः, अक्षरः, क्षरश्चेति पुरुषत्रयं क्रमेणाविर्भवति तत्रायमव्ययः पुरुषः सर्वोत्कृष्टत्वात् सर्वप्रथमत्वाच्च 'पर'शब्देनाप्युच्यते, ततोऽक्षरः पुरुषः अव्ययाख्य'पर'पुरुषादवरभूतत्वात् परावरशब्देनाभिधीयते। ततः क्षरपुरुषो विश्वरूपत्वात् सर्वतोऽवरत्वाच्च अवरशब्देनोच्यते। अत्र रसबलयोः समष्टिरूपः समवायः 'परात्पर'शब्देनोच्यते, नायं पुरुषपदव्यपदेश्यः; अपि तु पराख्यो योऽयमव्ययपुरुषस्तस्मादपि श्रेष्ठत्वात् परभूतत्वाच्च 'परात्परं' ब्रह्मपदेनाभिधीयते।

द्विविधा हि धर्मा भवन्ति—सत्तासिद्धाः, भातिसिद्धाश्चेति पुर्वमुक्तम्। येषां स्वरूपं धर्मिणि स्पष्टं प्रतीयते, ते सत्तासिद्धा धर्माः कथ्यन्ते, यथा घटादौ स्पर्शादयः। ये तु केवलं बुद्ध्या आरोप्यन्ते, अन्यसापेक्षाश्च भवन्ति, न च धर्मिणि किमपि तत् स्वरूपं प्रतीयते, ते भातिसिद्धा धर्माः कथ्यन्ते, यथा घटादौ द्वित्व-त्रित्वादिसंख्या, घटान्तरापेक्षया दैर्घ्य-स्थौल्याद्याः परिणामरूपा धर्माः।

तदिह रसबलयोः सत्तासिद्धाः केऽपि धर्मा न सन्ति; परन्तु बलान्तरेषु व्यवहारार्थम् एकत्व-द्वित्व-पृथक्त्वाद्या धर्मा बुद्ध्या आरोप्यन्ते। एवमेव अव्यये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषे, ततोऽपि परे परात्परे ब्रह्मणि ये धर्माः श्रुत्यादिषु कथ्यन्ते, ते भातिसिद्धा धर्मा भवन्ति, पुनः अक्षरे क्षरे वा पुरुषे ये धर्माः कथ्यन्ते, ते सत्तासिद्धा धर्मा भवन्ति।

अव्ययः पुरुषः

शुद्धे रसे सक्रियस्य बलस्य यदा सम्बन्धो जायते, तदा रसोदरे प्रविष्टं बलं रसस्यैव प्राधान्यं ख्यापयति, स एव 'परः' पुरुषः ख्यायते, अस्यैव 'पर'पुरुषस्य प्रतिपादिका श्वेताश्वतरश्रुतिरत्र प्रमाणत्वेन सङ्गृहीता श्रीचरणैः। तद्यथा—

न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।।

अत्रायमाशयः, यदयं परः पुरुषः, कार्यभावात् कारणभावाच्चातीतो न किमप्युत्पादयति, न वा केनाप्युत्पाद्यते। केवलं सर्वालम्बनत्वेन सर्वाधारतया तिष्ठति, अत्र वर्तमाना या परा शक्तिर्बलरूपा सैवास्य स्वाभाविकी शक्तिरस्ति, तया सर्वमुत्पाद्यते, ज्ञानबलक्रियारूपेण सैव सर्वत्रानुप्रविष्टा इति। अयमेव परः पुरुषः स्वरूपाद् न जातु व्येति-परिणमते, अतोऽव्ययपुरुषः कथ्यते। अक्षरे पुरुषे बलस्य विविधाः शक्तयो जायन्ते, ताभिः सह अयमक्षरः पुरुषो विभक्त इव भवति, बहुभिश्च युज्यते; परन्तु अयं परः पुरुषो न तथा बलशक्तिभिः सह युज्यते, आतेऽव्यय इत्युच्यते।

अक्षरः पुरुषः

मायाबलविशिष्टे मिततया प्रतीयमाने परे अव्यये रसप्रधाने बलं संसर्गसम्बन्धेन यदा अन्यद्बलं सम्बध्नाति, येन च नवीना सृष्टिः प्रादुर्भवति, तदा स अक्षरपुरुष इत्युच्यते। एतेन न अव्ययपुरुषस्याक्षरपुरुषे उपादान-कारणत्वमङ्गीकर्त्तव्यम्, अपि तु तदवच्छिन्ने रसे बलान्तरसंसर्गाज्जायमानस्य अक्षरपुरुषस्य बलविशिष्टो रस एव कारणमिति वक्तव्यम्।

एवं सर्वजगदुत्पादकोऽप्यक्षरः स्वयमक्षर एव न मनागपि क्षरति विनश्यतीत्यव्ययपुरुषस्यैव साधर्म्यमत्रोच्यते। अयमक्षरपुरुषः परावरः सेतुश्चाप्युच्यते, यतो मध्यभागः सेतुशब्दवाच्यो भवति, अतोऽवरस्य क्षरपुरुषस्य, परस्याव्ययपुरुषस्य मध्ये जायमानोऽयमक्षरपुरुषः सेतुभूतः कथ्यते। क्षरा जीवा अक्षरमेवावलम्ब्य परं पुरुषं प्राप्तुमर्हन्तीति सेतुकथनेनाभिव्यज्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयमक्षरः पुरुषः सर्वस्यापि भूतजातस्य क्षरस्य नियोजकत्वादीश्वर-शब्देनाप्युच्यते, क्षरेषु समस्तभूतादिषु अयमेवाक्षरः पुरुषो रसं प्रवाहयति। तत्र अव्ययपुरुषाद्रसोऽक्षरेऽनुवर्तते, अक्षरपुरुषाच्च क्षरपुरुषेऽनुवर्तते, अतः क्षराणां समस्तभूतजातानामयमक्षरः पुरुष एवेश्वरो भवति, तस्यापीश्वरः अव्ययः पुरुषो भवतीति क्रमः श्रीमद्भगवद्गीतायां द्रष्टव्यः, यत्र पञ्चदशाध्याये भगवान् स्वयमेवात्मानमव्ययः, उत्तमः पुरुषः, पुरुषोत्तमः, परमात्मा, ईश्वर इत्यनेकनामभिः प्रस्तौति। तद्यथा—

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते।।
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः।।
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः।।

(गीता-१५।१६-१८)

क्षरः पुरुषः

अक्षरपुरुषावच्छिन्ने रसे यदा बलान्तरं चयनरूपेण संसृज्य सृष्टिकारणाय समर्थं भवति, तदा क्षरपुरुष उच्यते, अत्रापि क्षरपुरुषस्य प्रादुर्भावे नाक्षरपुरुषस्य उपादानकारणत्वम्; अपि तु तदवच्छिन्ने रसे बलान्तरसम्प्रयोगात् तृतीयोऽयं पुरुषः 'क्षरः' प्रादुर्भवति, तथाऽस्याप्युपादानकारणत्वं रसबलयोरेव, न तु अक्षरपुरुष इति।

लोके यत् किमपि नामरूपात्मकं वस्तु दृश्यते, ज्ञानविषयीक्रियते वा, तत्र सर्वत्रापि एतत्पुरुषत्रयस्यैव सत्ताऽवश्यं सम्भाव्यते। यत् किमपि वस्तु इन्द्रियादिभिर्गृह्यते तत्सर्वं क्षरमुच्यते, तत्र सर्वत्रापि नितरामनुस्यूतं सर्ववस्तुपरिचालकं सर्ववस्तुजनकं चाक्षरमुच्यते। तृतीयोऽव्ययपदवाच्य उत्तमः पुरुषस्तु केवलमालम्बनमात्रमुच्यते, न कार्यं न वा कारणमिति। एतावता इदं विज्ञापितं भवति यत् सर्वस्यापि वस्तुन उपादानकारणं क्षरः, निमित्तकारणमक्षरः, तथा कार्यकारणातीतमधिष्ठानमात्रमव्ययतत्त्वमस्ति।

एवंप्रकारेण सर्ववस्तुषु क्षरतत्त्वन्तु स्पष्टं दृश्यते; परन्तु तत्रान्तर्निगूढमक्षरतत्त्वम्। तत्राप्यन्तः परतत्त्वं मानसप्रत्यक्षेण दृश्यते। तत्र अव्ययपुरुषः अशरीरः, कुत्रापि तस्य शरीराभिमानो नास्ति। अक्षरः पुरुषः क्षरमेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरीरतया गृह्णाति, क्षरः पुरुषः स्वोत्पादितं क्षरान्तरं शरीरतया गृह्णाति। अक्षरः क्षरश्च द्वाविमौ सशरीरौ उच्येते, अशरीरत्वादव्यये न सुखदुःखसंस्पर्शः, तस्मादव्ययं प्राप्यैव जीवः सुखदुःखैर्विनिर्मुक्तो जायते।

अत्रेदमपि वक्तुं शक्यते यत् परः अव्यय एव पुरुषो मुख्यः पुरुषः, अक्षरमस्य पुरम्, तत्रायं निवसति, अतः पुरुष उच्यते। एवमेव अक्षरस्य क्षर एव पुरम्, तत्र निवसनादयमक्षरोऽपि पुरुष उच्यते, क्षरस्यापि तदुत्पादिता अन्यावस्था पुरम, तत्र निवासात् क्षरोऽपि पुरुष उच्यते।

केषाञ्चिन्मते तु क्षराक्षरयोरेव पुरुषत्वं, परस्तु अविकृतं ब्रह्म इति, न पुरुष उच्यते, पुरुषरूपं जगदेव, परस्तु जगदतीतः, अतो न पुरुषपदव्यपदेशमर्हति; परन्तु श्रीचरणाः अन्ये विवेचकाश्च यत्र धर्मित्वं जायते, तत्रैव पुरुषत्वं प्रतिपादयन्ति, मूलतत्त्वाभ्यां धर्मरूपाभ्यां विशिष्टोऽव्ययो धर्मीति तस्यापि पुरुषत्वं युक्तमेव।

अव्ययादपि पूर्वा रसबलयोरसंसृष्टा संस्था तु परात्परं शब्देनोच्यते, स च निर्धर्मकत्वान्न पुरुषपदव्यपदेश्यः। प्रत्येकं पुरुषाणां पञ्चकला इति पञ्चदशकलाः सम्पद्यन्ते, तत्र षोडशी कला 'परात्पर'रूपाणि सङ्गृह्यत इति षोडशी पुरुषः प्रजापतिरूप एव, यस्मात् सर्वमिदं जगज्जायत इति। तद्यथा—'तदित्थं षोडशकलः प्रजापतिः। षोडशकलं वा इदं सर्वम्'। (कौ.ब्रा. १६।४)

निष्कर्षः

सृष्टेः प्राक् प्रलयावस्थायां प्रसुप्ते बले एक एवाद्वितीयो रसो ब्रह्मपदवाच्यो भवति, जागरिते तु बले बलविशिष्टो रसः परात्पर इति श्रुतिषूच्यते, यद् वेदान्तदर्शने विशिष्टं व्रह्म इति नाम्ना आचार्या व्यपदिशन्ति। तदनुक्रमेण पुरुषत्रयस्य प्रादुर्भावो जायते। अथ च यो परात्परो बलविशिष्टो रस उक्तः, तस्मादेव त्रयः पुरुषाः प्रादुर्भवन्ति। रसे आविर्भूतं बलं स्वयं परिच्छिन्नत्वाद्रसमपि परिच्छिन्नं दर्शयति, तत एव मितिसाधनत्वाद् बलमेव मायापदेन उच्यते, तदेतत् सङ्क्षेपेण गद्यमये पुरुषप्रपञ्चाधिकरणे श्रीचरणैः सङ्केतितमस्ति। बृंहणबलो रसो ब्रह्म। बृंहमाणं तत् त्रिधा सम्पद्यते। चित् चेतना चित्यञ्च। तत्र रसप्रधाना चित्। समबलरसा चेतना। बलप्रधानं चित्यम्। चिद् ब्रह्म अव्ययम्। चेतना ब्रह्म अक्षरम्। चित्यं ब्रह्म क्षरमित्याहुः। समन्वितं चेदं त्रितयमेकं रूपम्। तथा च क्षरब्रह्म अक्षरब्रह्म अविनाभूतेऽव्ययब्रह्मणि पुरुषशब्दः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलाः

अव्ययः	अक्षरः	क्षरः
आनन्दः	ब्रह्मा	आध्यात्मिकः (प्राण, आप्, वाक्, अन्नाद, अन्न)
विज्ञानम्	विष्णुः	आधिभौतिकः (पृथिवी, जल, तेज, वायु, आकाश)
मनः	इन्द्रः	आधिदैविकः (स्वयम्भू, परमेष्ठी, सूर्य, चन्द्र, पृथ्वी)
प्राणः	अग्निः	↓
वाक् ↓	**सोमः** ↓	
विभूतिसम्बन्धः	योगसम्बन्धः	बन्धः

⟶ सत्ता-चेतना-आनन्द-रसरूपः—निर्विकारः।

⟶ नाम-रूप-कर्म-बलरूपः—सविकारः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्यक्षप्रमाणस्वरूपविमर्शः

श्रीगणपतिशुक्लः
अनुसन्धानसहायकः
सर्वभारतीयकाशिराजन्यासः, दुर्गरामनगरम्
वाराणसी

* * *

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति गौतमसूत्रं वर्तते[१]। अर्थे सन्निकर्षो यस्य तद् अर्थसन्निकर्षम्। अर्थसन्निकर्षञ्च तदिन्द्रियञ्चेति इन्द्रियार्थसन्निकर्षम्, तस्मादुत्पन्नमिन्द्रियार्थसन्निकर्षोत्पन्नम्। अर्थाद् इन्द्रियार्थसन्निकर्षजन्यत्वे सति ज्ञानत्वं प्रत्यक्षप्रमाणस्य लक्षणम्। सुखादावतिव्याप्तिवारणाय ज्ञानत्वमिति लक्षणे देयम्[२]। सुखस्येन्द्रियार्थसन्निकर्षजन्यत्वादतिव्याति:। ज्ञानत्वपददानेन सुखे नातिव्याप्तिः। ज्ञानत्वमात्रोक्तावनुमितावतिव्याप्तिः। अत इन्द्रियार्थसन्निकर्षजन्यत्वं देयम्। संशयादावतिव्याप्तिवारणायाव्यभिचारीति सूत्रस्य पदं लक्षणे देयम्[३]। व्यभिचारित्वमतद्विषयकत्वम्। तद्विपरीतमव्यभिचारित्वम्।

तद्विभागः क्रियते—अव्यपदेश्यं व्यवसायात्मकं च। व्यपदेशो नाम द्रव्यगुणकर्मसामान्यविशेषैरपदिश्यते धर्मो यैस्ते व्यपदेशाः, तेषु भवं सम्बद्धं व्यपदेश्यम्, तद्भिन्नमव्यपदेश्यम्। तदेव निर्विकल्पकं भवति। अत्र प्रश्न उदेति यद् व्यपदेशे भवं जातमित्येव कथं नोक्तम्, नाम्नोऽकारणत्वात्[४]। आत्माभिन्नविशेषणं यस्य तद्व्यवसायात्मकम्। चन्द्रिकाकारमते प्रत्यक्षप्रमाया लक्षणमिदम्।

तत्रोच्यते—अथ प्रमाणानां विशेषलक्षणमुच्यते इन्द्रियार्थेत्यादिचतुस्सूत्र्या इति स्वयमेवोक्तं भाष्यचन्द्रिकाकारेण। तथा च जिज्ञासानिवृत्त्यनुपपत्तिः स्यादिति चेत्, न, सूत्रव्याख्यानस्य एका विधा वर्तते, यद् यतस्तदित्यध्याहृत्य प्रमाणमित्यनुषज्यते। भाष्यकारास्तु अन्यथा सूत्रस्य व्याख्यानं कृतवन्तः।

---

१. न्यायसूत्रम्-१।१।४;
२. भाष्यचन्द्रिका-१।१।४ सूत्रे।
३. तत्रैव;
४. तत्रैव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रियस्येति कर्तरि षष्ठी। अर्थस्य कारकत्वविवक्षया तृतीया कर्तरि। इन्द्रियस्येति कर्मणि षष्ठी। एवञ्च उभयकृतिसाध्यत्वं प्रत्यक्षस्य बोधजनकं भवति।

अस्मिन् सूत्रे मनसोऽग्रहणाद् मनसः अनिन्द्रियत्वं स्यादित्याशङ्कामुक्त्वा भाष्यकारो वदति—'न तर्हीदानीमिदं भवति'[१]। भ्रान्तः प्रत्यक्षकारणमित्यवधारणपरं सूत्रमिदं शङ्कते। तदुपरि उच्यते—मनसेति कर्तरि तृतीया। तत्कृतिश्च चलनम्। इन्द्रियेण इत्यत्र सहार्थे तृतीया। एवमर्थेन इत्यत्रापि ज्ञातव्यम्।

तत्रोच्यते—इदं सूत्रं विशिष्टमसाधारणं यत्कारणं तद्वचनात्मकम्। ज्ञायतासम्बन्धेन अर्थात् करणतासम्बन्धेन तद्विशिष्टप्रमाप्रत्यक्षं प्रत्यक्षप्रमाणस्य लक्षणम्।

नैयायिकमतम्

गौतममतानुसारेण 'इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्' इति प्रत्यक्षलक्षणं वर्तते। तद् अनिर्वचनीयं (अव्यपदेश्यं) दोषरहितम्, (अव्यभिचारि) निश्चितं (व्यवसायात्मकं) भवति[२]। गौतमस्योत्तरवर्ती नैयायिकानां प्रत्यक्षविमर्शस्य मुख्याधारभूतं न्यायसूत्रमेव वर्तते। गौतमोक्तानामिन्द्रियार्थसन्निकर्षोत्पन्नम्, अव्यपदेश्यम्, अव्यभिचारि, व्यवसायात्मकमिति चतुश्शब्दानां विश्लेषणावसरे तैर्महान् मतभेदः प्रकटितः।

वात्स्यायनमते प्रत्यक्षशब्दः प्रमावाचकः प्रमाणवाचकश्च वर्तते। उद्द्योतकारो वाचस्पतिमिश्रः, जयन्तभट्टश्च चतुश्शब्दोपरि महान्तं विचारं कृतवान्। अस्मिन् सन्दर्भे जयन्तभट्टैर्वाचस्पतिमिश्रैश्च उल्लेखनीयविचारः कृतः। गौतमेन प्रत्यक्षप्रमाणे अथ च प्रत्यक्षप्रमितिमध्ये भेदो न स्वीकृतः, एवं वाचस्पतिमिश्राणां जयन्तभट्टानां च मते तेषां सहमतिर्नास्ति। गौतमस्य उपर्युक्तसमस्तसूत्रं कतिपयाचार्यैः केवलं प्रत्यक्षस्य परिभाषामात्रं स्वीकृतम्। इन्द्रियार्थसन्निकर्षोत्पन्नमिति भागोऽयं परिभाषा, अव्यपदेश्यमिति अथ च व्यवसायात्मकमिति निर्विकल्पकसविकल्पकज्ञानभेदेन भेदोल्लेखः कृत इति अन्याचार्याः कथयन्ति।

इन्द्रियार्थसन्निकर्षोत्पन्नम्, अव्यपदेश्यम्, अव्यभिचारि, अथ च व्यवसायात्मकं यज्ज्ञानं वर्तते, तत् सम्बन्धविषये उत्तरवर्त्तिनैयायिकैर्यादृशो विचारः कृतः, सः साररूपेणेत्थं वर्तते—

---

१. भा., पृ. ५९।

२. इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षम्। (न्या.सू. १।१।४)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रियार्थसन्निकर्षः—अस्मिन् वाक्ये इन्द्रियम्, अर्थः, सन्निकर्षश्चेति शब्दत्रयस्य योगो वर्तते। अतः समस्तपदस्य विश्लेषणात्पूर्वं प्रत्येकखण्डोपरि विचार आवश्यक एव वर्तते।

इन्द्रियम्—इन्द्रियं द्विविधम्—कर्मेन्द्रियं ज्ञानेन्द्रियं च। क्रियासाधकत्वं कर्मेन्द्रियस्य लक्षणम्। ज्ञानसाधकत्वं ज्ञानेन्द्रियस्य लक्षणम्। प्रत्यक्षस्य सम्बन्धः ज्ञानेन्द्रियैः साकमेव वर्तते। तेषां नामानि घ्राणरसनचक्षुस्त्वक्श्रोत्राणि। मनोऽपि इन्द्रियम्। आभ्यन्तरेन्द्रियं मन इन्द्रियम्। तथा च पञ्चेन्द्रियाणि बाह्येन्द्रियाणि। मन इन्द्रियेण सुखदुःखादिसाक्षात्कारो भवति। बाह्येन्द्रियैः क्रमशो गन्धरसरूपस्पर्शशब्दानां ज्ञानं भवति। मनसो नियतविषयत्वं नास्ति। नासिका जिह्वा इन्द्रियाणामधिष्ठानमात्रं न तु इन्द्रियम्। इन्द्रियन्तु एतेषां सूक्ष्मशक्तिरेव। सूक्ष्मशक्तेर्ज्ञानमनुमानेन भवति। गुणलक्षणानामनुसारेणैतेषां स्वरूपनिश्चयो भवति। इन्द्रियं भौतिकम्। तदैव उक्तम्—'येनेन्द्रियेण यो गुणो गृह्यते, तन्निष्ठा जातिः, तदभावोऽपि तेनैव इन्द्रियेण गृह्यते। प्रत्येकमिन्द्रियं स्वविषयं प्रत्येव क्रियाशीलो भवति। अत इन्द्रियं स्वस्वविषयविषयकज्ञानं प्रति जनकम्। अतः प्रत्येकमिन्द्रियं स्वविषयस्यैव ग्रहणं कर्तुं शक्नोति।

अर्थः—ज्ञानप्रक्रियायां ज्ञातुर्ज्ञेयस्यापि महत्त्वपूर्णं स्थानं वर्तते। ज्ञेयमेव हि विषयवस्तुपदार्थरूपेण व्यवह्रियते। येनेन्द्रियेण विषयस्य ग्रहणं भवति, स एव तस्येन्द्रियस्यार्थः। इन्द्रियार्थः स्वयमेव ग्राहकं ग्राह्यश्च नैव भवितुमर्हति। यथा चक्षुः स्वस्य द्रष्टा नैव भवितुमर्हति। चक्षुरिन्द्रियस्य कार्यं वर्तते दर्शनम्।

अत्र प्रश्न उदेति यद् यदि विषयो न स्यात्, तदा किं चक्षुर्द्रष्टुं शक्नोति। अतो विषयाणां स्थितिरावश्यकी। बाह्यपदार्थसत्ताविषये दार्शनिकानां वैमत्यं वर्तते। विज्ञानवादिबौद्धमते कल्पनाभावमेव बाह्यजगत्। अहं यादृशानुभवात्मकं ज्ञानं करोमि तद् मानसिकप्रत्ययः। शून्यवादिबौद्धमतानुसारेण जगत् शून्यं वर्तते। वेदान्तानुसारेण सर्वे पदार्था भ्रममात्रमेव; किन्तु न्यायवैशेषिकमते बाह्यपदार्थानां निर्विवादरूपेणास्तित्वं स्वयं सिद्धं वर्तते। वस्तुवादिमतमिदमेव वर्तते।

सन्निकर्षः—इन्द्रियाणां विषयैः साकं यः सम्बन्धः, स एव सन्निकर्ष-पदवाच्यः। सन्निकर्षस्य षड्भेदा वर्तन्ते—संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्च। प्रत्यक्षं प्रति आत्ममनःसंयोगेऽपि कारणं वर्तते। यावत्पर्यन्तं मनसापि इन्द्रियैः साकं सम्बन्धो न भवति, तावत्पर्यन्तं ज्ञानं नैव भवितुमर्हति। अतो नैयायिकानां मतं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्तते यद् अर्थस्येन्द्रियैः साकम्, इन्द्रियस्य मनसा, मनस, आत्मना साकं सम्बन्धे जाते सति प्रत्यक्षज्ञानं भवति।

अव्यपदेश्यम्—प्रत्यक्षलक्षणे अव्यपदेश्यपदस्य परिगणनं वर्तते। वात्स्यायन उद्योतकारो वाचस्पतिश्च अस्मिन् विषये विस्तारेण विचारं कृतवन्तः; परन्तु जयन्तभट्टैः सर्वापेक्षयाऽधिकं वैकल्पिकानामर्थानामुल्लेखः कृतः। वात्स्यायनानुसारेण अव्यपदेशस्यार्थः शब्दैः प्रत्यक्षीकर्तुमयोग्यत्वम्। तैरेवमप्युक्तम्—इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं रूपरसादिबोधकशब्दैरभिहितं वर्तते। एवं परिस्थितौ यदि अव्यपदेश्यपदं प्रत्यक्षस्य लक्षणे सम्मिलितं न क्रियते, तदा शब्दप्रमाणे अथ च प्रत्यक्षप्रमाणे भेदो नैव साधितुं शक्यते[1]।

उद्योतकारमतानुसारेण इदमनुचितं वर्तते। शब्दप्रमाणस्य प्रत्यक्षप्रमाणेन साकं भेदसम्पादनार्थमव्यपदेश्यपदं निर्दिष्टमिति नैव वक्तुं शक्यते। कथमिति चेत्, इदमुद्देश्यं तु प्रत्यक्षपरिभाषाया द्वितीयलक्षणेनैव साधितुं शक्यते। 'इन्द्रियार्थसन्निकर्षोत्पन्नमिति'।

वाचस्पतिमिश्रैर्गौतमसूत्रस्य भागद्वयं कृतम्। अव्यपदेश्यपदं प्रत्यक्षस्यैको भेदो निर्विकल्पकज्ञानस्य वाचकः।

कतिपयाचार्याणां कथनं वर्तते यद् उत्पन्नं ज्ञानमिन्द्रियार्थसन्निकर्षजन्यत्वे सति उपदेशजन्यमपि वर्तते। यादृशज्ञानमुपदेशजन्यमपि इन्द्रियार्थसन्निकर्षजन्यमपि भवति, तदेव प्रत्यक्षम्। अतस्तादृशोभयजन्यं ज्ञानं प्रत्यक्षमिति प्रत्यक्षलक्षणे उभयजन्यत्वस्य बहिः करणार्थं सूत्रे अव्यपदेश्यपदमिति।

किन्तु अस्मिन् सन्दर्भे विचारणीयं वर्तते, यत् शब्दैर्व्यक्तं नैव कर्तुं शक्यते तद् अव्यपदेश्यमिति। एतादृशाधारं धृत्वा शब्दप्रमाणैः साकं भेदसम्पादनार्थमेवं कृतमनुचितम्। कथमिति चेत्, शब्दवाच्यतामात्रेणैव किमपि ज्ञानं प्रत्यक्षभिन्नं नैव भवितुमर्हति। एवं यदि प्रतीतिः स्वयं भ्रान्तिर्वर्तते तत्परिहारार्थमव्यभिचारिपदमेव पर्याप्तम्।

विश्वनाथभट्टैः अन्नंभट्टैश्च प्रत्यक्षस्य परिभाषावसरे मूलतया गौतमीयसूत्रस्य स्वीकृतत्वेऽपि अव्यपदेश्यमिति पदं त्यक्तम्। कथमिति चेत्, शब्दज्ञानं प्रति सन्निकर्षो न कारणम्। अतः शब्दप्रमाणे प्रत्यक्षप्रमाणलक्षणस्य नातिव्याप्तिः। अतस्तत्परिहारार्थमव्यपदेश्यपदमनावश्यकम्।

१. नामधेयशब्देन व्यपदिश्यमानं सत् शाब्दं प्रसज्यते, अत आह अव्यपदेश्यमिति (न्या.मा. १।१।४)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अव्यभिचारि—वात्स्यायनमतानुसारेण सूत्रकारेण प्रत्यक्षलक्षणावसरे अव्यभिचारिपदस्य प्रवेशो भ्रान्तौ प्रत्यक्षलक्षणस्यातिव्याप्तिवारणार्थं कृतः। यथा ग्रीष्मर्तौ पार्थिवीमुष्णतां गृहीत्वा सूर्यस्य रश्मिर्दूरदेशस्थपुरुषस्य समीपमागत्य तत्र इन्द्रियार्थसन्निकर्षेण जलस्य प्रतीतिं करोति। अतो भ्रान्तिनिवारणार्थं सूत्रे अव्यभिचारीति पदं निविष्टम्। वाचस्पतिमिश्रैरुक्तं यद् अन्यप्रमाणत्वेऽपि अव्यभिचारित्वमावश्यकम्, तथापि प्रत्यक्षमूलके च सर्वप्रमाणानां प्रत्यक्षलक्षणे विशेषणस्य निवेशनं तेषामपि स्वतः चरितार्थमेव।

व्यवसायात्मकम्—वात्स्यायनमते संशयव्यावृत्त्यर्थं प्रत्यक्षलक्षणे व्यवसायात्मकमिति पदं निविष्टम्। कोऽपि व्यक्तिर्दूरे पदार्थं दृष्ट्वा यदि एवं विचारयति यत् तत्र धूमो धूमपटलो वा, विचार्यमाणे सति निर्णयोपरि न गन्तुं शक्यते तादृशं ज्ञानं संशयः। एतादृशज्ञानस्य प्रत्यक्षलक्षणस्य मध्ये निस्सारणात् सूत्रे व्यवसायात्मकमित्युक्तम्। वाचस्पतिमिश्रा व्यवसायात्मकशब्देन सूत्रकारैः सविकल्पकप्रत्यक्षस्योल्लेखः कृत इति वदन्ति, कथमिति चेत्, संशयस्य वारणं त्वव्यभिचारीति पदेन भवितुमर्हति।

संशयभ्रमयोर्भेदो वर्तते। अतो भ्रमव्यावृत्त्यर्थमव्यभिचारिपदं संशयव्यावृत्त्यर्थं व्यवसायात्मकमिति पदमिति प्राचीना वदन्ति।

नव्यन्यायमतस्य प्रवर्तकैर्गङ्गेशोपाध्यायैस्तत्त्वचिन्तामणौ गौतममतस्य खण्डनकरणावसरे कथितं यत् साक्षात्कारित्वं प्रत्यक्षस्य लक्षणं वर्तते[1]। साक्षात्कारित्वमिन्द्रियार्थमानसादिसन्निकर्षोत्पन्नं वर्तते। प्राचीननैयायिकोक्तलक्षणं लौकिकप्रत्यक्षस्यैव, न त्वलौकिकस्येश्वरप्रत्यक्षे अव्याप्ते तद्दोषपरिहारार्थं विश्वनाथभट्टाचार्यैर्ज्ञानाकरणकं ज्ञानं प्रत्यक्षमिति प्रत्यक्षलक्षणं कृतम्[2]। इदं लक्षणमीश्वरप्रत्यक्षेऽपि सङ्गच्छते। तेनानुमितौ, उपमितौ, शाब्दीप्रमायां च नातिव्याप्तिः। यतो ह्यनुमितौ व्याप्तिज्ञानम्, उपमितौ सादृश्यज्ञानं, शाब्दीप्रमायां पदज्ञानं, स्मृतौ अनुभवात्मकं ज्ञानं करणम्। अतो न तत्रातिव्याप्तिः।

गङ्गेशोपाध्यायैः साक्षात्कारित्वं प्रत्यक्षप्रमाया लक्षणं कृतम्। यतो हि साक्षात्कारित्वं लक्षणं प्रत्यक्षप्रमायामेव घटते। अनुमानजन्यज्ञाने पूर्वं व्याप्तिज्ञानस्य पक्षधर्मताज्ञानस्य च व्यवधानं वर्तते। उपमितावपि सादृश्यज्ञानस्य व्यवधानं वर्तते।

१. प्रत्यक्षस्य साक्षात्कारित्वं लक्षणम् (त.चि., पृ. ५७०)।
२. ज्ञानाकरणकं ज्ञानं प्रत्यक्षम् (न्या.सि.मु., पृ. २८०)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शाब्दज्ञाने पदज्ञानस्य व्यवधानं वर्तते। प्रत्यक्षज्ञानं प्रति न किमप्यन्यज्ञानस्य कारणत्वं वर्तते। गङ्गेशोपाध्यायैर्ज्ञानाकरणकं ज्ञानं प्रत्यक्षमिति प्रत्यक्षप्रमाया लक्षणं कृतम्। एवं रीत्या प्रत्यक्षप्रमाया लक्षणं प्रकारद्वयेन सिद्धम्।

सांख्यमतम्

सांख्यशास्त्रे प्रत्यक्षप्रमालक्षणविषये परम्परायास्त्रैविध्यं वर्तते। प्रथम-परम्परायाः प्रवर्तकः कपिलमुनिर्वर्तते। द्वितीयपरम्परायाः प्रवर्तको विन्ध्यवासी अथवा वार्षगण्यो वर्तते। ईश्वरकृष्णस्तृतीयपरम्पराया उद्भावको वर्तते।

सूत्रकारेण प्रत्यक्षस्य लक्षणमिदं कृतं 'यत् सम्बन्धं सत् तदाकारोल्लेखि विज्ञानं तत् प्रत्यक्षम्', अर्थादिन्द्रियस्य विषयेण साकं सम्बन्धे जाते सति तदाकारज्ञानं तदेव प्रत्यक्षम्।

'श्रोत्रादिवृत्तिरविकल्पिका' इति विन्ध्यवासिमहोदयैः प्रत्यक्षस्य लक्षणं कृतम्। ततः पूर्ववर्तिभिराचार्यैः श्रोत्रादिवृत्तिः प्रत्यक्षमित्युक्तं वर्तते।

न्यायमञ्जरीकारेण तस्य खण्डनं कृतम्।

'श्रोत्रादिवृत्तिरपरैरविकल्पिकेति प्रत्यक्षलक्षणमवर्णि तदप्यपास्तम्'।

(न्या.मं., पृ. १३)

सांख्यमतानुसारेण प्रत्यक्षस्य विषयो बाह्य आभ्यन्तरश्च वर्तते। ते च नियमाः पृथिव्यादिस्थूलपदार्थाः सुखादिसूक्ष्मपदार्थाश्च। बाह्यप्रत्यक्षं प्रति बाह्येन्द्रियैः साकं संयोगोऽन्तःकरणस्य, आन्तरिकप्रत्यक्षं प्रति अन्तःकरणस्य मन इन्द्रियेण साकं संयोगश्च कारणम्। अन्तःकरणं नाम बुद्धेरहङ्कारस्य मनसश्च सम्मिलितरूपम्। तेन साकं बाह्येन्द्रियस्य आभ्यन्तरेन्द्रियस्य संयोगे जाते सति यद् ज्ञानमुत्पन्नं नदेव प्रत्यक्षम्।

वेदान्तमतम्

वेदान्तमते चैतन्यस्वरूपं ज्ञानं वर्तते। अतः प्रत्यक्षज्ञानं प्रमात्मकमेव भवति। शङ्कराचार्य-पद्मपादाचार्य-प्रभृतिभिराचार्यैः प्रत्यक्षस्य तूल्लेखः कृतः; किन्तु अस्य सङ्क्षिप्तपरिचयो विवरणे, बृहन्निरूपणं वेदान्तपरिभाषायां वर्तते।

प्रत्यक्षप्रमायाः करणं प्रत्यक्षमिति प्रत्यक्षप्रमाणस्य लक्षणं धर्मराजाध्वरीन्द्रैः कृतम्। प्रत्यक्षप्रमा एव चैतन्यम्। अस्मिन् सन्दर्भे इदं ज्ञातव्यं वर्तते यत् प्रमाणावच्छिन्नचैतन्यस्य विषयावच्छिन्नचैतन्येन साकमभेदः स्वीक्रियते वेदान्तमते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चैतन्यं त्रिविधं प्रमातृचैतन्यं प्रमाणचैतन्यं विषयचैतन्यं च। धर्मराजाध्वरीन्द्रमते अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम्। अन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यम्। घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यम्[1]।

अन्तःकरणावच्छिन्नं चैतन्यमर्थाद् यस्मिन् प्रदेशे अन्तःकरणं वर्तते, तत् प्रदेशवृत्तिचैतन्यं प्रमातृचैतन्यम्। यस्मिन् प्रदेशे अन्तःकरणस्य वृत्तिर्वर्तते तादृशप्रदेशवृत्तिचैतन्यं प्रमाणचैतन्यम्। यादृशस्थले घटादिस्थितिर्वर्तते तादृशस्थलवृत्तिचैतन्यं विषयचैतन्यम्।

अन्तःकरणवृत्तिश्चतुर्विधा—संशयः, निश्चयः, गर्वः, स्मरणं च। एवं प्रकारेण वृत्तिभेदद्वारा अन्तःकरणं मनोबुद्ध्यहङ्कारचित्तरूपेण ख्यातम्। अत एवोक्तं प्रमाणचैतन्येन साकं विषयचैतन्यस्याभेद एव प्रत्यक्षम्। एवं रीत्या 'सोऽयं देवदत्तः' इत्यादिवाक्यजन्यज्ञानीयविषयस्य सन्निकृष्टत्वे, अथ च बहिर्निर्गतान्तः-करणस्य वृत्तेः स्वीकारे सति देवदत्तावच्छिन्नचैतन्यस्य तद्विषयकवृत्त्य-वच्छिन्नचैतन्यस्य परस्पराभेदसत्त्वेन सोऽयं देवदत्त इत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षात्मकत्वं सिद्ध्यति।

प्रत्यक्षप्रमायाः करणानि इन्द्रियाणि षट् वर्तन्ते। अतः प्रत्यक्षप्रमा षड्विधा वर्तते—श्रोत्रं, त्वक्, चक्षुः, रसना, घ्राणं, मनः। श्रोत्रजन्यं यथार्थज्ञानं श्रोत्रप्रमा। त्वगिन्द्रियजन्यं ज्ञानं त्वाचप्रमा। चक्षुरिन्द्रियजन्यं ज्ञानं चाक्षुषप्रमा। रसनेन्द्रियजन्यज्ञानं रासनप्रमा। घ्राणेन्द्रियजन्यं ज्ञानं घ्राणजप्रमा। मन इन्द्रियजन्यं ज्ञानं मानसप्रभा। अद्वैततत्त्वशुद्धौ प्रत्यक्षप्रमा पञ्चविधा वर्तते[2]।

मध्वाचार्यमते प्रत्यक्षानुमानशब्दभेदेन प्रमाणं त्रिविधं वर्तते। दोषरहितज्ञानेन्द्रियस्य दोषरहितविषयैः साकं संयोगः प्रत्यक्षम्। विषयस्य अत्यन्तं दूरे स्थिते, अत्यधिकसामीप्ये, अत्यधिकलघुस्थले, अवरुद्धत्वे सति, स्वसमानपदार्थैः साकं मिश्रणे सति, सादृश्ये सति च ज्ञानं दोषपूर्णं भवति।

---

१. प्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणम्। प्रत्यक्षप्रमात्वमत्र चैतन्यमेव, तथा हि विविधं चैतन्यं, प्रमातृचैतन्यं प्रमाणचैतन्यं विषयचैतन्यं चेति। तत्र घटाद्यवच्छिन्नं विषयचैतन्यम्। अन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यम्। अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम्। (वे.परि.)।

२. (क) चैतन्यमात्रम्, (ख) अबाधितविषयावच्छिन्नचैतन्याभिन्नवृत्त्यवच्छिन्नचैतन्यम्, (ग) प्रमातृचैतन्याभिन्नबोधितविषयत्वम्, (घ) जीवसाक्षी, (ङ) ईश्वरसाक्षी चेति। (अ.त.शु., पृ. २)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानेन्द्रियं द्विविधम्—प्रमातृस्वरूपं प्राकृतस्वरूपं च। ज्ञातुरन्तः-प्रज्ञात्मकशक्तिः साक्षीति कथ्यते।[१] मध्वाचार्येणापि सविकल्पकनिर्विकल्पकभेदेन प्रत्यक्षं द्विविधं स्वीकृतम्।

वल्लभाचार्यमतानुसारेण सम्यग् ज्ञानं द्विविधम्—प्रत्यक्षं परोक्षम्। प्रत्यक्षन्तु इन्द्रियार्थं सत् सम्प्रयोगजन्यं ज्ञानम्[२]।

इन्द्रियार्थसन्निकर्षाणां विचारः

सन्निकर्षो द्विविधः—लौकिकोऽलौकिकश्च। लौकिकसन्निकर्षः षड्विधः—संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्च।

१. संयोगः—सम्बन्धो द्विविधः—अयुतसिद्धो युतसिद्धश्च। युतसिद्धस्योदाहरणं यथा—यदाहं घटं पश्यामि, तदा चक्षुरिन्द्रियस्य घटेन साकं संयोगो भवति। घटः चक्षुश्च उभयमपि द्रव्यं वर्तेते। एवं तयोः संयोगाभावकालेऽपि विद्यमानता वर्तते। अतो द्वयोः सम्बन्धो युतसिद्धः। स एव संयोगसन्निकर्षः। अस्मिन् संयोगे सहायकस्यावश्यकता नास्ति। आत्मा मनोऽपि भिन्नं द्रव्यम्। अतस्तौ अयुतसिद्धौ न स्तः। अतोऽहमस्मि इति प्रत्यक्षं भवति। तदपि संयोगसन्निकर्ष एवाधारितं वर्तते। अत्र कार्यकारणभावश्चक्षुरिन्द्रिय-जन्यघटप्रत्यक्षं प्रति चक्षुःसंयोगसन्निकर्षः कारणम्।

२. संयुक्तसमवायः—अयुतसिद्धः। नित्यसम्बन्धः समवायः। संयुक्ते समवायः संयुक्तसमवायः। अस्मिन् सन्निकर्षे इन्द्रियस्य द्रव्येण साकं संयोगः। द्रव्येषु गुणकर्मजातयः समवायेन तिष्ठन्ति। अतस्तयोरिन्द्रियेण साकं सम्बन्धो द्रव्यपरम्परया भवति। यदा अहं घटं पश्यामि तदा घटोपरि समवेतं नीलादिरूपमपि पश्यामि। अत्रेन्द्रियसंयोगो घटेन साकं, घटे नीलरूपं समवायेन तिष्ठति। अतश्चक्षुरिन्द्रियेण साकं नीलरूपस्य संयुक्तसमवायसन्निकर्षो वर्तते। अत्र कार्यकारणभावः—चक्षुरिन्द्रियजन्यघटरूपप्रत्यक्षं प्रति चक्षुसंयुक्तसमवायसन्निकर्षः कारणम्।

---

१. इन्द्रियशब्देन ज्ञानेन्द्रियं गृह्यते, तद् द्विविधं प्रामातृस्वरूपं प्राकृतं च। तत्र स्वरूपेन्द्रियं साक्षीत्युच्यते, तस्य विषय आत्मस्वरूपं तद्धर्मः अविद्यामनस् तद् वृत्तयो बाह्येन्द्रियज्ञान-सुखादयः कालव्याकृताकाशश्च। (प्र.प., पृ. २२)

२. इन्द्रियार्थे सत् सम्प्रयोगजन्यं ज्ञानम्। (प्र.रत्ना., पृ. २०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. संयुक्तसमवेतसमवायः—एतादृशसन्निकर्षेण जातेरपि प्रत्यक्षं कर्तुं शक्यते। यथा घटो द्रव्यं, तत्र नीलरूपं गुणः, तदुपरि नीलरूपत्वं जातिस्तस्यापि प्रत्यक्षं कर्तुं शक्यते। चक्षुषा घटेन साकं, घटस्य नीलरूपेण साकं, नीलस्य जातेः साकं सम्बन्धः। एवं रीत्या सम्बन्धत्रयं मिलित्वा जातेरपि प्रत्यक्षं भवति। अत्र कार्यकारणभावः, चक्षुरिन्द्रियजन्यनीलत्वजातिप्रत्यक्षं प्रति संयुक्तसमवेतसमवाय-सन्निकर्षः कारणम्।

४. समवायः—गुणगुणिनोः समवायः। श्रोत्रेन्द्रियशब्दयोः समवायसम्बन्धो वर्तते। श्रवणेन्द्रियं कर्णशष्कुल्यवच्छिन्नं आकाशमेव। शब्द आकाशस्य गुणो वर्तते। गुणी च आकाशः, आकाशस्य शब्दैः साकं समवायसम्बन्धो वर्तते। शब्दः समवेतरूपेण श्रोत्रेन्द्रिये वर्तते। अत्र श्रोत्रेन्द्रियेण शब्दस्य ग्रहणं समवायसम्बन्धेन भवति। अत्र कार्यकारणभावः—श्रोत्रेन्द्रियजन्यश्रावणप्रत्यक्षं प्रति समवायसम्बन्धेन श्रोत्रेन्द्रियं कारणम्।

वैशेषिकसम्प्रदायानुसारेण समवायसम्बन्धस्य ज्ञानमनुमानेन भवति; किन्तु नैयायिकमते सः प्रत्यक्षगम्यो वर्तते। तेषां कथनं वर्तते यद् अभावज्ञानं प्रति विशेषणविशेष्यभावसन्निकर्षः कारणम्, तथैव इन्द्रियेणापि विशेषण-विशेष्य-भावसन्निकर्षेण समवायस्यापि ग्रहणं भवितुमर्हति।

५. समवेतसमवायः—शब्दे शब्दत्वजातिर्वर्तते। यदा वयं श्रवणेन्द्रियेण शब्दत्वजातेर्ग्रहणं कुर्मस्तदा यः सम्बन्धः स एव समवेतसमवायः। श्रवणेन्द्रियजन्यशब्दतत्त्वजातेः प्रत्यक्षं प्रति समवेतसमवायसम्बन्धेन श्रवणेन्द्रियं कारणमिति कार्यकारणभावो भवति।

६. विशेष्यविशेषणभावः—यदि इन्द्रियस्य विषयस्तस्य इन्द्रियेण साकं सम्बन्धो विषयस्य विशेषणं भवति चेत्, तदा तादृश इन्द्रियविषयसम्बन्धो विशेष्यविशेषणभावसम्बन्ध एव। अभावप्रत्यक्षं प्रति विशेष्यविशेषणभावसम्बन्धेन इन्द्रियं कारणम्। यथा 'भूतले घटाभावः' इत्यत्र भूतलविशेष्यकघटाभावप्रकारकमिदं ज्ञानं भवति। एतादृशप्रत्यक्षे विशेषणीभूतो यो घटाभावस्तस्य प्रत्यक्षं न भवति; किन्तु विशेष्यभूतस्य भूतलस्य दर्शनं भवति। सुखाद्यभावप्रत्यक्षं प्रति मनो विशेष्यविशेषणभावसम्बन्धेन कारणम्। अतोऽभावस्य प्रत्यक्षार्थं विशेष्य-विशेषणभावसम्बन्ध आवश्यकः।

अत्रैवं वर्तते यद् विशेष्यविशेषणभावसन्निकर्षस्तदैव कार्यसमर्थो भवति, यदा पञ्चसन्निकर्षेषु मध्ये किमप्येकं तेन साकं स्यात्। यथा घटाभावप्रत्यक्षे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चक्षुरिन्द्रियस्य भूतलेन साकं संयोगसन्निकर्षो भवति। अत्र भूतले यो घटाभावस्तस्य प्रत्यक्षो वस्तुतः संयुक्तविशेषणविशेष्यभावसन्निकर्षेण भवति।

अलौकिकसन्निकर्षः

नव्यन्यायमते अलौकिकप्रत्यक्षमसाधारणरूपेण अथवा अलौकिकसन्निकर्षेण भवति। सन्निकर्षः प्रत्यासत्तिः। प्राचीनैः प्रत्यक्षस्य महत्त्वपूर्णमङ्गं संयोगः स्वीक्रियते। तेषां मते अलौकिकसन्निकर्षो नास्ति। अलौकिकसन्निकर्षस्त्रिविधः—सामान्यलक्षणा, ज्ञानलक्षणा, योगजधर्मश्च[१]।

१. सामान्यलक्षणा—एकं वस्तु दृष्ट्वा तत् सजातीयवस्तुनो यज्ज्ञानं भवति, तत् सामान्यलक्षणा प्रत्यासत्त्या। एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकम्। नैयायिका जातिः स्वतन्त्रपदार्थ इति वदन्ति।

प्राचीनैर्गोप्रत्यक्षं प्रति संयोगसन्निकर्षः कारणम्। गोत्वजातेः प्रत्यक्षं प्रति संयुक्तसमवायः सन्निकर्षः कारणम्। अनन्तरं गवान्तरं दृष्ट्वा कथितुं शक्यते सा गौरेव। अत्र विचारणीयो विषयो यद् वयं सर्वां गां दृष्टुं न शक्नुमः। वयन्तु गोषु गोत्वं दृष्ट्वा गोव्यक्तेः प्रत्यक्षं कुर्मः। अतोऽलौकिकसन्निकर्ष आवश्यकः।

जयन्तभट्टानुसारेण योगिनां तु सर्वविषयस्य विशेषज्ञानं वर्तते; किन्तु अलौकिकप्रत्यक्षेण तु सामान्यमात्रस्यैव बोधो भवति।

२. ज्ञानलक्षणा—इन्द्रियाणां नियतविषया वर्तन्ते। प्रत्येकमिन्द्रियं स्वस्वविषयस्यैव प्रत्यक्षं कर्तुं शक्नोति। यथा चक्षुषो रूपं, शब्दः श्रोत्रस्य, घ्राणेन्द्रियस्य गन्धः, रसनेन्द्रियस्य रसः, त्वगिन्द्रियस्य स्पर्शो विषयो भवति। सामान्यरूपेण एकेन्द्रिये अन्येन्द्रियजन्यविषयस्य ग्रहणयोग्यत्वं नास्ति; किन्तु ज्ञानलक्षणाप्रत्यासत्त्या एतादृशनियमस्य बाधः कर्तुं शक्यते। स्वविषयातिरिक्तस्य भिन्नेन्द्रियजन्यप्रत्यक्षविषयस्यापि ग्रहणं कर्तुं शक्यते। यथा तिन्तिणिं दृष्ट्वा जिह्वायां रस आगच्छति। तेनेदं जातं यत् चक्षुरिन्द्रियेण रसनेन्द्रियजन्यविषयस्यापि ग्रहणं कर्तुं शक्यते। इदं सर्वं ज्ञानलक्षणाप्रत्यासत्त्या एव साधितुं शक्यते।

नव्यनैयायिकैः स्वीकृतस्य ज्ञानलक्षणासन्निकर्षस्य खण्डनं एवं रीत्या वर्तते यद् अयं सन्निकर्षोऽनुमान एवान्तर्भवति। साहचर्यस्य ज्ञानमनुमानेन भवति; किन्त्वनुमानस्य प्रक्रिया अतिशीघ्रतया भवति। अतस्तस्य प्रत्यक्ष एवान्तर्भावः।

---

१. अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः। सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. योगजधर्मः—लौकिकसन्निकर्षकारणीभूतस्येन्द्रियस्य शक्तिः स्वल्पा भवति। इन्द्रियेण दूरस्थितस्य वस्तुनो ज्ञानं नैव कर्तुं शक्यते। इन्द्रियेण सूक्ष्मविषयाणां ज्ञानमसम्भवमेव। अतो योगजधर्मस्यावश्यकता वर्तते। योगजधर्मेण एतादृशसामर्थ्यमागच्छति तेन सूक्ष्मदूरस्थभूतभविष्यादिवस्तूनामपि ज्ञानं कर्तुं शक्यते। जैनदर्शनस्य 'केवलज्ञाने', बौद्धदर्शनस्य 'बोधितत्त्वे', सांख्यदर्शनस्य 'कैवल्ये', वेदान्तदर्शनस्य 'साक्षात्कारे' योगजधर्मस्यैव विभिन्नरूपत्वं वर्तते। अस्यां प्रक्रियायां लौकिकप्रत्यक्षरीत्या वस्तूनामिन्द्रियसापेक्षत्वमावश्यकं नास्ति। एवं प्रकारिका शक्तिर्योगेनैव प्राप्तुं शक्यते। अयमेव योगजप्रत्यक्षप्रकारः।

इन्द्रियत्वनिर्वचनम्

इन्द्रियस्य व्युत्पत्तिः पाणिनिसूत्रे वर्तते। पाणिनिना इन्द्र(आत्मा)शब्दे घ(इय)प्रत्ययं मेलयित्वा इन्द्रशब्दस्य ज्ञापकोऽर्थः कृतः[१]। एतादृशव्युत्पत्त्यनुसारेण इन्द्रियस्यार्थ आत्मसम्बन्धीति। यदि आत्मसम्बन्धित्वमिन्द्रियत्वं लक्षणमिन्द्रियस्य क्रियते तदा शरीरादातिव्याप्तिः। इन्द्रियपदस्य एतादृशी व्युत्पत्तिः पाणिनिव्याकरणद्वारैव गृहीता वर्तते विशुद्धिमग्गादिबौद्धग्रन्थे तत्त्वार्थभाष्यादिजैनग्रन्थे च। अन्यास्तिकदर्शनेष्विन्द्रियशब्दस्येतादृशी व्युत्पत्तिर्नैव दृश्यते। जैनाचार्यैरिन्द्रियपदस्यार्थं जीवः अथवा आत्मा स्वीकृतः। माठरवृत्ति-सदृशे प्राचीनग्रन्थे विषयं प्रति यद् गच्छति तद् इन्द्रियम्[२]। वाचस्पतिमिश्रैरपि आत्मनो ज्ञापकत्वमेव इन्द्रियशब्दस्याशयः स्वीकृतः[३]। वात्स्यायनैः प्राप्तिभूतविषयाणामाधारभूतत्वेनेन्द्रियं स्वीकृतम्[४]।

बौद्धैः संवेदनायाः षट् प्रकाराः कथिताः—चाक्षुषः, श्रावणः, घ्राणनः, रासनः, स्पार्शनः, मानसश्च। तेषां षड् आश्रया वर्तन्ते—चक्षुः, श्रोत्रं, नासिका, रसना, त्वक्, चेतना। तेषां षड् विषयाः सन्ति—रूपं, शब्दः, गन्धः, रसः, स्पर्शः, मनश्च। मनसश्चेतनाया आश्रयत्वं स्वीकृतम्। बौद्धैरिन्द्रियाणां संख्या पञ्च एव कथिता—नेत्रं, श्रोत्रं, घ्राणं, रसना, त्वक्। तेषां मते इन्द्रियस्य गोलकत्वं वर्तते।

---

१. इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा। (पा.सू. ५।२।९३)
२. इन इति विषयाणां नाम, तानिनो विषयान् प्रति द्रवन्तीति इन्द्रियाणि। (माठरवृत्तिः)
३. इन्द्रियस्यात्मनश्चिह्नत्वाद् इन्द्रियमित्युच्यते। (सा.त.कौ., पृ. २३६)
४. एवं समाख्यानिर्वचनसामर्थ्याद् बोद्धव्यं स्वविषयग्रहणमिति वात्स्यायनः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जैनाचार्यैरात्मनो लिङ्गमेवेन्द्रियमिति कथितं वर्तते। इन्द्रियमात्मपरिचायकं वर्तते। आत्मजन्यसंवेदनस्य जनकं वर्तते। जैनमते इन्द्रियाणां संख्या पञ्च वर्तते—स्पार्शनं, रसनं, घ्राणजं, चाक्षुषं, श्रावणञ्च। तेषां विषयोऽपि पञ्चविधः—स्पर्शः, रसः, गन्धः, रूपं, शब्दश्च। यद्यपि आत्मा स्वभावतोऽत्यन्तज्ञानवान् वर्तते, तथाप्यावरणशक्त्या तस्य इन्द्रियपराधीनत्वं वर्तते। मनोऽपि आत्मसंवेदनस्य साधकं वर्तते, तथापि जैनमते मनस इन्द्रियत्वं नास्ति। प्रत्येकमिन्द्रियं एकार्थग्राहि वर्तते; किन्तु सर्वार्थग्राहकत्वं मनसि एव वर्तते।

न्यायवैशेषिकदर्शनाचार्यैः स्वमतं प्रकटितम्, तथापि केशवमिश्रैः तर्कभाषायां यादृशी परिभाषा दत्ता सा बहुप्रचलिता वर्तते। केशवमिश्रैरिन्द्रियस्य लक्षणं शरीरसंयुक्तत्वे सति ज्ञानकरणमतीन्द्रियमिति कृतम्। अर्थात् शरीरसंयुक्तत्वे सति ज्ञानकरणत्वे सति अतीन्द्रियत्वमिन्द्रियस्य लक्षणम्। अस्मिन् लक्षणे अतीन्द्रियत्वानुपादाने प्रकाशे अतिव्याप्तेः। प्रकाशे शरीरसंयुक्तत्वं वर्तते, एवं ज्ञानकरणत्वमपि वर्तते। अतः प्रकाशे इन्द्रियलक्षणस्यातिव्याप्तिः। अतोऽतीन्द्रियत्वपदं दत्तम्। तेन प्रकाशे नातिव्याप्तिः। प्रकाशे इन्द्रियवेद्यत्वं वर्तते, अतीन्द्रियत्वाभावात्। अत्रातीन्द्रियत्वं योगजधर्माजन्यसाक्षात्काराविषयत्वम्[1]। यदि इन्द्रियाणामविषयीभूतत्वं तदा आत्माश्रयः, इन्द्रियशब्दस्य लक्षणे प्रयुक्तत्वात्। यदि शरीरसंयुक्तत्वं न दीयते तदा इन्द्रियार्थसन्निकर्षेऽतिव्याप्तिः। तत्रातीन्द्रियत्वमथ च ज्ञानकरणत्वमपि वर्तते। शरीरसंयुक्तत्वमिन्द्रियसन्निकर्षे नास्ति, तस्य द्रव्यरूपत्वाभावात्। अतो नातिव्याप्तिः। इन्द्रियार्थसन्निकर्षस्य अतीन्द्रियत्वे कारणमिदं वर्तते यदिन्द्रियार्थयोर्मध्ये अर्थस्यैव प्रत्यक्षम्, न तु इन्द्रियस्य। इन्द्रियं प्रत्यक्षस्याविषयः। अत्र नियमः—पदार्थद्वयस्य संयोगावसरे एकस्य अथवा द्वयोः प्रत्यक्षेण ग्रहणं न भवति चेत्, तत्र उभयसंयोगस्य प्रत्यक्षत्वं न स्यात्[2]। शरीरसंयुक्तत्वे सति अतीन्द्रियत्वमिन्द्रियलक्षणं क्रियते चेत्, तदा कालादावतिव्याप्तिः। काले शरीरसंयुक्तत्वं वर्तते, अतीन्द्रियत्वमपि वर्तते। ज्ञानकरणत्वनिवेशे काले नातिव्याप्तिः। यतो हि कालस्य कार्यमात्रं प्रति साधारणकारणसत्त्वेऽपि ज्ञानकरणत्वं (व्यापारवद् असाधारणकारणत्वं) नास्ति। अत्र व्यापारवद् असाधारणकारणं करणमिति करणत्वस्यार्थः[3]।

●

---

१. योगजधर्माजन्यसाक्षात्काराविषयमतीन्द्रियम् (त.चि.)।
२. शास्त्री श्रीनिवासः (तर्कभाषा-व्याख्या, पृ. १८७)।
३. शुक्लो बदरीनाथः (तर्कभाषा-व्याख्या, पृ. २२५)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चमत्कारसिद्धान्तः

प्रो॰ सन्निधानं सुदर्शनशर्मा
आचार्यः, साहित्यविभागस्य
राष्ट्रियसंस्कृतविद्यापीठे
तिरुपतिः

* * *

यथोपनिषत्सु यथा वा तदुपजीव्येषु वेदान्तादिषु दर्शनेषु, साहित्येऽपि सर्वातिशायिनः सारभूतस्य तत्त्वस्य गवेषणा चिराज्जागर्ति। केचिद् अलङ्कार इति, अन्ये गुण इति, इतरे रीतिरिति, तदितरे वक्रोक्तिरिति, परे औचित्यमिति, अपरे ध्वनिरिति, कतिपये रस इति च तत्तत्त्वमवादिषुः। तत्र दुर्व्याख्याविलासाद् यमकोपमादयोऽलङ्कारशब्दस्यं प्रवृत्तिनिमित्तत्त्वेन पर्यगृह्यन्त। तथा च अलङ्कारत्वादेवालङ्काराणाम्, गुणत्वादेव गुणानाम्, अवयवसंस्थाविशेषरूपत्वाद्रीतेः, उक्तिवैचित्र्यमात्रत्वाद्वक्रोक्तेः, दोषविपर्ययत्वादौचित्यस्य च काव्यात्मता निराकारि। यद्यपि ध्वन्यात्मवादश्चिरं साहित्यसाम्राज्यं शशास, तथापि क्रमशो रसगङ्गाप्रवाहे अलीयत।

एवमतिविचित्रपरम्परावाहिनि साहित्यसंसारे विश्वेश्वर इव विश्वेश्वरश्चमत्कारचन्द्रिकाशेखर आलङ्कारिकशेखर उदभूत्। चतुर्दशशतके लब्धजन्मा विश्वकविपण्डितविश्वेश्वरो विश्वेश्वरः स्वग्रन्थे चमत्कारः काव्यसार इति प्रत्यपादयत्। सकलसत्कविकाव्योपनिषद्भूतश्चमत्कार एवेति स्वीकुर्वता 'वागर्थौ सचमत्कारौ काव्यं काव्यविदो विदुः'[१] इति काव्यं लक्षयता च तेन तदुपोद्घाततया इत्यमवादि।

'नृणां विधौ निषेधे च शिक्षा काव्यप्रयोजनम्।
शिक्षा च सचमत्कारं चोदिता स्थिरतां भजेत्'[२]।इति।

---

१. चमत्कारचन्द्रिका-१.११।
२. तत्रैव-१.५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवञ्च चमत्कारिणी शिखा काव्यप्रयोजनमिति तस्याशयः। कोऽसौ चमत्कारः? विदुषामानन्दपरिवाहः[१]। चमत्कारस्य चाभिव्यक्तिस्थानानि सप्त। अतः 'सप्ताङ्गसङ्गतं काव्यं साम्राज्यमिव भासते'[२]। कानि तानीत्यपेक्षायाम्—

गुणं रीतिं रसं वृत्तिं पाकं शय्यामलङ्कृतिम्।
सप्तैतानि चमत्कारकारणं ब्रुवते बुधाः[३]।।

अथ काव्यभेदानाह—

त्रैविध्येन चमत्कारि चमत्कारितरं तथा।
चमत्कारितमं चेति प्रविविच्य निदर्शितम्[४]।।

विस्तरभयादाद्यं केवलमुदाह्रियते—

कमलमुकुलपाली कल्पिता पानकेली
कलमधुरबलाका काकली कल्पनादे।
सरसि सरसतीरे सारसारावसारे
विहरति भरितौघो राजशैलाधिराजः[५]।।

अत्रानुप्रासनिर्वहणमात्रे कविप्रयत्नस्य विश्रान्तेः शब्दमात्रचारुत्वाद् इदं काव्यं चमत्कारीत्युच्यते। इत्थं विश्वेश्वराच्चमत्कारसिद्धान्त आविरभूत्।

अत्र विचार्यते—कस्यचन सिद्धान्तस्य ग्राह्यत्वमुत त्याज्यत्वमिति विचिकित्सायां 'सन्तः परीक्ष्यान्यतरद्भजन्ते'[६]। परीक्षायां च त्रयोंऽशाः प्राधान्यं भजन्ते, समूलत्वं सानुयायित्वं सप्रमाणत्वं चेति। तत्सत्त्वे ग्राह्यत्वं, वैपरीत्ये विपरीतत्वम्।

नवमशतके ध्वनिसिद्धान्तव्याजेन योऽभूद्रससिद्धान्तस्योपष्टम्भकः, सोऽभूदाकर औचित्यादीनां सिद्धान्तानाम्। सोऽसावानन्दवर्धनः साहित्यशास्त्रे चमत्कारशब्दं प्रायुङ्क्त[७]। दशमशतकवर्ती अभिनवगुप्तो द्वादशाधिकस्थानेषु[८] चमत्कारशब्दप्रयोगेण साकं तस्य विवरणमप्यकरोत्। प्रायस्तमेवानुसरता

१. चम.च. १.६;
२. तत्रैव-१.९।
३. तत्रैव-१.४,७;
४. तत्रैव।
५. तत्रैव, पु. ७३;
६. मालविकाग्निमित्रम्-१.२।
७. ध्वन्यालोकः-४.१५,१६ वृत्तिः;
८. तदेव (सलोचनः), पृ. ११३, १३७,१३८ इत्यादि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारायणेनोक्तम्—'रसे सारश्चमत्कारस्सर्वत्राप्यनुभूयते'[1] इति। अभिनवगुप्तस्यान्तेवासी एकादशशतकवर्ती क्षेमेन्द्रः स्वगुरोरेव पन्थानमनुसृत्य—

'सुकविरतिशयार्थी वाक्चमत्कारलोभा-
दभिसरति मनोज्ञे वस्तुशब्दार्थसार्धे'[2]।

इति निगदति। तावताऽतृप्तः सः—'अविचारितरमणीयः, विचार्यमाणरमणीयः, समस्तसूक्तव्यापी, सूक्तैकदेशदृश्यः, शब्दगतः, अर्थगतः, शब्दार्थगतः, अलङ्कारगतः, रसगतः, प्रख्यातवृत्तिगतश्चेति चमत्कारं दशधा निर्दिश्य[3] प्रत्येकमुदाहरति। तावताप्यसन्तुष्टः, अचमत्कारसमत्कारयोः काव्ययोर्भेदं सोदाहरणमुपपादयति[4]। चमत्कारविरहितं यथा—

वेल्लत्पल्लवसम्मिलल्लतलसत्पुष्पस्फुटत्कुड्मल-
स्फूर्जद्गुच्छभरक्वणन्मधुकरक्रीडा विनोदाकर।
रक्ताशोक सखे दयां कुरु हर प्रारब्धमाडम्बरं
प्राणाः कण्ठमुपागताः प्रियतमा दूरे त्वमेवंविधः।।

सचमत्कारं यथा यशोवर्मणः—

रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणैः
त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्तास्सखे मामपि।
कान्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः
सर्वं तुल्यमशोक! केवलमहं धात्रा सशोकः कृतः।।

अन्ततो गत्वा क्षेमेन्द्र इत्थं निष्कर्षं ब्रूते—

एकेन केनचिदनर्घमणिप्रभेण
काव्यं चमत्कृतिपदेन विना सुवर्णम्।
निर्दोषलेशमपि रोहति कस्य चित्ते
लावण्यहीनमिव यौवनमङ्गनानाम्[5]।।

---

१. साहित्यदर्पणः, पृ. ७३ (धर्मदत्तेनोक्तमित्युद्धृतम्)।
२. कविकण्ठाभरणम्-३.१; ३. तत्रैव, पृ. १६७।
४. तत्रैव, पृ. १६६,१६७; ५. तत्रैव-३.२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा च—'न हि चमत्कारविरहितस्य कवेः कवित्वं काव्यस्य वा काव्यत्वम्'[१] इति।

इत्थं चतुर्दशशतकवर्तिना विश्वेश्वरेण प्रतिपादितश्चमत्कारसिद्धान्तो न स्वकपोलकल्पितः; किन्तु सुदृढमूल इति स्पष्टम्।

सम्प्रति सानुयायित्वांशस्य क्रमप्राप्तत्वेऽपि सूचीकटाहन्यायेन तदनन्तरवर्ती सप्रमाणत्वांशो निरूप्यते। ध्वनिकाराभिनवगुप्तादीनामाप्तत्वाच्चमत्कारसिद्धान्ते प्रामाण्यमस्त्येव। किञ्चालङ्कारिकाः प्रत्यक्षादीनि यमवलम्बन्ते, तमनुभवं प्रमाणमूर्धन्यत्वेनाभ्युपगच्छन्ति। तथा हि—

'सचेतसामनुभवः प्रमाणं तत्र केवलम्'[२] इति विश्वनाथः। 'रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते'[३] इति नारायणः। 'लोकोत्तरत्वं च आह्लादगतः चमत्कारत्वापरपर्यायः अनुभवसाक्षिको जातिविशेषः'[४] इति जगन्नाथः। इत्थं चमत्कारसिद्धान्तस्य सप्रमाणत्वं सिद्धम्।

साहित्यशास्त्रे रीतिवक्रोक्त्यौचित्यादयः सिद्धान्तास्तदनुसारिणामभावाद् नाद्रियन्ते। अधुना चमत्कारसिद्धान्तस्य सानुयायित्वं व्याख्यास्यामः। एतत्सिद्धान्तानुयायिनां मध्येऽग्रगण्य आलङ्कारिकशिरोमणेरप्पय्यदीक्षितस्य सफलप्रतिस्पर्धी अन्वर्थपण्डितराजबिरुदाङ्कितो जगन्नाथ एव।

पण्डितराजो जगन्नाथोऽपि चमत्कृतिसिद्धान्तमेवावलम्ब्य रसगङ्गाधरं वितनुते इत्येतद् अग्रे प्रदर्शयिष्यमाणैस्तस्यैव वचनैर्निराबाधमभिधातुं शक्यते। तथा हि— काव्यं लक्षयता तेनोक्तं 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति। तदेव विवृण्वन् ब्रवीति—लोकोत्तरत्वं च आह्लादगतश्चमत्कारत्वापरपर्यायः अनुभवसाक्षिको जातिविशेष इति। 'चमत्कारजनकभावनाविषयार्थप्रतिपादकशब्दत्वम् अथवा यत्प्रतिपादितार्थविषयकभावनात्वं चमत्कारजनकतावच्छेदकं तत्त्वम्; स्वविशिष्टजनकताऽवच्छेदकार्थप्रतिपादकतासंसर्गेण चमत्कारत्ववत्त्वमेव वा काव्यत्वम्'[५] इति।

---

१. तत्रैव, अवतारिका;
२. साहित्यदर्पणः-३.८ (पृ. ७६)।
३. तत्रैव, पृ. ७३;
४. रसगङ्गाधरः-पृ. ४,५।
५. तत्रैव, पृ. ११।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथैव, काव्यं चतुर्धा विभज्य तत्र आद्यमुत्तमोत्तमं काव्यम्—'शब्दार्थौ यत्र गुणीभावितात्मानौ कमप्यर्थमभिव्यङ्क्तस्तदाद्यम्'[1] इति लक्षयित्वा, तल्लक्षणघटकं 'कमपि' इति पदं व्याचष्टे—'कमपीति चमत्कृतिभूमिम्' इति। तत्रैव—'तेनातिगूढ-स्फुटव्यङ्ग्ययोर्निरासोऽपराङ्गवाच्यसिद्ध्यङ्गो व्यङ्ग्यस्यापि चमत्कारितया....' इति, 'न हि विशेषाकारेण व्यङ्ग्योऽपि सामान्याकारेण अभिहितोऽर्थः सहृदयानां चमत्कृतिमुत्पादयितुमीष्टे' इति च आह।

'काव्यजीवितं चमत्कारित्वं चाविशिष्टमेव'[2] इत्येकं वाक्यमलं जगन्नाथः चमत्कारप्राधान्यवादीति वक्तुम्। तदुक्तमुत्तमकाव्यलक्षणम्, इतरद् द्वयं च वीक्ष्यताम्—'यत्र व्यङ्ग्यमप्रधानमेव सत् चमत्कारकारणं तद् द्वितीयम्'[3], 'यत्र व्यङ्ग्यचमत्कारासामानाधिकरणो वाच्यचमत्कारस्तत्तृतीयम्'[4], 'यत्र अर्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः प्रधानं तदधमं चतुर्थम्'[5]।

स्मर्यताम्—'विश्वेश्वरः काव्यं चमत्कारि, चमत्कारित, चमत्कारितमम्' इति काव्यं व्यभजदिति। इत्थं सः अतिमुख्ये (१) काव्यलक्षणे (२) काव्यविभागे च जगन्नाथेनानुक्रियत इति सानुयायित्वं करबदरसमानं गोचरीभवति। एवमुपमालङ्कारनिरूपणेऽपि। तदुक्तं रसगङ्गाधरे—'सादृश्यं सुन्दरं वाक्यार्थोपस्कारकमुपमालङ्कृतिः', 'सौन्दर्यं च चमत्कृत्याधायकत्वम्', 'चमत्कृतिरानन्दविशेषः सहृदयहृदयप्रमाणकः'[6] इति। किमन्यत्प्रमाणान्तरमपेक्ष्यते विश्वेश्वरं प्रति जगन्नाथस्याधमर्ण्यमुद्घाटयितुम्?

अष्टादशे शतके मधुरागङ्गेशमिश्रसूनुना हरिप्रसादेनापि, स्वस्य 'काव्यालोके' अलेखि—'विशिष्टशब्दरूपस्य काव्यस्यात्मा चमत्कृतिः'[7] इति।

इत्थं चमत्कारसिद्धान्तः सानुयायीति स्फुटम्, एवञ्च समूलत्वसानुयायित्व-सप्रमाणत्वानां त्रयाणामपि सत्त्वात्, चमत्कारसिद्धान्ताङ्गीकारेऽवरोधो न वर्तेत सहृदयानाम्।

अत्र—'रस एव काव्यस्य सारः खलु, स एव काव्यस्य जीवितमित्यभिहितं

---

१. तत्रैव, पृ. १२। २. रसगङ्गाधरे, पृ. ५;
३. तत्रैव, पृ. २०। ४. तत्रैव, पृ. २२;
५. तत्रैव, पृ. २३। ६. तत्रैव, पृ. २.४;
७. काव्यालोकः, पृ. ८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खलु, तर्हि तस्यापि सारभूतं वस्तु अस्ति किम्'? इति शङ्कोदेति। समाधीयते—'यन्नेति नेति.......'[१] इति वचनं परमात्मविचार इव काव्यात्मविचारेऽप्युपपद्यते। तथा हि—केचन अलङ्कारपारम्यवादिनः। इमे हि काव्यशरीरादपि बहिर्भूतान् काव्यात्मतया कथं वदेयुरिति तदीयो वादो निरास्यत। अन्ये रीतिपारम्यवादिनः। रीतेः काव्यशरीरभूतत्वात् लौकायतिकानामिव एतेषामपि वादो हेयः। अपरे ध्वनिपारम्यमङ्गयकार्षुः। (त्रि)(वि)विधस्य ध्वनेस्सारो रस इतीतरे रसपारम्यमवादिषुः। तत्रापि सारं गवेषमाणाः पयोदधितक्रनवनीतेभ्यो घृतमिव वस्त्वन्तरमलभन्त। स एव चमत्कारः। अत एवोक्तं नारायणेन 'रसे सारश्चमत्कारः'[२] इति। काव्ये रसादपि सारतरं वस्तु भवितुमर्हतीत्यत्र क्षेमेन्द्रस्य वचनमपि प्रमाणम्[३]।

ननु रसः चित्तवृत्तिविशेषः, स चानन्दरूपः। चमत्कारोऽपि तद्रूप एव। रसः चमत्कार इत्येतदुभयं अनर्थान्तरमेव। तदुक्तम्—

अक्षरं परमं ब्रह्म सनातनमजं विभुम्।
वेदान्तेषु वदन्त्येकं चैतन्यं ज्योतिरीश्वरम्।।
आनन्दस्सहजस्तस्य व्यज्यते स कदाचन।
व्यक्तिस्सा तस्य चैतन्यचमत्काररसाह्वया[४]।।इति।

तथा च नाम्नि केवलं नवत्वं न तु वस्तुतत्त्वे। रससिद्धान्त एव गतार्थत्वाद् निष्प्रयोजनकः चमत्कारसिद्धान्त इति चेत्, अत्रोच्यते—भावानामपि चित्तवृत्तिविशेषत्वात्, कृतं रसेनापि। किञ्च, बहवो रस्यत इति भावव्युत्पत्तिमाश्रित्य 'स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः' इत्यादिवचनबलाच्च रस एवानन्द इत्याचक्षते, रस्यते अनेनेति करणव्युत्पत्तिसमाश्रये तु तस्य सुखसाधनत्वमेव। उक्तं च मुनिनापि—'यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनसः पुरुषा हर्षादींश्चाधिगच्छन्ति तथा नानाभावाभिनयव्यञ्जितान् वागङ्गसत्त्वोपेतान्

---

१. श्रीशङ्कराचार्यविरचितं प्रातःस्मरणस्तोत्रम्, श्लोकः २।
२. साहित्यदर्पणः, पृ. ७३।
३. औचित्यस्य रसजीवितभूतस्य विचारं कुरुतेऽधुना (औ.वि.च., पृ. २)।
४. अग्निपुराणम्-३३९.१,२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थायिभावानास्वादयन्ति सुमनसः प्रेक्षका हर्षादींश्चाधिगच्छन्ति'[१] इति। एवञ्च लोके पाकरसा यथा सुखहेतवस्तथा नाट्यरसा अपि। उक्तं चापि 'तस्मान्नाट्यरसा इत्यभिख्याताः'[२] इति।

भरतमुनेर्मते रस आस्वाद्यः, न तु (आ)स्वादः, यथा कैश्चिद् व्याख्यातम्। तदुक्तं मुनिना—'रस इति कः पदार्थः? उच्यते। आस्वाद्यत्वात्'[३] इति।

मुनिहृदयावगाहिना दर्पणकारेणोट्टङ्कितम्—'प्रपाणकरसन्यायेनायमास्वाद्यते रसः'[४] इति। प्रपाणकस्यानन्दहेतुत्वमेव, न त्वानन्दरूपत्वम्, एवमेव रसस्यापि। प्रपाणकं हि आस्वाद्यमानं सदानन्दं जनयति। रसोऽप्यास्वाद्य एव। नयेनानेन काव्यरस आनन्दहेतुरिति वक्तुं शक्यते खलु। चमत्कारस्तु रसस्य सार आनन्दरूप एव। अतोऽस्ति वैलक्षण्यम्। अतो रसश्चमत्कार इति च नानर्थान्तरम्।

यद्यपि केचिदचूचुदन्—रस आस्वाद्यत इति व्यवहारोऽन्नं पचतीति व्यवहारसदृशः, वस्तुतस्तयोर्भेद एव नास्तीति, तथापि नाट्यरसान् काव्यरसान् परिकल्पितवतः, सुनिशितरसस्वरूपपरामर्शकस्य भट्टनायकस्य वचांसि परिशीलयत। यथोट्टङ्कितं काव्यप्रकाशे[५]—स भुक्तिवादप्रवर्तकः। रसो भुज्यत इति तस्याशयः। रससूत्रस्थस्य निष्पत्तिशब्दस्य तन्मते भुक्तिरित्यर्थः। किञ्च, 'सवासनानां नाट्यादौ रसस्यानुभवो भवेत्'[६] इत्यादीन्यपि वचनानि रसः आस्वाद्य इति प्रतिपादयन्ति।

प्रायोऽभिनवगुप्ताचार्याणां व्याख्यापाटवमहिम्ना, अद्वैततत्त्ववासना-सङ्क्रान्त्या च, अनन्तरवर्तिन आचार्या रस एव स्वाद इत्यभेदं मेनिरे। अपि च मुनिः—

> शृङ्गाराद्धि भवेद्धासो रौद्राच्च करुणो रसः।
> वीराच्चैवाद्भुतोत्पत्तिर्बीभत्साच्च भयानकः[७] ।।

इति कारिकायां शृङ्गारादिभ्यो हास्यादयो जायन्त इत्याह। यदि

---

१. नाट्यशास्त्रम्, पृ. ९६; २. तत्रैव।
३. तत्रैव; ४. साहित्यदर्पणः, पृ. २०८।
५. काव्यप्रकाशः, पृ. ९७।
६. धर्मदत्तेनोक्तमिति साहित्यदर्पणे उद्धृतम्, पृ. १०८।
७. नाट्यशास्त्रम्, ६.४०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसमात्रस्यानन्दरूपत्वं प्रकृतिरसेषु विकृतिरसेषु च तदविशिष्टमेव। तथा च, आनन्दादानन्द उत्पद्यत इति वक्तव्यम्। सहृदयानुभवस्तथा न विलोक्यते। आलङ्कारिका अनुभवप्रामाण्यवादिन इति प्रागेवावादि।

वस्तुतस्तु—भावव्युत्पत्तिसमाश्रयणेऽपि रस आनन्दरूप एवेति वक्तुमपि न शक्यम्। मुनिरब्रवीत्—'हर्षादींश्चाधिगच्छन्ति' इति आदिशब्देन हर्षोद्भिन्नाः शोकादयो ग्राह्याः।

अथवा रसचमत्कारयोर्द्वयोरपि आनन्दैकरूपत्वाभ्युपगमेऽपि, वैलक्षण्यमतिरोहितमेवावतिष्ठते। अवधार्यतां साहित्यसरणिः—

अमृतममृतं कस्सन्देहो मधून्यपि नान्यथा
मधुरमधिकं चूतस्यापि प्रसन्नरसं फलम्।
सकृदपि पुनर्मध्यस्थस्सन् रसान्तरविज्जनो
वदतु यदिहान्यत्स्वादु स्वात्प्रियादशनच्छदात्[1] ।।

अमृतादीनां मधुरत्वेऽपि प्रियाधरस्य माधुर्ये यत् सर्वातिशायिवैलक्षण्यं, रसिकजनानुभवगम्यं वरीवर्ति, तद्वद्, रसस्याप्यानन्दरूपत्वेऽपि, तदानन्दगतं सर्वोत्कृष्टं वैलक्षण्यं पुरस्कृत्य 'चमत्कारस्य' अभ्युपगमे को दोषः?

'हर्षादींश्चाधिगच्छन्ति' इति भरतोक्तदिशा अनिर्धारितैकान्तसुखरूपत्वस्य रसस्य कथं काव्यात्मत्वम्? चमत्कारस्य तु सुखैकतानरूपस्य तथात्वे नास्ति विप्रतिपत्तिः। तथा हि—यद्यपि सर्वे रसा आनन्दरूपा इति प्रोच्यते, तथापि जुगुप्सादिप्रकृतिकानां बीभत्सादीनां तद्रूपत्वे किं सर्वे सहृदयाः संवदन्ति? विषयेऽस्मिन् मुनेरप्यभिसन्धिः शिथिलित इव दृश्यते। रसं काव्यात्मानं विधाय दर्शनान्तर(प्रभावेण)संस्कारेण, तस्य कथञ्चित् सुखैकरूपत्वस्य कल्पनार्थं विधीयमानोऽयं संरम्भः किं सकलविद्वन्मनोग्राहितामवलम्बेत? सुखरूपस्य तदितररूपस्य च वस्तुस्थितिं कुतो न गुणयन्तीत्येव वयं पृच्छामः। ये यथा प्रपद्यन्ते तांस्तथैव स्वीकुर्वन्तु। तथा स्वीक्रियते चेद् बीभत्सादिरसस्य (सर्वत्रानन्दरूपत्वस्याभावात्) काव्यात्मत्वं न सिद्ध्येत। अत एवायं प्रयासः। यद्ययमाग्रहः त्यज्यते, चमत्कारः काव्यात्मतयाऽङ्गीयते च, न स्यादयं क्लेशः।

---

१. काव्यप्रकाशः, पृ. ३७४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चमत्कारे सुखेतरांशस्य प्रसक्तिरेव नास्ति। पण्डितराजोऽपि स्वोक्तं काव्यलक्षणं परिष्कुर्वन्, कदाचिद् अरमणीयस्य सम्भावितां सङ्क्रान्तिं वारयितुं ज्ञानपदस्य स्थाने भावनापदं प्रावेशयत्[1]। अरमणीयमपि कदाचिद् ज्ञानविषयो भवितुमर्हति, न कथञ्चिदपि भावनाविषयः। एवमेवात्रापि, कदाचिद् अरमणीयस्य (बीभत्सादेः) रसस्य, काव्यात्मत्वाङ्गीकारापेक्षया, सर्वथा सुखेतरस्पर्शशून्यस्य चमत्कारस्य काव्यात्मत्वाभ्युपगमो वरीयान् खलु।

किञ्च, रसस्यैव काव्यात्मत्वे, केषाञ्चन महाकविप्रणीतानां नीरसानामथापि चमत्कृतिजनकानां काव्यानां काव्यत्वं न स्यात्, न चेष्टापत्तिः। तथा सति महाकाव्यसम्प्रदाय एव आकुलीभवेत्। सन्ति (विस्मयावहानि) चमत्कारकारीणि नगरार्णवादिवर्णनानि महाकाव्येषु, यानि काव्यस्य महत्त्वमापादयन्ति। तत्र शृङ्गारादे रसस्याभावेऽपि वर्णनगतश्चमत्कारः सहृदयैरनुभूयत एव। अत्र सहृदयानुभव एव प्रमाणम्।

अपि च, 'वाक्यं रसात्मकं काव्यम्'[2] इति वदतो विश्वनाथस्य मतं प्रत्याचक्षमाणेन जगन्नाथेन यदुक्तं तदपि नूनमवधारणीयम्—'यत्तु रसवदेव काव्यमिति साहित्यदर्पणे निर्णीतं, तन्न, वस्त्वलङ्कारप्रधानानां काव्यानामकाव्यत्वापत्तेः। न चेष्टापत्तिः, महाकविसम्प्रदायस्याकुलीभावप्रसङ्गात्। तथा च जलप्रवाहवेगनिपतनोत्पतनभ्रमणानि महाकविभिर्वर्णितानि कपिबालादिविलसितानि च। न च तत्रापि यथाकथञ्चित्परम्परया रसस्पर्शोऽस्त्येवेति वाच्यम्, ईदृशरसस्पर्शस्य 'गौश्चलति मृगो धावति' इत्यादावतिप्रसक्तत्वेनाप्रयोजकत्वात्[3]।

एवञ्च, यदि रसः काव्यात्मेत्यङ्गीक्रियेत, तदभावाद् वस्त्वलङ्कारप्रधानध्वनिकाव्येषु शब्दार्थ(वाच्यार्थ)चमत्कारप्रधानेषु प्रहेलिकादिषु चाव्याप्तिदुर्निवारैव।

यदि रसोऽपि चमत्कारको भवेत्, तदाऽस्य रससिद्धान्तस्य चमत्कारसिद्धान्त एवान्तःपात उचितः, चमत्कारसिद्धान्तस्य महाविषयत्वात्। न कथञ्चिदपि रससिद्धान्तेन चमत्कारसिद्धान्तो गतार्थो भविता।

---

१. रसगङ्गाधरः, पृ. ५; २. साहित्यदर्पणः।
३. रसगङ्गाधरः, पृ. ८-९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा च रसः, चमत्कार इत्येतद्द्वयं नानर्थान्तरमिति (रसस्य सुखसाधनत्वात्, अथवा क्वचित् सुखरूपत्वेऽपि बीभत्सादिषु तदभावात् सुखेतरस्पर्शदोषदूषितत्वात्, चमत्कारस्य च केवलानन्दरूपत्वात्), रससिद्धान्तेन चमत्कारसिद्धान्तो न व्याप्रियत इति (रसात्मवदस्य अव्याप्तिदोषदुष्टत्वात्) च स्थितम्। तस्माद् वास्तविकीं स्थितिमुररीकृत्य (सुखं सुखमिव दुःखं दुःखमिव) स्वसहृदयतावच्छिन्नमनुभवसाक्षिकं च प्रामाण्यमवलम्ब्य चमत्कारसिद्धान्त उपादीयतामिति दिक्।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लघु-ग्रन्थमाला
[६४]

चामराजनगररामशास्त्रिप्रणीता

सीतारावणसंवादझरी

स्वोपज्ञ-संस्कृतव्याख्यया
डॉ. बृजेशमणिपाण्डेयकृतया
हिन्दी-व्याख्यया च संयुता

सम्पादकः
डॉ. राजारामशुक्लः
निदेशकः, अनुसन्धानसंस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
वि.सं. २०५९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेवैद्यम्

अथ प्रप्रथममिह प्रथिमानमानीयते भारताभिजनभाषाभाष्यविभूषितं कविकौशलनिकषोपममिदं किमपि विचित्रचित्रचातुरीचमत्कृतं सीतारावणसंवादझरीति नाम काव्यम्। चित्ररचना यद्यप्यभ्यासार्थिमात्रप्रवृत्तिविषयत्वेनोत्तमकाव्यकोटिं नासादयति, तथापि प्रायेण सर्वैरपि महाकविभिरत्र स्वीया वाग् व्यापारितैवेत्यवश्यमस्याः किमप्यनितरसाधारणं वैशिष्ट्यमुपगच्छामः। शब्दालङ्कारेष्वन्यतमश्चित्रालङ्कारः[1]। यद्यपि रसादिव्यधिकरणोऽलङ्कारः काव्यस्य चित्रत्वप्रयोजकत्वेनाभ्युपगत आचार्यैरिति[2] मनागिव विरागः स्यात् सचेतसामितस्तथाप्यक्षरविन्यासविशेषैर्विस्मयोत्पादकता हि चित्तमावर्जयति[3]। तेन हि 'चित्तं राति' इति चित्रमिति व्युत्पत्तिरपि सार्था भवति। अत एवावरकाव्यत्वेनोरीकृतमपि चित्रकाव्यं विदग्धानतितरां स्पृहयत्येव, अत एव च न केवलं चित्रानुबन्धीनि नैकानि काव्यानि व्यरच्यन्त कविभिः, प्रत्युत तल्लक्षणभेदोपभेदप्रतिपादनप्रक्रमे बहु पराक्रान्तं शास्त्रकारैरपि। नास्त्ययमवसरस्तद्विषये स्वात्मानं व्यापारयितुम्।

इदं पुनः काव्यरत्नमनूत्नमपि दक्षिणदिग्भाग एव प्रसृतमित्यस्माभिरनाकलितपूर्वमकस्मादस्मद्दृष्टिमावर्जयत्। इतः प्रायः सार्धशतवर्षेभ्यः प्राक् कर्नाटकराज्ये नैकशास्त्रविदो विद्वदग्रेसरस्य वेङ्कटरमणनाम्नः पुत्रत्वेन गृहीतावतारः स्ववैदुष्यातिशयेन महीशूर(मैसूर)राजधान्यां **महाराजश्रीकृष्णराजेन्द्र**स्यास्थानपण्डितपदवीमलङ्कृत्य समभिवर्धितपितृपैतामहादियशा महाकविः श्रीमान् **चामराजनगररामशास्त्री** अस्याश्चित्रकृतेः कर्तेत्येतत्कृतिसंवीक्षणेन सहजत एवावबोद्धुं शक्यते। पिता चास्य कवे**र्वेङ्कटरमणशास्त्री** शृङ्गगिरौ स्थित्वा तत्र विराजितायाः शारदाम्बायाः परमानुग्रहेण पाण्डित्यमासादितवानिति कवेर्वचस एव ज्ञायते—

---

१. वक्रोक्तिरनुप्रासो यमकं श्लेषस्तथा चित्रम्। शब्दस्यालङ्काराः.....॥ (काव्यालङ्कारः, २।१३)
२. रसभावादिविषयविवक्षाविरहे सति। अलङ्कारनिबन्धोऽयं स चित्रविषयो मतः। (ध्वन्या.)
३. ....नीरसत्वेऽपि विदग्धानां महोत्सवः। (अग्निपुरा. ३४३।३२)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रृङ्गेरीपुरशारदाङ्घ्रिकमलद्वन्द्वं बहून् वत्सरान्
सेवित्वा तदनुग्रहेण परमं वैदुष्यमासेदुषः।
श्रीमद्वेङ्कटशब्दपूर्वरमणाभिख्यस्य विद्वन्मणेः
सूनोर्वागिह चामराजनगरीरामस्य जीयादियम् ।।१०७।।

अशोकवनिकामानीतया सीतया सह रावणस्य संवादमालम्ब्य विरचितेयं कृतिर्न केवलं शब्दचित्रयुताऽपि त्वर्थगाम्भीर्यपरिपुष्टापीत्येतद्द्वयमेतां दुर्घटां विदधाति। तथा चाह स्वयमेव कविः—

अर्थपुष्ट्यविनाभूतशब्दचित्राऽतिदुर्घटा।
सीतारावणसंवादझरीति ग्रथ्यते कृतिः।।२।।

एकस्मिन्नेव पद्येऽक्षरव्यत्यासादिमात्रेण प्रश्नोत्तरयोरुभयोरपि समायोजनं वैशिष्ट्यमस्य कवेः। तथा हि प्रथमसंवादः—

परिक्षीणालस्यः समरभुवि रक्षःकुलपतिः,
सलज्जः स्वस्तुत्याममलहितमार्गैकपथिकः।
प्रणम्रः स्त्रीलभ्यः सुमुखि विलसत्कीर्तिरिति च
श्रुतो नाहं किम्?..................।।

इत्येतावान् प्रश्नभागः, सीताप्रदत्तमुत्तरन्तु—

..................रेऽधम मुहुरलं त्वां श्रुतवती।।

इति यथाश्रुतं तु सामान्यमुत्तरम्। विशिष्टोत्तरं पुनः चरणघटक–'अलम्' इत्यनेनोक्तं पद्यस्यास्य चमत्काराधायकत्वं साधयति। तथा हि पूर्वोक्तविशेषणोऽहं किं न श्रुतस्त्वया इति प्रश्नस्योत्तरं—पूर्वोक्तविशेषणोपेतं त्वामहम् अलं = लकाररहितं श्रुतवती इति। अर्थात् पूर्वोक्तेभ्यः सर्वेभ्योऽपि विशेषणेभ्यः लकारस्य विरहे यत्स्वरूपमवशिष्यते तादृशस्त्वमसि। तथा च—परिक्षीणालस्यः = परिक्षीणास्यः, रक्षःकुलपतिः = रक्षःकुपतिः, सलज्जः स्वस्तुत्यां = सज्जः स्वस्तुत्याम्, अमलहितमार्गैकपथिकः = अमहितमार्गैकपथिकः, प्रणम्रः स्त्रीलभ्यः = प्रणम्रः स्त्रीभ्यः, विलसत्कीर्तिः = विसत्कीर्तिः, इत्येवं रावणेनोक्तानि सर्वाण्यपि विशेषणानि तन्निन्दापरकतया नीतानि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्थमनेकान् प्रकारानाश्रित्य काव्येऽस्मिन् कविना स्वीयं विशिष्टं काव्यकौशलं प्रादर्शीति सचेतसः स्वयमेव साक्षात्करिष्यन्ति विदग्धतामदसीयाम्। तत्तादृशमेतत्काव्यं स्वोपज्ञव्याख्याविभूषितमपि बहुतरजनसम्बद्धं भूयादिति धिया अस्य राष्ट्रभाषयाऽनुवादं विहितवतो व्याकरणसाहित्यादिशास्त्रेषु कृतपरिश्रमस्य **डॉ. बृजेशमणिपाण्डेय**महाभागस्य कार्तज्ञं विजिज्ञापयिषामि। अन्ते व्यापारस्यास्य साधुतामसाधुतां वा संसूच्य मार्गनिर्देशैरस्मानुत्साहयितुं विदुषः सम्प्रार्थ्य सर्वविधेष्टसिद्धये भगवतीं शारदाम्बां निवेद्य च विरमामि।

इत्थं विद्वद्विधेयः

राजारामशुक्लः

निदेशकः, अनुसन्धानसंस्थानस्य

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये, वाराणसी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सीताराावणसंवादझरी

क्रीडारुष्टाद्रिजाङ्घ्रिप्रणतशिवशिरश्चन्द्रखण्डे कराग्रं
लीलालोलं प्रसार्य स्फुरदमलविसाशङ्कयाऽऽक्रष्टुकामः।
उद्यद्धृद्यस्मिताभ्यामहमहमिकयाऽऽलिङ्ग्यमानः शिवाभ्यां
कश्चिन्नश्चिन्तितार्थं कलयतु कलभो बाललीलाऽभिरामः।।१।।

व्याख्या

यदीक्षणाभ्यामभिवीक्ष्यमाणं स्वप्राणकान्ताकरकेलिपद्मम्।
निमीलनोन्मीलनयौगपद्यविद्यामधीते पुरुषस्स वोऽव्यात्।।

सीतारावणसंवादझरीं वाग्देवतैव या।
मन्मुखस्थाऽवदत्प्रेम्णा सैव व्याख्याति तां स्वयम्।।

स्फुटार्थोक्त्यन्वितात्यन्तस्फुटप्रत्युक्तिमय्यपि।
गूढार्थभेदकोदारगूढोत्तरकरम्बिता।।

रामरावणयोर्निन्दास्तुत्योर्व्यत्ययतोऽद्भुता।
सीतारावणसंवादझरी विजयतेतराम्।।

औचितीमर्थतस्तत्र शब्दतश्चातुरीमपि।
आस्वादयितुमेवैष यत्नो व्याख्योद्यमात्मकः।।

इह खलु प्रारिप्सितं प्रबन्धमविघ्नतः परिपूरयितुमखिलविघ्ननिवारणचणस्य भगवतो बालगजाननस्यानुसन्धानौपयिकम् आशीरूपं मङ्गलं प्रबन्धमुखलक्षणेषु प्रथमोपात्तमादौ निबध्यते—**क्रीडेति**। क्रीडया रुष्टायाः क्रीडामेव फलतयोद्दिश्य रोषमात्मन्यारोपितवत्या इत्यर्थः। 'अध्ययनेन वसति' इत्यत्रेव फलस्यापि हेतुत्वात् 'हेतौ' इति सूत्रेण तृतीया, 'तृतीया' इति योगविभागात् 'सुप्सुपा' इति वा समासः। अद्रिजायाः पार्वत्याः अङ्घ्र्योः प्रणतस्य शिवस्य शिरश्चन्द्रखण्डे मौलीन्दुकलायां लीलालोलं करस्य शुण्डायाः अग्रं प्रसार्य स्फुरत, अमलं च यद्बिसं तदाशङ्कया लसदच्छमृणालमिदं स्यात्, इति वितर्केण—'शङ्का वितर्कभययोः' इति वैजयन्ती। आक्रष्टुं कामो यस्य स तथोक्त इति शिवयोः स्मितहेतूक्तिः। 'तुं काममनसोरपि' इति तुमुनो मकारस्य लोपः। उद्यत् हृद्यं स्मितं ययोः तथोक्ताभ्यां, शिवा च शिवश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवौ 'पुमांस्त्रिया' इत्येकशेषः, ताभ्यां गौरीशङ्कराभ्याम् अहमहमिकया अहमहमिति परस्परं प्रत्यहङ्कारेण अहमिति शब्दपरमव्ययम्। तस्य वीप्सायां द्वित्वम्। मयूरव्यंसकादित्वात्समासः, अहमहमिति शब्दोऽस्त्यस्यां क्रियायामित्यहमहमिका, ब्रीह्यादित्वात् मत्वर्थीयः ठन्प्रत्ययः, 'ठस्येकः' इतीकादेशः 'अनित्यत्वादव्ययानाम्' इति टिलोपो न। 'अहमहमिका तु सा स्यात् परस्परं यो भवत्यहङ्कारः' इत्यमरः। आलिङ्ग्यमानः। आङ्पूर्वाल्लिङ्गतेः कर्मणि लटश्शानजादेशः। बाललीलाभिः प्रागुक्तचन्द्रकलाकर्षणसदृशीभिर्बह्वीभिरिति भावः। अभिरामः मनोहरः स्पृहणीय इति यावत्। कश्चित् स्वरूपतः प्रकारतश्च निर्वक्तुमशक्य इत्यर्थः। कलभो गजशवकः— 'कलभः करिशावकः' इत्यमरः। गौरीशङ्करकर्तृकातिप्रेमपूर्वकालिङ्गनविषयतौचित्याद्बालो गणपतिरित्यर्थः। युज्यते च—'सर्वस्य गात्रस्य शिरः प्रधानम्' इति न्यायेन मुखस्यैव प्राधान्याभिमत्या गजमुखत्वाद्बालस्य गणपतेरेवात्र कलभ इति व्यपदेशः। नः अस्माकं चिन्तितार्थमिष्टार्थं कलयतु ददातु। आशिषि लोट्। कवीनां कलिः कामधेनुः। अत्रादौ हर्षमूलकव्यापारविशेषवाचकतया भद्रादिशब्दान्तःपातिनः क्रीडाशब्दस्य प्रयोगाद् वर्णगणादिशुद्धेरभ्युच्चयः। तदुक्तम्—

देवतावाचकाश्शब्दा ये च भद्रादिवाचकाः।
ते सर्वे नैव निन्द्यास्स्युर्लिपितो गणतोऽपि वा।। इति।

विघ्नराजत्वादिरूपया प्रसिद्धयैव भङ्ग्या गम्यस्यापि भगवतो गणपतेः कलभ इति भङ्ग्यन्तराश्रयणेनोक्तत्वादत्र पर्यायोक्तं नामालङ्कारः। तदुक्तम्—

पर्यायोक्तं तु गम्यस्य वचो भङ्ग्यन्तराश्रयम्।। इति।

स च विसाशङ्कयेति भ्रान्तिमदलङ्कारेण उद्यद्धृद्यस्मिताभ्यामिति, कश्चिन्नश्चिन्तितार्थमिति व्यञ्जनद्वयावृत्तिलक्षणाभ्यां शब्दालङ्काराभ्यां च वृत्त्यनुप्रासनामभ्यां संसृज्यते। व्यङ्ग्यदृशश्चात्रैवं परितोष्यन्ते—तथा हि—क्रीडारुष्टेत्यनेन गौर्याश्शिवे स्ववाल्लभ्यजिज्ञासा द्योत्यते। अङ्घ्र्योः प्रणत इत्यनेन शिवकृतानां सान्त्ववचनादीनामनुनयनोपायान्तराणामकिञ्चित्करत्वं गौर्याः कृतककोपस्य गाढत्वं शम्भोः कथमपि गौरीप्रसादनौत्सुक्यं च द्योत्यते। विसाशङ्कयाऽऽक्रष्टुकाम इत्यनेन चेष्टाहारादिष्वपि गजस्वभावानुवृत्तिर्गजमुखस्यास्तीति द्योत्यते। उद्यद्धृद्यस्मिताभ्यामित्यनेन गौर्याः प्रणयकोपस्य शम्भोस्स्वापराधसम्भावनातङ्कस्य च सद्योऽपगमः प्रहर्षोन्मेषश्च द्योत्यते। तयोर्मनसि कोपातङ्कयोरपगममन्तरा प्रहर्षोन्मेषस्यानवकाशात्। प्रहर्षोन्मेषमन्तरा स्मितस्यानुदयात्। कृतकस्य तु स्मितस्य हृद्यत्वासम्भवादिति। अहमहमिकयेत्यनेनातिव्यामोहकत्वं बालगणपतेरतिवत्सलत्वं च शिवयोस्तस्मिन्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्योत्यते। शिवाभ्यामालिङ्ग्यमान इत्यनेन तयोर्गणपतेश्चानन्दसान्द्रत्वं द्योत्यते। कश्चिदित्यनेन अलौकिकत्वं कलभस्य द्योत्यते। कलभशब्दप्रयोगहेतुचिन्तयोन्नीयमानेन बालत्वेन भक्तजनैरभ्यर्थितानां महतामपीप्सितार्थानां वितरणे गणपतेर्निर्विमर्शत्वं द्योत्यते। बाला एव हि खलु जगति संस्तुतैर्जनैरभ्यर्थितमनर्घमप्याभरणादिकमविमृशन्त एव वितरन्ति। एवमन्यान्यपि व्यङ्ग्यानि यथासम्भवं कुशलजनैराकलनीयानि। स्रग्धरावृत्तमेतत्—

म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्।।

इति लक्षणात्।।१।।

श्लोकार्थ—क्रीडा से रुष्ट पर्वतराजपुत्री पार्वती के चरणों में झुके हुए भगवान् शिव के मस्तक पर विराजमान जो चन्द्रखण्ड उसे स्वच्छ कमलनाल समझकर खींचने की इच्छा से शुण्ड (सूड़) को आगे बढ़ाता हुआ, भगवान् शिव एवं पार्वती के मन्दहास का हेतुस्वरूप, मैं, मैं, इस प्रकार परस्पर अहङ्कार से शिव एवं पार्वती के द्वारा आलिङ्गित होता हुआ कोई (अनिर्वचनीय) बाललीलाभिराम गजशावक हमारे चिन्तितार्थ को प्रदान करे।

विमर्श—श्लोक में प्रयुक्त 'विसाशङ्कया (कमलनाल की आशङ्का से)' यहाँ पर भ्रान्तिमान् नामक अलङ्कार है।।१।।

अर्थपुष्ट्यविनाभूतशब्दचित्रातिदुर्घटा।
सीतारावणसंवादझरीति ग्रथ्यते कृतिः।।२।।

अथ चिकीर्षितो ग्रन्थः सविशेषतया विषयेण नाम्ना च निर्दिश्य प्रतिज्ञायते—**अर्थेति**। अर्थस्याभिधेयस्य पुष्ट्या परिपोषेण सहृदयहृदयविस्तारावगाहिना परिबृंहणेनेति यावत्। अविनाभूतैः अरहितैः शब्दैः वाचकैः चित्रा आलेख्यवद् रूपविशेषशालिनीत्यर्थः। रूपविशेषस्य च वाङ्मयगतस्य वर्णविन्याससाधारण्यात् श्लेषभित्तिकमभेदाध्यवसायमनुमन्यमानैरालङ्कारिकैः प्रवर्तित औपचारिकश्चित्रत्वव्यवहारः। यद्वा—आश्चर्यकरीत्यर्थः—'आलेख्याश्चर्ययोश्चित्रम्' इत्यमरः। अत एव अतिदुर्घटा अतितरां घटयितुमशक्या चित्रदेहे चेतनाया इव चित्रकाव्ये अर्थपुष्टेरघटमानत्वादिति भावः। घटयतेः 'ईषद्दुस्सुषु' इत्यादिना खल्प्रत्ययः। सीतारावणसंवादझरीति। इतिशब्दोऽत्र 'नाम' इत्यव्ययस्थानिकस्संज्ञास्वरूपनिर्देशपरः। जानकीदशग्रीवोक्तिप्रत्युक्तिपरम्परारूपविषयानुरूपयैव संज्ञया प्रथिष्यमाणेत्यर्थः। कृतिः ग्रन्थः। संज्ञायां घञपवादः क्तिन्प्रत्ययः। ग्रथ्यते निबध्यते। ग्रन्थतेः कर्मणि लट्। 'अनिदिताम्' इति नलोपः। आनुष्टुभं वृत्तम्।।२।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मंगलाचरण के अनन्तर कवि चिकीर्षित ग्रन्थ के विषय एवं नाम का निर्देश करता है—

श्लोकार्थ—अर्थ के परिपोषण से युक्त शब्दचित्र अर्थात् शब्दालङ्कारघटित काव्य अत्यन्त दुरूह है (चित्र में बनी हुई शरीर में चेतना की तरह चित्रकाव्य में अर्थपुष्टि असंभव है), तथापि **'सीतारावणसंवादझरी'** (जानकी-दशग्रीवोक्ति-प्रत्युक्तिपरम्परा) नामक ग्रन्थ की रचना करता हूँ॥२॥

पुरा रामे श्रीमत्यवनिपनिदेशेन वसुधा-
सुतासौमित्रिभ्यां सह विपिनगर्भे निवसति।
दुरात्मा लङ्केशो जनकतनयां छद्मविधिना
गृहीत्वा लङ्काया विपदमिव मूर्तां गृहमगात्॥३॥

अथ प्रतिज्ञाते ग्रन्थे विषयतया निर्दिष्टस्य सीतारावणसंवादस्य सन्दर्भानयनाय सङ्क्षेपतः श्रीरामकथा प्रस्तूयते। पुरेत्यादिभि कतिपयैश्श्लोकैः— **पुरेति**। पुरा पूर्वकाले त्रेतायुग इत्यर्थः। श्रीमति रामे, अवनिपस्य दशरथस्य निदेशेन वसुधासुतासौमित्रिभ्यां सीतालक्ष्मणाभ्यां सह। 'समुद्राभ्राद्धः' इति निर्देशेन पूर्वनिपातप्रकरणस्यानित्यत्वज्ञापनाद् घिसंज्ञकस्य परनिपातः। विपिनगर्भे दण्डकारण्याभ्यन्तरे निवसति सति दुरात्मा दुश्शीलो लङ्केशो रावणः छद्मनो रामलक्ष्मणसन्निधानविघटकस्य कनकमयमायामृगप्रेषणरूपस्य कपटस्य विधिना विधानेन जनकतनयां लङ्कायाः स्वनगर्याः मूर्तां शरीरवतीम्। मूर्तिशब्दात् 'अर्शआदिभ्योऽच्' इति मत्वर्थीयोऽच्प्रत्ययः। विपदमिवेत्युत्प्रेक्षा। सीताऽपहारस्यैव लङ्कादाहरक्षोवधादीनां मूलत्वादिति भावः। गृहीत्वाऽपहृत्य गृहमगात्। इणो लुङ्। 'इणो गा लुङि' इति गादेशः॥३॥

श्लोकार्थ—त्रेतायुग में पृथ्वीपालक राजा दशरथ की आज्ञा से भार्या सीता एवं अनुज लक्ष्मण के साथ दण्डकारण्य में प्रभु श्रीराम के निवास करते समय, दुष्ट रावण कपटपूर्वक, लङ्का की मूर्तिमती विपत्ति के सदृश सीता को अपहरण करके घर ले गया।

विमर्श—श्लोक में प्रयुक्त **'विपदमिव'** यहाँ विपत्ति के सदृश इस उत्प्रेक्षा के द्वारा यह द्योतित किया गया है कि देवी सीता का अपहरण ही लङ्का की समस्त विपत्तियों एवं अनर्थों का मूल कारण है, जैसे लङ्कादहन, राक्षसवध इत्यादि॥३॥

निवेश्योद्याने स्वालयपरिसरस्थे रहसि तां
तदीयं सौन्दर्यं निरतिशयमालोक्य च मुहुः।
स कामी स्वस्मिंस्तां कथमपि सरागां रघुपतौ
विरागाञ्च श्रीमत्यपि कलयितुं यत्नमकरोत्॥४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निवेश्येति। निन्दित: कामोऽस्यास्तीति कामी निन्दायाम् 'अत इनिठनौ' इतीनिप्रत्यय:—

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादय:।।

इत्युक्ते। स: रावण: तां सीतां स्वालयस्य परिसरस्थे पर्यन्तभूवर्तिनि उद्याने अशोकवन इत्यर्थ:। तत्रापि रहसि विविक्तदेशे निवेश्य मुहु: तस्यास्सीताया इदं तदीयम् 'त्यदादीनि च' इति वृद्धसंज्ञायां 'वृद्धाच्छ:' इतीदमर्थे छप्रत्यय:। अतिशेत इत्यतिशयम्। पचादित्वात्कर्तर्यच्प्रत्यय:। निर्गतमतिशयं यस्मात् तन्निरतिशयं सर्वोत्कृष्टमित्यर्थ:। निरत्र निषेधार्थक:—'निर्निश्चयनिषेधयो:' इत्यमर:। सौन्दर्यमालोक्य च तां स्वस्मिन् कथमपि महता प्रयत्नेनेत्यर्थ:,

ज्ञातहेतुविवक्षायामप्यादि कथमव्ययम्।
कथमादि तथाऽप्यन्तं यत्नगौरवबाढयो:।।

इत्युक्ते:। सरागामनुरागवतीम्। श्रीमत्यपि सकलकल्याणगुणसम्पत्सम्पन्नेऽपि रघुपतौ रामे विरागां निरनुरागां च कलयितुं यत्नमुद्यममकरोत्। कृञो लङ्। अत्र कथमपीत्यनेन सामान्यतो रावणेन कृतानां सर्वेषामनुरागसम्पादनोपायानामकिञ्चित्करत्वम्। तेन सीतायास्तस्मिन्नतीवविमुखत्वम्। तेन च तस्या: परमं पातिव्रत्यं व्यज्यते। श्लोकद्वयमपि शिखरिणीवृत्तम्—'रसै रुद्रैश्छिन्ना यमनसभलागश्शिखरिणी' इति लक्षणात्।।४।।

श्लोकार्थ—अपने निवास स्थान के परिसर में स्थित अशोकवन के एकान्त प्रदेश में प्रवेश करके सीता के अलौकिक सौन्दर्य का बार-बार अवलोकन कर उस कामुक रावण ने सीता का अपने प्रति किसी भी प्रकार से अनुराग उत्पन्न करने के लिए तथा सर्वगुणसम्पन्न श्रीराम के प्रति सीता के मन में वैराग्य उत्पन्न करने के लिए प्रयास किया।

विमर्श—श्लोक में प्रयुक्त **'कथमपि'** के द्वारा ग्रन्थकार यह बोध कराना चाहते हैं कि, सामान्यरूप से रावण के द्वारा अपने प्रति सीता के मन में अनुरागोत्पादन के लिए किया गया उपाय निष्फल ही रहा, जिससे सीता का रावण के प्रति अत्यन्त विमुख होने का ज्ञान होता है तथा उस वैमुख्य द्वारा सीता का परमपातिव्रत्य व्यञ्जित होता है।।४।।

एतस्मिन्नन्तरे निर्जनकजमुटजं वीक्ष्य संशोचता ता-
मन्वेष्टुं सानुजेनाध्यटवि विचरताऽवाप्तपम्पातटेन।
रामेण प्रापितस्य श्रियमिनतनयस्याज्ञयोत्तीर्णवार्धि-
र्लङ्कां गत्वाऽऽञ्जनेयो जनकदुहितुरावासवृक्षाग्रगोऽभूत्।।५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतस्मिन्निति। एतस्मिन्नन्तरे अस्मिन्नवसरे—

अन्तरवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये।
छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च।।

इत्यमरः। निर्गता जनकजा यस्मात् तं यथोक्तं सीताविरहितमित्यर्थः। उटजं पर्णशालां वीक्ष्य संशोचता निर्लज्जं उच्चैश्शोकं कुर्वतेत्यर्थः। तां येन तथोक्तेन रामेण। श्रियं राज्यलक्ष्मीमित्यर्थः। प्रापितस्य वालिनं निगृह्य तद्राज्येऽभिषेचितस्येत्यर्थः। इनतनयस्य सूर्यपुत्रस्य सुग्रीवस्येत्यर्थः। आज्ञया उत्तीर्णः वार्धिस्समुद्रो येन तथोक्तः आञ्जनेयः लङ्कां रावणपुरीं गत्वा प्राप्य जनकदुहितुस्सीतायाः आवासवृक्षस्य शिंशपातरोः अग्रं गच्छतीति तथोक्तः अभूत्। स्रग्धरावृत्तम्। लक्षणं तूक्तम्।।५।।

श्लोकार्थ—उसी समय सीता से रहित पर्णशाला का अवलोकन कर सीता का अन्वेषण करने के लिए अतिशय दुःख को प्रकट करते हुए जंगल में विचरण कर रहे पम्पा सरोवर के तट पर पहुँचे हुए श्रीराम के द्वारा, राज्यलक्ष्मी को प्राप्त सूर्यपुत्र सुग्रीव की आज्ञा से समुद्र को पार कर चुके श्री हनुमान्, लङ्का में पहुँचकर सीता के निवास स्थान 'शिंशपा' वृक्ष के सामने उपस्थित हुए।।५।।

तदानीं निर्निद्रो रजनिचरमांशे दशमुखः
स्मरार्तः सीतायाः सविधमुपयातो मम वशे।
इयं स्यादेवं चेदिति शुभगुणानात्मनि मृषा
मृषा दोषानाह स्म च मुहुरनेकान् रघुपतौ।।६।।

तदानीमिति। तदानीं रजनिचरमांशे रात्र्यन्त्यभागे निर्निद्रः त्यक्तनिद्र इत्यर्थः। स्मरार्तः कामपीडितः दशमुखः रावणः सीतायाः सविधं समीपं उपयातस्सन् एवं चेत् वक्ष्यमाणमुपायं कुर्यां यदीत्यर्थः इयं सीता मम वशे अधीनत्वे स्यात् भवेत्। वशः प्रभुस्पृहायत्तेष्वायत्तत्वप्रभुत्वयोः। इति विश्वः। इति बुद्ध्वेति शेषः। आत्मनि स्वस्मिन् मृषा अनृतान् आरोपितानिति यावत्। अनेकान् शुभगुणान् रघुपतौ च अनेकान् मृषा दोषान् मुहुः आह स्म अब्रवीत्। ब्रुवो लटि 'ब्रुवः पञ्चानाम्' इत्यादिना तिपो णल् ब्रुवश्चाहादेशः, 'लट्स्मे' इति भूते लट्। शिखरिणीवृत्तम्।।६।।

श्लोकार्थ—उसी समय रात्रि के अन्त्यभाग अर्थात् प्रातःकाल निद्रा का परित्याग कर काम से पीड़ित रावण ने सीता के समीप पहुँचकर, इस प्रकार सीता मेरे वश में हो सकती है (ऐसा जानकर) अनेक शुभ गुणों का अपने में आरोप किया तथा रघुपति में अनेक दोषों को बताया।।६।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साध्व्याष्षिद्गमभि क्रुधा प्रतिवचो यादृक् क्षमं तादृशीं
प्रत्युक्तिं विशदार्थिकां जनकजाऽऽख्यान्ती तदभ्यन्तरे।
अर्थेनातिनिगूहितेन सकलां तस्योक्तिमर्थान्तरं
निन्ये यस्य स वेदिता यदि पुनर्ह्रीणो न किञ्चिद्वदेत्।।७।।

साध्व्या इति। साध्व्याः पतिव्रतायाः षिद्गमभि विट्पुरुषं प्रति क्रुधा कोपेन यादृक् यादृशं प्रतिवचः उत्तरं क्षमम् उचितं तादृशीं तथाविधां विशदः अक्लेशेन स्फुटं प्रतीयमानः अर्थो यस्यास्तथोक्ताम्। शैषिकः कप्, 'प्रत्ययस्थात्' इत्यादिना कात्पूर्वस्याकारस्येकारादेशः। प्रत्युक्तिं 'किमरे चेलं बधानासकृत्' इत्यादिरूपं प्रतिवचनम् आख्यान्ती वदन्ती। आङ्पूर्वकात् ख्यातेश्शतरि ङीप्, 'आच्छीनद्योर्नुम्' इति नुमागमः। जनकजा सीता तदभ्यन्तरे तादृशप्रतिवचनगर्भे अतिनिगूहितेन अतितरां गोपितेन अर्थेन 'चकारस्थाने लकारं योजय' इत्यादिरूपेण सकलां सर्वामपि तस्य रावणस्य उक्तिं वाचम् 'मां पश्यातिविचक्षणोऽस्मि' इत्यादिरूपाम् अर्थान्तरं 'मां पश्यातिविलक्षणोऽस्मि' इत्यादिरूपमन्यमर्थं निन्ये प्रापयामास। यस्य स्वश्लाघामपि स्वनिन्दात्मना परिणमयतोऽर्थस्य वेदिता यदि ज्ञाता चेत् सः रावणः ह्रीणः लज्जितस्सन् पुनः भूयोऽपि किञ्चित् ईषद्वचनमपि न वदेत् न ब्रूयात् किन्तु मुखमवनमय्य तूष्णीमेव परावर्तेतेत्यर्थः। तादृशमर्थान्तरं निन्य इति पूर्वेण सम्बन्धः। शार्दूलविक्रीडितं वृत्तम्—

सूर्याश्वैर्मसजास्तताास्सगुरवश्शार्दूलविक्रीडितम्।।

इति लक्षणात्।।७।।

श्लोकार्थ—पतिव्रता नारी का स्वच्छन्द आचरण करने वाले पुरुष के प्रति क्रोध के कारण जैसा प्रत्युत्तर उचित था, उस प्रकार सहजरूप से अर्थ का बोध करा देने वाली प्रत्युक्ति (किम् रे चेलं बधानासकृत् अर्थात् क्यों रे बार बार गाँठ बाध लो) इत्यादि रूप में कहती हुई सीता जिन प्रत्युक्तियों में अत्यन्त गोपनीय रूप से रावण की समस्त उक्तियाँ अर्थान्तर को अभिव्यक्त करती हैं, जिसको जानकर रावण लज्जित हो जाय तथा पुनः बिना कुछ कहे ही लौट जाय—इस प्रकार की प्रत्युक्तियों का प्रयोग करती हैं।

विमर्श—जनकजा सीता की प्रत्युक्तियों में छिपे हुए अर्थों की प्रतीति चकार के स्थान पर लकार का प्रयोग करने पर जैसे 'मां पश्यातिविचक्षणोऽस्मि' इत्यादि 'मां पश्यातिविलक्षणोऽस्मि' इत्यादि रूप में प्रत्युक्तियाँ अर्थान्तर को अभिव्यक्त करती हैं।।७।।

तदज्ञानात्तस्मिन्नविरतविवक्षे सति पुनः
पुनः पौलस्त्ये सा जनकतनयाऽतीव कुपिता।
स्फुटोऽस्य स्वोक्त्यैव स्वयमभिभवोऽस्त्वित्यतिपरि-
स्फुटीकृत्यैवार्थं कतिचन जगाद प्रतिगिरः।।८।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदज्ञानादिति। तस्मिन् पौलस्त्ये रावणे तदज्ञानात् तस्य प्रत्युक्ति-निगूहितार्थेन स्वप्रशंसाभिप्रायप्रयुक्तानामपि स्वोक्तीनां स्वनिन्दापर्यवसायित्वप्रापणस्य अज्ञानात् अबोधात् हेतोः पुनः पुनः अविरता विराममप्राप्ता विवक्षा वक्तुमिच्छा यस्य तथोक्ते सति पुनः पुनर्वक्तुमेव प्रवृत्ते सतीत्यर्थः। सा जनकतनया अतीव कुपिता सती अस्य राक्षसस्य स्वोक्त्यैव स्वयमभिभवः स्वतिरस्कारः स्फुटोऽस्तु इति विचिन्त्येति शेषः। अर्थं रावणस्य स्वप्रशंसावचनानां तन्निन्दाप्रतिपादकत्व-प्रापकमर्थमित्यर्थः। अतिपरिस्फुटीकृत्यैव त्रिषु चरणेषु सङ्ख्यानिर्दिष्टस्यैकैकस्य वर्णस्य परित्यागकथनेन अतितरां व्यक्तीकृत्यैव कतिचन काश्चित् प्रतिगिरः प्रत्युक्तीः 'त्रिष्वप्यङ्घ्रिषु तुर्यवर्णरहितं रे जल्प ते जल्पितम्' इत्येवंविधाः जगाद। शिखरिणीवृत्तम्।।८।।

श्लोकार्थ—मेरी उक्तियों से ही मेरी निन्दा गम्यमान हो रही है, यह न जानने के कारण बार बार बोलने की इच्छा करने वाले रावण पर जनकपुत्री सीता अत्यन्त क्रोधित हुई तथा इस राक्षस को अपने कथन से अपना तिरस्कार स्पष्टतया ज्ञात हो, यह सोचकर कुछ प्रत्युक्तियों को स्पष्टरूप से कहा।

विमर्श—रावण को अपने कथन से ही अपना तिरस्कार ज्ञात हो, इस तरह की उक्तियों का निर्वचन जैसे (त्रिष्वप्यङ्घ्रिषु तुर्यवर्णरहितं रे जल्प ते जल्पितम्) जनकजा सीता रावण से कहती हैं कि अपने द्वारा अपनी प्रशंसा में कहे गये श्लोक के प्रथम तीन चरणों में प्रयुक्त वर्णसमूह में से चतुर्थ वर्ण को हटाकर बोलो इस प्रकार से प्रशंसा निन्दा के रूप में परिणत हो जाती है, जिसका निर्वचन यथावसर किया जायेगा।।८।।

तयोस्तं संवादं तरुशिरसि लीत्वा निशमयन्
हनूमान् वैदेह्याः प्रतिवचनतोऽत्यन्तमुदितः।
प्रयाते पौलस्त्ये निजवचनभङ्गात्सरुषि तां
समाश्वास्य त्रस्तां द्रुततरमुपागाद्रघुपतिम्।।९।।

तयोरिति। तयोः सीतारावणयोः तं संवादं तरुशिरसि शिंशपावृक्षाग्रे लीत्वा निलीय निशमयन् शृण्वन् हनूमान् वैदेह्याः प्रतिवचनतः प्रतिवचनेन। सार्वविभक्तिकस्तसिः। अत्यन्तमुदितः अतीवसन्तुष्टस्सन् तस्य सकल-व्याकरणपारीणतया निगूढस्यापि प्रतिवचनार्थस्य सद्य एव प्रतिभानादिति भावः। पौलस्त्ये निजवचनानां भङ्गात् स्वनिन्दापर्यवसायित्वरूपपराजयात् हेतोः सरुषि सकोपे प्रयाते सति कुपित्वा गते सतीत्यर्थः त्रस्तां 'कुपितो रावणः किं कुर्याद्वा' इति भीतां तां सीतां समाश्वास्य देवि! मा भैषीः क्षिप्रमेव राम आगत्य रावणं हत्वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वामयोध्यां नेष्यतीत्यादिवचनैस्समाधाय द्रुततरमतिशीघ्रं यथा तथा रघुपतिम् उपागात् रामस्यान्तिकमागमदित्यर्थः। वृत्तं पूर्ववत्।।९।।

श्लोकार्थ—उन दोनों (सीता और रावण) के संवाद को शिंशपा वृक्ष के पत्तों में छिपकर श्रवण कर रहे श्री हनुमान्, सीता की प्रत्युक्तियों से अत्यन्त प्रसन्न हुए। अपनी प्रशंसा में कहे गये वचनों के खण्डित हो जाने से रुष्ट रावण के लौट जाने पर डरी हुई सीता को आश्वासन देकर हनुमान् शीघ्र ही भगवान् राम के पास आ पहुँचे।

विमर्श—सीता की प्रत्युक्तियों को सुनकर हनुमान् जी की अतिप्रसन्नता का कारण यह था कि श्री हनुमान् जी सम्पूर्ण व्याकरणशास्त्र के ज्ञाता थे, जिसके कारण अत्यन्त गूढ़ भी प्रतिवचनों का उन्हें ज्ञान हो जाता था। रावण के वचनभङ्ग का अभिप्राय यह है कि जिन वाक्यों का प्रयोग वह अपनी प्रशंसा में करता था, उन्हीं वाक्यों से उसकी निन्दा गम्यमान होती थी।।९।।

नत्वोत्थाय कृताञ्जलौ हनुमति त्वत्प्रेयसी देव दे-
व्यैक्षि क्षेमवती दशास्यसदनोद्यानद्रुमाधोभुवि।
इत्यावेदयति प्रिया मम कथंशीला स रक्षोऽधमः
किंवृत्तः कथयेति तं रघुपतिः पप्रच्छ वातात्मजम्।।१०।।

नत्वेति। नत्वा नमस्कृत्य उत्थाय कृतः अञ्जलिः येन तथोक्ते हनुमति हे देव! रामचन्द्र! त्वत्प्रेयसी देवी सीता दशास्यस्य रावणस्य सदनोद्याने अशोकवने यो द्रुमः शिंशपातरुः तस्य अधोभुवि मूलदेशे क्षेमवती सकुशला ऐक्षि अदर्शि। ईक्षतेः कर्मणि लुङ्। इति आवेदयति विज्ञापयति सति मम प्रिया सीता कथं शीलं यस्याः सा तथोक्ता रक्षोऽधमः राक्षसापशदः सः रावण इत्यर्थः। तन्नामकथनस्य जुगुप्सितत्वादेवं निर्देशः किं कीदृशं वृत्तं चरित्रं यस्य स तथोक्तः इति रघुपतिः तं वातात्मजं पप्रच्छ। शार्दूलविक्रीडितं वृत्तम्।।१०।।

श्लोकार्थ—नमस्कार करने के अनन्तर हाथ जोड़कर हनुमान् जी ने इस प्रकार से कहा—हे देव रामचन्द्र! आपकी प्रियतमा देवी सीता को रावण के घर के उद्यान में जो वृक्ष है, उसके नीचे सकुशल रूप से मैंने देखा है। ऐसा कहने पर वायुपुत्र हनुमान् से देव श्रीराम ने पूछा कि मेरी प्रिया सीता किस तरह से है तथा वह राक्षसाधम रावण कैसा है।

विमर्श—रावण के नाम का कथन घृणित होने के कारण श्लोकस्थ **'किंवृत्त'** शब्द के द्वारा उसका संकेत श्रीराम ने किया।।१०।।

स च श्रीरामचन्द्रेण परिपृष्टोऽनिलात्मजः।
व्यजिज्ञपत्किमुक्तेन बहुना रघुपुङ्गव।।११।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

स चेति। श्रीरामचन्द्रेण परिपृष्टः सोऽनिलात्मजश्च व्यजिज्ञपत्। विज्ञापनाप्रकार एव किमित्यादिः। हे! रघुपुङ्गव! बहुना उक्तेन किम्? सङ्क्षेपतः कथयामि शृण्विति शेषः॥११॥

श्लोकार्थ—श्री रामचन्द्र के द्वारा पूछे गये वायुपुत्र श्री हनुमान् ने कहा—हे रघुश्रेष्ठ! बहुत कहने से क्या लाभ है। संक्षिप्त रूप से निवेदन कर रहा हूँ, श्रवण करें॥११॥

यत्सौशील्यं जनकदुहितुर्यस्त्वयि प्रेमभूमा
यस्त्वच्छौर्यप्रणयगरिमा याऽप्यवज्ञा दशास्ये।
या चाहन्ता निशिचरपतेस्तत्समस्तं व्यनक्ति
प्रत्यक्षं मे रघुवर तयोः सम्प्रवृत्तो विवादः॥१२॥

यदिति। हे रघुवर! जनकदुहितुः सौशील्यं सुशीलत्वं यत्। अस्तीति शेषः। एवमग्रेऽपि। अत्र यच्छब्दानां सर्वेषामस्तीत्यध्याहार्यपदेनान्वयो बोध्यः। त्वयि विषये प्रेमभूमा अनुरागातिशयः यः त्वच्छौर्ये विषये प्रणयस्य विस्रम्भस्य गरिमा अलघिमा यः। 'प्रणया अमी। विस्रम्भयाच्ञाप्रेमाणः' इत्यमरः। दशास्ये रावणे विषये अवज्ञाऽपि तिरस्कृतिश्च या निशिचरपतेः रावणस्य अहन्ता अहङ्कारश्च या तत्समस्तं सीतायास्सौशील्यादिकं रावणस्याहङ्कारं च सर्वमपि मे प्रत्यक्षं यथा तथा सम्प्रवृत्तः तयोः सीतारावणयोः विवादः संवादः, व्यनक्ति प्रकटयति। सीतारावण-संवादश्रवणादेव सीतायाः सौशील्यादिकं रावणस्याहङ्कारश्च स्पष्टमेव त्वयाऽवगम्यत इत्यर्थः। मन्दाक्रान्तावृत्तम्—'मन्दाक्रान्ता जलधिषडगैर्म्भौंनतौतोगुरू चेत्' इति लक्षणात्॥१२॥

श्लोकार्थ—हे रघुवर! जनकपुत्री सीता का आपके प्रति जो सौशील्य एवं अतिशय अनुराग तथा आपके शौर्य (वीरता) के विषय में प्रणय की गरिमा और जो रावण के प्रति तिरस्कार एवं निशिचरपति का अहङ्कार है, उसे मैंने प्रत्यक्ष किया तथा उसका ज्ञान उन दोनों के संवाद द्वारा आपको सहजता से हो सकता है।

विमर्श—इतना कहने के अनन्तर सीता-रावण का **'विवाद-संवाद'** हनुमान् जी के द्वारा प्रकट किया जाता है। श्लोक में प्रयुक्त **'व्यनक्ति'** पद के द्वारा ग्रन्थकार यह बताना चाहते हैं कि सीता-रावण-संवाद श्रवण के अनन्तर ही सीता का सौशील्य इत्यादि तथा रावण का अहङ्कार स्पष्टतया ज्ञात हो जायेगा॥१२॥

दृप्तः स्वस्मिन् सुगुणमनृतं यातुधानाधिनाथो
देव त्वय्यप्यनृतमगुणं यैरवादीद्वचोभिः।
तान्येवार्थं तदवमतिदं त्वत्समुत्कर्षदञ्च
स्वप्रत्युक्त्याऽद्भुतघटनया प्रापिपत्प्रेयसी ते॥१३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स विवादोऽवश्यं त्वया श्रोतव्य इति वक्तुकामश्चमत्कारकारिणस्तस्य प्रकारं विज्ञापयति—**दृप्त इति**। हे देव! दृप्तः गर्वितः यातुधानाधिनाथः रावणः यैः वचोभिः स्वस्मिन् आत्मनि अनृतम् असत्यम् सुगुणं त्वय्यपि दोषदूरे निरतिशयकल्याणगुणशालिन्यपीत्यपेरर्थः। अनृतम् अगुणं दोषम् अवादीत् तान्येव वचांसि ते प्रेयसी सीता। अद्भुता आश्चर्यकरी घटना निगूढार्थवर्णयोजना यस्यां तथोक्तया स्वप्रत्युक्त्या निजप्रतिवचनेन तदवमतिदं तस्यैव तिरस्कारप्रयोजकम्। त्वत्समुत्कर्षदं दूषणीयतया रावणेनोद्दिष्टस्यापि तवोत्कर्षमेवावगमयन्तं च अर्थम् अभिधेयं प्रापिपत् अनीनयत्। प्राप्नोतेर्ण्यन्तात् कर्तरि लुङ्। वृत्तं पूर्ववत्।।१३।।

श्लोकार्थ—हे देव! गर्व से युक्त राक्षसाधिपति रावण जिन वचनों के द्वारा अपने में गुणों का आरोप तथा आप में दोषों का आरोप किया है, उन्हीं वचनों से आपकी प्रियतमा सीता ने अपनी प्रत्युक्तिस्वरूप अद्भुत घटना (निगूढार्थ वर्णयोजना) के द्वारा रावण के ही वचनों से उसको तिरस्कृत करने वाले तथा आपको उत्कर्ष प्रदान करने वाले अर्थों को अभिव्यक्त किया।।१३।।

प्रत्युक्त्यर्थविबोधशक्तिविरहान्निर्लज्जमात्मस्तव-
त्वन्निन्दाव्यवसायतस्स जडधीर्नैव व्यरंसीद्यदा।
स्पष्टार्थानि तदा तथा प्रतिवचांस्याह स्म देवी यथा
स्वोक्त्यैवावगतार्थया स कुमतिर्ह्रीणः परावर्तत।।१४।।

प्रत्युक्त्यर्थेति। जडधीः मन्दबुद्धिः सः रावणः प्रत्युक्तीनां सीता-प्रतिवचनानाम् अर्थस्य स्वोक्त्यन्यथार्थत्वप्रापकनिगूढार्थस्य विबोधे ज्ञाने विषये शक्तिविरहात् बुद्धिपाटवराहित्यात् निर्लज्जं निस्त्रपं यथा तथा आत्मस्तवत्वन्निन्दा-व्यवसायतः स्वश्लाघनत्वन्निन्दनरूपात् उद्यमात्। सार्वविभक्तिकस्तसिः। यदा नैव व्यरंसीत् नैव विरतोऽभूत्। विपूर्वाद्रमतेः कर्तरि लुङ्, 'व्याङ्परिभ्यो रमः' इति परस्मैपदम्। तदा देवी सीता तथा स्पष्टः विशदीभूतः अर्थः रावणेनात्मानं स्तोतुमुक्तानामुक्तीनां तन्निन्दापर्यवसायित्वप्राप्तिबोधकार्थः येषु तानि प्रतिवचांसि आह स्म। कुमतिः दुर्बुद्धिः सः रावणः अवगतार्थया सम्यग्विदितस्वनिन्दारूपार्थया स्वोक्त्यैव हेतुना ह्रीणः लज्जितस्सन् यथा परावर्तत सीताया आभिमुख्यमेव परिहृत्य न्यवर्ततेत्यर्थः। तथा स्पष्टार्थानि प्रतिवचांस्याह स्म देवीति पूर्वेण सम्बन्धः। शार्दूलविक्रीडितं वृत्तम्।।१४।।

श्लोकार्थ—सीता के द्वारा कही गई प्रत्युक्तियों के अर्थ का बोध न होने के कारण निर्लज्ज रावण अपनी स्तुति तथा आपकी निन्दा रूप कार्य से वह अज्ञानी जब

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरत नहीं हुआ तब स्पष्ट रूप से अर्थों को अभिव्यक्त कर देने वाले प्रतिवचनों को देवी सीता ने कहा—जिससे अपनी उक्तियों से ही अर्थ का ज्ञान हो जाने के कारण दुष्टमति रावण लज्जित होकर लौट गया॥१४॥

शतार्धश्लिष्टार्थप्रतिफणितियुक्पद्यविधया
स्फुटैकार्थप्रत्युक्त्युपहितनवश्लोकविधया।
प्रवृत्तं तं वादं दृढमवधृतं मे हृदि हठा-
न्मुखादद्योद्यन्तं रघुकुलमणे शृण्ववहितः॥१५॥

शतार्धेति। हे रघुकुलमणे! शतार्धं पञ्चाशत्सङ्ख्यावन्ति श्लिष्टार्थाभिः उभयार्थाभिः प्रतिफणितिभिः प्रत्युक्तिभिः युज्यन्त इति तथोक्तानि यानि पद्यानि तान्येव विधा प्रकारः तया स्फुटः व्यक्त एक एव अर्थः यासां ताभिः प्रत्युक्तिभिः उपहिताः सहिताः ये नवसंख्याकाः श्लोकाः त एव विधा तया च प्रवृत्तं दृढं यथा तथा मे हृदि चित्ते अवधृतं त्वयि विज्ञापयितुमेव सकुतुकं मया सम्यग्गृहीतानुपूर्वीकमित्यर्थः। अत एवाद्य त्वत्सन्निधौ हठाद्बलात्कारात् मुखात् उद्यन्तं निर्गच्छन्तं तं रावणोक्तिदेवीप्रत्युक्तिरूपं वादम् अवहितः सावधानस्सन् शृणु। शिखरिणीवृत्तम्॥१५॥

श्लोकार्थ—हे रघुकुलमणे! श्लिष्ट है अर्थ जिसमें ऐसी उभयार्थक प्रत्युक्तियों से युक्त पचास श्लोकों को एवं स्फुटरूप से एक अर्थ है जिनका ऐसी प्रत्युक्तियों से युक्त नवसंख्याक श्लोकों को इस प्रकार से कहा है जो स्थाई रूप से मेरे हृदय में स्थित है। अतएव आज आपके सामने हठात् मुख से निकल रहे रावणोक्ति एवं देवी प्रत्युक्तिरूप विवाद-संवाद सावधान होकर सुनें॥१५॥

इत्युदीर्य पवमाननन्दनः शब्दशास्त्रविदुषां पुरोगमः।
आदरादवधृतं श्रुतं पुरा तं विवादमवदद्यथाक्रमम्॥१६॥

इतीति। शब्दशास्त्रविदुषां व्याकरणशास्त्रपारीणानां पण्डितानां पुरोगमः अग्रेसरः पवमाननन्दनः हनूमान् इत्युदीर्य एवमुक्त्वा पुरा शिंशपाग्रावस्थानावसरे श्रुतम् आदरात् अवधृतं चमत्कृतिजनितया श्रीरामचन्द्रे विजिज्ञापयिषया सम्यग्गृहीतं तं विवादं सीतारावणयोस्संवादं यथाक्रमं वर्णानुपूर्वीक्रममनतिक्रम्य अवदत्। रथोद्धतावृत्तम्—'रान्नराविह रथोद्धता लगौ' इति लक्षणात्॥१६॥

श्लोकार्थ—ऐसा कहकर शब्दशास्त्र (व्याकरणशास्त्र) के विद्वानों में श्रेष्ठ पवनात्मज हनुमान् ने आदरपूर्वक हृदय में धारण किया गया तथा पूर्व में सुना गया जो विवाद उसको यथाक्रम बताया॥१६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिक्षीणालस्यः समरभुवि रक्षःकुलपतिः
सलज्जः स्वस्तुत्याममलहितमार्गैकपथिकः।
प्रणम्रस्त्रीलभ्यः सुमुखि विलसत्कीर्तिरिति च
श्रुतो नाहं किं रेऽधम मुहुरलं त्वां श्रुतवती।।१७।।

परिक्षीणालस्य इति। रावणः सीतामाह—परिक्षीणेत्याद्यहं किमित्यन्तम्। अत्र विलसत्कीर्तिरित्यन्त्यविशेषणान्ते श्रूयमाण इतिशब्दस्समुच्चयार्थक-चकारयोगमहिम्ना प्रतिविशेषणमभिसम्बध्यते। सुमुखि! सुवदने! जानकि! समरभुवि परिक्षीणम् आलस्यं यस्य तथोक्त इति, रक्षसां कुलस्य पतिरिति, स्वस्तुत्यां सलज्ज इति, अमले हिते च मार्गे एकस्मिन् पथिक इति, निष्पापमुभयलोकसुखावहं च शास्त्रविहितं सदाचारमेकमेवाभिपन्न इतीत्यर्थः। 'मलोऽस्त्री पापविटिकवृक्षानि' इत्यमरः। मार्गैकपथिक इति शिवभागवतवत्समासः। प्रणम्राणां प्रणामशीलानां 'नमिकम्पि' इत्यादिना रप्रत्ययः। स्त्रीणां लभ्य इति। विलसन्ती कीर्तिः यस्य तथोक्तः इति च अहं न श्रुतः किम्। त्वयेति शेषः। अत्र समरभुवि परिक्षीणालस्य इत्यनेन स्वस्य महोत्साहत्वमरिनिर्भीकत्वं च, रक्षःकुलपतिरित्यनेन दुस्साधसाधनसमर्थत्वं दुर्धर्षत्वं च, स्वस्तुत्यां सलज्जा इत्यनेन धीरोदात्तत्वं, अमलहितमार्गैकपथिक इत्यनेन सुजनाग्रगण्यत्वं, प्रणम्रस्त्रीलभ्य इत्यनेन सुभगत्वं, विलसत्कीर्तिरित्यनेन सकललोकश्लाघनीयत्वं च रावणेन द्योतितम्। कृता खल्वेवमेव सीतां प्रत्यात्मश्लाघा रावणेन श्रीमद्रामायणे—

नेह पश्यामि लोकोऽन्यं यो मे प्रतिबलो भवेत्।
पश्य मे मुहहद्वीर्यमप्रतिद्वन्द्वमाहवे।।
असकृत्संयुगे भग्ना मया विमृदितध्वजाः।
अशक्ताः प्रत्यनीकेषु स्थातुं मम सुरासुराः।। इत्यादिना।

सीता प्रत्युत्तरमाह—रेऽधमेत्यादि श्रुतवतीत्यन्तम्। रेऽधम! मुहुरलम् पुनःपुनर्मा वादीरित्यर्थः। त्वां श्रुतवती अहमिति शेषः रे इति हीनसम्बोधने, अलमिति निवारणे। 'हीनसम्बोधने तु रे', 'अलं भूषणपर्याप्तिशक्तिवारणवाचकम्' इत्युभयत्राप्यमरः। अत्र रेऽधमेति सम्बोधनेन मुहुरलमित्युक्तिपौनःपुन्यनिवारणेन च रावणं प्रति सीताया महान्क्रोधः त्वां श्रुतवतीत्यनेन तद्वचनेऽनादरश्च द्योत्यते। प्रत्युत्तरनिगूढार्थस्तु—रेऽधम! त्वाम् अलं लवर्णरहितं मुहुश्श्रुतवती इति। नास्ति लः लवर्णः यस्मिन्निति विग्रहः तं अलम्। एवं च—समरभुवि पारक्षीणास्य इति, रक्षःकुपतिरिति, स्वस्तुत्यां सज्ज इति, अमहितमार्गैकपथिक इति, स्त्रीभ्यः प्रणम्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति, विसत्कीर्तिरिति च त्वं श्रुतोऽसीत्यर्थः। समरभुवि परिक्षीणानि कृशानि आस्यानि मुखानि यस्य स तथोक्तः। रक्षःकुपतिरिति कर्मधारयोत्तरपदस्तत्पुरुषः। स्वस्तुत्यां सज्जस्सन्नद्धः—'सन्नद्धो वर्मितस्सज्जः' इत्यमरः। महितः पूजितो न भवतीत्यमहितः कुत्सितः स चासौ मार्गश्च तस्मिन्नेकस्मिन्पथिकः। स्त्रीभ्यः प्रणम्र इत्यत्र स्त्रीरनुकूलयितुमिति। 'क्रियार्थोपपदस्य' इत्यादिना चतुर्थी। प्रणम्रस्त्रीभ्य इत्यत्र 'संहितायां खर्परे शरि वा विसर्गलोपो वक्तव्यः' इति पाक्षिको विसर्गलोपः। अत्र समरभुवि परिक्षीणास्य इत्यनेन निस्तेजस्त्वं, रक्षःकुपतिरित्यनेन नीतिविधुरत्वं, स्वस्तुत्यां सज्ज इत्यनेन निर्लज्जत्वं, अमहितमार्गैकपथिक इत्यनेनातिनिन्दितत्वं, स्त्रीभ्यः प्रणम्र इत्यनेन कामपरिभूतत्वं, विसत्कीर्तिरित्यनेन गुणशून्यत्वं च रावणे द्योतितं भवति। स्फुटमेवेदं निस्तेजस्त्वादिकमुपपादितं रावणं प्रति सीतया श्रीमद्रामायणे—

जनस्थाने हतस्थाने निहते रक्षसां बले।
अशक्तेन त्वया रक्षः कृतमेतदसाधु वै।।
आश्रमं तु तयोश्शून्यं प्रविश्य नरसिंहयोः।
गोचरं गतयोर्भ्रात्रोरपनीता त्वयाऽधम।। इत्यादिना।

ननु लवर्णेन साहित्यं वा शब्दस्यैव, न त्वर्थस्य एवं सत्यलं त्वां श्रुतवतीत्यत्रोद्देश्यार्थरूपे रावणे लवर्णराहित्यरूपस्य शब्दधर्मस्य विधानं कथमुपपद्यत इति। यद्यप्यस्त्येवास्पदमाशङ्कायाः, तथापि 'उपजिगमिषोर्देव पूर्वं गिरिं ते', 'नरस्य स्वर्भोगभाग्यं विरलोदयस्य', 'हिरण्यपूर्वं कशिपुं प्रचक्षते' इत्यादिषु कालिदासश्रीहर्षमाघादीनां महाकवीनां प्रयोगेषु देवपूर्वत्वादीनामन्यथाऽनुपपत्त्या शब्दपरतयैव निश्चितानामपि गिर्यादिशब्दानामर्थपरताया एवावश्यं वक्तव्यतया महामहोपाध्यायमल्लिनाथादिभिर्व्याख्यातृभिः प्रदर्शितां शब्दपराणामपि शब्दानां लक्षणयाऽर्थपरताभ्युपगमसरणिमनुसृत्य लवर्णसहितशब्दवाच्यत्वेनोक्तं त्वां लवर्णरहितशब्दवाच्यं श्रुतवतीत्यर्थस्य सुवचत्वान्नैवात्राग्रतश्च क्वचिदीदृशीषु चित्रोक्तिष्वाशङ्कितस्यावकाश इत्यलमनेकमहाजनक्षुण्णेऽपि पथि सञ्चरणमधिक्षिपन्तं प्रत्यनुनयनायासेन।

सन्दर्भविरहान्मूले नियमः पारिभाषिकः।
अवश्यकथनीयोऽपि नोक्त इत्यत्र कथ्यते।।
चमत्कारान्तरश्लाघ्याः प्रबन्धास्सन्ति भूरिशः।
निगूढार्थचमत्कारमेकमेकं क्वचित्क्वचित्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पद्यं वा श्रूयते वाक्यं न तु द्वित्राणि तान्यपि।
अत एव प्रयत्नेन प्रबन्धोऽयं प्रवर्तितः।।
वर्णचित्रात्मकोऽत्यन्तनिगूढार्थचमत्क्रियः।
वर्णचित्रेषु शतशः कल्पनीयेषु सत्स्वपि।।
गूढार्थस्यानुकूलानि त्रीण्येवात्र मतानि नः।
च्यावितामक्षरमित्येकमधिदत्ताक्षरं परम्।।
प्रतिदत्ताक्षरं त्वन्यदित्येव त्रीणि तानि हि।
कस्मिंश्चिच्च्याविते वर्णे यत्रार्थोऽन्यः प्रतीयते।।
चित्रं तदेव विज्ञेयं च्यावितामक्षरनामकम्।
कस्मिंश्चिदधिके वर्णे दत्तेऽर्थो यत्र भिद्यते।।
अधिदत्ताक्षरं नाम चित्रं तदिति बुध्यताम्।
च्यावितस्यास्पदेऽन्येन प्रतिदत्तेन केनचित्।।
प्रतीयतेऽन्यो यत्रार्थः प्रतिदत्ताक्षरं हि तत्।
प्रतिदत्ताक्षरे चित्रे विस्वरं व्यञ्जनाक्षरम्।।
सङ्केतितं सस्वरं तु च्युतदत्तैकता यदि।
इतरत्र द्वयोर्यादृक् प्रत्युक्त्यर्थानुकूल्यभाक्।।
तादृगेवाक्षराकारस्सङ्केतास्पदतां गतः।।

इति। एवं चेदं च्यावितामक्षरं चित्रम्। अत्र 'ल' इत्यकारसम्बद्धस्यैव व्यञ्जनस्याकृतिस्सङ्केतिता बोध्या। तस्या एव प्रत्युक्त्यर्थानुकूलत्वात्। शिखरिणीवृत्तं लक्षणमुक्तम्।।१७।।

श्लोकार्थ—रावण अपनी प्रशंसा करता हुआ कहता है कि हे जानकि! युद्ध के मैदान में आलस्य का परित्याग करने वाला, राक्षसों के कुल का स्वामी, अपनी प्रशंसा से लज्जित होने वाला, केवल उचित मार्ग पर चलने वाला, प्रणाम करना स्वभाव है जिनका ऐसी स्त्रियों के द्वारा प्राप्य तथा सुशोभित होती हुई कीर्ति से युक्त मैं क्या तुम्हारे द्वारा नहीं सुना गया हूँ। ऐसा पूछने पर देवी सीता ने कहा—हे अधम! सुना है, बार-बार कहना व्यर्थ है।

विमर्श—यहाँ पर रावण समरभूमि में 'आलस्य का परित्याग करने वाला' के माध्यम से अपने में अत्यन्त उत्साह एवं शत्रुओं के बीच निर्भीकता द्योतित करता है तथा राक्षसों के स्वामीरूप कथन से अत्यन्त दुरूह कार्य करने वाला, 'अपनी प्रशंसा से सलज्ज' के द्वारा धीरोदात्तत्व, सुशोभितकीर्तिस्वरूप कथन से सकल लोकप्रशंसनीयत्व द्योतित करता है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशेषार्थ—सीता ने रावण से कहा—रे अधम! तुम्हारे द्वारा कहे गये वचनों को 'लकार' रहित सुना गया है, तदनुसार पूर्वोक्त तीनों चरणों में प्रयुक्त लकार का परित्याग कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे जानकि! मैं युद्ध के मैदान में परिक्षीण (कृश) मुख वाला हूँ अर्थात् युद्ध में मेरे मुख की कान्ति फीकी पड़ जाती है (परिक्षीणास्यः), मैं राक्षसों का कुपति हूँ (रक्षः कुपतिः) आत्मश्लाघा में निरन्तर लगा रहता हूँ (सज्जः स्वस्तुल्यां), केवल निन्दित मार्ग पर चलने वाला (अमहितमार्गैकपथिकः) तथा स्त्रियों को अनुकूल करने वाला (प्रणम्रः स्त्रीभ्यः) एवं विनष्ट हुई कीर्ति से युक्त (विसत्कीर्तिः) हूँ।

विशेषार्थ का आधार—**अलं श्रुतवती**।।१७।।

विशेष—श्लोक संख्या १७ से लेकर ६६ तक गूढ उभयार्थक श्लोकों का प्रयोग ग्रन्थकार के द्वारा किया गया है, जिसमें विशेषार्थ का आधार श्लोक के चतुर्थ चरण के कुछ वर्ण हैं, जिसका निर्देश उन-उन श्लोकों में किया गया है। विशेषार्थ के आधार के रूप में गृहीत वर्णों से निर्दिष्ट कार्य पूर्वोक्त तीन चरणों में ही होगा, चतुर्थ चरण में नहीं।

अतल्पं निद्रालू रजनिषु कुवाग्दुर्गततमो
महाकातर्याढ्यो मनसि विधुतप्रोज्ज्वलयशाः।
वधान्मांसादानां बहुविमतलाभो जनकजे
कथं श्लाघ्यो रामः, खल तमसकृन्मा स्पृश गिरा।।१८।।

अतल्पमिति। रावणः सीतामाह—अतल्पमित्यादि राम इत्यन्तम्। हे जनकजे! रजनिषु नास्ति तल्पं शय्या यस्मिंस्तद्यथा तथा निद्रालुर्निद्राशीलः 'स्पृहिगृहि' इत्यादिना आलुच्। निद्रालू रजनिष्वित्यत्र 'रोरि' इति रेफलोपे 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति दीर्घः। कुवागिति बहुव्रीहिः। अतिशयेन दुर्गतो दुर्गततमः, अतिदरिद्र इत्यर्थः। 'अतिशायने तमबिष्ठनौ' इति तमप्।

निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः।

इत्यमरः। कुवाक्चासौ दुर्गमश्चेति विग्रहः। विशेषणयोरेव परस्परं विशेष्यविशेषणभावविवक्षायां खञ्जकुब्जादिवत् 'विशेषणं विशेष्येण बहुलम्' इति समासः। मनसि महता कातर्येण अधैर्येण आढ्यस्समृद्धः अत्यधीरमनस्क इत्यर्थः। कातरस्य भावः कातर्यम् 'गुणवचनब्राह्मणादिभ्यः' इति ष्यञ्।

अधीरे कातरस्त्रस्नौ भीरुभीरुकभीलुकाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यमरः। विधुतं त्यक्तं प्रोज्ज्वलं यशो येन तथोक्तः। मांसादानां रक्षसाम्। कर्मणि षष्ठी। त्रिचतुराणामिति भावः। वधाद् हेतोः बहु विमतानां शत्रूणां लाभो यस्य तथोक्तः सम्पादितानेकशत्रुक इत्यर्थः। रामः कथं श्लाघ्यः? अत्र रजनिष्वतल्पं निद्रालुरित्यनेन विषयनिस्स्पृहत्वं, कुवागित्यनेन चाटुसुखाननुकूलत्वं, दुर्गततम इत्यनेन सहायसम्पद्विकलत्वं, मनसि महाकातर्याढ्य इत्यनेन निरुत्साहत्वं, विधुतप्रोज्ज्वलयशा इत्यनेन पौरुषाभिमानशून्यत्वं, मांसादानां वधाद्बहुविमतलाभ इत्यनेन अकुशलपरिणामत्वं च रामे रावणेन द्योतितम्। स्पष्टमेवेदमुक्तं श्रीरामायणे—

किं करिष्यसि रामेण सुभगे चीरवाससा।
निक्षिप्तविजयो रामो गतश्रीर्वनगोचरः।।
व्रती स्थण्डिलशायी च शङ्के जीवति वा न वा।।

इत्यादिना। एवञ्च नैव रामस्य त्वय्यनुरागः सत्यप्यनुरागे स इहस्थां त्वां न कथमप्यवाप्तुं शक्नुयादिति भावः। आविष्कृतश्चायं श्रीरामायणे—

न हि वैदेहि रामस्त्वां द्रष्टुं वाऽप्युपलप्स्यते।
पुरोबलाकैरसितैर्मेघैर्ज्योत्स्नामिवावृताम्।।

न चापि मम हस्तात्त्वां प्राप्तुमर्हति राघवः।
हिरण्यकशिपुः कीर्तिमिन्द्रहस्तगतामिव।।

इति। सीता प्रत्याह—खलेत्यादि गिरेत्यन्तम्। खल! दुरात्मन्! असकृत् मुहुः तं रामं गिरा वाचा मा स्पृश मा स्प्राक्षीः नामोच्चारणमेव खलु वाचा स्पर्शो नाम। तन्मा कार्षीरित्यर्थः। तन्नामकीर्तनेऽप्यनर्हत्वात्तवेति भावः। उक्तं हि श्रीरामायणे—'दास्येऽप्यस्य न युज्यसे' इति। अनेन पुण्यश्लोकत्वं रामस्य, महापापित्वं च रावणस्य द्योतितं भवति। प्रत्युत्तरनिगूढार्थस्तु—खल! असकृत् तं त इत्याकारकं वर्णं गिरा मा स्पृशेति। तवर्णं विरहय्योक्तेन त्वद्वचनेनैव रामस्य श्लाघ्यत्वं जानीहीत्यर्थः फलितः। रजनिषु अल्पमीषत् परिमितांशं यथा तथेत्यर्थः।

द्वितीययामपश्चार्धं तृतीयप्रहरोऽखिलः।
स्वापकालः प्रतिनिशं नित्योद्योगस्य भूपतेः।।

इति कामन्दकोक्तेः। निद्रालुः निद्राशीलः कुवाग्भिः गर्हावचनैः दुर्गमः दुष्प्रापः। गमेः खल्प्रत्ययः। मनसि महद्भिः अनितरसाध्यैः कार्यैः रक्षःकुलोन्मूलनादिभिः आढ्यस्सान्द्रः सततसङ्कल्पितानन्यसाध्योद्योग इत्यर्थः। विधुश्चन्द्रः—'विधुस्सुधांशुश्शुभ्रांशुः' इत्यमरः। तद्वत् प्रोज्ज्वलं यशो यस्य स तथोक्तः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मांसादानां वधात् बह्वी विमला च आभा यस्य तथोक्तः। अत्र रजनिष्वल्पं निद्रालुरित्यनेन—

अल्पाहारोऽल्पनिद्रश्च स भवेद्योऽतिभाग्यवान्।

इति सामुद्रिकोक्तमहाभाग्यत्वसहकृतमप्रमत्तत्वं, कुवाग्दुर्गम इत्यनेन दोषसामान्यशून्यत्वं, मनसि महाकार्याढ्य इत्यनेन पुरुषकारधुरीणत्वं, विधुप्रोज्ज्वलयशा इत्यनेन सकललोकाभिनन्दनीयगुणत्वं, मांसादानां वधाद्बहुविधलाभ इत्यनेन जयश्रीसान्निध्यविद्योतमानत्वं च श्रीरामे द्योतितं भवति। इदमपि च्यावितताक्षरमेव चित्रम्—

कस्मिंश्चिच्च्याविते वर्णे यत्रार्थोऽन्यः प्रतीयते।
चित्रं तदेव विज्ञेयं च्यावितताक्षरनामकम्।।

इति तल्लक्षणात्। वृत्तं पूर्ववत्।।१८।।

श्लोकार्थ—अपनी प्रशंसा के अनन्तर प्रभु श्रीराम की निन्दा करता हुआ रावण कहता है कि हे जनकजे! निद्राशील श्रीराम के पास रत्रिशयन हेतु शय्या का अभाव है। श्रीराम परुषवचन बोलने वाला, अत्यन्त दरिद्र तथा अत्यधिक अधीर मन वाला एवं उज्ज्वल कीर्ति से रहित है। मांसाहारी राक्षसों के वध के कारण अनेक शत्रुओं से युक्त वह किस तरह प्रशंसा योग्य हो सकता है। रावण के इस तरह कहने पर देवी सीता ने प्रत्युत्तर देते हुए कहा—हे दुष्ट! बार-बार प्रभु श्रीराम के नाम का उच्चारण मत करो।

विशेषार्थ—प्रत्युत्तर में छिपा हुआ अर्थ है कि सीता ने रावण से कहा रे खल! बार-बार त इत्याकारक वर्ण का उच्चारण मत करो। तदनुसार श्लोक के पूर्वोक्त तीन चरणों में प्रयुक्त वर्णसमूह में से 'त' वर्ण का परित्याग करा देने पर तुम्हारे प्रभु श्रीराम रात्रि में कम सोने वाले, निन्दाबोधक वचनों से दूर चन्द्रमा की तरह उज्ज्वल यश से युक्त एवं राक्षसों के वध के कारण अत्यन्त पवित्र आभा से परिपूर्ण हैं। उक्त प्रशंसाबोधक वाक्यों में महाभाग्यवान्, दोषसामान्यशून्य, अत्यन्त दुरूह कार्यों को सम्पन्न करने में अग्रगण्य, विजयश्री के अत्यन्त निकट इत्यादि अर्थ बोधित होता है।

प्रस्तुत श्लोक में च्यावितताक्षर नामक अलङ्कार तथा शिखरिणी छन्द हैं।

विशेषार्थ का आधार—**तमस्कृन्मा स्पृश गिरा।।**१८।।

रामो वाच्यतिविप्रियोऽतिचलितश्रीस्तन्वि नीचं वपु-
र्बिभ्रत्काननसीम्नि राक्षसचयायत्तः स्वयं वेत्सि तम्।
मां पश्यातिविचक्षणोऽस्मि बहुधा चापैकवीरोऽस्म्यहं
लब्धश्रीप्रचयस्तथाऽस्मि, किमरे चेलं बधानासकृत्।।१९।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राम इति। रावणः सीतामाह—राम इत्यादि तथाऽस्मीत्यन्तम्। तन्वि! कृशाङ्गि! 'वोतो गुणवचनात्' इति वैकल्पिकङीषन्तस्य तनुशब्दस्य सम्बुद्ध्यन्तं रूपम्। रामः वाचि अतिविप्रियः अतिविप्रियवागित्यर्थः। अतिचलिता बहुदूरविभ्रष्टा श्रीः सम्पत् यस्मात्स तथोक्तः। नीचं निकृष्टं वपुश्शरीरं बिभ्रद्दधानः। बिभर्तेर्लटश्शत्रादेशः। 'नाभ्यस्ताच्छतुः' इति नुमभावः। काननसीम्नि अरण्यप्रान्ते राक्षसानां चयस्य सङ्घस्य आयत्तः अधीनः 'अधीनो निघ्न आयत्तः' इत्यमरः। तं रामं स्वयं वेत्सि तस्य प्रकृतिमाकृतिं स्थितिं च स्वयमनुभवादेव जानासीत्यर्थः। मां पश्येति सवक्षस्पर्शमात्मनो निर्देशः। अविदितांस्त्वया मम गुणान्वदाम्याकर्णयेत्यर्थः। अहं बहुधा बहुभिः प्रकारैः अतिविचक्षणः अत्यन्तमभिज्ञः अस्मि बहून्वेदितव्यान् सम्यग्विदितवानस्मीत्यर्थः। 'धीमांत्सूरिः कृती कृष्टिर्लब्धवर्णो वीरोऽस्मि धानुष्केष्वनितरसाधारणोऽहं वीरोऽस्मीत्यर्थः। तथा अद्वितीयत्वप्रकारेणैवेत्यर्थो लब्धः। श्रियां सम्पदां प्रचयस्समुच्चयो येन तथोक्तोऽस्मि। उक्तं चैवमेव रावणेन श्रीमद्रामायणे—

न रामस्तपसा देवि न बलेन न विक्रमैः।
न धनेन मया तुल्यस्तेजसा यशसाऽपि वा।।
ऋद्धिं ममानुपश्य त्वं श्रियं भद्रे यशश्च मे।।

इत्यादिना। अत्र रामो वाचीत्यादिना श्रीरामे गगनकुसुमायमानानां दोषाणां मां पश्येत्यादिना स्वस्मिन्नसम्भावितानां गुणानां चोपन्यासेन कथमपि सीतामावर्जयेयमिति रावणस्य दुरभिनिवेशः, तेन तस्य महच्च कामान्धत्वं द्योत्यते। सीता प्रत्याह—किमित्याद्यसकृदित्यन्तम्। अरे! नीच! किं जल्पसीति शेषः। असकृत् मुहुः एकैकवचन इत्यर्थः। चेलं बधान वचनसङ्ख्यामनुसृत्य उत्तरीयाञ्चले ग्रन्थीन् कुरुष्वेत्यर्थः। अस्ति खलु लोके विप्रियवादिनं जनं प्रति यदाऽहमेषां वचनानामनुरूपं दण्डनं तव कारयिष्यामि तदा त्वमात्मनोक्तं विस्मरन्नाहं तथाऽवदमित्यात्मानमपराधाच्च्यावयेः सति तु ज्ञापकेऽस्मिन्वस्त्रग्रन्थौ नैव तथा विस्मरेरित्यभिप्रायेण विप्रियश्रवणकुपितैर्जनैरुच्यमानं वस्त्रप्रान्तं बधानेति वचनम्। तद्भङ्गीमनुसृत्योक्तमिदं सीताप्रतिवचनम्। अत एवात्र लोकोक्तिरलङ्कारः—

लोकप्रवादानुकृतिर्लोकोक्तिरिति कथ्यते।।

इति तल्लक्षणात्। अत्र किमर इत्यादिना प्रतिवचनेन सीताया महानमर्षो द्योत्यते। प्रतिवचननिगूढार्थस्तु—अरे! किं जल्पसीति शेषः। प्राग्वत् चे चकारस्थाने इत्यर्थः। असकृत् अनेकास्वप्यावृत्तिष्वित्यर्थः। लं लकारं बधान योजय। एवं च—'रामो वाल्यतिविप्रियोऽतिललितश्रीस्तन्वि नीलं वपुर्बिभ्रत्काननसीम्नि राक्षसलयायत्तस्स्वयं वेत्सि तम्। मां पश्यातिविलक्षणोऽस्मि बहुधाऽऽलापैकवीरोऽस्म्यहं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लब्धश्रीप्रलयस्तथाऽस्मि' इति वदेत्यर्थ:। राम: वाल्यतिविप्रिय: वालिन: तन्नाम्नस्सुग्रीवाग्रजस्य कपिराजस्य अतिविप्रिय: अत्यन्ताहित: अतर्कितात्द्धननादिति भाव:। अतिललिता श्री: यस्य तथोक्त:। नीलं मेघश्यामलमित्यर्थ:। वपु: बिभ्रत् काननसीम्नि राक्षसानां लये नाशे आयत्त: एकाग्र इत्यर्थ:। तं स्वयं वेत्सि। मां पश्य अहम् अतिविलक्षण: अत्यन्तविकृताकार इत्यर्थ:। अस्मि बहुधा आलापे एकस्मिन् न तु युद्धे वीर: अस्मि तथा लब्ध: श्रियां सम्पदां प्रलय: अत्यय: येन तथोक्तोऽस्मि। 'दिष्टान्त: प्रलयोऽत्यय:' इत्यमर:। प्रतिदत्ताक्षरमिदं चित्रम्—

च्यावितस्यास्पदेऽन्येन प्रतिदत्तेन केनचित्।
प्रतीयतेऽन्यो यत्रार्थ: प्रतिदत्ताक्षरं हि तत्।।

इति तल्लक्षणात्। अतोऽत्र विस्वर एव व्यञ्जने सङ्केत:—'प्रतिदत्ताक्षरे चित्रे विंस्वरं व्यञ्जनाक्षरम्। सङ्केतितम्' इत्युक्ते:। चेलमिति सङ्केतभेदनस्थले तु चकारलकारोत्तरावकारावुच्चारणार्थौ एवमग्रतश्च प्रतिदत्ताक्षरचित्रेषु सर्वत्र बोध्यम्। शार्दूलविक्रीडितं वृत्तम्।।१९।।

श्लोकार्थ—रावण ने सीता से कहा—हे कृशाङ्गि। राम अत्यन्त अप्रिय बोलने वाला, श्रीविहीन, निकृष्ट शरीर धारण करने वाला तथा जंगल की सीमाओं में राक्षसों के अधीन है, उस राम को तुम स्वयं जानती हो। मुझको देखो मैं अनेक प्रकार से अत्यन्त विचक्षण, धनुर्धारियों में अद्वितीय वीर एवं सम्पत्तियों के समूह से युक्त हूँ।

रावण के द्वारा कहे गये वचनों का प्रत्युत्तर देते हुए देवी सीता ने कहा—अरे नीच! बार-बार क्या बोल रहे हो? वचनों की संख्या के अनुसार उत्तरीय के छोर में गाँठ बाध लो।

विशेषार्थ—देवी सीता ने रावण से कहा—अरे! क्या बोल रहे हो चकार के स्थान पर लकार का प्रयोग (चे लं) करो तदनुसार प्रस्तुत श्लोक के पूर्वोक्त तीनों चरणों में प्रयुक्त चकार के स्थान पर लकार का प्रयोग कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे कृशाङ्गि! राम बाली का अत्यन्त अहित करने वाला, अतिललित श्रीसम्पन्न, मेघ के सदृश श्यामल शरीर को धारण करने वाला, तथा अरण्यप्रान्तों में राक्षसों के विनाश के लिए दत्तचित्त है। मुझको देखो मैं अतिविलक्षण अर्थात् अत्यन्त विकृत आकार वाला, अनेक प्रकार से आलाप करने में वीर तथा सम्पत्ति से रहित हूँ।

प्रस्तुत श्लोक में प्रतिदत्ताक्षर नामक अलङ्कार है, जिसका स्वरूप है—

च्यावितस्यास्पदेऽन्येन प्रतिदत्तेन केनचित्।
प्रतीयतेऽन्यो यत्रार्थ: प्रतिदत्ताक्षरं हि तत्।।

विशेषार्थ का आधार—**चेलं बधान**।।१९।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पश्याम्यन्यमुदारभोगविषये तुल्यं न मे कञ्चिद-
प्यन्यः कोऽहमिवास्ति भाजनमुमापत्यादरस्यापि च।
मद्वद्भूतनये मुखाब्जविकसत्तेजा रणे कः श्रुतः
पापिञ्जल्प यथास्पृहं मम पुनर्मौनादरो रोचते।।२०।।

पश्यामीति। रावणः सीतामाह—पश्यामीत्यादि श्रुत इत्यन्तम्। हे भूतनये! उदारः महान् यो भोगः सुखं स एव विषयः वस्तु तस्मिन् मे तुल्यम् अन्यं कञ्चिदपि न पश्यामि अपि च अहमिव उमापतेः शिवस्य यः आदरः अनुग्रह इत्यर्थः। तस्य भाजनं पात्रम् अन्यः कोऽस्ति? न कोऽपीत्यर्थः। उमापत्यादरस्येत्यत्र 'संहितायामनचि च' इति तकारस्य पाक्षिकं द्वित्वम्। मद्वत् मया तुल्यम्—'तेन तुल्यम्' इत्यादिना तृतीयान्ताद्वतिप्रत्ययः। कः पुमान् रणे मुखान्यब्जानी-वेत्युपमितसमासः तेषु विकसत् विजृम्भमाणमित्यर्थः। तेजः यस्य तथोक्तः श्रुतः त्वयेति शेषः। अहमेव भोगिष्वीश्वरानुग्रहपात्रेषु रणवीरेषु चाग्रगण्य इत्यर्थः। सीता प्रत्याह—पापिन्नित्यादि रोचत इत्यन्तम्। पापिन्! यथास्पृहं यथेच्छं जल्प कत्थस्वेत्यर्थः। मम पुनः मम तु मौने अभाषणे आदरः रोचते, अप्रतिभाषमाणाऽहं तूष्णीमेवावस्थातुमिच्छामीत्यर्थः। एतेन वृथैव त्वमात्मानं श्लाघसे इति रावणं प्रत्यवज्ञा द्योत्यते।

प्रत्युत्तरनिगूढार्थस्तु—पापिन्! यथास्पृहं जल्प मम पुनः मौ मु इत्यस्मिन्वर्णे आदरः न रोचत इति। एवं च—'पश्याम्यन्यदारभोगविषये तुल्यं न मे कञ्चिदप्यन्यः कोऽहमिवास्ति भाजनमापत्त्या दरस्यापि च मद्वद्भूतनये खाब्जविकसत्तेजा रणे कश्श्रुतः' इत्येव त्वया वक्तुमुचितमित्यर्थः। भूतनये! जानकि! अन्यदारभोगविषये परकलत्रोपभोगविषये मे तुल्यम् अन्यं कञ्चिदपि न पश्यामि अत एव अहमिव आपत्त्याः विपत्तेः अपि च दरस्य भयस्य—'दरोऽस्त्री शङ्कभययोः' इति वैजयन्ती, 'दरत्रासौ भीतिर्भीः' इत्याद्यमरश्च। भाजनम् अन्यः कोऽस्ति। अहमेव विपत्तेर्भयस्य चासाधारण्येन पात्रीभूत इत्यर्थः। पारदारिकाणां नित्यविपत्तेर्नित्यभयस्य चावश्यम्भावादिति भावः। मद्वत् रणे खाब्जमिव आकाशकमलमिव विकसत् तेजो यस्य तथोक्तः मिथ्यातेजस्क इत्यर्थः। प्रसिद्धमेव वन्ध्यापत्यशश-विषाणयोरिवाकाशकमलस्य मिथ्यात्वम्। कश्श्रुतः न कश्चिदप्यहमिव रणेऽतिनिस्तेजस्कमुख इत्यर्थः। अनेन रावणेऽतीव रणभीरुत्वं द्योत्यते। स्पष्टमेवेदमुक्तं सीतया श्रीरामायणे—

किञ्चिद्वीर्यं तवानार्य यो मां भर्तुरसन्निधौ।
अपहृत्यागतः पाप तेनादृष्टो महात्मना।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शूरेण धनदभ्रात्रा बलैस्समुदितेन च।
अपोह्य रामं कस्माद्धि दारचौर्यं त्वया कृतम्।।

इत्यादिना। च्यावितात्क्षरमिदं चित्रम्। शार्दूलविक्रीडितं वृत्तम्।।२०।।

श्लोकार्थ—रावण ने सीता से कहा—हे भूतनये! अत्यन्त सुख के विषय में मेरी समानता करने वाला कोई नहीं दीख रहा है तथा मेरी तरह उमापति भगवान् शिव का कृपापात्र कौन है, अर्थात् कोई नहीं। मेरी तरह युद्ध के मैदान में खिले हुए कमल की तरह कान्ति से युक्त मुख किसका सुना गया है? रावण के इस कथन के अनन्तर श्लोक के चतुर्थ चरण के माध्यम से देवी सीता ने कहा—हे पापी! इच्छानुसार प्रलाप करो, मुझे तो न बोलना ही अच्छा लगता है।

विशेषार्थ—देवी सीता ने रावण से कहा—हे पापी! इच्छानुसार बोलो। मुझे तो 'मु' इस वर्ण के प्रति आदर अच्छा नहीं लगता, तदनुसार पूर्वोक्त तीनों चरणों में से 'मु' इस वर्ण का अपहार कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे भूतनये! परनारी के साथ व्यभिचार के विषय में मेरी समानता करने वाला कोई नहीं है। मेरी तरह विपत्ति और भय का भाजन दूसरा कौन है? मेरी तरह युद्ध के मैदान में खिले हुए आकाशकमल की तरह कान्ति से युक्त मुख किसका है?

विमर्श—उपमानभूत आकाशकमल के असम्भव होने के कारण मिथ्यातेज से युक्त रूपार्थ गम्यमान होता है, जिससे रावण की अत्यन्त कायरता द्योतित होती है।

विशेषार्थ का आधार—**मौ नादरो रोचते**।।२०।।

स्मृत्वा मां हृदि जायतेऽतिविनयः क्रव्यादमात्रेऽपि ते
भर्ता भूमिसुते सदाऽनृतगुणस्तेऽतोऽपि सौख्यं कुतः।
जाते मय्यसुनायके तव सुखं स्यादेव किं दूयसे
किं रे जल्पसि दुर्वचः खलमते भूयोऽपि नेदं वद।।२१।।

स्मृत्वेति। रावणः सीतामाह—स्मृत्वेत्यादि दूयस इत्यन्तम्। भूमिसुते! सीते! अनृताः असत्याः अनभिज्ञैरारोपिता इत्यर्थः। गुणाः शौर्यधैर्यादयो यस्य तथोक्तः ते तव भर्ता रामः सदा मां हृदि स्मृत्वा मम राक्षसराजत्वेन राक्षसेषु सर्वत्र मदीयत्वमनुचिन्त्येत्यर्थः। क्रव्यादमात्रेऽपि राक्षससामान्येऽपि विषये—'मात्रं कार्त्स्न्येऽवधारणे' इत्यमरः। धातुकत्वादिस्वजातिधर्मविरहादवगणनीये राक्षससंज्ञामात्रशरण्ये यस्मिन्कस्मिंश्चिद्यातुधानेऽपीति मात्रशब्दापिशब्दयोरर्थः। अतिशयितः विनयः प्रश्रयो यस्य तथोक्तः जायते भवति अतोऽपि एतस्माद्रामादपि हेतोः। एतच्छाब्दात्पञ्चम्यास्तसिल्। ते तव सौख्यं सुखं कुतः कुत्र स्यादिति शेषः। नैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यादित्यर्थः। शूरस्यैवाश्रितजनरक्षणसमर्थत्वादिति भावः। मयि असुनायके प्राणनाथे जाते सति तव सुखं स्यादेव किं दूयसे कुतो हेतोर्दुःखिताऽसि सुखसाधनानामैश्वर्यायत्तत्वादैश्वर्यस्य शौर्यायत्तत्वाच्छूरं मामेव समाश्रितायास्तव सुखं स्यान्न तु भीरुं रामम्। इदमनाकलय्य वृथैव त्वं दूयस इति भावः। उक्तं चेदं रावणेन श्रीरामायणे—

देवि नेह भयं कार्यं मयि विश्वसिहि प्रिये।
विचित्राणि च माल्यानि चन्दनान्यगरूणि च।।
विविधानि च वासांसि दिव्यान्याभरणानि च।
महार्हाणि च पानानि शयनान्यासनानि च।।
गीतं नृत्तं च वाद्यं च लभ मां प्राप्य मैथिलि।।

इत्यादिना। सीता प्रत्याह—किमित्यादि वदेत्यन्तम्। रे! खलमते! दुर्बुद्धे! दुर्वचः किं जल्पसि? कुतः प्रलपसि? भूयोऽपि पुनरपि इदं दुर्वचः न वद मा वादीरित्यर्थः। नञत्र निषेधार्थकः। 'नञभाविनिषेधयोः' इत्युक्तेः।

प्रत्युत्तरनिगूढार्थस्तु—रे खलमते! भूयोऽपि किं दुर्वचः जल्पसि? अर्थः प्राग्वद्बोध्यः। ने नकारस्थान इत्यर्थः। दं दकारं वद। एवं च—'स्मृत्वा मां हृदि जायतेऽतिविदयः क्रव्यादमात्रेऽपि ते भर्ता भूमिसुते सदादृतगुणस्तेऽतोऽपि सौख्यं कुतः। जाते मय्यसुदायके तव सुखं स्यादेव किं दूयसे' इति वदेत्यर्थः। हे! भूमिसुते! सद्भिः गुणग्राहिभिस्साधुभिः आदृताः गुणाः शौर्यधैर्यादयो यस्य तथोक्तः ते भर्ता मां हृदि स्मृत्वा त्वदपहरणेन महापराधिनं मामनुचिन्त्येत्यर्थः। क्रव्यादमात्रेऽपि मज्जातीय एवापि स्वयमनपराधिन्यपीत्यर्थः। अतिविदयः अत्यन्तनिर्दयः जायते। अतोऽपि एतस्माद्रामादपि अपादानात् ते तव कुतः कस्मादन्यस्मात्सौख्यं स्यादिति शेषः। सकलरक्षःकुलोन्मूलनपर्याप्तशौर्यसम्पत्कात् तस्मादेव सौख्यं नान्यस्मादित्यर्थः। ननु—तथाविधादपि तस्मान्न खल्विदानीं मम सुखमिति चेदाह—जात इत्यादि। मयि असुदायके प्राणदायिनि जाते सति रणभुवि मृते सतीत्यर्थः। ददातेः कर्तरि ण्वुल्यकादेशः। 'आतो युक्' इत्यादिना युगागमः। शेषषष्ठ्या समासः। 'तृजकाभ्यां कर्तरि' इति प्रतिषेधाद् याजकादेश्चाना-कृतिगणत्वात्। तव सुखं स्यादेव किं दूयसे? तं कालमप्रतीक्षमाणैवात्रान्तरे कुतो दुःखिताऽसीत्यर्थः। प्रतिदत्ताक्षरमिदं चित्रम्। वृत्तं पूर्ववत्।।२१।।

श्लोकार्थ—रावण ने सीता से कहा—हे भूमिसुते! आरोपित शौर्यादिगुणों से युक्त तुम्हारे पति मुझको स्मरण करके राक्षस सामान्य के विषय में भी अत्यन्त विनीत हो जाते हैं। इस प्रकार के राम से तुम्हें सुख कैसे मिल सकता है, अर्थात् सुख सम्भव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नहीं है। मेरे प्राणनाथ (पति) हो जाने पर तुम्हें सुख होगा ही, क्यों दुःखित हो रही हो, अर्थात् मेरे परामर्श को अस्वीकार करके तुम अनायास दुःखी हो रही हो।

रावण के इस कथन के अनन्तर देवी सीता ने प्रत्युत्तर देते हुए कहा—हे रावण! क्या प्रलाप कर रहे हो, पुनः इस दुर्वचन को मत बोलना।

विशेषार्थ—सीता ने रावण से कहा—क्यों बार-बार दुर्वचन का प्रलाप कर रहे हो, नकार के स्थान पर दकार बोलो। तदनुसार श्लोकार्थ सम्पन्न होता है—

रावण ने सीता से कहा—हे भूमिसुते! सत्पुरुषों के द्वारा आदृत शौर्यधैर्यादि गुणों से सम्पन्न तुम्हारे पति राम, मुझको हृदय में स्मरण करके राक्षस सामान्य के प्रति भी अत्यन्त कठोर हो जाते हैं। ऐसे राम के अतिरिक्त किससे सुखी हो सकती हो, मेरी मृत्यु के अनन्तर तुम्हें सुख होगा ही, क्यों दुःखी हो।

विशेषार्थ का आधार—**ने दं वद**॥२१॥

जुष्टो मन्त्रिजनेन सङ्गतधिया मद्वन्न कश्चित्प्रभुः
प्राप्तात्युज्ज्वलकीर्तिसंहतिरहं तैस्तैश्चरित्रैर्निजैः।
रामो नार्हति तुल्यतां जनकजे सङ्ग्रामसिंहस्य मे
सर्वं सत्यमरे परं त्वनुचितः संन्यास एकस्तव॥२२॥

जुष्ट इति। रावणः सीतामाह—जुष्ट इत्यादि म इत्यन्तम्। जनकजे! जानकि! मद्वत् मया तुल्यम् अहमिवेत्यर्थः। तृतीयान्ताद्वतिः। सङ्गता हृदयङ्गमा देशकालपात्राद्यनुरोधेन सामाद्युपायप्रयोगविज्ञानरूपत्वादिति भावः। धीर्यस्य तथोक्तेन मन्त्रिजनेन जुष्टः सेवितः प्रभुः कश्चित् कोऽपि न नास्ति। अहमेक एव सन्मन्त्रिपरिवृतः प्रभुरित्यर्थः। अत एव अहं निजैः तैस्तैः चरित्रैः कुबेरनिरसनपुष्पकापहरणलङ्काक्रमणादिभिरिति भावः। प्राप्ता अत्युज्ज्वलानां कीर्तीनां संहतिर्येन तथोक्तः अस्मीति शेषः। 'स्त्रियां तु संहतिर्बृन्दम्' इत्यमरः। सङ्ग्रामे युद्धे सिंहस्य तद्वद्दुर्धर्षस्येत्यर्थः। मे तुल्यतां रामो नार्हति मम च रामस्य च मेरुसर्षपयोरिव महदन्तरमित्यर्थः। सीता प्रत्याह—सर्वमित्यादि तवेत्यन्तम्। अरे! तुच्छ! सर्वं त्वदुक्तमखिलं सत्यमवितथम्। परं तु—संन्यास एकः यतिवेष एवेत्यर्थः। तव अनुचितः अनर्हः यदि त्वं सन्मन्त्रिसहायस्सर्वाद्भुतचरित्रस्समरवीरश्च कुतस्तर्हि मदपहारसमये रघुवीरात्सन्त्रस्य यतिवेषेणात्मानमपावृणोः, अतस्त्वदुक्तस्वोत्कर्षस्सर्वोऽप्यपहासास्पदमेव। इदमबुद्ध्वा किं वृथा कत्थस इत्यर्थः। प्रतिवचननिगूढार्थस्तु—अरे! सर्वं त्वदुक्तिवर्णजालमखिलं सत्यम् उचितमित्यर्थः। परन्तु समः समित्युपसर्गस्य यद्वा अनुस्वारपरकस्य स इति वर्णस्य न्यास एकः न्यसनमेव तस्मिन् वर्णजाले इत्यर्थाल्लभ्यते अनुचित इति। एवं च—यथायोगं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परसवर्णपरकं वाऽनुस्वारपरकं वा स इति वर्णं परिहृत्य 'जुष्टो मन्त्रिजनेन गतधिया मद्वन्न कश्चित्प्रभुः प्राप्तात्युज्ज्वलकीर्तिहतिरहं तैस्तैश्चरित्रैर्निजैः। रामो नार्हति तुल्यतां जनकजे ग्रामसिंहस्य मे' इति वदेत्यर्थः। मद्वत् गता धीर्यस्मात्तथोक्तेन बुद्धिहीनेनेत्यर्थः। मन्त्रिजनेन। जुष्टः प्रभुः कश्चित् कोऽपि न नास्ति। अहं निजैः तैस्तैश्चरित्रैः यतिवेषधारणादिभिरिति भावः। प्राप्ता अत्युज्ज्वलानां कीर्तीनां हतिः हानिः येन तथोक्तः अस्मीति शेषः। ग्रामसिंहस्य शुनकस्य—'श्वा ग्रामसिंहश्शुनको भषको ग्रामपालकः' इति निघण्टुसारे। तद्वन्नीचस्येत्यर्थः। मे तुल्यतां रामः पुरुषोत्तम इति भावः। नार्हति। च्यावित्ताक्षरमिदं चित्रम्। वृत्तं प्राग्वत्।।२२।।

श्लोकार्थ—रावण ने सीता से कहा—हे जानकि! मेरी तरह, सङ्गत (साम, दाम, दण्ड, भेदादि नीतियों से युक्त) बुद्धि है जिनकी ऐसे मन्त्रियों से सेवित सामर्थ्यशाली कोई नहीं है। इसीलिए मैं अपने उन-उन चरित्रों (कुबेरनिरसन-पुष्पकापहरणेत्यादि) के द्वारा अत्युज्ज्वल कीर्तिसमूह को प्राप्त कर लिया हूँ। हे जनकजे! युद्ध के मैदान में सिंह के सदृश मुझ रावण की समानता को राम प्राप्त नहीं कर सकता है। रावण के इस कथन के अनन्तर देवी सीता ने कहा—अरे नीच! तुम्हारे द्वारा कहा गया सब कुछ सत्य है; किन्तु तुम्हारे द्वारा धारण किया गया यति का वेष अनुचित था।

विशेषार्थ—सीता ने रावण से कहा—अरे! तुम्हारे द्वारा कहा गया सम्पूर्ण अक्षरसमूह सत्य है; किन्तु अनुस्वारपरक स (सं) का प्रयोग अनुचित है, तदनुसार 'सं' इत्याकारक वर्ण का पूर्वोक्त तीनों चरणों में से अपहार कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—समाप्त हो गई है बुद्धि जिनकी ऐसे मन्त्रियों से युक्त मेरी तरह सामर्थ्यशाली कोई नहीं है, इसीलिए अपने उन-उन चरित्रों (यतिवेष-धारणादि) के द्वारा अत्युज्ज्वल कीर्ति से विरहित हो गया हूँ। हे जनकजे! ग्रामसिंह (कुत्ता) के सदृश मुझ रावण की समानता राम प्राप्त नहीं कर सकता।

विशेषार्थ का आधार—**अनुचितः संन्यासः**।।२२।।

मूर्त्या मर्कटसन्निभस्य नियमैः संशोषणात्कानने
काकुत्स्थस्य सदोटजःसंस्थितिजुषो रक्षोजये का कथा।
क्वैषोऽहं जटयाऽन्वितोऽनिशमटव्यध्वाश्रयःस क्व ते
भर्ता जानकि रे विटोक्तिपरिपाट्येवोचिता ते न किम्।।२३।।

मूर्त्येति। रावणः सीतामाह—मूर्त्येत्यादि जानकीत्यन्तम्। हे जानकि! कानने नियमैः उपवासादिभिः संशोषणात् कर्शनात् हेतोः मूर्त्या वपुषा मर्कटसन्निभस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्वद्विकृतस्येत्यर्थः। सदा उटजे पर्णशालायां स्थितिम् अवस्थानं जुषते सेवत इति तथोक्तस्य। 'पर्णशालोटजोऽस्त्रियाम्' इत्यमरः। जुषेः कर्तरि क्विप्। काकुत्स्थस्य कर्तुश्शेषत्वविवक्षायां षष्ठी। रक्षसां जये विषये का कथा? उक्तविधो रामः राक्षसान् जेष्यतीति कथं कथनीयमित्यर्थः। सोऽत्रागत्य राक्षसान् जित्वा मामितो नेष्यतीत्यहो ते दुराशेति भावः। एषोऽहं क्व एष इति मणिकनका-भरणाम्बरविभूषितत्वाद्यभिप्रायेणात्मनो निर्देशः। जटया। जातावेकवचनम्। अन्वितः जटिल इत्यर्थः। अनिशमजस्रम्। अटव्यध्वा अरण्यमार्गः आश्रयो यस्य तथोक्तः स ते भर्ता रामः क्व। मम तस्य चोभयोः कल्पद्रुमवटद्रुमयोरिव महदन्तरमित्यर्थः। तादृशेऽपि तस्मिन्ननुरागेण मामपीदृशं नाद्रियस इत्यहो ते महन्मौग्ध्यमिति भावः। सीता प्रत्याह—र इत्यादि न किमित्यन्तम्। रे! नीच! विटानां षिद्गानां उक्तिपरिपाटी वचनानुक्रम एव ते तव उचिता न किम्? उचितैवेत्यर्थः।

प्रतिवचननिगूढार्थस्तु—रे! ते उक्तिपरिपाटी मूर्त्या मर्कटेत्यादिः प्राग्वदर्थः। विटा विगतटवर्णैव उचिता न किम्? वक्तुमिति शेषः उचितैवेत्यर्थः। एवं च—'मूर्त्या मर्कट' इत्यादि प्रागुक्तं वचनं, 'मूर्त्यामर्कसन्निभस्य नियमैस्संशोषणात्कानने काकुत्स्थस्य सदोजस्थितिजुषो रक्षोजये का कथा क्वैषोऽहं जयान्वितोऽनि-शमव्यध्वाश्रयस्स क्व ते भर्ता जानकि' इति त्वया वक्तुमुचितमित्यर्थः। हे! जानकि! कानने नियमैः संशोषणात् मूर्त्यां वपुषि अर्कसन्निभस्य तपस्सम्भृतया तेजस्सम्पदेति भावः। सतः प्रशस्तस्य—'प्रशस्तेऽभ्यर्हिते च सत्' इत्यमरः। ओजसः प्रभावस्य—'ओजो दीप्तिप्रभावयोः' इति विश्वः। स्थितिं जुषत इति तथोक्तस्य काकुत्स्थस्य रक्षोजये का कथा निरतिशयमार्षं क्षात्रं च तेजोविशेष-मासेदुषा रघुवीरेण लीलयैव राक्षसा निहन्यन्त इति सिद्ध एवार्थः। कुतः पुनरपि वाचा कथनीय इत्यर्थः। एषः एवं दुश्शील इत्यर्थः। अहं क्व? अनिशमजस्रम् अन्वयात्क्रियाविशेषणमेतत् जयेन अन्वितः जित्वर इत्यर्थः। अव्यध्वः सन्मार्ग आश्रयो यस्य तथोक्तः सदाचारसम्पन्न इत्यर्थः। विरुद्धोऽध्वा व्यध्वः स न भवतीत्यव्यध्वः सन्मार्गः। 'उपसर्गादध्वनः' इति समासान्तोऽच्प्रत्ययः। 'व्यध्वो दुरध्वो विपथः' इत्यमरः। स ते भर्ता क्व? मम च तस्य च वायसवैनतेययोरिव महदन्तरमित्यर्थः। स्वयमेवेदमुक्तवती सीता श्रीरामायणे—

यदन्तरं वायसवैनतेययोस्तदन्तरं दाशरथेस्तवैव च।

इति। इदं च च्यावितातक्षरं नाम चित्रम्। वृत्तं पूर्ववत्॥२३॥

श्लोकार्थ—रावण ने सीता से कहा—हे जानकि! जंगल से उपवासादि के कारण कृश हुये मर्कट (बन्दर) की तरह विकृत शरीर धारण करने वाला तथा सदा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर्णकुटी में रहने वाला राम, राक्षसों पर विजय प्राप्त करेगा, ऐसी आशा व्यर्थ है। कहाँ जटा धारण करने वाला एवं जंगल का मार्ग ही जिसका आश्रय है ऐसा तुम्हारा पति राम और कहा मैं। रावण के इस तरह कहने पर देवी सीता ने प्रत्युत्तर देते हुए कहा—अरे नीच! स्वच्छन्द भाषण करने वाले तुम्हारे लिए क्या उचित नहीं है, अर्थात् सब उचित ही है।

विशेषार्थ—देवी सीता ने रावण से कहा—रे नीच! तुम्हारे द्वारा कही गयी बन्दर की तरह शरीर धारण करने वाला इत्यादि उक्तिपरिपाटी (कथनपरम्परा) 'ट'वर्ण-परित्यागपूर्वक ही (वि-ट) उचित है, तदनुसार उक्त वर्णजाल में 'ट' वर्ण का परित्याग कर देने पर श्लोकार्थ सम्पन्न होता है—

रावण ने सीता से कहा—हे जानकि! जंगल में तपश्चर्यादि नियमों के कारण सूर्य के समान सदा ओज से परिपूर्ण राम का राक्षस विजय के विषय में क्या कहना, अर्थात् अवश्यमेव जयश्री प्राप्त करेंगे। कहाँ मैं और कहाँ जयश्री से युक्त सन्मार्ग पर चलने वाले तुम्हारे पति राम।

विशेषार्थ का आधार—**विटोक्तिपरिपाटी (विगत टकारोक्ति)**॥२३॥

Central Library Gurukul Kangri University Haridwar-249404

त्वल्लाभे मम निग्रहे जययशोलाभेऽप्यसत्यादरो
भर्ता ते मिथिलेन्द्रपुत्र्यसमरश्लाघ्यः क्व वा तिष्ठतु।
मय्याधेहि दृशं दयारसहितां क्षिप्रं भवेच्छर्म ते
किं संजल्पसि यामिनीचरकुलोच्छेदिन्नरे दुर्मते।।२४।।

त्वल्लाभ इति। रावणः सीतामाह—त्वल्लाभ इत्यादि शर्म त इत्यन्तम्। हे मिथिलेन्द्रपुत्रि! समरश्लाघ्यो न भवतीत्यसमरश्लाघ्यः अवीर इत्यर्थः। अत एव त्वल्लाभे तव प्राप्तौ मत्सकाशादिति भावः। मम निग्रहे जयेन यद्यशः तस्य लाभेऽपि। समासेऽसमासे च सर्वत्र कर्मणि षष्ठी। असत्यः आदरो यस्य तथोक्तः ते भर्ता रामः क्व वा तिष्ठतु तादृशात्तस्मात्सुखावाप्तिदुराशां जहिहीत्यर्थः। दयैव रसः तेन चिरमयं मामभ्यर्थयते तपस्वीत्यनुकम्पयेत्यर्थः। हितां प्रसन्नां दृशं मयि आधेहि निधेहि ते तव क्षिप्रम् अविलम्बेनैव शर्म सुखं भवेत्, मयि प्रसन्नाया एव तव सुखं नान्यथेत्यर्थः। सीता प्रत्याह—किमित्यादि दुर्मत इत्यन्तम्। यामिनीचराणां कुलमुच्छिनत्तीति तथोक्तस्य सम्बुद्धिः दुर्मते! अरे! तुच्छ! किं संजल्पसि? मैवं पुनस्संजल्पीरित्यर्थः। यामिनीचरकुलोच्छेदेनान्यत्फलमस्य संजल्पितस्येति भावः। अनेन महान् क्रोधस्सीताया द्योत्यते।

प्रतिवचननिगूढार्थस्तु—यामिनीचरकुलोच्छेदिन्! अरे! दुर्मते! सं स इत्याकारकवर्णं किं जल्पसि मा तं जल्पीरित्यर्थः। एवं च—'त्वल्लाभे मम निग्रहे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जययशोलाभेऽप्यत्यादरो भर्ता ते मिथिलेन्द्रपुत्र्यमरश्लाघ्यः क्व वा तिष्ठतु मय्याधेहि दृशं दयारहितां क्षिप्रं भवेच्छर्म ते' इति वदेत्यर्थः। हे मिथिलेन्द्रपुत्रि! त्वल्लाभे मम निग्रहे जययशोलाभेऽपि अतिशयितः आदरो यस्य तथोक्तः। अमरैः देवैः श्लाघ्यः स्तुत्यः किमुतान्यैरिति भावः। ते भर्ता क्व वा तिष्ठतु। दयारहितां सत्यपि पातिव्रत्यमहिम्नि कथमहं शापतः प्राणिहिंसां कुर्यामित्यनुकम्पयानया रहितामित्यर्थः। दृशं मयि आधेहि दाहात्मिकया दृशा मां पश्येत्यर्थः। क्षिप्रं तव शर्म भवेत् महानुभावो रामो मां निहनिष्यतीत्यसंशयमेव। किन्तु—तेनैवात्रागतेनायं निहन्यतां ततोऽस्माद्बन्धनाद्विमुक्ताया मम सुखं स्यादिति किं तवानया चिरकालप्रतीक्षया पातिव्रत्याग्निनैव मां दग्ध्वा क्षिप्रं सुखमवाप्नुहीति तात्पर्यार्थः। च्यावितक्षरमिदं चित्रम्। वृत्तं पूर्ववत्॥२४॥

श्लोकार्थ—रावण ने सीता से कहा—हे मिथिलेन्द्रपुत्रि! राम युद्ध में प्रशंसा अर्थात् विजय नहीं प्राप्त कर सकते, इसलिए मेरे पास से तुम्हारी प्राप्ति एवं मुझसे विजयश्री की प्राप्तिरूप मिथ्या प्रतिष्ठा है जिसकी, ऐसे कहाँ तुम्हारे पति राम, अर्थात् श्रीराम से सुखावाप्ति की दुराशा छोड़ दो। करुणा एवं प्रसन्नता से पूर्ण दृष्टि मेरी तरफ करो, शीघ्र ही तुम्हें सुख की प्राप्ति होगी। रावण के इस कथन के अनन्तर सीता ने प्रत्युत्तर देते हुए कहा—राक्षसों के कुल का विनाश करने वाले दुष्टमति क्या प्रलाप कर रहे हो।

विशेषार्थ—सीता ने रावण से कहा—हे राक्षस कुल का विनाश करने वाले दुष्टमति 'स' इत्याकारक वर्ण को मत बोलो (किं संजल्पसि), तदनुसार 'स' इत्याकारक वर्ण का अपहार कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे मिथिलेन्द्रपुत्रि! तुम्हारी प्राप्ति एवं मुझसे जय तथा यश के लाभ में भी अत्यन्त आदर है जिसका ऐसे देवताओं के द्वारा स्तुत्य कहाँ तुम्हारे पति। दया से रहित अर्थात् क्रोधपूर्ण दृष्टि से मुझको देखो, शीघ्र ही तुम्हें सुख की प्राप्ति होगी, अर्थात् महानुभाव श्रीराम निश्चय ही मेरा वध करेंगे।

विशेषार्थ का आधार—**किं संजल्पसि**॥२४॥

क्षोणीनन्दिनि कोऽस्ति भासुरतमो मद्वत्त्रिलोक्यामपि
स्यात्किं मे चरिते श्रुते नवसुधोदन्तश्रुतीच्छा सताम्।
मां लब्ध्वा सुखराशिभागियमिति प्रख्यायसे नान्यथा
वाचोऽस्याः कुमते भवेत्तव वृथासुत्यागतः सार्थता॥२५॥

क्षोणीति। रावणः सीतामाह—क्षोणीत्याद्यन्यथेत्यन्तम्। हे क्षोणीनन्दिनि! त्रिलोक्यामपि त्रिष्वपि लोकेष्वित्यर्थः। मद्वत् मया तुल्यं 'तेन तुल्यम्' इति वतिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहमिवेत्यर्थः। 'प्रत्ययोत्तरपदयोश्च' इत्यस्मदो मपर्यन्तस्य मादेशः। अतिशयेन भासते ताच्छील्येनेति भासुरतमः। 'भञ्जभासभिदो घुरच्' इति घुरच्प्रत्ययः। 'तदन्तादतिशायने तमप्' इति तमप्। कोऽस्ति न कोऽपीत्यर्थः। मे मम चरिते दिक्पालाक्रमणादौ इति भावः। तत्प्रतिपादके वाङ्मय इत्यर्थः। श्रुते सति। सतां विदुषाम्—'सन् सुधीः कोविदो बुधः' इत्यमरः। नवायाः सुधायाः य उदन्तः वार्ता माधुर्यादिगुणप्रशंसिनी कथेत्यर्थः। तस्य श्रुतौ श्रवणे इच्छा स्यात्किं न स्यादेवेत्यर्थः। सुधामप्यवधीरयति माधुर्येण मम चरित्रमित्यर्थः। त्वं मां लब्ध्वा इयं सीता सुखानां राशिं भजत इति सुखराशिभाक् 'भजो ण्विः' इति ण्विः। इति प्रख्यायसे प्रसिद्ध्या निगद्यसे। अन्यथा—मां न लभसे चेदित्यर्थः। न। सुखराशिभागिति न प्रख्यायस इत्यर्थः। जगत्यहमेक एव सकलसुखशेवधिः पुमानिति भावः। सीता प्रत्याह—वाच इत्यादि सार्थतेत्यन्तम्। रे कुमते! दुर्बुद्धे! अस्याः प्रागुक्तायाः तव वाचः वचनस्य। वृथा व्यर्थं यथातथा इष्टसिद्धि-रूपप्रयोजनविरहेणैवेत्यर्थः। असूनां प्राणानां त्यागतः त्यागेन सार्थता साफल्यं भवेत् प्राणत्याग एव तवास्य प्रलपितस्य फलं न ततोऽन्यत्किञ्चिदपीत्यर्थः।

प्रतिवचननिगूढार्थस्तु—रे कुमते! अस्याः क्षोणीत्यादेरन्यथेत्यन्तायाः तव वाचः वृथा व्यर्थः स चासौ सुश्च तस्य समुचितार्थबोधनाननुकूलत्वाद्वन्ध्यस्य सु इत्याकारकस्य वर्णस्येत्यर्थः। त्यागतः सार्थता भवेत्। एवञ्च—क्षोणीत्यादि त्वदुक्तं वचनं सु इत्याकारकवर्णविरहेण 'क्षोणीनन्दिनि कोऽस्ति क्षारतमो मद्वत्त्रिलोक्यामपि स्यात्किं मे चरिते श्रुते न वधोदन्तश्रुतीच्छा सतां मां लब्ध्वा खराशिभागियमिति प्रख्यायसे नान्यथा' इत्युक्तं चेदुचितार्थो भवेदित्यर्थः। हे क्षोणीनन्दिनि! त्रिलोक्यामपि मद्वत् भारतमः सकलसज्जनप्रतिकूलाचरणेन पापमस्तित्वात्पापिष्ठस्य च लोकभारभूतत्वादिति भावः। कोऽस्ति अहमेक एव तादृश इत्यर्थः। मे चरिते परदारहरणादौ श्रुते सति सतां सज्जनानां वधस्य मत्कर्मकस्य मे इत्यस्योभयत्रानुषङ्गात् य उदन्तः तस्य श्रुतौ श्रवणे इच्छा न स्यात्किं 'मदीयं दुश्चरितमाकर्णयन्तस्साधवस्सत्वरमस्य खलस्य संहारकथा श्रोतव्या' इति नाभिलषेयुः किमित्यर्थः। सकलसज्जनाभिमते वध्योऽहं दुरात्मेति भावः। त्वं मां लब्ध्वा इयं खरं गर्दभम् अश्नातीति खराशी। ताच्छील्ये णिनिः। तं भजतीति खराशिभाक् इति प्रख्यायसे न अन्यथा गर्दभभक्षकसंसर्गवतीयमिति प्रथां यद्यभिलषसि तर्हि मामेव भजेत्यर्थः। अहमेक एव गर्दभभक्षक इति भावः। 'रासभा गर्दभाः खराः' इत्यमरः। इदं च्यावितताक्षरं चित्रम्। वृत्तं पूर्ववत्॥२५॥

श्लोकार्थ—रावण ने सीता से कहा हे पृथ्वीपुत्रि! मेरी तरह अत्यन्त तेज से युक्त त्रिलोक में कौन है। मेरा चरित्र (दिक्पालाक्रमणादि) सुनने के अनन्तर विद्वानों

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

की अभिनवामृत-स्वरूप माधुर्यादि गुणों से परिपूर्ण कथा के श्रवण की इच्छा होती है क्या? अर्थात् मेरी कथा अमृत को भी फीका कर देने वाली है, तुम मुझको प्राप्त करके सुखसमूह की पूर्णता के कारण प्रसिद्धि को प्राप्त करोगी, अन्यथा नहीं। रावण के इस कथन के अनन्तर देवी सीता ने कहा—रे दुर्बुद्धे! तुम्हारे द्वारा कहा गया वचन व्यर्थ है। प्राणत्याग ही तुम्हारे इस प्रलाप का फल है।

विशेषार्थ—सीता ने रावण से कहा—रे दुष्टमति! तुम्हारी वाणी व्यर्थ है। उसकी सार्थकता 'सु' इत्याकारक वर्ण के त्याग से होगी(सुत्यागतः), तदनुसार पूर्वोक्त तीनों चरणों में से 'सु' इत्याकारक वर्ण का अपहार कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे पृथ्वीपुत्रि! मेरी तरह तीनों लोकों में भार (पाप) से युक्त कौन है। परस्त्रीहरणादिरूप तथा सज्जनों के वध रूप मेरे चरित को सुनने की इच्छा क्या नहीं होती है। तुम मुझको प्राप्त करके गर्दभभक्षकसंसर्गवती के रूप प्रशंसा प्राप्त करोगी, अर्थात् यदि इस तरह की प्रशंसा प्राप्त करना चाहती हो तो मुझे स्वीकार करो, मैं अकेला ही गर्दभभक्षक (खराशि=खरम् अश्नाति) हूँ।

विशेषार्थ का आधार—**सु-त्यागतः**।।२५।।

तापोन्मेषविवर्जितो युधि मितौजस्काभिमुख्यातिगः
सीते सादितदुर्जयप्रतिरथः कृत्या विमूढाशयः।
स्थानायत्तजयेन्दिरश्च किमहं श्रोत्रेऽस्मि लग्नो न ते
प्रागेव त्वमरे प्रसङ्गत इह श्रोत्रेऽसि लग्नो मुहुः।।२६।।

तापोन्मेषेति। रावणः सीतामाह—तापोन्मेषेत्यादि न त इत्यन्तम्। हे सीते! अहं युधि तापस्य उन्मेषेण उद्गमेन विवर्जितः परित्यक्तः अपरिखिन्न इत्यर्थः। मितमोजो येषां ते मितौजस्काः दुर्बला इत्यर्थः। तेषाम् आभिमुख्यमतीत्य गच्छतीति मितौजस्काभिमुख्यातिगः अभिमुखागतानपि दुर्बलाननादृत्यान्यतोगामीत्यर्थः। सादिताः संहता दुर्जयाः जेतुमशक्याः प्रतिरथाः प्रतिरथिकाः येन तथोक्तः। कृत्येषु कर्तव्येषु विषये अविमूढः पटुः आशयो यस्य तथोक्तः कार्येष्वप्रमत्त इत्यर्थः। स्थाने स्वाधिष्ठाने आयत्ता अधीना जयेन्दिरा यस्य तथोक्तश्च ते तव श्रोत्रे लग्नः त्वया श्रुत इत्यर्थः। नास्मि किं? किमिति प्रश्ने। सीता प्रत्याह—प्रागित्यादि मुहुरित्यन्तम्। अरे तुच्छ! त्वं प्रागेव पुरैव प्रसङ्गतः प्रसङ्गेन। सार्वविभक्तिकस्तसिः। कुतश्चित्प्रसक्ति-वशादित्यर्थः। मुहुः इह मदीय इत्यर्थः। श्रोत्रे लग्नोऽसि पुरैवासकृन्मया श्रुतोऽसीत्यर्थः। प्रतिवचननिगूढार्थस्तु—अरे! त्वं प्रागेव प्रथमत एव स्वगुण-प्रतिपादकविशेषणपदाक्षरेभ्यः सर्वेभ्योऽप्यादित एवेत्यर्थः। प्रेण प्र इत्याकारकवर्णेन संगतः सम्बद्धः। प्रसमुपसर्गद्वयपूर्वकाद्गमेः कर्तरि क्तः। इह श्रोत्रे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुहुः लग्नोऽसि। एवञ्च—'त्वं युधि प्रतापोन्मेषविवर्जितः प्रमितौजस्काभिमुख्यातिगः प्रसादितदुर्जयप्रतिरथः प्रकृत्या विमूढाशयः प्रस्थानायत्तजयेन्दिरश्च श्रुतोऽसि' इत्यर्थः। प्रतापस्य उन्मेषेण अभिव्यक्त्या विवर्जितः निष्प्रताप इत्यर्थः। प्रमितं सुज्ञातं प्रसिद्धमिति यावत्—ओजो येषां तेषामाभिमुख्यमतीत्य गच्छतीति प्रमितौजस्काभिमुख्यातिगः हन्युरेव मामिति भयादिति भावः। प्रसादिताः प्रसादवन्तः कृताः प्रणामादिभिरिति भावः। प्रसादवच्छब्दात्तत्करोतीत्यर्थकण्यन्तात्कर्मणि क्तः। णाविष्ठवद्भावेन 'विन्मतोर्लुक्' इति लुक्। दुर्जयाः प्रतिरथाः येन तथोक्तः। प्रकृत्या स्वभावेन विमूढः आशयः यस्य तथोक्तः मन्दबुद्धिरित्यर्थः। प्रस्थाने गमने आयत्ता व्यग्रा जयेन्दिरा जयाभिमानिनी श्रीः यस्मात्तथोक्तः। 'प्रस्थानं गमनं गमः' इत्यमरः। अधिदत्ताक्षरमिदं चित्रम्—

कस्मिंश्चिदधिके वर्णे दत्तेऽर्थो यत्र भिद्यते।
अधिदत्ताक्षरं नाम चित्रं तदिति बुद्ध्यताम्।।

इति तल्लक्षणात्। वृत्तं पूर्ववत्।।२६।।

श्लोकार्थ—रावण ने सीता से कहा—हे सीते! मैं समराङ्गण में तापप्राकट्य दुःख, चिन्ता इत्यादि से रहित हूँ। सम्मुख आए हुए दुर्बलों का अनादर करके दूसरी जगह चला जाता हूँ, अर्थात् उनका वध नहीं करता हूँ। जिन पर विजय नहीं प्राप्त की जा सकती ऐसे दुर्जेय योद्धाओं का मैं संहार करने वाला हूँ तथा कर्तव्य में कुशल अर्थात् प्रमाद नहीं करता हूँ। विजयश्री मेरे निवासस्थान के अधीन है। तुमने जैसा सुना है वैसा मैं नहीं हूँ क्या? रावण के इस कथन के अनन्तर सीता ने प्रत्युत्तर देते हुए कहा—अरे तुच्छ! तुम पहले ही प्रसङ्गवशात् श्रवणीयता को प्राप्त कर चुके हो।

विशेषार्थ—सीता ने रावण से कहा—तुम पहले ही, अपने गुणों का वर्णन करने वाले वर्णसमूह में 'प्र' इत्याकारक वर्ण से सम्बद्ध रूप में सुने गये हो तदनुसार गुणप्रतिपादक प्रत्येक विशेषण वचनों में 'प्र' का योग कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे सीते! मैं समराङ्गण में प्रतापाभिव्यक्ति से रहित अर्थात् निष्प्रताप तथा मृत्यु के भय से प्रसिद्ध ओजस्वी के पास जाने वाला, योद्धाओं पर विजय न प्राप्त करने वाला, स्वभाव से मन्दबुद्धियुक्त तथा विजयलक्ष्मी से सर्वथा रहित हूँ।

प्रस्तुत श्लोक में अधिदत्तक्षर नामक अलङ्कार है। विशेषार्थ का आधार—प्रसङ्गतः ('प्र' इत्याकारकवर्णेन सङ्गतः)।।२६।।

सदायत्तं सत्याविकलमपि मां विद्ध्यवनिजे
सुधेत्येव ग्राह्या त्वदनुनयनोक्तिर्मम न किम्।
सुखाधिक्यं रामादपि मयि विमूढा अपि विदन्त्य-
सम्बद्धं मे न श्रुतिमधम तेऽभ्येति वचनम्।।२७।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सदिति। रावणः सीतामाह—सदायत्तमित्यादि विदन्तीत्यन्तम्। अवनिजे! मां सतां साधूनाम् आयत्तमधीनं विधेयमित्यर्थः। सत्येन मनोवाक्कर्मस्वभिन्न-वृत्तित्वरूपेण सत्यव्रतेन अविकलमपि अरहितं च विद्धि जानीहि। मम सम्बन्धिनी तव। कर्मणि षष्ठी। अनुनयनस्य उपलालनस्य। तादर्थ्ये षष्ठी। उक्तिः सुसुधेत्येव अमृतमित्येव मत्वेति शेषः। ग्राह्या आदरणीया न किम्? अमृतायितमेव त्वामनुनेतुं मया प्रयुक्तं वचनमित्यर्थः। ईदृशेन वचनेनोपलाल्यमानाऽपि मयि नानुरज्यस इत्यहो ते मौर्ख्यमिति भावः। रामादपि। विभागनिर्देशार्था पञ्चमीयम्। मयि विद्यमानमिति शेषः। मत्तो जायमानमित्यर्थः। सुखानाम् आधिक्यं बाहुल्यं विमूढा अपि विदन्ति किं पुनः प्राज्ञा इति वाक्यशेषः। त्वं तु न जानासीत्यहो महदाश्चर्यं ममेति भावः। सीता प्रत्याह—असम्बद्धमित्यादि वचनमित्यन्तम्। रे अधम! असम्बद्धं प्रथमवाक्यस्य द्वितीयवाक्येन तयोस्तृतीयवाक्येन च मिथोऽर्थतस्सम्बन्ध-रहितमित्यर्थः। ते वचनं मे श्रुतिं नाभ्येति मया न श्रूयत इत्यर्थः। एतेनापहासानादरौ द्योत्येते।

प्रतिवचननिगूढार्थस्तु—अधम! रे नीच! ते वचनं सदायत्तमित्यादि प्रागुक्तं नास्ति स यस्मिन् तत् असं सकाररहितं सदित्यर्थः। मेन मकारेण बद्धं योजितं सत् सकारस्थानापन्नमकारं सदित्यर्थः। श्रुतिं ममेत्यर्थात्सिद्ध्यति। अभ्येति श्राव्यतां गच्छतीत्यर्थः। एवञ्च—'मदायत्तं मत्या विकलमपि मां विद्ध्यवनिजे मुधेत्येव ग्राह्या त्वदनुनयनोक्तिर्मम न किं मुखाधिक्यं रामादपि मयि विमूढा अपि विदन्ति' इत्येव त्वयोक्तमहं जानामीत्यर्थः। हे अवनिजे! मां मदस्य आयत्तम्—'अधीनो निघ्न आयत्तः' इत्यमरः। मत्तमित्यर्थः। मत्या बुद्ध्या विकलमपि विहीनं च। अपिस्समुच्चये—'गर्हासमुच्चय-प्रश्नशङ्कासम्भावनास्वपि' इत्यमरः। विद्धि मम त्वदनुनयनोक्तिः मुधेत्येव व्यर्थेत्येव ग्राह्या ज्ञेया न किम्? 'व्यर्थके तु वृथा मुधा' इत्यमरः। रामादपि मयि मुखाधिक्यं वदनबाहुल्यं विमूढा अपि विदन्ति। एकमेव मुखं रामस्य मम तु दश मुखानि सन्तीत्याबालमखिलजना जानन्तीत्यर्थः। तेन ममैवं वाचाटतायां न विस्मयनीयमिति भावः। प्रतिदत्ताक्षरमिदं चित्रम्। शिखरिणीवृत्तम्। लक्षणं तूक्तम्॥२७॥

श्लोकार्थ—रावण ने सीता से कहा—हे जानकि! मुझको सज्जनों के अधीन एवं सत्य से अविमल अर्थात् युक्त जानो। तुम्हारे उपलालन में मेरे द्वारा कहे गये वचन, अमृत की तरह आदरणीय हैं। मुझको प्राप्त करने के अनन्तर राम की अपेक्षा अधिक सुख प्राप्त करोगी, इसको मूर्ख भी जानते हैं।

रावण के इस कथन के अनन्तर देवी ने कहा—तुम्हारा वाक्य क्रमशः असम्बद्ध है, अर्थात् प्रथम वाक्य का द्वितीय से तथा द्वितीय वाक्य का तृतीय वाक्य से सम्बन्ध

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नहीं है। रे अधम! तुम्हारे वचनों को मैं नहीं सुनती हूँ। इससे रावण का उपहास एवं अनादर द्योतित होता है।

विशेषार्थ—देवी सीता ने रावण से कहा—अरे नीच! रावण! तुम अपनी प्रशंसा में कहे गये शब्दों में सकार के स्थान पर मकार रख देने पर सुने जा सकते हो, तदनुसार सकार के स्थान पर मकार का प्रयोग कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे जानकि! मुझको मद के अधीन तथा बुद्धि से रहित जानो। तुम्हारे उपलालन में मेरे द्वारा कहे गये वचन व्यर्थ ही हैं। राम से भी अधिक मुख वाला मुझे मूर्ख भी जानते हैं। अर्थात् राम के एक ही मुख है और मेरे दश मुख हैं, इस बात को बच्चे तक जानते हैं। इसलिए मेरे कुत्सित भाषण से आश्चर्यचकित नहीं होना चाहिए।

प्रस्तुत श्लोक में प्रतिदत्ताक्षर नामक अलङ्कार तथा शिखरिणी छन्द है। विशेषार्थ का आधार—**असम्बन्द्धम्** (सकाररहितं मकारेण बद्धम्)॥२६॥

जनस्यास्य प्रेष्याश्शशिमुखि महाहेतिमुखरा
विदध्युर्भर्तुस्ते महति विमुखत्वं बत रणे।
निमित्तं तत्रास्मिन्कलय मदयोत्कर्षविभवं
प्रजल्पारे नक्तञ्चर खल न मेऽस्त्यादृतिरिह।।२७।।

जनस्येति। रावणः सीतामाह—जनस्येत्यादि विभवमित्यन्तम्। हे शशिमुखि! अस्य जनस्य ममेत्यर्थः। प्रेष्याः किङ्कराः राक्षसा इत्यर्थः। 'नियोज्यकिङ्करप्रेष्यभुजिष्यपरिचारकाः' इत्यमरः। महति रणे महद्भिः हेतिभिः अस्त्रैः—'हेतिरस्त्रेऽपि नृस्त्रियोः' इति केशवः। मुखराः शब्दायमानास्सन्तः ते भर्तुः रामस्य विमुखत्वं पराङ्मुखत्वं विदध्युः कुर्युः। मदीयभृत्यजनाकृष्टशस्त्र-शब्दश्रवणादेव संत्रस्य रामः पलायेतेत्यर्थः। एवं भीरुस्स कथं सह साक्षान्मयैव योत्स्यत इति भावः। बतेति हर्षे। तत्रास्मिन्विषये तदिदंशब्दाभ्यामुभाभ्यामप्येकस्यैव पूर्वोक्तस्य विषयस्य परामर्शः, दृश्यन्ते हि—'सोऽयं मदान्धहृदयो रघुवीरपत्नीम्' इत्यादय एवंविधाः परश्शताः प्रयोगाः। मम मदीयस्येत्यर्थः। अयोत्कर्षस्य शुभफलावहभाग्यातिशयस्य विभवं समृद्धिमेव निमित्तं हेतुं कलय जानीहि। 'अयश्शुभावहो विधिः' इत्यमरः। एवमनायासेन प्रतिभटापगमादीनि शुभफलान्यावहति मम भाग्यातिशयसमृद्धिरिति जानीहीत्यर्थः। सीता प्रत्याह—प्रजल्पेत्यादि इहेत्यन्तम्। अरे खल! नक्तञ्चर! प्रजल्प प्रलप मे मम इह त्वदीये प्रलापे आदृतिः आदरः श्रवणेच्छेत्यर्थः। न त्वदीयं प्रलपितमहं न श्रोतुमिच्छामीत्यर्थः। एतेनासङ्गतस्तव प्रलाप इति द्योत्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिवचननिगूढार्थस्तु—'अरे खल! नक्तञ्चर! प्रजल्प इह त्वत्प्रजल्पिते मे म इति यो वर्णोऽस्ति तस्मिन्नादृतिः न ममेत्यर्थात्सिद्धिः। एवञ्च—जनस्येत्यादि प्रागुक्तं वचनं मवर्णेन वियोज्य 'जनस्यास्य प्रेष्याश्शशिमुखि हाहेति मुखरा विदध्युर्भर्तुस्ते हतिविमुखत्वं बत रणे निमित्तं तत्रास्मिन्कलय दयोत्कर्षविभवम्' इति वदेत्यर्थः। हे! शशिमुखि! अस्य जनस्य प्रेष्याः रणे हाहा इति मुखराः शोकोद्रेकावबोधकहाहाकारं कुर्वाणास्सन्तः ते भर्तुः हतिविमुखत्वं हन्तुमनुत्साहमित्यर्थः। विदध्युः बतेत्याश्चर्ये। राक्षसान् हन्तुमुद्यतस्यापि रामस्य तेषां हनने पराङ्मुखत्वं भवेदित्याश्चर्यम्। तत्र तस्मिन्विषये रामसम्बन्धिनि राक्षसकर्मकहननविमुखत्वमित्यर्थः। अस्मिन् त्वद्भर्तरि विद्यमानमिति शेषः। दयोत्कर्षविभवं कृपातिशयसमृद्धिमेव निमित्तं कारणं कलय विद्धि 'रामोऽतीव दयालुत्वाद्धाहेति शोचतो राक्षसान्युधि न हन्यात्' इति जानीहीत्यर्थः। च्यविताक्षरमिदं चित्रम्। वृत्तं प्राग्वत्॥२८॥

श्लोकार्थ—रावण ने सीता से कहा—हे चन्द्रमुखि! इस व्यक्ति के अर्थात् मेरे द्वारा भेजे गये राक्षस, महान् अस्त्रों के द्वारा किये गये शब्दों से तुम्हारे पति राम को युद्ध से विमुख कर देंगे, अर्थात् मेरे अनुचरों के द्वारा किये गये शस्त्रों के प्रयोग से निकली हुई ध्वनि से ही भयभीत होकर राम पलायन कर जायेंगे। ऐसे भीरु राम साक्षात् मुझसे कैसे युद्ध कर पायेंगे, इसमें मेरे भाग्यातिशय की समृद्धि को निमित्त जानो।

रावण के इस कथन के अनन्तर देवी सीता ने प्रत्युत्तर देते हुए कहा—अरे निशाचर! तुम्हारे द्वारा किये गये प्रलाप को मैं नहीं सुनना चाहती हूँ।

विशेषार्थ—सीता ने रावण से कहा—तुम्हारे द्वारा कहे गये शब्दों में जो मकार वर्ण है उसे मैं नहीं सुनना चाहती हूँ, अर्थात् मकार को हटाकर बोलो। तदनुसार श्लोकार्थ सम्पन्न होता है—

रावण ने सीता से कहा—हे चन्द्रमुखि! मेरे द्वारा भेजे गये राक्षसों के मुख से निकला हुआ 'हा हा' यह शोक का उद्‌बोधक शब्द तुम्हारे पति को राक्षसवध से विमुख कर देगा। राक्षसों को मारने के लिए उद्यत राम उनके हनन से विमुख हो जायेंगे, यह आश्चर्य है। अतिशय कृपारूपी समृद्धि को ही इसका कारण जानो, राम अत्यन्त दयालु हैं, वे राक्षसों के हा हा यह शोक का उद्‌बोधक शब्द सुनकर राक्षसों का युद्ध के मैदान में वध नहीं करेंगे, यह जानो।

प्रस्तुत श्लोक में च्यविताक्षर नामक अलङ्कार तथा शिखरिणी छन्द है। विशेषार्थ का आधार—**न मेऽस्त्यादृतिरिह** (मे=म-वर्णे)॥२८॥

प्रलापरचितोद्यमः किमहमस्मि काकुत्स्थवत्
स किं स्वजनपालनोद्यमधुरन्धरोऽहं यथा।
ममेव ननु तस्य किं जनकजे महालङ्कताऽ-
स्त्यलातघटितेव ते खल विभाति वाग्दारुणा।।२९।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रलापेति। रावणः सीतामाह—प्रलापेत्याद्यस्तीत्यन्तम्। ननु जनकजे! अहं काकुत्स्थेन तुल्यं काकुत्स्थवत् 'तेन तुल्यम्' इति वतिः। राम इवेत्यर्थः। प्रलापे अनर्थके वचसि परिदेवन इत्यर्थः। रचितः उद्यमः व्यवसायो येन तथोक्तः प्रलापैकव्यापृत इत्यर्थः। अस्मि किं? स रामः अहंयथा अहमिव 'इववद्वायथाशब्दौ' इत्याचार्यदण्डी। 'ववा यथा तथैवैवं साम्ये' इत्यमरसिंहश्च। स्वजनानां बन्धूनां पालनस्य उद्यमे धुरन्धरः किं? ममेव तस्य रामस्य महती लङ्का लङ्कापुरी यस्य तस्य भावः महालङ्कता अस्ति किं? सीता प्रत्याह—अलातेत्यादि-दारुणेत्यन्तम्। रे खल! दारुणा क्रूरा ते वाक् अलातैः अङ्गारैः घटितेव गुम्फितेवेत्युत्प्रेक्षा विभाति। 'अङ्गारोऽलातमुल्मुकम्' इत्यमरः। कर्णौ दहतीत्यर्थः।

प्रतिवचननिगूढार्थस्तु—रे खल! दारुणा ते वाक् नास्ति लः लकारः यस्यां सा अला लकाररहिता, तेन घटिता तघटिता तकारेण योजिता च सतीत्यर्थः। लकारस्थानापन्नतकारा सतीति यावत्। विभाति शोभते। इवशब्दोऽत्र वाक्यालङ्कारे—'इवेतीषदर्थोपमोत्प्रेक्षावाक्यालङ्कारेषु' इति गणव्याख्यानम्। एवञ्च—प्रलापेत्यादि त्वयोक्ता वाक्, 'प्रतापरचितोद्यमः किमहमस्मि काकुत्स्थवत्स किं स्वजनपातनोद्यमधुरन्धरोऽहं यथा ममेव ननु तस्य किं जनकजे महातङ्कताऽस्ति' इत्युक्ता चेच्छोभत इत्यर्थः। ननु जनकजे! अहं काकुत्स्थवत् प्रतापेन रचितः उद्यमः येन तथोक्तः अस्मि किम्? केवलं मायाविनो मम प्रतापशालिना श्रीरामेण सादृश्यं घटते किमित्यर्थः। स रामः अहं यथा स्वजनानां पातने विनाशने य उद्यमः तस्मिन्धुरन्धरः किम्? रामो मद्वत्स्वजनविनाशकदुर्व्यापारनिरतः किमित्यर्थः। तस्य रामस्य ममेव महान् आतङ्कः विपद्भयं यस्य तस्य भावः महातङ्कता अस्ति किम्? रामो नित्यमहमिव विपदापत्तिशङ्कया बिभेति किमित्यर्थः। प्रतिदत्ताक्षरमिदं चित्रम्। पृथ्वीवृत्तम्—'जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः' इति लक्षणात्॥२९॥

श्लोकार्थ—रावण ने सीता से कहा—हे जनकजे! क्या मैंने, अनर्थक भाषण के लिए व्यवसाय किया है जिससे ऐसे व्यर्थप्रलाप करने वाले ककुत्स्थकुलोत्पन्न राम की तरह हूँ। क्या वह मेरी तरह अपने लोगों के पालन में धुरन्धर (अग्रगण्य) है। क्या मेरी तरह लङ्का का आधिपत्य राम के पास है। देवी सीता ने प्रत्युत्तर देते हुए कहा—रे नीच! तुम्हारी कठोर वाणी अङ्गारगुम्फित-सी प्रतीत हो रही है, अर्थात् कानों को जलाती हुई-सी लग रही है।

विशेषार्थ—देवी सीता ने रावण से कहा—रे दुष्ट! तुम्हारी कठोर वाणी लकार से रहित एवं तकार से युक्त अर्थात् लकारस्थानापन्न तकार के रूप में सुशोभित हो रही है। तदनुसार लकार के स्थान पर पूर्वोक्त तीनों चरणों में तकार का प्रयोग कर देने पर श्लोकार्थ सम्पन्न होता है—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रावण ने सीता से कहा—हे जनकजे! क्या मैं, प्रताप के लिए किया है प्रयास जिसने उस ककुत्स्थकुलोत्पन्न राम की तरह हूँ। क्या वह अपने बन्धुओं के विनाश के लिए प्रयास करने में मेरी तरह अग्रगण्य है। क्या उनको मेरी तरह महान् विपत्ति का डर बना हुआ है।

प्रस्तुत श्लोक में प्रतिदत्ताक्षर नामक अलङ्कार तथा पृथ्वी छन्द है। जिसका लक्षण है—जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः॥२९॥

लाभात्ते परमामवैमि नियतं सीते ममेमां दशां
तस्मादेव शुभश्रियो मम गृहे पूर्णीभवन्त्यन्वहम्।
लङ्काश्रीःश्रीकला त्वया ननु मदालम्बादियं पाल्यतां
पञ्चत्वं समुपागतं वचनतस्ते वेद्मि रक्षोऽधम।।३०।।

लाभादिति। रावणः सीतामाह—-लाभादित्यादि पाल्यतामित्यन्तम्। ननु सीते! ते तव। कर्मणि षष्ठी। लाभाद्धेतोः मम इमां वर्तमानामित्यर्थः। दशां ज्योतिश्शास्त्रप्रसिद्धामुडुदशां नियतं निश्चयेनेत्यर्थः परमां सर्वोत्कृष्टाम् अवैमि जानामि। जातकस्य लोकोत्तरस्त्रीरत्नप्रभृत्युत्तमफलप्रापिकायास्सुस्थितशुक्रादिशुभ-ग्रहमहादशाया एव परमतया वृद्धपराशरादिभिरुक्तत्वादिति भावः। तस्मादेव त्वल्लाभादेव मम गृहे शुभश्रियः शुभसम्पदः अन्वहम् अहन्यहनि। यथार्थे वीप्सायामव्ययीभावः। 'अनश्च' इति समासान्तष्टच्। पूर्णीभवन्ति मदालम्बात् ममाश्रयणात् त्वया इयमित्यङ्गुलिभ्रमणेन निर्देशः। सकला समग्रा लङ्काश्रीः लङ्काराज्यसम्पदित्यर्थः। पाल्यतां भुज्यतां मामाश्रित्य यथासुखमिमां समृद्धां राज्यसम्पदमुपभुङ्क्ष्वेत्यर्थः। एवमेवोक्तं तेन सीतां प्रति श्रीरामायणे—

लोकेभ्यो यानि रत्नानि सम्प्रमथ्याहृतानि वै।
तानि मे भीरु सर्वाणि राज्यं चैतदहं च ते।।
पिब विहर रमस्व भुङ्क्ष्व भोगान्।
धननिचयं प्रदिशामि मेदिनीं च।।

इत्यादिना। सीता प्रत्याह—रे रक्षोऽधम! ते तव वचनतः लाभादित्यारभ्योक्तेन वचनेनेत्यर्थः। आसन्नमरणज्ञाने करणत्वात् 'कर्तृकरणयोस्तृतीया' इति करणे तृतीया। तृतीयान्तादाद्यादित्वात्तसिप्रत्ययः। पञ्चत्वं मरणं—'स्यात्पञ्चता कालधर्मः' इत्यमरः। समुपागतं समुपस्थितं वेद्मि, आसन्नमेव ते मरणं जानामि। यदेवमवाच्यं प्रलपसीत्यर्थः—

अकार्यकरणे शश्वदवाच्यवचनेऽपि च।
आसन्नस्सर्वथा मृत्युः प्रवर्तयति पूरुषान्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति वचनादिति भावः। प्रतिवचननिगूढार्थस्तु—रे! रक्षोऽधम! ते तव वचनतो वचने। आद्यादित्वात्सप्तम्यन्तात्तसिः। लाभात्ते परमामित्यादि पाल्यतामित्यन्ते पं पकारं चत्वं चकारत्वं समुपागतं सम्प्राप्तवन्तं वेद्मि। एवञ्च—'लाभात्ते चरमामवैमि नियतं सीते ममेमां दशां तस्मादेव शुभश्रियो मम गृहे चूर्णीभवन्त्यन्वहम्। लङ्काश्रीस्सकला त्वया ननु मदालम्बादियं चाल्यताम्' इत्येव त्वमवादीरिति वेद्मीत्यर्थः। ननु सीते! ते लाभात् मम इमां दशां नियतं चरमाम् अन्त्याम्। मारकग्रहनेतृकामित्यर्थः। अवैमि त्वामपहृतवतो मम रामेण निधनस्यावश्यकत्वादिति भावः, तस्मादेव ममासन्नमरणत्वादेवेत्यर्थः। मम गृहे शुभश्रियः अन्वहं चूर्णीभवन्ति। दिने दिने शुभलक्षणान्यवसीदन्तीत्यर्थः। त्वया सकला इयं लङ्काश्रीः मत् मद्रूपात् आलम्बात् अधिष्ठानात् चाल्यताम् अपसार्यताम् अन्यथाक्रियतामित्यर्थः। अत्र चलेरन्यथाकरणार्थत्वेनाकम्पनार्थत्वादमित्वं बोध्यम्। प्रतिदत्ताक्षरमिदं चित्रम्। शार्दूलविक्रीडितं वृत्तम्। लक्षणं तूक्तम्॥३०॥

श्लोकार्थ—रावण ने सीता से कहा—सीते! तुम्हारे लाभरूप हेतु से मेरी ज्योतिषशास्त्रप्रसिद्ध ग्रहदशा निश्चित रूप से सर्वोत्कृष्ट ज्ञात हो रही है। इसीलिए दिन-प्रति-दिन मेरे घर में शुभलक्ष्मी पूर्णता को प्राप्त हो रही है, अर्थात् दिन-प्रति-दिन बढ़ती जा रही है। मेरा आश्रयण करके अर्थात् मुझको पति के रूप में स्वीकार करके सम्पूर्ण लङ्का की राज्यसम्पत्ति का तुम उपभोग करो।

रावण के इस कथन के अनन्तर देवी सीता ने प्रत्युत्तर देते हुए कहा—रे अधम राक्षस! तुम्हारे वचनों से तुम्हारी मृत्यु की उपस्थिति का ज्ञान हो रहा है।

विशेषार्थ—सीता ने रावण से कहा—तुम्हारे द्वारा प्रथम चरण से लेकर तृतीय चरण तक कहे गये वचनों में प्रयुक्त पकार को चकार के रूप में जान रही हूँ। तदनुसार पकार के स्थान में चकार प्रयुक्त हो जाने के अनन्तर प्रस्तुत श्लोकार्थ अधोलिखित प्रकार से सम्पन्न होता है—

रावण ने सीता से कहा—तुम्हारे लाभरूप हेतु से निश्चित रूप से मेरी चरम (अन्तिम) दशा का ज्ञान हो रहा है, इसीलिए शुभलक्ष्मी दिन-प्रति-दिन विनष्ट हो रही हैं। मेरा आश्रयण करके लङ्का की समग्र राज्यसम्पत्ति तुम्हारे द्वारा नष्ट की जाय। प्रस्तुत श्लोक में प्रतिदत्ताक्षर अलङ्कार है। विशेषार्थ का आधार—**पञ्चत्वं समुपागतम्**॥३०॥

आतङ्कोदयदाहकैरतितरां मैथिल्यनेकैर्निजै-
र्व्यापारैर्निहतापदस्मि न कुतोऽप्यालोकयाम्याहतिम्।
हातुं मृत्युवशत्वमेव कृतसङ्कल्पोऽस्मि वीक्षस्व मां
किं रे हेयमनाकलय्य कुरुषे निर्लज्जमात्मस्तवम्॥३१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आतङ्केति। रावणः सीतामाह—आतङ्केत्यादि मामित्यन्तम्। हे मैथिलि! अहं अतितरामत्यन्तम्। आतङ्कस्य भयस्य शत्रुजनाभ्यवस्कन्दनादि-सम्भावनामूलकस्येति भावः। य उदयस्समुद्गमः तस्य दाहकैः विध्वंसकैरित्यर्थः। निजैः अनेकैः व्यापारैः करणैः दुर्गरचनादिभिरिति भावः। निहता नाशिता आपत् सैन्यक्षयादिः येन तथोक्तोऽस्मि कुतोऽपि कस्माच्चिदपि आहतिमुपघातं नालोकयामि। मृत्युवशत्वमेव मरणमेव हातुं त्यक्तुम् अमर्त्य एव भवितुमित्यर्थः। कृतः सङ्कल्पः येन तथोक्तोऽस्मि मां वीक्षस्व ममैवं प्रभावतां सम्यगाकलयेत्यर्थः। सीता प्रत्याह—किमित्यादि स्तवमित्यन्तम्। रे नीच! हेयं दोषम् अनाकलय्य अबुद्ध्वा आत्मस्तवदोषमविगणय्येत्यर्थः। निर्लज्जं निस्त्रपं यथा तथा आत्मस्तवं किं कुरुषे? मैवं वृथाऽऽत्मानं स्तोष्ठा इत्यर्थः।

प्रतिवचननिगूढार्थस्तु—रे नीच! हे हकारस्थाने यं यकारम् अनाकलय्य असंयोज्य निर्लज्जं यथा तथा आत्मस्तवं किं कुरुषे? हकारस्थाने यकारं संयोज्य—'आतङ्कोदयदायकैरतितरां मैथिल्यनेकैर्निजैर्व्यापारैर्नियतापदस्मि न कुतोऽप्यालोकयाम्यायतिं यातुं मृत्युवशत्वमेव कृतसङ्कल्पोऽस्मि वीक्षस्व माम्' इत्येव वक्तुमर्हसीत्यर्थः। हे मैथिलि! अहम् अतितराम् आतङ्कोदयदायकैः भयोन्मेषजनकैरित्यर्थः। अनेकैः निजैः व्यापारैः परदारापहारादिभिः नियता अव्यभिचारिता आपत् यस्य तथोक्तोऽस्मि कुतोऽपि कस्मादपि 'पञ्चम्यास्तसिल्' इति तसिल्। 'कुतिहोः' इति किमः क्वादेशः। आयति उत्तरकालं नालोकयामि क्षिप्रं मरिष्यामीत्यर्थः। 'उत्तरः काल आयतिः' इत्यमरः। मृत्युवशत्वमेव मरणमेव यदत्यन्तानभिमतं जगति तदेवेत्येवशब्दार्थः। यातुं प्राप्तुं कृतः सङ्कल्पो येन तथोक्तोऽस्मि मां वीक्षस्व एवं दुरात्मा निष्प्रतीकारविपत्कस्स्वविनाशार्थी च कोऽन्योऽस्ति सम्यगाकलयेत्यर्थः। प्रतिदत्ताक्षरमिदं चित्रम्। वृत्तं पूर्ववत्॥३१॥

श्लोकार्थ—रावण ने सीता से कहा—हे मैथिलि! मैं अत्यन्त भयोत्पत्ति का विनाश करने वाले अपने अनेक व्यापारों अर्थात् दुर्गरचनादिरूप साधनों के कारण आपत्ति से रहित हूँ। किसी से भी विनाश नहीं देख रहा हूँ। मृत्यु विवशता का ही त्याग करने के लिए अर्थात् अमर होने के लिए कृतसंकल्प हूँ। मेरे प्रभाव का आकलन करो। रावण के इस कथन के अनन्तर देवी सीता ने प्रत्युत्तर देते हुए कहा—रे नीच! आत्मस्तुति रूप दोष को न जानकर लज्जा से रहित आत्मस्तुति कर रहे हो।

विमर्श—शास्त्र की दृष्टि से आत्मस्तुति दोष है। प्रस्तुत श्लोक में रावण आत्मस्तुति रूप दोष को चरितार्थ करता हुआ भी अपने को दोषरहित बता रहा है।

विशेषार्थ—सीता ने रावण से कहा—तुम अपने द्वारा कहे गये प्रथम से तृतीय चरण तक के वचनों में हकार के स्थान पर यकार को प्रयुक्त किये विना आत्मस्तुति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर रहे हो। तदनुसार हकार के स्थान पर यकार का प्रयोग कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे मैथिलि! मैं अत्यन्त भयोत्पत्तिकारक अपने अनेक व्यापारों अर्थात् परदारापहरणादि के द्वारा निश्चित है विपत्ति जिसकी उस प्रकार का हूँ। इसका उत्तरकाल नहीं देख रहा हूँ। अर्थात् शीघ्र मरूँगा। मृत्यु को ही प्राप्त करने के लिए कृतसंकल्प हूँ। मुझको देखो मेरे जैसा दुरात्मा अपना ही विनाश चाहने वाला दूसरा कौन है, सम्यग्रूप से आकलन करो।

प्रस्तुत श्लोक में प्रतिदत्ताक्षर अलङ्कार है। विशेषार्थ का आधार—**हे यमनाकलय्य** (हकार के स्थान पर यकार)॥३१॥

रामो दूषितवान्निजेन जनुषा प्राभाकरीं सन्ततिं,
त्यक्त्वा हस्तगतां श्रियं निजयशो दूरीकरोति स्म यत्।
तं श्रुत्वा सदयो भवाम्यतितरां मैथिल्यहं त्वत्कृते
पापिन्नेतददम्भवत्तव वचः श्राव्यं न कैः सादरम्।।३२।।

राम इति। रावणः सीतामाह—राम इत्यादि त्वत्कृत इत्यन्तम्। हे मैथिलि! रामः निजेन जनुषा जन्मना प्रभाकरस्येयं प्राभाकरी 'तस्येदम्' इत्यण्। 'टिड्ढाणञ्' इत्यादिना ङीप्। तां सन्ततिं सूर्यवंशं दूषितवान् स्वस्य भीरुत्वदोषेण स्ववंश्यानामभीरूणामपि भीरुत्वप्रवाददोषमापादितवानित्यर्थः। तत्र गमकं हेतुमाह—त्यक्त्वेति। यत् यस्मात्कारणात् हस्तगतां लब्धप्रायामित्यर्थः। श्रियं राज्यलक्ष्मीं त्यक्त्वा दशरथो भरतो वा मां निगृह्णीयादिति भयेनेति भावः। निजयशः क्षत्रियस्यात्मनोऽवश्यमेष्टव्यामपि शौर्यधैर्यप्रथामयीं कीर्तिमित्यर्थः। दूरीकरोति स्म अनादृतवानित्यर्थः। 'लट् स्मे' इति भूते लट्। अहं तं श्रुत्वा तस्यैवंवृत्तिमाकर्ण्येत्यर्थः। त्वत्कृते त्वदर्थम् 'अर्थे कृते च शब्दौ द्वौ तादर्थ्येऽव्ययसंज्ञितौ' इति कोशः। अतितरां सदयः दयावान् भवामि तं हन्तुमुद्यमतः परावृत्तोऽस्मीत्यर्थः। सीता प्रत्याह—पापिन्नित्यादि सादरमित्यन्तम्। रे पापिन्! दम्भः कपटोऽस्मिन्नस्तीति दम्भवत् तन्न भवतीत्यदम्भवत् निष्कपटमित्यर्थः। ते तव एतत् प्रागुक्तं वचः कैः जनैः सादरं यथा तथा न श्राव्यमिति सोल्लुण्ठनम्। दम्भमयत्वात्त्वत्प्रलपितमिदमनादरणीयमेवेत्यर्थः।

प्रतिवचननिगूढार्थस्तु—रे पापिन्! एतत् 'रामो दूषितवान्' इत्यादि ते वचः नास्ति दो दकारो यस्मिन् तत् अदं दकाररहितं सत् भो भकारोऽस्मिन्नस्तीति भवत् भकारसहितं सत् दकारस्थानापन्नभकारं सदित्यर्थः। कैः सादरं यथा तथा न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्राव्यम्। एवं च—'रामो भूषितवान्निजेन जनुषा प्राभाकरीं सन्ततिं त्यक्त्वा हस्तगतां श्रियं निजयशो भूरीकरोति स्म यत्। तं श्रुत्वा सभयो भवाम्यतितरां मैथिल्यहं त्वत्कृते' इति त्वयोक्तं चेत्सर्वैरपि सादरं श्राव्यमेवेत्यर्थः। रामः निजेन जनुषा प्राभाकरीं सन्ततिं भूषितवान् सूर्यवंशस्य महतीं ख्यातिं सम्पादितवानित्यर्थः। यत् यस्मात्कारणात् हस्तगतां दुस्त्यजामपीति भावः। श्रियं राज्यलक्ष्मीं त्यक्त्वा पितुस्सत्यसन्धत्वपरिरक्षणार्थमिति भावः। निजं यशः 'रामो विग्रहवान् धर्मः' इत्यादिप्रसिद्ध्या प्रागेव स्वयमुपात्तां कीर्तिमित्यर्थः। भूरीकरोति स्म बहुलीकृतवान् प्रतिज्ञापरिपालनधौरन्धर्यख्यापनेनेति भावः। अहं तं श्रुत्वा तथा निर्भयमरण्य-वासमुररीकृतवतस्तस्य धैर्यादिगुणानाकर्ण्येत्यर्थः। त्वत्कृते त्वदपहारनिमित्तेनेत्यर्थः। अतितरां सभयः भवामि। 'कदाऽऽगत्य मां हन्याद्वा' इति बिभेमीत्यर्थः। प्रतिदत्ताक्षरमिदं चित्रम्। वृत्तं पूर्ववत्॥३२॥

श्लोकार्थ—रावण ने सीता से कहा—हे मैथिलि! राम ने अपने जन्म के द्वारा सूर्यवंश को दूषित किया, अर्थात् अपने कायरतारूप दोष के द्वारा अपने कुल में होने वाले वीरों को भी भीरुत्वप्रवाद से कलङ्कित किया, जिसके कारण हाथ में आयी हुई राज्यलक्ष्मी का भी परित्याग करके अपने क्षत्रियोचित शौर्यधैर्यप्रथामयी कीर्ति का अनादर किया। मैं उनके इस तरह के कृत्य को सुनकर हे मैथिलि! तुम्हारे लिए अत्यन्त दयावान् हो रहा हूँ, अर्थात् मारने के लिए उद्यत मैं अपना विचार परिवर्तित कर ले रहा हूँ।

सीता ने प्रत्युत्तर देते हुए श्लोक के चतुर्थ चरण को कहा, जिसका अर्थ होता है—रे पापी! तुम्हारे द्वारा कहा गया कपटरहित वचन किसी के द्वारा सादर सुनने योग्य नहीं है। अर्थात् कपटपूर्ण होने के कारण अनादरणीय है।

विशेषार्थ—देवी सीता ने रावण से कहा—रे पापी! प्रथम तीन चरणों में प्रयुक्त वर्णों में दकार के स्थान पर भकार का प्रयोग कर देने से तुम्हारे द्वारा कहा गया वचन "किसके द्वारा सादर सुनने योग्य नहीं है" होता है—

रावण ने सीता से कहा—हे मैथिलि! राम ने अपने जन्म के द्वारा सूर्यवंश को भूषित किया, अर्थात् उसमें गौरवशाली परम्परा को प्रतिष्ठापित किया, जिसके कारण (पिता के सत्यसन्धत्व धर्म की रक्षा के लिए) हाथ में आयी हुई राज्यलक्ष्मी का परित्याग कर अपने यश को अत्यधिक बढ़ाया। मैं तो उनके इस कृत्य को सुनकर तुम्हारे अपहरण के कारण अत्यन्त भयभीत हूँ। अर्थात् कब आकर मुझको मार डालेंगे, इससे डरा हुआ हूँ।

प्रस्तुत श्लोक में प्रतिदत्ताक्षर अलङ्कार है। विशेषार्थ का आधार—**अदम्भवत्** (दकाररहित एवं भकारसहित)॥३२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्प्राप्ते मम राघवेण समरे सीते हरीणां चमू-
रुच्चैः शोकभयान्विता विकलसत्कीर्तिश्च सद्यो भवेत्।
स्यादेषा तु विकस्वरास्यनिखिलस्त्रीसन्ततिर्मत्पुरी
रे पापिन् कलये न सङ्गतमिदं सर्वं त्वदुक्तं वचः।।३३।।

सम्प्राप्त इति। रावणः सीतामाह—सम्प्राप्त इत्यादि मत्पुरीत्यन्तम्। हे सीते! मम राघवेण रामेण सह सहशब्दयोगाभावेऽपि तदर्थेन योगात् 'विनाऽपि तद्योगं तृतीया' इत्युक्तत्वात्तृतीया। समरे सम्प्राप्ते सति हरीणां कपीनां चमूः सद्यः सपदि युद्धोपक्रमक्षण एवेत्यर्थः। उच्चैः अधिकाभ्यामित्यर्थः। शोकभयाभ्यां मदीयबाणप्रहारकृताभ्यामिति भावः। अन्विता विकलसत्कीर्तिः प्रणष्टसुयशस्का च पलायनाद्युपक्रमेणेति भावः। भवेत् सम्भावनायां लिङ्। एषेत्यङ्गुलिभ्रमणेन निर्देशः। मत्पुरी लङ्का तु विकसन्ति ताच्छील्येनेति विकस्वराणि स्वभर्तृजयोदन्तश्रवणादिति भावः। 'स्थेशभास' इत्यादिना विपूर्वात्कसेर्वरच्प्रत्ययः। आस्यानि मुखानि यस्याः तथोक्ता निखिलानां स्त्रीणां सन्ततिः सङ्घो यस्यां सा तथोक्ता बहुव्रीहिगर्भो बहुव्रीहिः स्यात्। सीता प्रत्याह—र इत्यादि वच इत्यन्तम्। रे पापिन्! इदं सर्वं 'सम्प्राप्ते मम' इत्याद्यखिलं त्वदुक्तं वचः सङ्गतं समञ्जसं न कलये न जानामि असमञ्जसमेव जानामीत्यर्थः। बाधितार्थत्वादिति भावः।

प्रतिवचननिगूढार्थस्तु—रे पापिन्! इदं सर्वं त्वदुक्तं वचः कस्य क इत्याकारकस्य वर्णस्य लयेन अपगमेनेत्यर्थः। सङ्गतं हृदयङ्गमं स्यादिति शेषः, कवर्णमपहायोक्तं चेत्सङ्गच्छत इत्यर्थः। एवञ्च—सम्प्राप्ते मम राघवेण समरे सीते हरीणां चमूरुच्चैश्शोभयाऽन्विता विलसत्कीर्तिश्च सद्यो भवेत्। स्यादेषा तु विस्वरास्यनिखिलस्त्रीसन्ततिर्मत्पुरी' इति वदेत्यादेशः फलति। हे सीते! मम राघवेण समरे सम्प्राप्ते सति हरीणां चमूः सद्यः युद्धोपक्रमक्षण एवेत्यर्थः। जयसिद्धेरविलम्बितत्वादिति भावः। उच्चैः महत्येत्यर्थः। शोभया कान्त्या जयलाभप्रहर्षजनितयेति भावः। अन्विता अत एव विलसन्ती कीर्तिर्यस्याः तथोक्ता च भवेत्। एषा मत्पुरी तु—विस्वराणीति बहुव्रीहिः विकृतस्वराणीत्यर्थः। पत्यपत्यभ्रात्राद्यत्ययशोककविलापमयत्वादिति भावः। आस्यानि यस्यास्तथाविधा निखिलानां स्त्रीणां सन्ततिः यस्यां तथोक्ता स्यात्। लङ्कायां सर्वत्र राक्षसीनां 'हा नाथ! हा तनय! हाऽनुज! हाऽग्रज!' इत्यादिपरिदेवनारावः प्रादुर्भवेदित्यर्थः। उक्तमेवेदं सीतया श्रीरामायणे—

नूनं राक्षसकन्यानां रुदन्तीनां गृहे गृहे।
श्रोष्यामि न चिरादेव दुःखार्तानामिह ध्वनिम्।। इति।

च्यावितालक्षरमिदं चित्रम्। वृत्तं पूर्ववत्।।३३।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्लोकार्थ—रावण ने सीता से कहा—हे सीते! मेरा राम के साथ युद्ध होते समय वानरी सेना शीघ्र ही अत्यधिक शोक और भय से युक्त विनष्ट कीर्ति वाली हो जायगी अर्थात् पलायन कर जायेगी। यह मेरी लङ्कापुरी तो विकसित हो गया है अर्थात् खिल गया है मुख जिसका इस तरह के सम्पूर्ण स्त्रीसमूह से युक्त होगी।

रावण के इस कथन के अनन्तर देवी सीता ने कहा कि तुम्हारे द्वारा प्रथम से तृतीय चरण तक कहे गये वचन को उपयुक्त नहीं समझती हूँ।

विशेषार्थ—देवी सीता ने कहा कि—तुम्हारे द्वारा प्रारम्भ से तृतीय चरण तक कहे गये वचनों को 'क'लोपपूर्वक उपयुक्त समझती हूँ। तदनुसार तृतीय चरण तक प्रयुक्त वर्णसमूह से 'क' इत्याकारक वर्ण का अपहार कर देने पर श्लोकार्थ सम्पन्न होता है—

रावण ने सीता से कहा—रे सीते! मेरा राम के साथ युद्ध होते समय शीघ्र ही अर्थात् युद्धारम्भ के समय ही वानरी सेना अत्यधिक कान्ति से युक्त सुशोभित कीर्ति वाली होगी। यह मेरी लङ्का पुरी तो पति, पुत्र, भाई इत्यादि के विनाश से विकृतस्वरवाली स्त्रियों के समूह से युक्त होगी। अर्थात् लङ्का में सर्वत्र हा नाथ, हा पुत्र इत्यादि करुण क्रन्दन उत्पन्न हो जायेगा।

विशेषार्थ का आधार—**कलये** (कस्य लये=क का लोप होने पर)॥३३॥

हारौचित्यनिवेदकाखिलगुणः सीतेऽस्म्यहं पश्य मां
सर्गात्यन्तबहिर्भवत्वधिषणापादिस्वरूपोऽस्म्यहम्।
स्यां चाहं हननत्यगप्यभिमतिस्ते चेत्तथा रेऽधम
प्राक्संन्यासत एव ते समुचितं वेद्मि स्वरूपं ननु।।३४।।

हारौचित्येति। रावणः सीतामाह—हारेत्यादि तथेत्यन्तम्। हे सीते! अहं हाराणां मुक्तावलीनाम् औचित्यस्य योग्यताया वैमल्यरामणीयकादिजनिताया इति भावः। निवेदकाः ज्ञापकाः साधर्म्यादिति भावः। अखिलाः गुणाः सौशील्यादयो यस्य तथोक्तः अस्मि मुक्तावलीरमणीयामलगुणोऽस्मीत्यर्थः। 'हारो मुक्तावली' इत्यमरः। 'उचितं स्यान्मिते योग्ये ज्ञातेऽभ्यस्ते समञ्जसे' इति नानार्थरत्नमाला। मां पश्य अहं सर्गस्य सृष्टेः ब्रह्मनिर्माणस्येत्यर्थः। यदत्यन्तबहिर्भवम् अतीवाविषयीभूतं तस्य भावस्तत्त्वं तस्य धिषणां तत्प्रकारिकां बुद्धिं आपादयत्युत्पादयति जनानामिति सर्गात्यन्तबहिर्भवत्वधिषणापादि ब्रह्मणेदं निर्मातुमतीवाशक्यमिति बुद्ध्युत्पादकमित्यर्थः। सर्वातिशायित्वादिति भावः। स्वरूपं यस्य तथोक्तोऽस्मि। नन्वेवं श्लाघ्यगुणोऽपि त्वम्—

श्मशानचैत्यप्रतिमो भूषितोऽपि भयङ्करः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

इत्युक्तरीत्या राक्षसतया हिंस्रत्वाद्भयङ्कर एवास्यतो न मह्यं रोचस इति चेदत्राह—स्यां चेत्यादि। किञ्चेति चार्थः। ते तव तथा अभिमतिश्चेत् हिंस्रत्वं जहिहीत्यभिप्रायश्चेदित्यर्थः। अहं हननं हिंसां त्यजतीति हननत्यगपि स्यां जातिधर्मत्वाद्दुस्त्यजामपि प्राणिहिंसां परित्यजेयमित्यर्थः। सीता प्रत्याह—र इत्यादि नन्वित्यन्तम्। रेऽधम! प्राक् पुरा मदपहारावसर इत्यर्थः। संन्यासतः संन्यासेनैव आद्यादित्वात्तृतीयान्तात्तसिः। यतिवेषपरिग्रहेणैवेत्यर्थः। ते स्वरूपं समुचितं वेद्मि ननु जानामि खलु। सर्वातिशायिस्वरूपं ममेति प्रलपता त्वया किमिति पुरा स्वरूपं परित्यज्य यतिरूपं स्वीकृतमित्यधिक्षेपगर्भमवहेलनमेतत्।

प्रतिवचननिगूढार्थस्तु—रेऽधम! ते तव स्वरूपं तत्प्रकारबोधकं विशेषणत्रयमित्यर्थः। प्राक् पूर्वभागे स्वघटकसर्ववर्णेभ्योऽप्यादावित्यर्थः। संन्यासतः समः समित्युपसर्गस्य अनुस्वारपरक-'स' इत्याकारकवर्णस्य वा न्यासः न्यसनं सङ्घटनमिति यावत्। तेनैव। तृतीयान्तात्तसिः। समुचितं योग्यं वेद्मि—ननु। एवञ्च—'संहारौचित्यनिवेदकाखिलगुणस्सीतेऽस्म्यहं पश्य मां संसर्गात्यन्त-बहिर्भवत्वधिषणापादिस्वरूपोऽस्म्यहम्। स्यां चाहं संहननत्यगप्यभिमतिस्ते चेत्तथा' इत्येव त्वया वक्तुमुचितमित्यर्थः। हे सीते! अहं संहारे विषये औचित्यस्य योग्यत्वस्य वध्यत्वस्येति समुदितार्थः। निवेदकाः ज्ञापकाः। एवं—दुर्गुणोऽयं दुरात्मा केनचिल्लोकरक्षकेण महात्मनाऽवश्यं निहतस्स्यादिति ज्ञापयन्त इत्यर्थः। अखिलाः गुणाः परदारापहारादयः यस्य तथोक्तोऽस्मि। अहं संसर्गे संवाससंभाषणादिसम्बन्धे विषये अत्यन्तबहिर्भवत्वस्य अतिदूरवर्तित्वस्य अत्यन्तानुचितत्वस्येत्यर्थः। धिषणां आपादयतीति तथोक्तं स्वरूपं यस्य तथोक्तोऽस्मि। किञ्चेति चार्थः। ते तथा अभिमतिश्चेत् अनेन देहत्यागः कर्तव्य इत्यभिप्रायो यदीत्यर्थः अहं संहननं शरीरं त्यजतीति तथोक्तोऽपि स्याम्। प्राणिसामान्याभिमततया दुस्त्यजमपि शरीरं त्यजेयमित्यर्थः। 'गात्रं वपुस्संहननम्' इत्यमरः। अधिदत्ताक्षरमिदं चित्रम्—लक्षणं तूक्तम्। वृत्तं पूर्ववत्॥३४॥

श्लोकार्थ—रावण ने सीता से कहा—हे सीते! मैं हारों की योग्यता का ज्ञान कराने वाले समस्त सौशील्यादि गुणों से युक्त हूँ। मुझको देखो, मैं ब्रह्मनिर्माण की अत्यन्त बहिर्भूत=अविषयभूत, बुद्धि के द्वारा निर्मित स्वरूपवाला हूँ। अर्थात् ब्रह्मा के द्वारा मेरी शरीर का निर्माण नहीं किया जा सकता है, इस प्रकार की बुद्धि को उत्पन्न करने वाला हूँ। यदि तुम्हें अभिमत हो तो राक्षसजाति का धर्म होने के कारण दुस्त्यज भी प्राणिहिंसा का परित्याग कर सकता हूँ। रावण के इस कथन के अनन्तर देवी सीता ने उत्तर देते हुए कहा—मेरे अपहरण के समय धारण किये गये संन्यासी के वेष से ही तुम्हारे स्वरूप को ठीक से जानती हूँ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशेषार्थ—देवी सीता ने कहा—रे अधम! तुम्हारे उक्त स्वरूप का ज्ञान कराने वाले तीनों विशेषणों को 'सं' इत्याकारक वर्ण से युक्त मानती हूँ। तदनुसार तीनों विशेषणों में 'सं' इत्याकारक वर्ण का पूर्वप्रयोग कर देने पर श्लोकार्थ इस प्रकार सम्पन्न होता है—

रावण ने सीता से कहा—'मैं संहार की योग्यता का ज्ञान कराने वाले समस्त गुणों से युक्त हूँ (यहाँ पर गुण शब्द से दुर्गुण ध्वनित होता है, अतः किसी जगद्रक्षक महात्मा के द्वारा रावण का वध्यत्व बोधित होता है।) मैं संसर्ग अर्थात् संभाषणेत्यादि से सम्बन्धित विषयों में अत्यन्त अनुचित बुद्धिवाला हूँ। यदि तुम्हारा उस प्रकार का विचार हो तो अर्थात् मेरे द्वारा देहत्याग कर दिया जाय यदि यह अभिप्राय हो तो मैं प्राण त्याग करने वाला भी हूँ (प्राणिसामान्य को अभिमत होने के कारण दुस्त्यज भी शरीर का त्याग कर सकता हूँ)। प्रस्तुत श्लोक में अधिदत्ताक्षर नामक अलङ्कार है। विशेषार्थ का आधार—**संन्यासतः**।।३४।।

वैदेहि स्वजनाभिवृद्धिकलनव्यासङ्गमग्नोऽस्म्यहं
नारीणामनुरागकारणमिदं रूपं प्रपन्नोऽस्म्यहम्।
साफल्यं कमनीयता मम पुनर्नेया त्वयैवाधुना
वाक्ते मूढ विकासदा यदि हृदि श्लाघ्या तदानीं भवेत्।।३५।।

वैदेहीति। रावणः सीतामाह—वैदेहीत्याद्यधुनेत्यन्तम्। हे वैदेहि! अहं स्वजनानां बन्धूनां राक्षसानामित्यर्थः। अभिवृद्धेः कलने सम्पादने यो व्यासङ्गः तस्मिन् मग्नोऽस्मि बन्धुजनाभ्युच्चयनैकतानोऽस्मीत्यर्थः। अहं नारीणाम् अनुरागस्य कारणं हेतुभूतं सकलाङ्गनाजनमनोहरमित्यर्थः। इदमिति स्वाभिमुखेन स्वहस्तेन निर्देशः। रूपं चतुर्विधैर्भूषणैरभूषितत्वेऽपि भूषितवदवभासमानमाकारविशेषमित्यर्थः। तदुक्तम्—

आवेध्यारोप्यविक्षेप्यबन्धनीयैरभूषितम्।
यद्भूषितमिवाभाति तद्रूपमिति कथ्यते।। इति।

प्रपन्नः प्राप्तवानस्मि अधुना मम कमनीयता पुनः कामनीयकं तु त्वयैव साफल्यं नेया यदि त्वं कामयसे तदैव मम कमनीयत्वं सफलं स्यान्नान्यथेत्यर्थः। सीता प्रत्याह—वागित्यादिभवेदित्यन्तम्। रे मूढ! ते तव वाक् हृदि श्रोतृणामिति शेषः। विकासं ददातीति तथोक्ता यदि हृदयोल्लासिनी चेदित्यर्थः। तदानीं श्लाघ्या भवेत्, अतथात्वादियमिदानीमश्लाघ्यैवेत्यर्थः।

प्रतिवचननिगूढार्थस्तु—रे मूढ! ते वाक् विका विगतककारा, सदा दकारसहिता यदि ककारस्थानापन्नदकारा यदीत्यर्थः। तदानीं हृदि श्लाघ्या हृद्या भवेत्। एवञ्च—'वैदेहि स्वजनाभिवृद्धिदलनव्यासङ्गमग्नोऽस्म्यहं नारीणामनुराग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दारणमिदं रूपं प्रपन्नोऽस्म्यहम्। साफल्यं दमनीयता मम पुनर्नेया त्वयैवाधुना' इत्युक्ता यदि श्लाघ्या भवेदित्यर्थः। हे वैदेहि! अहं स्वजनाभिवृद्धेः दलने खण्डने यो व्यासङ्गः तत्र मग्नोऽस्मि कथमन्यथा त्वामपहरेयमिति भावः। अहं नारीणाम् अनुरागस्य दारणं विच्छेदकं दशमुखत्वविंशतिभुजत्वादिना लोकविलक्षणत्वाद्दंष्ट्रावत्त्वादिना भीकरत्वाच्चेति भावः। दारयतेर्नन्द्यादित्वात्कर्तरि ल्युप्रत्ययः। इदं रूपं प्रपन्नः अस्मि मम दमनीयता पुनः दौरात्म्यप्रयुक्तं वधार्हत्वं त्वित्यर्थः। त्वया अधुनैव साफल्यं नेया क्षिप्रमेव मद्वधमभिसन्धत्स्व त्वदभिसन्धिविलम्बादेव मद्वधो विलम्बत इत्यर्थः। प्रतिदत्ताक्षरमिदं चित्रम्। वृत्तं पूर्ववत्।।३५।।

सामान्यार्थ—रावण ने सीता से कहा—हे वैदेहि! मैं अपने भाई राक्षसों की अभिवृद्धि सम्पादन के लिए किया जाने वाला जो व्यापार है, उसमें तत्पर हूँ, मैं नारियों के अनुराग का कारण अर्थात् सकल अङ्गनाजनों के मन का हरण कर लेने वाले रूप से युक्त हूँ। मेरे कमनीयता का साफल्य तुम्हारे द्वारा ही सम्पन्न होना है। अर्थात् यदि तुम चाहती हो तो मेरी कमनीयता सफल है अन्यथा निष्फल। रावण के इस कथन के अनन्तर देवी ने कहा—रे मूढ़! यदि तुम्हारी वाणी श्रोताओं के हृदय को उल्लसित करने वाली हो तो प्रशंसनीय है। यदि उक्त प्रकार की नहीं है तो प्रशंसनीय भी नहीं है।

विशेषार्थ—देवी सीता ने कहा—रे मूढ़! तुम्हारी वाणी ककार से रहित तथा दकार से युक्त होकर हृदयगत होती है। तदनुसार ककार के स्थान पर दकार कर देने के अनन्तर श्लोकार्थ अधोलिखित प्रकार से सम्पन्न होता है—

रावण ने सीता से कहा—हे वैदेहि! मैं अपने भाई-बन्धुओं की अभिवृद्धि के विनाश के लिए किए जाने वाले कार्य में संलग्न हूँ (अन्यथा तुम्हारा अपहरण कैसे करता)। मैं नारियों के प्रेम को समाप्त कर देने वाले रूप (दशमुखत्व, विंशतिभुजत्वादि लोकविलक्षण) को प्राप्त कर लिया हूँ। मेरा दौष्ट्य व धार्टत्व) तुम्हारे द्वारा इसी समय साफल्य को प्राप्त होगा, अर्थात् तुम्हारी खोज में होने वाला विलम्ब ही मेरे वध में होने वाले विलम्ब का कारण है। प्रस्तुत श्लोक में प्रतिदत्ताक्षर नामक अलङ्कार हैं। विशेषार्थ का आधार—**विका सदा**।।३५।।

निश्चिन्तस्य बुधैर्विपत्त्युपनतावङ्गारदीप्तौजसो
दुस्साधानपि भञ्जनाद्वशयतः शश्वद्रिपूनाहवे।
तुल्यो मे किमु भङ्गवानिति सदा रामः श्रुतो भूसुते
श्राव्यं नास्त्यपि बिन्दुमात्रमनृते पापिन् वचस्यत्र ते।।३६।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निश्चिन्तेति। रावणः सीतामाह—निश्चिन्तस्येत्यादि भूसुत इत्यन्तम्। हे भूसुते! सदा भङ्गवान् पराजयवान्—'रणे भङ्गः पराजयः' इत्यमरः। इति श्रुतः प्रसिद्धः रामः बुधैर्देवैर्हेतुभिः विपत्तेः विपदः उपनतौ प्राप्तौ विषये निश्चिन्तस्य चिन्तारहितस्य देवेभ्यो मम कदाचिद्विपदुपनमेदित्याशङ्कां त्यक्तवत इत्यर्थः। ब्रह्मवरप्रभावादिति भावः। अङ्गारवत् दीप्तम् ओजो यस्य तथोक्तस्य अलातोज्ज्वलतेजस्कस्येत्यर्थः। अत एव आहवे युद्धे शश्वत् मुहुः भञ्जनात् पराजयप्रापणात् हेतोः दुस्साधानपि स्वेतरैर्दुर्जयानपि रिपून् वशयतः स्वनिदेशे स्थापयतः मे मम तुल्यः किमु सदृशः किम्? नित्यं पराजयमनुभवतो रामस्योक्तविधस्य मम च सादृश्यं घटते किमित्यर्थः। सीता प्रत्याह—श्राव्यमित्यादि त इत्यन्तम्। रे पापिन्! अनृते असत्ये ते तव अत्र वचसि निश्चिन्तस्येत्यादिवचने बिन्दुमात्रमपि ईषदंशोऽपीत्यर्थः। श्राव्यं श्रोतुमर्हं नास्ति अनृतत्वात्सर्वमप्यश्राव्यमेव त्वद्वच इत्यर्थः।

प्रतिवचननिगूढार्थस्तु—रे पापिन्! अनृतेऽपि ते अत्र वचसि बिन्दुमात्रं बिन्दुस्थानापन्नवर्णमात्रम्। अत्र लक्षणया बिन्दुपदेन बिन्दुस्थानापन्नवर्णो गृह्यते—

चिन्तायाश्च चितायाश्च बिन्दुमात्रादिहान्तरम्।
चिता दहति निर्जीवं चिन्ता जीवन्तमप्यहो।।

इत्यादिपुरातनाभ्यर्हितप्रयोगेषु तथा दर्शनात्। न हि तत्रानुस्वारस्साक्षादुपलक्ष्यते, परसवर्णेन नकारेण तदपहारात्। श्राव्यं श्रोतुमर्हं नास्ति न भवति। यद्यप्यनृतत्वात्सर्वांशतोऽप्यश्राव्यमेव त्वद्वचस्तथापि 'तुष्यतु दुर्जनः' इति न्यायेन अनुस्वारमात्रमपहायान्यत्सर्वं श्रूयत इत्यर्थः। एवञ्च—'निश्चितस्य बुधैर्विपत्त्युपनतावगारदीप्तौजसो दुस्साधानपि भजनाद्वशयतश्शश्वद्रिपूनाहवे तुल्यो मे किमु भगवानिति सदा रामश्श्रुतो भूसुते' इति त्वयोक्तं चेच्छ्रूयत इति फलितम्। हे भूसुते! सदा भगवानिति—

ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसश्श्रियः।
ज्ञानविज्ञानयोश्चैव षण्णां भग इतीरणा।।

इत्युक्तलक्षणषड्गुणसम्पत्तिमानिति श्रुतः रामः बुधैः ज्ञातृभिः—'ज्ञातृचान्द्रिसुरा बुधाः' इति क्षीरस्वामी। विपत्त्युपनतौ विषये निश्चितस्य क्षिप्रमयं विपत्स्यत इति विपदुपस्थितिलक्षणज्ञैर्निर्धारितस्येत्यर्थः। अगारे गृहे दीप्तम् ओजो यस्य तथोक्तस्य अन्तःपुरमात्रवीरस्येत्यर्थः। आहवे दुस्साधानपि रिपून् शश्वत् भजनात् सेवनात् प्रणमनस्तवनादिरूपात् वशयतः प्रसादयत इत्यर्थः। मे तुल्यः किमु जगत्पतेश्श्रीरामस्य कापुरुषस्य मम च कथमिव सादृश्यं घटत इत्यर्थः। च्यावितक्षरमिदं चित्रम्। वृत्तं पूर्ववत्।।३६।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामान्यार्थ—रावण ने सीता से कहा—हे भूसुते! सदा युद्ध में पराजय प्राप्त करने वालों में प्रसिद्ध राम, देवताओं के द्वारा विपत्ति की प्राप्ति के विषय में चिन्तारहित (ब्रह्मा के वर के प्रभाव से) अङ्गार की तरह दीप्त ओज से परिपूर्ण, इसीलिए (उक्त गुणों के कारण) युद्ध में बार-बार पराजयप्राप्तिरूप हेतु से दुर्जेय शत्रुओं को भी वश में कर रहे मुझ रावण के समान क्या राम है। रावण के इस कथन के अनन्तर श्लोक के चतुर्थ पाद के माध्यम से देवी सीता ने कहा—रे पापिन्! तुम्हारी यह झूठी वाणी थोड़ा भी सुनने योग्य नहीं है (झूठ होने के कारण तुम्हारा सारा कथन अश्रवणीय ही है)।

विशेषार्थ—देवी सीता ने रावण से कहा—रे पापिन्! तुम्हारी इस झूठ से युक्त वाणी में बिन्दु मात्र (अनुस्वार) अपहार पूर्वक ही श्रवणयोग्यता है। तदनुसार प्रस्तुत श्लोक के आदि के तीन चरणों में से अनुस्वार का अपहार कर देने पर श्लोकार्थ अधोलिखित रूप से सम्पन्न होता है—

रावण ने सीता से कहा—हे भूसुते! सदा भगवान् (षडैश्वर्यसम्पन्न) रूप में प्रसिद्ध राम, देवताओं के द्वारा विपत्ति प्राप्ति के विषय में निश्चित, घर में ही दीप्त ओज से परिपूर्ण अर्थात् अन्तःपुर मात्र वीर, युद्ध में दुर्जेय शत्रुओं को बार-बार स्तुति प्रणामादि के द्वारा प्रसन्न कर रहे मुझ रावण के समान क्या राम हैं, अर्थात् जगत्पति श्रीराम का क्या कायर पुरुष मेरे साथ सादृश्य घटित होता है। श्लोक में च्यावितक्षर नामक अलङ्कार है। विशेषार्थ का आधार—**बिन्दुमात्र**॥३६॥

भद्रो हेतिविशारदः प्रकृतितः सर्वक्षपाटावली-
भव्यापादनमार्गकृद्भवनसम्प्राप्त्युत्कसर्वोदयः।
वैधात्रान्वयशोभकात्युपचयव्यासक्त इत्यप्यहं
क्षोणीनन्दिनि न श्रुतोऽस्मि किमु रे पापिन् भवान्न श्रुतः॥३७॥

भद्र इति। रावणः सीतामाह—भद्र इत्यादि किमित्यन्तम्। अत्रान्त्यविशेषणस्यान्ते श्रूयमाण इतिशब्दः समुच्चयार्थकापिशब्दयोगमहिम्ना प्रतिविशेषणमभिसम्बध्यते। हे क्षोणीनन्दिनि! अहं भद्रः मङ्गलात्मा इति, हेतिषु आयुधेषु तत्प्रयोगादिष्वित्यर्थः। विशारद इति, प्रकृतितः प्रकृत्या। आद्यादित्वात्तृतीयान्तात्तसिः। सर्वेषां क्षपाटानां रक्षसाम् आवल्याः भव्यापादनस्य क्षेमसम्पादनस्य मार्गम् अन्वेषणम्। मार्गयतेर्भावे घञ्। मनसि विचारमित्यर्थः। करोतीति सर्वक्षपाटावलीभव्यापादनमार्गकृदिति, भवनस्य स्वगृहस्य। कर्मणि षष्ठी। सम्प्राप्तौ उत्कः उत्सुकः सर्वेषामिन्द्रादिलोकपालानामित्यर्थः। उदयः अभ्युदयो यस्य। तथोक्त इति, वैधात्रस्य विधातृसम्बन्धिनः 'तस्येदम्' इत्यण्। अन्वयस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वंशस्य शोभके प्रकाशके अत्युपचये अत्यन्ताभिवृद्धौ व्यासक्तः विशेषेणासक्तिमान् इत्यपि श्रुतः नास्मि किमु। सीता प्रत्याह—र इत्यादि श्रुत इत्यन्तम्। रे पापिन्! भवान् त्वं न श्रुतः त्वामहं न श्रुतवतीत्यर्थः।

प्रतिवचननिगूढार्थस्तु—रे पापिन्! त्वमिति शेषः भवान् भवर्णवान् न श्रुतः त्वां भवर्णवद्विद्वेषणकमहं न श्रुतवतीत्यर्थः। एवञ्च—भवर्णविरहेण 'द्रोहेऽतिविशारदः प्रकृतित इति, सर्वक्षपाटावलीव्यापादनमार्गकृदिति, वनसम्प्राप्त्युत्कसर्वोदय इति, वैधात्रान्वयशोकात्युपचयव्यासक्त इत्यपि त्वं मया श्रुतोऽसि' इति फलितम्। प्रकृतितस्स्वभावेन राक्षसतयेत्यर्थः। द्रोहे प्राणिहिंसायाम् अतिविशारदः, अत एव सर्वेषां क्षपाटानाम् आवल्याः व्यापादने मारणे यो मार्गः हेतुभूतं कार्यमित्यर्थः। त्वदपहारात्मकमिति भावः। तं करोतीति तथोक्तः वनस्य काननस्य सम्प्राप्तौ उत्कः उत्कण्ठितः विनाशोन्मुख इत्यर्थः। सर्वः उदयः यस्य तथोक्तः वैधात्रस्य अन्वयस्य पुलस्त्यादीनां ब्रह्मवंश्यानामित्यर्थः। शोकस्य स्वदौर्जन्यमूलकस्येति भावः। अत्युपचये अत्यन्ताभिवर्धने व्यासक्तः। च्यावितांक्षरमिदं चित्रम्। वृत्तं पूर्ववत्॥३७॥

श्लोकार्थ—रावण ने सीता से कहा—हे क्षोणीनन्दिनि! मैं मंगलस्वरूप हूँ तथा आयुधों (अस्त्र-शस्त्रों) के प्रयोग में स्वभावतः निष्णात हूँ। समस्त राक्षसों के कल्याण का आपादन करने वाला हूँ। अपने घर की प्राप्ति के विषय में उत्सुक (इन्द्रादि लोकपालों) का अभ्युदय अर्थात् भाग्यस्वरूप हूँ, विधाता (ब्रह्मा) से सम्बन्धित वंश का प्रकाशक अत्यन्त अभिवृद्धि में लगा हुआ विशेष रूप से समस्त शक्तियों से सम्पन्न भी क्या मैं नहीं सुना गया हूँ। रावण की इस आत्मश्लाघा के अनन्तर देवी सीता ने कहा—रे पापिन्! तुमको मैंने नहीं सुना है।

विशेषार्थ—देवी सीता ने रावण से कहा—रे पापिन्! तुमको भवर्णवान् (भकार अक्षर वाला) के रूप में नहीं सुना है, तदनुसार प्रस्तुत श्लोक के आदि के तीन चरणों में से भ वर्ण का परित्याग कर देने पर श्लोकार्थ इस प्रकार सम्पन्न होता है—

रावण ने सीता से कहा—स्वभाव से ही राक्षस होने के कारण प्राणिहिंसा में निष्णात हूँ, अत एव समस्त राक्षससमूह के मारण का जो मार्ग उसका हेतुस्वरूप हूँ। वन प्राप्ति के विषय में उत्कण्ठित अर्थात् विनाशोन्मुख समस्त राक्षसों का अभ्युदय (भाग्य) हूँ, विधाता (ब्रह्मा) के वंश पुलस्त्यादि के शोक के अत्यन्त अभिवर्द्धन में लगा हुआ हूँ। प्रस्तुत श्लोक में च्यावितांक्षर नामक अलङ्कार है। विशेषार्थ का आधार—**भवान्न श्रुतः**—(भ-वान् न श्रुतः)।

नोट—प्रस्तुत श्लोक में अन्त्य विशेषण के अन्त में श्रूयमाण इति शब्द समुच्चयार्थक अपिशब्दयोग महिम्ना प्रत्येक विशेषण के साथ सम्बद्ध होता है॥३७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स भर्ता ते जानक्युपचितविपत्सर्वसमये
समस्ते च स्थाने गुणविदपरिश्लाघितगुणः।
अतः कुर्वे तस्मिन्न पतितृषमाः किं वदसि ते
सपापा येऽभिज्ञा इह वचसि कर्णं निदधते।।३८।।

स इति। रावणः सीतामाह—स इत्यादि तृषमित्यन्तम्। हे जानकि! स ते भर्ता रामः पतिभक्त्या यस्मिन्ननुरक्ताऽसीति भावबोधकस्तच्छब्दः सर्वसमये समस्ते स्थाने च सर्वकालदेशावच्छेदेनेत्यर्थः। उपचिता प्रवृद्धा विपद्यस्य तथोक्तः। गुणविद्भिः गुणज्ञैः अपरिश्लाघिताः गुणाः यस्य तथोक्तः। गुणज्ञाभिमतैर्गुणैर्वर्जित इत्यर्थः। अतः हेतोः एतस्मिन् रामे पतितृषं पतिरित्यनुरागं न कुरु मा कार्षीः। सीता प्रत्याह—आः इत्यादि निदधत इत्यन्तम्। आः इति कोपे—'आस्तु स्यात्कोपपीडयोः' इत्यमरः। किं वदसि! किमित्याक्षेपे मैवं वादीरित्यर्थः। अभिज्ञाः—'अश्राव्यश्रवणं दोषाय' इति जानन्त इत्यर्थः। ये जनाः इह वचसि त्वदुक्ते वचने कर्णं निदधते अभिमुखीकुर्वते इदं वचश्शृण्वन्तीत्यर्थः। ते तेऽपीत्यर्थः। सपापाः पापवन्तः भवन्तीति शेषः। श्रोतृणामपि पापजनकं तव दुर्वचः किं पुनर्वक्तुरेव तवेत्यर्थः।

अतिनिगूढः प्रतिवचनार्थस्तु—आः किं वदसीत्येतदभिन्नार्थम्। पस्य पवर्णस्य अपायः अपगमः पापायः पापायेन सह वर्तत इति सपापायं तस्मिन् सपापाये प इत्याकारकवर्णरहिते इत्यर्थः। ते तव इह वचसि स भर्तेत्यादिवचने अभिज्ञाः कर्णं निदधते। एवञ्च—स भर्तेत्यादिवचनं पवर्णेन विना—'स भर्ता ते जानक्युचितवित्सर्वसमये समस्ते च स्थाने गुणविदरिश्लाघितगुणः अतः कुर्वे तस्मिन्नतितृषम्' इत्युक्तं सदभिज्ञैश्श्राव्यं भवतीत्यर्थः। हे जानकि! स ते भर्ता रामः सर्वसमये समस्ते स्थाने च उचितं वेत्तीति उचितवित् यदा यत्र यत्कर्तव्यं तदभिज्ञ इत्यर्थः। गुणविद्भिः गुणज्ञैः अरिभिश्शत्रुभिरपीत्यर्थः। किमुतान्यैरिति भावः। श्लाघिताः गुणाः यस्य स तथोक्तः अतः एवङ्गुणशालित्वात् एतस्मिन् रामे अतितृषम् अत्यन्तानुरागं कुरु। च्यावितक्षरमिदं चित्रम्।।३८।।

श्लोकार्थ—रावण ने सीता से कहा—हे जानकि! वह तुम्हारे पति राम अर्थात् जिसमें तुम पतिभक्ति के द्वारा अनुरक्त हो वह हर समय तथा हर जगह अत्यधिक विपत्ति वाले हैं। गुणज्ञों के द्वारा अभिमत जो गुण उससे रहित हैं, अतः इस प्रकार के राम में पति जैसा प्रेम मत करो।

रावण के इस कथन के अनन्तर देवी सीता ने कहा—आः (क्रोधसूचक) क्या बोल रहे हो अर्थात् ऐसा मत बोलो। जो लोग तुम्हारे द्वारा कहे गये इस वचन को सुनते हैं, वे पापी होते हैं, अर्थात् तुम्हारा दुर्वचन श्रोताओं को भी पापयुक्त बनाने वाला है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशेषार्थ—जानकी ने रावण से कहा—आः क्या बोल रहे हो, प वर्ण का अपाय (विश्लेष) पुरस्सर ही तुम्हारे इस वचन को अभिज्ञ लोग सुनते हैं। तदनुसार प्रस्तुत श्लोक में से प वर्ण का परिहार कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे जानकि! वह तुम्हारे पति राम हर समय एवं हर जगह उचित कार्य को जानने वाले हैं, गुणज्ञ शत्रुओं के द्वारा भी प्रशंसित गुण वाले हैं, अतः इस प्रकार के गुणशाली राम में अत्यन्त प्रेम करो। विशेषार्थ का आधार—**पापाये**। प्रस्तुत श्लोक में भी च्यावितार्क्षर नामक अलङ्कार है॥३८॥

आरामस्मृतिजायमानपुलकस्त्वामत्र रुद्ध्वाऽस्म्यहं
सीतेऽस्म्यादरवानतीव समरारम्भे खरध्वंसिना।
आशान्तप्रथितप्रतापविसरः किञ्चास्मि रक्षोऽधम
प्रागाकारपिधानमेव ननु ते व्याख्याति सर्वान् गुणान्॥३९॥

आरामेति। रावणः सीतामाह—आरामेत्यादि किञ्चास्मीत्यन्तम्। हे सीते! अहम् अत्र अशोकवने त्वां रुध्वा आरामस्य उपवनस्य स्मृत्या जायमानाः पुलकाः रोमाञ्चाः यस्य तथोक्तः अस्मि त्वदधिष्ठितमिदमुपवनमपि स्मरतो मम रोमाञ्चास्सञ्जायन्त इत्यर्थः। इयान्मम त्वय्यनुराग इति भावः। 'आरामस्स्यादुपवनम्' इत्यमरः। न च रामस्त्वामितो नीत्वा ममेमं त्वय्यनुरागं विफलयेदित्यातङ्कवानस्मीत्याह—सीतेऽस्मीत्यादि। खरध्वंसिना रामेण सह समरारम्भे युद्धोपक्रमे विषये अतीव आदरवान् अस्मि कदाऽहं मद्बान्धवद्रोहिणं रामं पश्येयं कदा च युध्वा तं हन्यामिति समयप्रतीक्ष एवास्मीत्यर्थः। ननु कथं न बिभेषि खरादीनपि निहतवता रामेण सह योद्धुमिति चेदाह—आशान्तेत्यादि। किञ्चेत्युक्तगुणसमुच्चये। आशान्तेषु दिगन्तेषु प्रथितः ख्यातः प्रतापस्य विसरो विजृम्भणं यस्य तथोक्तोऽस्मि। नाहं खरादिवत्क्षुद्रः किन्त्वखिललोकविदिततेजा महावीरोऽस्मीत्यर्थः। सीता प्रत्याह—रक्षोऽधमेत्यादि गुणानित्यन्तम्। रे रक्षोऽधम! प्राक् पुराकृतमित्यर्थः। आकारपिधानमेव यतिवेषेणात्मरूपतिरोधानमेवेत्यर्थः। ते तव सर्वान्गुणान् शौर्यादीन् व्याख्याति ननु स्पष्टं कथयति खल्वित्यर्थः। यदि त्वमक्षुद्रो महावीरस्तर्हि ममापहारसमये कुतश्श्रीरामभयाद्यतिवेषपरिग्रहेणात्मरूपं प्यधाः तन्मृषैव तव शौर्यादयो गुणाः वृथैव त्वं कत्थस इत्यर्थः।

प्रतिवचननिगूढार्थस्तु—रे रक्षोऽधम! प्राक्चासौ आकारश्च प्रागाकारः प्रथमः आ इति वर्णः तस्य पिधानं तिरोधानं वर्जनमित्यर्थः। तदेव विशेषणपदाक्षरेषु प्राथमिकस्य आ इति वर्णस्य परित्याग एवेत्यर्थः। ते सर्वान्गुणान्व्याख्याति ननु। एवञ्च—'रामस्मृतिजायमानपलकस्त्वामत्र रुद्ध्वाऽस्म्यहं सीतेऽस्मि दरवानतीव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समरारम्भे खरध्वंसिना शान्तप्रथितप्रतापविसर: किञ्चास्मि' इत्येव त्वं वक्तुमर्हसीत्यर्थ:। हे सीते! अहं त्वामत्र लङ्कायां रुद्ध्वा मोहादपहृतामपि त्वां विवेकतो रामाय पुनरसमर्प्येत्यर्थ:। रामस्य स्मृत्या जायमाना: पुलका यस्य तथोक्त: अस्मि। 'राम: कदाऽऽगत्य मां हन्याद्वा' इति बिभेमीत्यर्थ:। भयेऽपि पुलकोद्गम: प्रसिद्ध एव। ननु वीरस्त्वं कुतो रामाद्बिभेषीत्यत आह—सीतेऽस्मीत्यादि। खरध्वंसिना सह समरारम्भे अतीव दरवान् भयवान् अस्मि। 'ख्यातवीर्यं खरं नाम रक्ष:प्रमुखं हतवान् राम: कथं मां न हन्यात्' इति बिभेमीत्यर्थ:। 'दरत्रासौ भीतिर्भी:' इत्यमर:। ननु खरादिभ्योऽपि प्रतापवत्तया प्रथितस्य ते कुतो भयमित्यत आह—शान्तप्रथितप्रतापविसर इति शान्त: विरत:—

गर्ह्यकर्मप्रवृत्तस्य स्वयं तेजो विनश्यति।

इति न्यायात् परदारचौर्याद्यकार्यप्रवृत्तिवशेन विनष्ट इत्यर्थ:। प्रथितस्य दिक्पालाक्रमणादिनेति भाव:। प्रतापस्य विसरो यस्य तथोक्त: अस्मि। एवंभूतस्य मे न कथं रामाद्भयमिति भाव:। च्यावितक्षरमिदं चित्रम्।।३९।।

श्लोकार्थ—रावण ने सीता से कहा—हे सीते! मैं तुमको यहाँ (अशोक वन में) रखकर उपवन के स्मरण से उत्पन्न रोमाञ्च वाला हूँ, अर्थात् तुम्हारे द्वारा अधिष्ठित यह उपवन है यह स्मरण करके रोमाञ्चित हो जाता हूँ। खर नामक राक्षस का वध करने वाले राम के साथ युद्ध के विषय में अत्यन्त आदरवान् हूँ। अर्थात् भ्रातृद्रोही राम से युद्ध करने की प्रतीक्षा कर रहा हूँ और दिग्दिगन्त में प्रसिद्ध प्रताप से युक्त हूँ।

रावण की इस आत्मश्लाघा के अनन्तर देवी सीता ने कहा—रे अधम राक्षस! पूर्व में तुम्हारे द्वारा किया गया आकारपिधान (यतिवेष धारण) ही तुम्हारे समस्त शौर्यादि गुणों को व्याख्यायित करता है।

विशेषार्थ—सीता ने रावण से कहा—रे रक्षोऽधम! पूर्व में प्रयुक्त आकार वर्ण का तिरोधान (वर्जन) ही तुम्हारे समस्त गुणों को व्याख्यायित करता है। तदनुसार विशेषणपदों के अक्षरसमूह में से आकार का परित्याग कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे सीते! तुमको यहाँ (लङ्का में) रखकर राम के स्मरण से उत्पन्न रोमाञ्च से युक्त हूँ (भय में भी रोमाञ्च प्रसिद्ध है), अर्थात् राम कब आकर मेरा वध कर देंगे इससे डरा हुआ हूँ। खर का वध करने वाले राम के साथ युद्ध के विषय में अत्यन्त भयभीत हूँ। मैं प्रसिद्ध प्रताप से रहित हूँ (गर्ह्यकर्म में प्रवृत्त व्यक्ति का स्वयं तेज विनष्ट हो जाता है इस न्याय से)। प्रस्तुत श्लोक में च्यावितक्षर नामक अलङ्कार है। विशेषार्थ का आधार—**प्रागाकारपिधानमेव**।।३९।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ईतित्यङ्निजबन्धुपौरपरिषत्तोष्टूय्यमानोऽस्म्यहं
शान्तातङ्कनिमित्तभूतचरितः सीतेऽस्म्यहं पश्य माम्।
नित्यं किञ्च धनोपलब्ध्यनुगुणव्यापार एवास्मि रे
स्वैरं जल्प मुहुर्निकारविषयाः प्रागेव तेऽमी गुणाः।।४०।।

ईतीति। रावणः सीतामाह—ईतीत्यादि एवास्मीत्यन्तम्। हे सीते! अहम् ईतिं त्यजन्तीति ईतित्यजः तेषां निरीतिबाधानां निजानां बन्धूनां पौराणां च परिषदा समाजेन तोष्टूय्यमानः पुनः पुनः स्तूयमानः अस्मि। स्तौतेर्यङन्तात्कर्मणि यकि लटश्शानच्। मम सौराज्येन सुखिता बन्धवः पौराश्च मुहुर्मुहुर्मां स्तुवन्तीत्यर्थः। अहं शान्तानि विरतानि अप्रवर्तमानानीत्यर्थः। आतङ्कनिमित्तभूतचरितानि भयकारणीभूतव्यापाराः यस्य तथोक्तः अस्मि। दुष्कर्मप्रवृत्तिविरहेण निर्भयमहं तिष्ठामीत्यर्थः। मां पश्य। किञ्च—नित्यमजस्रं धनोपलब्धेः धनप्राप्तेः अनुगुणाः अनुकूलाः व्यापाराः यस्य तथोक्त एव अस्मि। नित्यं धनप्राप्त्यनुकूलेष्वेव व्यापारेषु अहं प्रवृत्त इत्यर्थः। सीता प्रत्याह—र इत्यादि गुणा इत्यन्तम्। रे नीच! स्वैरं यथेच्छं मुहुः जल्प अमी त्वदुक्ताः ते तव गुणाः प्रागेव पुरैव निकारस्य न्यक्कारस्य विषयाः गोचराः। पूर्वमेव मया श्रुतावधीरितानपि गुणान्निर्लज्जं पुनः पुनः जल्पसि जल्प किं तेन ममेत्यर्थः।

प्रतिवचननिगूढार्थस्तु—रे! स्वैरं मुहुर्जल्प अभी ते इत्येतदभिन्नार्थं गुणाः तत्प्रतिपादकविशेषणपदानीत्यर्थः। प्रागेव स्वावयवीभूतेभ्योऽक्षरेभ्यः सर्वेभ्योऽप्यादित एव निकारस्य नि इत्यानुपूर्वीकस्य वर्णस्य विषयाः स्थानीभूताः। एवञ्च—'नीतित्यङ्निजबन्धुपौरपरिषत्तोष्टूय्यमानोऽस्म्यहं निशान्तातङ्कनिमित्तभूतचरितस्सीतेऽस्म्यहं पश्य मां नित्यं किञ्च निधनोपलब्ध्यनुगुणव्यापार एवास्मि' इत्येव त्वया वक्तव्यमित्यर्थः। हे सीते! अहं नीतित्यजां त्यक्तनीतीनां निजानां बन्धूनां पौराणां च परिषदा तोष्टूय्यमानः अस्मि। ये बन्धवः पौराश्च मां मुहुर्मुहुः स्तुवन्ति ते सर्वेऽपि—

जीवन्ति ये यमाश्रित्य ते स्युस्तस्य हितैषिणः।

इत्यादिवचनोक्तां नीतिं दूरतः परित्यक्तवन्त इत्यर्थः। कथमन्यथैवं दुर्मार्गप्रवृत्तमपि मामनिवारयन्तः प्रत्युत स्तुयुरिति भावः। अहं निशान्तस्य अन्तःपुरस्य। मन्दोदर्यादीनामित्यर्थः। आतङ्कस्य भयस्य। वैधव्यसंभावनाप्रयुक्तस्येति भावः। निमित्तभूतानि चरितानि यस्य तथोक्तः अस्मि मां पश्य। स्वचरितानां तथात्वे हेतुमाह—नित्यमित्यादि। किञ्च—नित्यमहं निधनस्य मरणस्य उपलब्धेः प्राप्तेः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुगुणा: व्यापारा: यस्य तथोक्त एव अस्मि। अतो युक्त एव ममान्त:पुरस्य वैधव्यसम्भावनातङ्क इति भाव:। 'मरणं निधोऽस्त्रियाम्' इत्यमर:। अधिदत्ताक्षरमिदं चित्रम्।।४०।।

सामान्यार्थ—रावण ने सीता से कहा—हे सीते! बाधारहित अपने भाइयों, पुरवासियों तथा समाज के लोगों के द्वारा बार-बार स्तूयमान हूँ, अर्थात् मेरे सुन्दर राज्य के कारण सुखी भाई एवं पुरवासी बार-बार मेरी स्तुति कर रहे हैं। भय का कारणीभूत जो व्यापार (दुष्कर्मों में प्रवृत्ति) उससे मैं विरत हूँ। मुझको देखो। और निरन्तर धनप्राप्ति के अनुकूल व्यापार में मैं लगा हुआ हूँ।

रावण के इस कथन के अनन्तर श्लोक के चतुर्थ पाद के माध्यम से देवी सीता ने कहा—रे नीच! इच्छानुसार भाषण करो। ये तुम्हारे द्वारा कहे गये तुम्हारे ही गुण धिक्कार के विषय हैं।

विशेषार्थ—सीता ने कहा—रे नीच! इच्छानुसार भाषण करो ये तुम्हारे गुण अर्थात् गुण प्रतिपादक विशेषण पद अपने अवयवी भूत अक्षरों के आदि में 'नि' इत्याकारक वर्ण के विषय हैं। तदनुसार प्रत्येक विशेषणपदों के आदि में 'नि' का योग कर देने पर श्लोकार्थ अधोलिखित प्रकार से सम्पन्न होता है—

रावण ने सीता से कहा—हे सीते! मैं नीतिरहित अपने भाइयों, पुरवासियों तथा सामाजिकों के द्वारा बार-बार स्तूयमान हूँ। मैं अन्त:पुर स्थित मन्दोदरी इत्यादि पटरानियों के वैधव्य की संभावना का निमित्तभूत हूँ और मैं निरन्तर मृत्युप्राप्ति के अनुकूल व्यापार में लगा हुआ हूँ। (अत: अन्त:पुर स्थित मन्दोदरी इत्यादि पटरानियों के वैधव्य की संभावना उचित ही है।) यहाँ अधिदत्ताक्षर नामक चित्रालङ्कार है। विशेषार्थ का आधार—**निकारविषया:**।।।४०।।

जयश्रीर्लग्ना मे भुजभुवि सदा राघवलयं
निधत्तेऽन्तर्वैदेह्यरिलवनसम्प्राप्त्यभिरता।
न ते प्रीतिर्न स्यान्मयि लसितभावं गत इह
त्वदुक्तैषा पापिन् कुफणितिरलाभान्वयवती।।४१।।

जयश्रीरिति। रावण: सीतामाह—जयश्रीरित्यादि इहेत्यन्तम्। हे वैदेहि! अरीणां लवनस्य छेदनस्य सम्प्राप्तौ उपस्थित्यामित्यर्थ:। अभिरता आसक्ता:। युद्धलाभ: कदा स्यात्कदा स्यादित्यभिलषन्तीत्यर्थ:। सदा मे भुजभुवि बाहुप्रदेशे लग्ना विश्रान्ता जयश्री: राघवस्य लयं वधमित्यर्थ:। अन्त: मनसीत्यर्थ:। ममेति शेष:। निधत्ते स्थापयति। लीलयैव त्वया रामो निहनिष्यत इति मां प्रत्याययतीत्यर्थ:। अत एवेति शेष:। लसितभावम् उल्लासं गते प्राप्ते इह मयि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ते तव प्रीतिः अनुरागः न स्यादिति न किन्तु स्यादेवेत्यर्थः। सीता प्रत्याह— त्वदित्यादि अन्वयवतीत्यन्तम्। रे पापिन्! त्वदुक्ता एषा जयश्रीर्लग्नेत्यादिः कुफणितिः असदर्थप्रतिपादकत्वात्कुत्सितोक्तिः लाभेन फलेन अन्वयवती सम्बद्धा न भवतीत्यलाभान्वयवती निष्फलेत्यर्थः।

प्रतिवचननिगूढार्थस्तु—रे पापिन्! त्वदुक्ता एषा कुफणितिः नास्ति लः लकारः यस्यां सा अला लकाररहिता भस्य भकारस्य अन्वयस्सम्बन्धः अस्यामस्तीति भान्वयवती भकारान्विता लकारस्थानापन्नभकारेत्यर्थः। इति जानामीति शेषः। एवञ्च—'जयश्रीर्भग्ना मे भुजभुवि सदा राघवभयं निधत्तेऽन्तर्वैदेह्यरिभवनसम्प्राप्त्यभिरता। न ते प्रीतिर्न स्यान्मयि भसितभावं गत इह' इत्येव त्वयोक्तं जानामीत्यर्थः। हे वैदेहि! मे भुजभुवि भग्ना भङ्गं प्राप्ता अत एव अरीणां भवनस्य। कर्मणि षष्ठी। सम्प्राप्तौ अभिरता जयश्रीः सदा राघवात् भयम् अन्तः मनसि। ममेति शेषः। निधत्ते जयश्रिया परित्यक्तोऽहं कदाऽऽगत्य रघुवीरो मां निहन्याद्वेति मनस्यजस्रं बिभेमीत्यर्थः। इह मयि भसितभावं भस्मत्वं गते सति ते प्रीतिः न स्यादिति न किन्तु स्यादेवेत्यर्थः। 'भूतिर्भसितभस्मनी' इत्यमरः। प्रतिदत्ताक्षरमिदं चित्रम्। शिखरिणीवृत्तम्।।४१।।

सामान्यार्थ—रावण ने सीता से कहा—है वैदेहि! शत्रुओं के विनाश में लगी हुई तथा सदा मेरी बाहों में स्थित विजयश्री राघव के वध को मेरे मन में स्थापित करती है, अर्थात् खेल-खेल में ही राम तुम्हारे द्वारा मार डाले जायेंगे, इस प्रकार विश्वास दिलाती है, इसीलिए उत्कण्ठित होने पर यहाँ मुझमें तुम्हारा प्रेम क्या नहीं होगा, अर्थात् होगा ही, सीता ने प्रत्युत्तर देते हुए कहा—हे पापिन्! तुम्हारे द्वारा आत्मप्रशंसा में कहा गया वचन असदर्थप्रतिपादक होने के कारण निन्दित वचन है, अतः फल के साथ सम्बद्ध नहीं होता है।

विशेषार्थ—सीता के द्वारा कहे गये प्रतिवचन का गूढार्थ इस प्रकार से है— सीता ने रावण से कहा—रे पापिन्! तुम्हारे द्वारा कहा गया निन्दित भाषण लकार से रहित एवं भकार से युक्त जान रही हूँ। तदनुसार लकार के स्थान पर भकार का प्रयोग कर लेने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे वैदेहि! मेरी बाहों में विनाश को प्राप्त, इसीलिए शत्रुओं के भवन की प्राप्ति में लगी हुई, जयश्री, सदा राघव से भय, मेरे मन में स्थापित करती है, अर्थात् जयश्री से मैं परित्यक्त हूँ, कब आकर राघव मेरा वध कर दें, इस प्रकार मैं निरन्तर डर रहा हूँ। यहाँ पर भस्मीभूत (मृत्यु को प्राप्त) हो जाने पर क्या तुम्हारा अनुराग नहीं होगा, अर्थात् होगा ही। प्रस्तुत श्लोक में प्रतिदत्ताक्षर नामक अलङ्कार है। विशेषार्थ का आधार—**अलाभान्वयवती**।।४१।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मारास्योन्नतिभङ्गदायि सुदृशः श्रुत्वा स्वरूपं द्रुतं
वाञ्छन्त्यस्य जनस्य मण्डनकथां कर्तुं स्वकर्णोत्सवम्।
अस्याजिष्वसुरक्षणं परमया शक्त्यैव नैवान्यथा
मन्दीकुर्वयि मूढ किं बहु मुहुः सञ्जल्पसीत्थं वृथा।।४२।।

मारेति। रावणः सीतामाह—मारास्येत्याद्यन्यथेत्यन्तम्। हे सीते! सुदृशः स्त्रियः मारस्य मन्मथस्य आस्योन्नतेः मुखौन्नत्यस्य सौन्दर्यगर्वप्रयुक्तस्येति भावः। भङ्गं ददातीति तथोक्तम्। तस्मादपि सुन्दरत्वादिति भावः। अस्य जनस्य ममेत्यर्थः। स्वरूपं श्रुत्वा द्रुतम् अविलम्बितं यथा तथा अस्य जनस्येत्यत्राप्यनुषज्यते। मण्डनकथाम् अलङ्कारवर्णनमित्यर्थः। स्वेषां कर्णयोः उत्सवं कर्तुं वाञ्छन्ति। एवमतिसुन्दरोऽयमलङ्कृतोऽपि चेत्कथं भासेत तच्छ्रोतव्यमिति सकौतुकमतितरां त्वरन्त इत्यर्थः। एवं स्वस्य सौन्दर्यातिशयमुक्त्वा शौर्यातिशयं कथयति—अस्याजिष्वित्यादिना। आजिषु युद्धेषु। अस्य ममेत्यर्थः। असुरक्षणं प्राणरक्षा। शत्रुभ्य आत्मपरित्राणमित्यर्थः। परमया सर्वोत्कृष्टया शक्त्यैव पराक्रमेणैव। भवतीति शेषः। 'शक्तिः पराक्रमप्राणौ' इत्यमरः। अन्यथा सैन्यसाहाय्यादिनेत्यर्थः। नैव भवति असहायशूरोऽहमित्यर्थः। सीता प्रत्याह—मन्दीकुर्वित्यादि वृथेत्यन्तम्। अयि मूढ! इत्थं मुहुः बहु यथा तथा वृथा किं सञ्जल्पसि मन्दीकुरु अल्पीकुरु सञ्जल्पितमित्येवार्थिकं कर्म।

प्रतिवचननिगूढार्थस्तु—मं मकारं दीकुरु दकारीकुरु अन्यत्सर्वमन्यतोऽर्थतश्चाभिन्नम्। एवञ्च—'दारास्योन्नतिभङ्गदायि सुदृशश्श्रुत्वा स्वरूपं द्रुतं वाञ्छन्त्यस्य जनस्य दण्डनकथां कर्तुं स्वकर्णोत्सवम्। अस्याजिष्वसुरक्षणं परदयाशक्त्यैव नैवान्यथा' इति वदेत्यर्थः। सुदृशः विद्वांसः गुणदोषविवेक्तारः सुजना इत्यर्थः। 'सुदृग्विदुषि वाच्यवत्' इत्यजयः। दाराणां मदीयानाम् आस्योन्नतेः। सौभाग्यगर्वप्रयुक्ताया इति भावः। भङ्गदायि अस्य जनस्य स्वरूपं स्वभावं—'स्वरूपं च स्वभावश्च' इत्यमरः। स्वाभाविकं दुश्शीलमित्यर्थः। परदारापहारादिकमिति भावः। श्रुत्वा द्रुतम् अस्य जनस्य दण्डनकथां संहारकथामित्यर्थः। स्वेषां कर्णयोरुत्सवं कर्तुं वाञ्छन्ति। मम दुश्चरितमाकर्णयन्तस्सुजना अस्य दुरात्मनः कथं केन कदा वधः क्रियेत कदा वयमिदं श्रुत्वा आनन्दमनुभवेमेति त्वरन्त इत्यर्थः। आजिषु अस्येति स्वनिर्देशः। असुरक्षणं परेषां शत्रूणां—'परोऽरिपरमात्मनोः' इति विश्वः। दयाशक्त्यैव कृपामहिम्नैवेत्यर्थः। भवतीति शेषः। अन्यथा स्वपराक्रमादिनेत्यर्थः। नैव न भवत्येव। प्रतियुद्धमरिभिर्दयालुभिः परित्यक्त एवाहं जीवामीत्यर्थः। प्रतिदत्ताक्षरमिदं चित्रम्।।४२।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामान्यार्थ—रावण ने सीता से कहा—हे सीते! सुन्दर दिखाई देने वाली कामदेव की स्त्रियों के सौन्दर्याभिमान का नाश करने वाले इस व्यक्ति के हृद्य वर्णन को सुनकर शीघ्र ही विद्वज्जन इस व्यक्ति के भी अलङ्कार वर्णन को, कानों के उत्सव के रूप में स्वीकार करना चाहते हैं।

इस प्रकार अपने सौन्दर्यातिशय का वर्णन करके शौर्यातिशय का वर्णन करता है—युद्ध में मेरे प्राणों की रक्षा परमपराक्रम से ही होती है, अन्य (सैन्य सहायतादि) के द्वारा नहीं होती है।

उसके अनन्तर प्रतिवचनस्वरूप सीता ने कहा—अरे मूर्ख! इस प्रकार बार-बार वृथा प्रलाप क्यों कर रहे हो, कम बोलो।

विशेषार्थ—सीता ने रावण से कहा—अयि मूढ! मकार के स्थान पर दकार करो तदनुसार श्लोक के वर्णसमूह में मकार के स्थान पर दकार कर देने पर श्लोकार्थ सम्पन्न होता है—

रावण ने सीता से कहा—हे सीते! गुण-दोष का विवेचन करने वाले सुजन मेरी स्त्रियों के सैभाग्याभिमान का विनाश करने वाले इस व्यक्ति के (मेरे) स्वभाव अर्थात् परदारापहरणादि को सुनकर शीघ्र ही मेरी संहार कथा को कानों का उत्सव बनाना चाहते हैं। युद्ध में मेरे प्राणों की रक्षा शत्रुओं की कृपा से ही होती है, अन्यथा (पराक्रमादि के द्वारा) नहीं होती है। प्रस्तुत श्लोक में प्रतिदत्ताक्षर नामक अलङ्कार है।

विशेषार्थ के ऊहन का आधार—**मन्दीकुरु**॥४२॥

अहं नापत्त्रासक्षुभितहृदयोऽस्मि क्षितिसुते
कथं श्रीरेवं मय्यनुभवति लोलत्वमयते।
वृणीष्वैव त्वं मां यदि नवरसज्ञेऽस्त्यभिरुचिः
दुरात्मन् वागेषा ननु तव विनाशोदयवती॥४३॥

अहमिति। रावणः सीतामाह—अहमित्याद्यभिरुचिरित्यन्तम्। हे क्षितिसुते! अहम् आपद्भ्यः विपत्तिभ्यः त्रासेन क्षुभितं कम्पितं हृदयं यस्य तथोक्तः नास्मि। विपदुपनिपातशङ्कैव मम दूरतोऽपास्तेत्यर्थः। दिक्पालादीनामपि स्वाधीनत्वादिति भावः। मयि एवम् अनेन प्रकारेण। सकललोकाधीशतयेत्यर्थः। अनुभवति उपभुञ्जाने सति। श्रियमित्यर्थाद्गम्यते। श्रीः सम्पत् कथं लोलत्वं चञ्चलत्वम् अयते प्राप्नोति। सर्वलोकनियामकतया निष्कण्टकस्य मम सम्पदपगमः कथं सम्भाव्यत इत्यर्थः। नवः अपूर्वः स चासौ रसज्ञश्च तस्मिन्। पुंसीति शेषः। अभिरुचिः अस्ति यदि। तवेति शेषः। त्वं मामेव वृणीष्व भर्तृभावेन भज। न कोऽप्यहमिवापूर्वो रसज्ञ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यर्थः। सीता प्रत्याह—दुरात्मन्नित्याद्युदयवतीत्यन्तम्। रे दुरात्मन्! एषा पूर्वोक्ता वाक् तव विनाशेन उदयवती ननु फलवती न किं—'उदयस्तूद्भवे फले' इति विश्वः। तव विनाशमन्तरा नान्यद्वाचोऽस्याः फलं पश्यामीत्यर्थः।

प्रतिवचननिगूढार्थस्तु—रे दुरात्मन्! एषा तव वाक् अहमित्यादिः विना विगतनकारा सती, शस्य शकारस्य उदयः उद्भवः अस्यामस्तीति शोदयवती ननु। नकारस्थानापन्नशकारा खल्वित्यर्थः। इति जानामीति शेषः। एवञ्च—'अहं शापत्वासक्षुभितहृदयोऽस्मि क्षितिसुते कथं श्रीरेवं मय्यशुभवति लोलत्वमयते। वृणीष्वैव त्वं मां यदि शवरसज्ञेऽस्त्यभिरुचिः' इत्येव त्वयोक्तं जानामीत्यर्थः। हे क्षितिसुते! अहं शापेभ्यः वेदवतीनन्दिकेश्वरानरण्यादिभिर्मया प्रधर्षितैर्दत्तेभ्य इति भावः। स तु विस्तरः श्रीमत्युत्तररामायणे द्रष्टव्यः। त्रासेन 'विपद्रूपतः कदा परिणमेद्वा इति भयेन क्षुभितं हृदयं यस्य तथोक्तः अस्मि। शापत्रासेत्यत्र 'संहितायाम्' 'अनचि च' इति तकारस्य द्वित्वं बोध्यम्। ननु 'श्रीमतामापदः कुतः' इति न्यायेन नैव श्रीमन्तमापत्प्राप्नोति प्राप्ताऽप्यपैति श्रीमहिम्ना तत्कुतो बिभेषीत्यत आह—कथमित्यादि। एवम् अनेन प्रकारेण प्रत्यक्षतस्त्वयैवेदानीमनु-भूयमानेनापहारोपरोधकदर्थनादिरूपेणेति भावः। अशुभवति अमङ्गलाचारवति मयि श्रीः लक्ष्मीः कथं लोलत्वं साभिलाषत्वम् अयते। 'लोलश्चलसतृष्णयोः' इत्यमरः। कथञ्चिदुपलब्धाऽप्यपसरत्येवेत्यर्थः। एवं श्रिया जिहासितोऽपि त्वया पुनर्वरणीय एवेति कथनाभासेन दूरतः परिहरणीय एवाहमित्याह—वृणीष्वेत्यादिना। शवरसज्ञे कुणपसारज्ञे। पुंसीति शेषः। अभिरुचिः अस्ति यदि। तवेति शेषः। त्वं मामेव वृणीष्व तादृशेष्वप्यहमेवाग्रगण्य इति भावः। प्रतिदत्ताक्षरं चित्रम्।।४३।।

सामान्यार्थ—रावण ने सीता से कहा—हे क्षितिसुते! मैं विपत्ति के त्रास से कम्पित हृदय वाला नहीं हूँ, मेरे इस प्रकार (सकललोकाधीश) होने के कारण लक्ष्मी (सम्पत्ति) कैसे चञ्चलता को प्राप्त कर सकती है, अर्थात् समस्त लोकों का नियामक होने के कारण बाधारहित मुझ रावण की सम्पत्ति का विनाश कैसे सम्भव हो सकता है? यदि अपूर्व रस को जानने वाले पुरुष में अभिरुचि तुम्हारी हो, तो तुम मेरा वरण करो, अर्थात् पति के रूप में स्वीकार करो, कोई भी मेरी तरह अपूर्व रसज्ञ नहीं है।

रावण के इस कथन के अनन्तर देवी सीता ने कहा—रे दुरात्मन्! यह पूर्व में कही गयी वाणी निश्चितरूप से तुम्हारे विनाशरूप फल वाली है।

विशेषार्थ—सीता ने रावण से कहा—रे दुरात्मन्! यह तुम्हारी वाणी नकाररहित होते हुए शकारसहित है। तदनुसार श्लोक में प्रयुक्त वर्णसमूह में नकार के स्थान पर शकार का प्रयोग कर देने पर श्लोकार्थ होता है—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रावण ने सीता से कहा—हे क्षितिसुते! मैं शाप के त्रास से कम्पित हृदय वाला हूँ। इस प्रकार अशुभ आचरण वाले मुझ रावण की लक्ष्मी (सम्पत्ति) कैसे इच्छानुसार जा सकती है, अर्थात् किसी प्रकार से उपलब्ध भी सम्पत्ति जा रही है। यदि कुत्सित रस को जानने वाले पुरुष में अभिरुचि हो, तो तुम मेरा ही वरण करो।

प्रस्तुत श्लोक में प्रतिदत्ताक्षर नामक अलङ्कार है। विशेषार्थ के ऊहन का आधार—**विनाशोदयवती**।।४३।।

न जात्वापद्भीर्मे दशरथकुमारात् क्षितिसुते
नराशाः सर्वे मय्यभिरतिजुषोऽत्यन्तसुहृदः।।
अनष्टश्रीर्मद्वत्क इह नयतोऽपेतविपदाः
खल त्वद्वक्त्रे यत्प्रलपनमनन्नयास्पदमिदम्।।४४।।

नेति। रावणः सीतामाह—न जात्वित्यादि विपदित्यन्तम्। हे क्षितिसुते! मे मम दशरथकुमारात् रामाद्धेतोः आपद्भीः विपद्भयं 'रामो मां हन्यात्' इति भयमित्यर्थः। जातु कदाचन न नास्ति। सर्वे नराशाः राक्षसाः अत्यन्तसुहृदस्सन्तः अतीवहितचिन्तकास्सन्त इत्यर्थः। मयि विषये अभिरतिमनुरागं जुषन्ते सेवन्त इति तथोक्ताः। तैस्ससहायस्य मम कुतो विपद्भयमिति भावः। अस्तु किं तेनेत्यत आह—अनष्टेत्यादि। इह लोके मद्वत् मया तुल्यम् अहमिवेत्यर्थः। अनष्टा श्रीः यस्य तथोक्तः स्थिरसम्पदित्यर्थः। किञ्चेति शेषः। नयतः नयेन हेतुना। तृतीयान्तात्तसिः। नीतिशास्त्रानुवर्तनेनेत्यर्थः। अपेता अपास्ता विपद्यस्मात्तथोक्तः कः। अस्तीति शेषः। सीता प्रत्याह—आः इत्यादि इदमित्यन्तम्। आः इति कोपे। रे खल! त्वद्वक्त्रे तव मुखे यत्प्रलपनम् अनर्थकं वचनम् अस्तीति शेषः। इदं प्रलपनमित्यर्थः। न विद्यते अन्यत् आस्पदं स्थानं यस्य तत्तथोक्तं त्वन्मुखैकास्पदं 'संहितायाम्' 'अनचि च' इति द्वितीयनकारस्य वैकल्पिकं द्वित्वम्। त्वमिव न कोऽप्येवमप्रयोजकं साहङ्कारवचनं जल्पतीत्यर्थः।

प्रतिवचननिगूढार्थस्तु—आः! खल! त्वद्वक्त्रे यत्प्रलपनम् अस्ति इदम् अनं नवर्णरहितं किन्तु नेः निवर्णस्य आस्पदं स्थानभूतम् इति जानामीति शेषः। नवर्णस्थानापन्ननिवर्णमिति प्रत्येमीत्यर्थः। एवञ्च—'निजा त्वापद्भीर्मे दशरथकुमारात् क्षितिसुते निराशाः सर्वे मय्यभिरतिजुषोऽत्यन्तसुहृदः। अनिष्टश्रीर्मद्वत्क इह नियतोपेतविपत्' इत्येव त्वयोक्तं जानामीत्यर्थः फलितः। हे क्षितिसुते! मे दशरथकुमारात्तु रामात्पुनः आपद्भीः निजा नित्या—'स्वके नित्ये निजं त्रिषु' इत्यमरः। देवासुरादयः केऽपि मां न निहन्तुं शक्नुवन्ति रामस्तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निहनिष्यत्येवेत्यर्थगमकस्तुशब्दः। अभिरतिजुषः प्रेमभाजः अत एव अत्यन्तदुर्हृदः अतीवहितचिन्तकाः। सर्वे जना इति शेषः। राक्षसा इत्यर्थः। मयि विषये निराशाः निश्चितमरणा इत्यर्थः। इह मद्वत् अनिष्टा लोकस्यानभिप्रेता श्रीर्यस्य तथोक्तः। किञ्चेति शेषः। नियतमव्यभिचरितं यथा तथा उपेता उपस्थिता विपद्यस्य तथोक्तः कः। अस्तीति शेषः। अहमेक एव तादृश इत्यर्थः। प्रतिदत्ताक्षरमिदं चित्रम्। अत्र नकारस्यैकस्यैव च्युतत्वाद्दत्तत्वाच्च स्थानित्वे प्रतिनिधित्वे च सस्वरस्यैव तस्य ग्रहणं न तु सर्वत्रेवान्यत्र विस्वरस्य। तदुक्तं प्राक्—प्रतिदत्ताक्षरे चित्रे विस्वरं व्यञ्जनाक्षरम्। सङ्केतितं सस्वरं तु च्युतदत्तैकता यदि।।इति।।४४।।

सामान्यार्थ—रावण ने सीता से कहा—हे क्षितिसुते! दशरथपुत्र राम से मुझे कुछ भी भय नहीं है, समस्त नरभक्षी (राक्षस) अतीव हितचिन्तक हैं तथा मेरे प्रिय हैं। इस लोक में मेरे जैसा कौन है? मैं नष्ट न होने वाली लक्ष्मी से युक्त हूँ। नीति-शास्त्र का अनुवर्तन करने के कारण विपत्तियों से रहित मुझ जैसा कौन है?

रावण के इस कथन के अनन्तर देवी सीता ने कहा—आः (क्रोधसूचक) रे खल! तुम्हारे मुख में जो अनर्थक वचन है, उसके लिए अन्य कोई स्थान नहीं है, अर्थात् इस प्रकार अनर्थक वचन तुम्हीं कह सकते हो।

विशेषार्थ—सीता ने रावण से कहा—आः रे खल! तुम्हारे मुख में जो अनर्थक वचन है, वह न वर्ण के स्थान पर 'नि' वर्ण जान रही हूँ। तदनुसार श्लोकार्थ होता है—

रावण ने सीता से कहा—हे क्षितिसुते! मुझे दशरथकुमार राम से हमेशा विपत्ति का भय बना हुआ है, अर्थात् देवासुर इत्यादि कोई भी मेरा वध नहीं कर सकते; किन्तु राम तो मारेंगे ही, मुझसे प्रेम करने वाले अत्यन्त हितचिन्तक सभी राक्षस मेरे विषय में मृत्यु को निश्चित जानते हैं। इस संसार में मेरी तरह अनिष्ट (लोकानभिप्रेत) लक्ष्मीवाला कौन है। हमेशा विपत्तियों से घिरा हुआ कौन है, अर्थात् मैं अकेला ही उस प्रकार का हूँ।

प्रस्तुत श्लोक में प्रतिदत्ताक्षर नामक अलङ्कार है। विशेषार्थ के ऊहन का आधार—**अनन्यास्पदम्**।।४४।।

वयस्थोऽहं नित्यं न परलवनेच्छां त्यजसि मे
मनोऽजस्रं सीते पुरमनवसादास्पदमिदम्।
दृगन्तक्षेपान्मे कुवलयमुपस्थापय झडि-
त्यहो निर्वेलश्रुत्यभिरुचिरिह त्वद्वचसि रे।।४५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वयस्थ इति। रावणः सीतामाह—वयस्थ इत्यादि झडितीत्यन्तम्। हे सीते! अहं नित्यमजस्रं यथा तथा वयस्थः तरुणः। अस्मीति शेषः। 'वयस्थस्तरुणो युवा' इत्यमरः। अत एव अजस्रं मे मनः परेषां शत्रूणां लवने छेदने इच्छां न त्यजति। इदमित्यङ्गुलिभ्रमणेन निर्देशः। पुरं लङ्कानगरम् अवसादस्य अपचयस्य आस्पदं न भवतीत्यनवसादास्पदम्। दृगन्तयोः क्षेपात् प्रेरणात्! कटाक्षवीक्षणादित्यर्थः। मे झडिति क्षिप्रं कुवलयमिन्दीवरम् उपस्थापय कुलवयोपस्थितिप्रत्यायिकया दृशा मां पश्येत्यर्थः। सीता प्रत्याह—अहो इत्यादि र इत्यन्तम्। रे नीच! निर्वे निर्गतवकारे इह त्वद्वचसि वयस्थोऽहमित्यादौ लश्रुत्यभिरुचिः लकारश्रवणेच्छा भवतीति शेषः। वकारस्थानापन्नलकारं त्वद्वचश्श्रोतुमिच्छा सञ्जायत इत्यर्थः। मतिमतामिति शेषः। अहो अन्यथोक्तमन्यथैव श्रवणेच्छां जनयतीत्याश्चर्यम्। एवञ्च—'लयस्थोऽहं नित्यं न परललनेच्छां त्यजति मे मनोऽजस्रं सीते पुरमनलसादास्पदमिदम्। दृगन्तक्षेपान्मे कुललयमुपस्थापय झडिति' इत्येव त्वयोच्यमानं सन्तः श्रोतुमिच्छन्तीत्यर्थः। हे सीते! अहं नित्यं लये तिष्ठतीति लयस्थः अजस्रासन्नमृत्युरित्यर्थः। तत्र हेतुमाह—मे मनः अजस्रं परललनेच्छां—परस्त्र्यभिलाषं न त्यजति इदं पुरं लङ्कानगरं अनलसात् अग्न्यधीनम्। अधीनवचने सातिप्रत्ययः। भस्मीभवनार्हमित्यर्थः। आस्पदं प्रतिष्ठा यस्मिन् तत् अनलसादास्पदं भवतीति शेषः। दृगन्तक्षेपात् निनाशयिषाप्रयुक्तादिति भावः। झडिति मे कुलस्य लयम् उपस्थापय। प्रतिदत्ताक्षरमिदं चित्रम्॥४५॥

श्लोकार्थ—रावण ने सीता से कहा—हे सीते! मैं हमेशा युवा हूँ, अत एव मेरा मन, निरन्तर शत्रुओं के वध का परित्याग नहीं करता, अर्थात् युवा होने के कारण शत्रुओं के वध में हमेशा मन लगा रहता है। मेरी लङ्कापुरी का नाश नहीं होता है। कमल जैसे सुन्दर नेत्रों के द्वारा कटाक्ष करते हुये (तिरछी चितवन से) मुझे देखो।

रावण के इस प्रकार कहने पर देवी सीता ने कहा—रे नीच! अहो (परिहास-सूचक शब्द) जैसे तुम्हारे वचनों को सुनने की बहुत इच्छा होती है (अर्थात् तुम्हारे इन वचनों को सुनना नहीं चाहती हूँ)।

विशेषार्थ—सीता ने रावण से कहा—रे नीच! वकाररहित एवं लकारसहित तुम्हारे वचनों को सुनना चाहती हूँ। तदनुसार नकार के स्थान पर लकार हो जाने के अनन्तर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे सीते! मैं निरन्तर मृत्यु की तरफ अग्रसर हो रहा हूँ। क्योंकि मेरा मन निरन्तर परस्त्री की इच्छा का परित्याग नहीं कर रहा है, अर्थात् परस्त्री को प्राप्त करने की इच्छा बराबर बनी रहती है। यह मेरी लङ्कापुरी अग्नि के

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधीन है, अर्थात् शीघ्र ही जलने वाली है, नाश करने की इच्छा से युक्त कटाक्ष के द्वारा शीघ्र ही वंश का विनाश करो।

प्रस्तुत श्लोक में प्रतिदत्ताक्षर नामक अलङ्कार है। विशेषार्थ के ऊहन का आधार—**निर्वेलश्रुति**।।४५।।

दिगन्तश्रीर्मग्ना मम सुमुखि लङ्काऽन्तरधुना
विलापः क्वाप्येकोऽप्यहह न नगर्यामिह मम।
विलक्षत्वं बिभ्रत्यपि हरिदधीशा मदुदये
विलापाक्रान्तेव स्फुरति खल वाक्ते हृदि सताम्।।४६।।

दिगन्तेति। रावणः सीतामाह—दिगन्तेत्यादि मदुदय इत्यन्तम्। हे सुमुखि! अधुना दिगन्तेषु दिक्पालनगरेष्वित्यर्थः। या श्रीः सम्पत् सा मम लङ्कान्तः लङ्कापुराभ्यन्तरे मग्ना नैश्चल्येनावस्थितेत्यर्थः। सकललोकाधीशत्वात्स्वस्येति भावः। मम इह अस्यां नगर्यां लङ्कायां क्वापि एकोऽपि विलापः परिवेदनं न न श्रूयते। अहहेत्याश्चर्ये। तथाऽद्भुतराज्यभारोऽहं न यथैकोऽपि पौरेषु विपद्गन्धमाजिघ्रतीति भावः। हरिदधीशा अपि मदुदये ममाभ्युदये विषये विलक्षत्वं विस्मयान्वितत्वं बिभ्रति—'विलक्षो विस्मयान्वितः' इत्यमरः। न कथमीदृशेऽपि सतामित्यन्तम्। रे खल! ते तव वाक् विलापाक्रान्तेव परिदेवनमयीवेत्यर्थः। सतां हृदि स्फुरति जुगुप्सितत्वादिति भावः।

प्रतिवचननिगूढार्थस्तु—रे खल! ते वाक् विला विगतलकारा पाक्रान्ता पवर्णेनाधिश्रिता लकारस्थानापन्नपकारा सतीत्यर्थः। इवेति वाक्यालङ्कारे। सतां विदुषां हृदि स्फुरति विभाति। एवञ्च—'दिगन्तश्रीर्मग्ना मम सुमुखि पङ्कान्तरधुना विपापः क्वाप्येकोऽप्यहह न नगर्यामिह मम। विपक्षत्वं बिभ्रत्यपि हरिदधीशा मदुदये' इत्येव तवोक्तिमभिज्ञास्सम्मन्यन्त इत्यर्थः। हे सुमुखि! मम दिगन्तश्रीः मया दिगन्तेभ्यस्समाहृता सम्पदित्यर्थः। अधुना इदानीं त्वत्कदर्थनदिनेष्वित्यर्थः। श्रीरामस्य क्रोधोद्रेकदिनेष्विति वा। पङ्कान्तः कर्दमाभ्यन्तरे मग्ना विनाशावस्थामापन्नेत्यर्थः। मम इह नगर्यां क्वापि एकोऽपि विपापः पापरहितः न। सर्वे पापिन इत्यर्थः। एवञ्च न पौरेष्वेकतमस्य पुण्यप्रभावाद्वा मम सम्पद्विनाशप्रतिबन्धस्स्यादिति भावः। मदुदये ममाभ्युदये विषये हरिदधीशा अपि विपक्षत्वं विद्वेषित्वं बिभ्रति 'कदाऽस्याभ्युदयभङ्गं द्रक्ष्यामः' इत्याशासत इत्यर्थः। कथमेवं देवैरपि विद्विष्टस्य श्रेयो मम स्यादिति भावः। प्रतिदत्ताक्षरमिदं चित्रम्।।४६।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामान्यार्थ—रावण ने सीता से कहा—हे सुमुखि! इस समय दिक्पालों के नगरों की जो लक्ष्मी हैं वह मेरी लङ्कापुरी में निश्चलरूप से अवस्थित हैं। अहह (आश्चर्य) मेरी इस नगरी लङ्का में कहीं भी किञ्चिदपि विलाप नहीं सुनाई देता है, अर्थात् इस प्रकार के राज्य वाला मैं हूँ, जहाँ विपत्ति का गन्ध तक नहीं है। जिनका राज्य छिन गया है ऐसे राजा लोग भी मेरे अभ्युदय के विषय में आश्चर्यचकित हैं।

रावण के इस कथन के अनन्तर देवी सीता ने कहा—रे खल! विलापाक्रान्त ही तुम्हारी वाणी सज्जनों के हृदय को स्फुरित करती है।

विशेषार्थ—देवी सीता ने रावण से कहा—रे खल! तुम्हारी वाणी लकार से रहित तथा पकार से युक्त होकर ही सज्जनों के हृदय को स्फुरित करती है। तदनुसार लकार के स्थान पर पकार का प्रयोग कर देने पर श्लोकार्थ अधोलिखित प्रकार से सम्पन्न होता है—

रावण ने सीता से कहा—हे सुमुखि! मेरे द्वारा दिक्पालों के नगरों से आहृत की गयी सम्पत्ति इस समय (श्रीराम के क्रोधोद्रेक के दिनों में) विनाशावस्था को प्राप्त हो गई है। मेरी इस नगरी में कहीं भी एक भी व्यक्ति पापरहित नहीं है, अर्थात् सभी पापी ही हैं[1]। मेरे अभ्युदय के विषय में छिन गयी है सम्पत्ति जिनकी ऐसे राजा लोग भी विद्वेष भाव को प्राप्त कर रहे हैं।

प्रस्तुत श्लोक में प्रतिदत्ताक्षर नामक अलङ्कार है।।४६।।

शौर्यं दाशरथौ ममावनिकुमार्यप्रत्ययापादकं
मिथ्यामानवतः प्रकृत्यपटुतो नेषद्भयं मे ततः।
तस्माद्धन्त मम प्रसादनविधावेवैष सज्जो भवेद्
रे किं जल्पसि निष्प्रयोजनमिदं जल्प क्षतिः का ततः।।४७।।

शौर्यमिति। रावणः सीतामाह—शौर्यमित्यादि भवेदित्यन्तम्। हे अवनिकुमारि! दाशरथौ शौर्यं मम अप्रत्ययापादकं प्रत्ययजनकं न भवति। 'रामश्शूरः' इत्यहं न प्रत्येमीत्यर्थः। प्रकृत्यपटुतः स्वभावेनैवासमर्थादित्यर्थः। मिथ्यामानोऽस्यास्तीति मिथ्यामानवान् तस्मात् मिथ्यामानवतः आरोपित-पौरुषाभिमानादित्यर्थः। ततः तच्छब्दात् पञ्चम्यन्तात्तसिल्। तस्माद्रामादित्यर्थः। मे ईषत् किञ्चिदपीत्यर्थः। भयं न। तस्मात् निष्पौरुषत्वाद्धेतोः एष रामः मम। कर्मणि षष्ठी। प्रसादनमेव विधिः तस्मिन्नेव प्रसादसम्पादनकर्मण्येव सज्जः सन्नद्धः भवेत्।

१. समस्त पुरवासियों के पापी होने के कारण किसी एक के भी पुण्य के प्रभाव से सम्पत्ति के विनाश का प्रतिबन्ध संभव नहीं है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मां प्रसादयितुं शरणागत एव स्यादित्यर्थः। हन्तेति हर्षे। अतो वृथैव तव तस्मिन्ननुराग इति वाक्यशेषः। सीता प्रत्याह—र इत्यादि तत इत्यन्तम्। रे नीच! निष्प्रयोजनं यथा तथा इदं किं जल्पसि? अथवेति शेषः। जल्प ततः जल्पनेनेत्यर्थः। तृतीयान्तात्तसिः। का क्षतिः? न काऽप्यर्थहानिर्ममेत्यर्थः।

प्रतिवचननिगूढार्थस्तु—रे! किं जल्पसि? निष्प्रयोजनं प्र इत्यानुपूर्वीकवर्णयोजनरहितं यथा तथा इदं शौर्यं दाशरथावित्यादिवचनं जल्प ततः का क्षतिः? एवञ्च—'शौर्यं दाशरथौ ममावनिकुमार्यत्ययापादकं मिथ्यामानवतः कृत्यपटुतो नेषद्भयं मे ततः तस्माद्धन्त मम सादनविधावेवैष सज्जो भवेत्' इति वदसि चेन्न काऽप्युचितार्थहानिरित्यर्थः। हे अवनिकुमारि! मम अत्ययापादकं नाशजनकं शौर्यं दाशरथौ रामे अस्तीति शेषः। न केष्वप्यन्येषु देवदानवादिष्वपीत्यर्थः। कृत्यपटुतः कर्तव्येषु समर्थात् मिथ्यामानवतः मायामानवात्। आद्यादित्वात्पञ्चम्यास्तसिः। ततः तस्माद्रामात्। पञ्चम्यन्तात्तसिल्। मे ईषद्भयं न किन्तु महदेवेत्यर्थः। तस्मान्महाभयादेवानुमापकाद्धेतोः मम। कर्मणि षष्ठी। सादनविधौ संहारव्यापारे एष एव राम एव सज्जः भवेत्। सम्भावनायां लिङ्। हन्तेति खेदे। च्यविताक्षरमिदं चित्रम्।।४७।।

सामान्यार्थ—रावण ने सीता से कहा—हे अवनिकुमारि! रामविषयक शौर्य मुझे विश्वस्त नहीं कर सकता है, अर्थात् राम वीर हैं, यह विश्वास मुझको नहीं हो रहा है। स्वभाव से ही असमर्थ, आरोपित पौरुषाभिमानी राम से मुझे थोड़ा भी भय नहीं है, अतः पौरुषविहीन होने के कारण यह राम मेरी प्रसन्नता के लिए ही (शरणागत होने के लिए ही) सन्नद्ध हो रहा है। हन्त! (हर्षसूचक शब्द) अतः तुम्हारा उसमें अनुराग व्यर्थ ही है।

रावण के इस कथन के अनन्तर अवनिकुमारि सीता ने कहा—रे नीच! निष्प्रयोजन मिथ्याप्रलाप क्यों कर रहे हो, अथवा मिथ्याप्रलाप करो—उससे मेरी कौन-सी हानि है?

विशेषार्थ—देवी सीता ने रावण से कहा—रे! क्या अनर्थक प्रलाप कर रहे हो, 'प्र' इत्याकारक वर्ण से रहित राम के शौर्य का वर्णन करो, क्या हानि है। तदनुसार श्लोक के पूर्व के तीन चरणों में से 'प्र' इत्याकारक वर्ण का अपहार कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे अवनिकुमारि! मेरा विनाश करने वाला शौर्य दशरथनन्दन श्रीराम में है[1]। कर्तव्यों में समर्थ होने के कारण माया से मनुष्य का रूप

१. अन्य किसी देवता अथवा राक्षससमूह में नहीं है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धारण करने वाले राम से मुझे थोड़ा भय नहीं है, अर्थात् बहुत भय है, अतः संहाररूपी कार्य में यह राम ही सन्नद्ध होता है।

प्रस्तुत श्लोक में च्यावितावक्षर नामक अलङ्कार है। विशेषार्थ के ऊहन का आधार—**निष्प्रयोजनमिदम्**।।४७।।

नातिश्लाघ्यगुणस्तव क्षितिसुते भर्ता पितुर्यो गिरा
नीतिभ्रंशवशाद्विचारविमुखः कान्तारमाशिश्रियत्।
स क्वाहं क्व समस्तयौवतहृदां रूपश्रियाऽनङ्गदो
न स्थाने भवदुक्तमेतदयि रे पापिष्ठ रक्षोऽधम।।४८।।

नेति। रावणः सीतामाह—नेत्याद्यनङ्गद इत्यन्तम्। हे क्षितिसुते! स तव भर्ता रामः अतिश्लाघ्याः गुणाः यस्य स तथोक्तः न भवति। यः रामः नीतेस्सकाशात् भ्रंशस्य पतनस्य वशात् आयत्तत्वात् नीतिवैधुर्यबलादित्यर्थः। विचारे कार्याकार्यविमर्शे विमुखः निरादरस्सन् पितुः दशरथस्य गिरा वचनेन कान्तारं दण्डकवनम् आशिश्रियत्। आङ्पूर्वाच्छ्रयतेः 'णिश्रि' इत्यादिना चङ्। स इति पूर्वेण सम्बन्धः। कथमीदृशं तं त्वमतीव श्लाघस इत्याकूतम्। सः रामः क्व? रूपश्रिया सौन्दर्यसम्पदा समस्तानां यौवतानां युवतीसमूहानां युवतीशब्दात् 'तस्य समूहः' इत्यर्थे 'अनुदात्तादेरञ्' इत्यञ्। न तु युवतिशब्दात् तथा सति भिक्षादित्वात् 'अणि भस्याढः' इति पुंवद्भावे अन्निति प्रकृतिभावे यौवनमिति स्यात्। हृदाम् अनङ्गदः कामोद्रेकद इत्यर्थः। अहं क्व? तस्य च मम च महदन्तरमित्यर्थः। सीता प्रत्याह—नेत्याद्यधमेत्यन्तम्। अयि रे पापिष्ठ! रक्षोऽधम! भवदुक्तं त्वदभिहितं एतत् नातिश्लाघ्येत्यादि-वचनं न स्थाने न युक्तम्—'युक्ते द्वे साम्प्रतं स्थाने' इत्यमरः।

प्रतिवचननिगूढार्थस्तु—अयि रे पापिष्ठ! रक्षोऽधम! एतत् नातिश्लाघ्येत्यादि उक्तं वचनं भावे क्तः। नस्थाने नकारस्थाने भवत् भकारयुक्तम् इति जानामीति शेषः। एवञ्च—'भाति श्लाघ्यगुणस्तव क्षितिसुते भर्ता पितुर्यो गिरा भीतिभ्रंशवशाद्विचारविमुखः कान्तारमाशिश्रियत्। स क्वाहं क्व समस्तयौवतहृदां रूपश्रिया भङ्गदः' इत्येव त्वयोक्तं जानामीत्यर्थः। हे क्षितिसुते! स तव भर्ता श्लाघ्याः गुणाः यस्य स तथोक्तस्सन् भाति प्रकाशते यः भीतिभ्रंशवशात् निर्भीकत्वबलादित्यर्थः। पितुः गिरा विचारविमुखः निर्विचारस्सन् कान्तारमाशिश्रियत् स श्लाघ्यगुणस्सन् भातीति पूर्वेणान्वयः। स ते भर्ता क्व? रूपश्रिया दशवदनत्वदंष्ट्राकरालत्वादिविकृतरूपविशेषेणेत्यर्थः। समस्तयौवतहृदां भङ्गदः भयङ्कर इत्यर्थः। अहं क्व? उभयोर्महदन्तरमित्यर्थः। प्रतिदत्ताक्षरमिदं चित्रम्।।४८।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

सामान्यार्थ—रावण ने सीता से कहा—हे क्षितिसुते! वह तुम्हारा पति राम अतिप्रशंसनीय गुणों वाला नहीं है। जो राम राजनीतिविषयक विचार (कार्याकार्य-विमर्श) से विरहित होने के कारण पिता दशरथ की आज्ञा से जंगल का आश्रयण कर लिया, कहाँ वह और कहाँ सौन्दर्यरूपी सम्पत्ति के कारण समस्त युवतियों के हृदय में कामवासना को जागृत करने वाला मैं अर्थात् उसमें और मुझमें महान् अन्तर है।

रावण के इस कथन के अनन्तर श्लोक के चतुर्थ पाद के माध्यम से सीता ने कहा—रे पापिष्ठ! रक्षोऽधम! तुम्हारे द्वारा पूर्व की तीन पंक्तियों में अभिहित वचन उपयुक्त नहीं है।

विशेषार्थ—देवी सीता ने रावण से कहा—रे पापिष्ठ! रक्षोऽधम! तुम्हारे द्वारा कहे गये वचनों को नकार के स्थान पर भकार के रूप में जान रही हूँ। तदनुसार प्रस्तुत श्लोक के पूर्व की तीन पंक्तियों में प्रयुक्त वर्णसमूह में नकार के स्थान पर भकार का प्रयोग कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे क्षितिसुते! वह तुम्हारा पति राम प्रशंसनीय गुणवान् के रूप में प्रकाशित हो रहा है। भयरहित होने के कारण विचारविरहित (विना विचारे ही) पिता की आज्ञा से वनवास को स्वीकार कर लिया कहाँ वह तुम्हारा पति और कहाँ सौन्दर्यसम्पत्ति (दशवदनत्व-दंष्ट्राकरालत्वादि) के कारण सभी युवतियों के हृदय को भय प्रदान करने वाला मैं। अर्थात् दोनों में महान् अन्तर है। प्रस्तुत श्लोक में प्रतिदत्ताक्षर नामक अलङ्कार है। विशेषार्थ के ऊहन का आधार—**नस्थाने भवदुक्तमेतदपि**।।४८।।

आचारेण शुभेन को मदपि सुश्रेष्ठो विदेहात्मजे
नाहुर्मां किमभेत्तुकाममबलान्मर्त्यान्दयार्द्राशयम्।
स्वाभेद्यं विवृताननः कलयते द्रागेव मामन्तको
रे पापिन् पिशिताशनाधम भयं त्यक्त्वैव जल्पोच्चकैः।।४९।।

आचारेणेति। रावणः सीतामाह—आचारेणेत्याद्यन्तक इत्यन्तम्। हे विदेहात्मजे! शुभेन आचारेण मदपि मत्तोऽपि सुश्रेष्ठः कः? अस्तीति शेषः। शुभाचारविषये मत्तः श्रेष्ठो न कोऽप्यस्तीत्यर्थः। अबलान् बलहीनान् मर्त्यान् मनुष्यान् भेत्तुं विदारयितुं कामो यस्य स न भवतीत्यभेत्तुकामः—'तुङ्काममनसोरपि' इति तुमुनो मकारस्य लोपः। तं मां दयया आर्द्रः आशयः अभिप्रायो यस्य तं तथोक्तं नाहुः किं? न वदन्ति किम्? अपि त्वाहुरेवेत्यर्थः। 'ब्रुवः पञ्चानाम्' इत्यादिना आहादेशः। झेर्जुस्। बुधा इति शेषः। 'सकललोकहिंसाधूर्वहेणापि मया न दुर्बला मनुजा हिंस्यन्ते' इत्यत्र मम दयार्द्राशयत्वमेव हेतुर्न किमित्यर्थः। द्रागेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवृतं विस्तृतम् आननं मुखं येन स तथोक्तः। प्रबलदुर्बलविमर्शविरहेणैव सर्वलोकग्रसनोद्युक्त इत्यर्थः। अन्तकः मां स्वस्य अभेद्यं भेत्तुमशक्यं कलयते जानाति। सर्वहन्तुरन्तकस्याप्यवध्योऽहमस्मीत्यर्थः। सीता प्रत्याह—र इत्याद्युच्च-कैरित्यन्तम्। रे पापिन्! पिशिताशनाधम! राक्षसापशद! भयं त्यक्त्वैव निर्भयस्सन्नेवेत्यर्थः। उच्चकैः जल्प। स्त्रीणां समक्षमात्मश्लाघायां न कश्चिदपि ते प्रतिबन्ध इत्यर्थः।

प्रतिवचननिगूढार्थस्तु—रे पापिन्! पिशिताशनाधम! भयं मे इत्यानुपूर्वीकं वर्णरूपार्थवतो भे इत्यस्माच्छब्दाद्द्वितीयैकवचने अम्ययादेशे च भयमिति रूपसिद्धिः। त्यक्त्वैव उच्चकैः जल्प। एवञ्च—'आचारेण शुनको मदपि सुश्रेष्ठो विदेहात्मजे नाहुर्मां किमत्तुकाममबलान्मर्त्यान्दयार्द्राशयं स्वाद्यं विवृताननः कलयते द्रागेव मामन्तकः' इति जल्पेत्यर्थः पर्यवस्यति। हे विदेहात्मजे! आचारेण शुनकोऽपि मत् मत्तः अवधिभूतात् सुश्रेष्ठः तस्मादप्यहं दुराचार इत्यर्थः। अबलान् मर्त्यान् अत्तुं भक्षयितुं कामो यस्य तं मां दयार्द्राशयं नाहुः किमिति विपरीतलक्षणया निर्दयतमं न वदन्ति किमित्यर्थः। अन्तकः विवृताननस्सन् मां द्रागेव स्वाद्यं कलयते। मां भक्षयितुं व्यात्ताननस्त्वरत इत्यर्थः। च्यविताक्षरमिदं चित्रम्।।४९।।

सामान्यार्थ—रावण ने सीता से कहा—हे विदेहात्मजे! शुभ आचरण के विषय में मुझसे श्रेष्ठ कौन है, अर्थात् कोई नहीं है, मैं बलहीन मनुष्यों को भय प्रदान करने वाला नहीं हूँ। क्या मुझको दयार्द्र के रूप में नहीं कहा गया है[1], अर्थात् कहा ही गया है। शीघ्र ही खुले हुए मुख वाला अर्थात् अन्तर्भाव को प्रकाशित कर देने वाला हूँ। यमराज मुझको अपने द्वारा अभेद्य के रूप में जानता है[2]।

रावण के इस कथन के अनन्तर देवी सीता ने कहा—रे पापिन्! पिशिताशनाधम[3]! भयपरित्यागपूर्वक जोर-जोर से बोलो (क्योंकि स्त्रियों के समक्ष आत्मप्रशंसा करने में तुम्हारे लिए कोई रोक-टोक नहीं है)।

विशेषार्थ—श्लोक की चतुर्थ पंक्ति के माध्यम से देवी सीता ने रावण से कहा—श्लोक के तीन चरणों में प्रयुक्त वर्णसमूह में से 'भे' इत्याकारक वर्ण का परित्याग करके प्रलाप करो ('भे' शब्द के द्वितीयैकवचन में अम् परे रहते अयादेश

१. सम्पूर्ण लोकों में हिंसाविषयक कार्य में अग्रणी होने पर भी मेरे द्वारा दुर्बलों की हिंसा नहीं की जाती है।

२. समस्त जगत् को मृत्यु प्रदान करने वाले यमराज के द्वारा भी मैं अवध्य हूँ।

३. राक्षस।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करने पर 'भयम्' रूप की सिद्धि होती है), तदनुसार उक्त वर्णजाल में से 'भे' इत्याकारक वर्ण का अपहार कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे विदेहात्मजे! आचरण के विषय में कुत्ता भी मुझसे श्रेष्ठ है, अर्थात् मैं कुत्ते से भी ज्यादा दुराचारी हूँ। मैं दुर्बल मनुष्यों के भक्षण की इच्छा वाला हूँ, क्या मुझको दयार्द्र के रूप में वर्णित नहीं किया गया हूँ, विपरीत लक्षण के द्वारा क्यों मुझको निर्दयतम नहीं कहा गया है, खुले हुए मुख वाला यमराज मुझको शीघ्र ही भक्ष्य के रूप में जान रहा है।

प्रस्तुत श्लोक में च्यावितार्क्षर नामक अलङ्कार है। विशेषार्थ के ऊहन का आधार—**भयं त्यक्त्वैव**॥४९॥

जनस्यास्यैश्वर्यं जगदमितभूतं जनकजे
यशोवृन्दं मालाऽमलरुचि हरित्सु प्रसरति।
मतिः सर्वश्लाघ्या त्वदभिरुचये हन्त न कथं
विभाति व्याहारः खल तव विमोहाढ्य इति मे॥५०॥

जनस्येति। रावणः सीतामाह—जनस्येत्यादि कथमित्यन्तम्। हे जनकजे! अस्य जनस्येति षष्ठ्यन्तपदस्य त्रिष्वपि पादेष्वनुषङ्गः। ममेत्यर्थः। ऐश्वर्यमाधिपत्यं जगदमितभूतं लोकाधिकतामापन्नं यशोवृन्दं कीर्तिजालं मालेव पुष्पस्रगिव अमला रुचिर्यस्य तथोक्तं सत् हरित्सु दिक्षु प्रसरति। सर्वैः श्लाघ्या मतिः बुद्धिः त्वदभिरुचये तवाभिप्रीतये। कथं न भवतीति शेषः। हन्तेत्याश्चर्ये। सीता प्रत्याह—विभातीत्यादि म इत्यन्तम्। रे खल! तव व्याहारः उक्तिः विमोहाढ्यः अज्ञानसान्द्रः इति मे विभाति।

प्रतिवचननिगूढार्थस्तु—रे खल! तव व्याहारः जनस्येत्यादिः विमः विगतमकारः हाढ्यः हकारपरिपूर्णः मकारस्थानापन्नहकार इत्यर्थः। इति मे विभाति। एवञ्च—'जनस्यास्यैश्वर्यं जगदहितभूतं जनकजे यशोवृन्दं हालाहलरुचि हरित्सु प्रसरति। हतिस्सर्वश्लाघ्या त्वदभिरुचये हन्त न कथम्' इत्येव त्वयोक्तमहं जानामीत्यर्थः। हे जनकजे! अस्य जनस्य मम ऐश्वर्यं जगद्भ्यः अहितभूतं सकललोकविद्विष्टमित्यर्थः। यशोवृन्दं हालाहलस्य विषस्येव रुचिर्यस्य तथोक्तं सत्। दुस्सहं दूष्यं च सदित्यर्थः। हरित्सु प्रसरति। सर्वश्लाघ्या सकललोकैराशंसनीयेत्यर्थः। हतिः वधः कथं त्वदभिरुचये न न स्यात्। स्यादेवेत्यर्थः। हन्तेति खेदे। प्रतिदत्ताक्षरमिदं चित्रम्। शिखरिणीवृत्तम्॥५०॥

श्लोकार्थ—रावण ने सीता से कहा—हे जनकजे! इस व्यक्ति का लोकोत्तर आधिपत्यरूपी यशःसमूह पुष्पमाला की तरह पवित्र सुगन्ध से परिपूर्ण होकर समस्त

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिशाओं में फैल रहा है। सब लोगों के द्वारा प्रशंसनीय इस व्यक्ति की मति, तुम्हारी प्रीति का कारण क्यों नहीं बनती है, हन्त (आश्चर्य है)।

रावण के इस कथन के अनन्तर देवी सीता ने कहा—रे खल! तुम्हारा कथन अज्ञान से परिपूर्ण मुझे प्रतीत होता है।

विशेषार्थ—सीता ने रावण से कहा—रे खल! तुम्हारा कथन मकार से रहित तथा हकार परिपूर्ण मुझे प्रतीत हो रहा है। तदनुसार मकार के स्थान पर हकार का प्रयोग कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—इस व्यक्ति का सम्पूर्ण लोकों का अहितसाधक आधिपत्यरूपी यश:समूह हलाहल विष की तरह दुर्गन्ध से परिपूर्ण होकर समस्त दिशाओं में फैल रहा है, सम्पूर्ण लोकों के द्वारा कहा गया इस व्यक्ति का वध तुम्हारे प्रीति का कारण क्यों नहीं बनता है।

प्रस्तुत श्लोक में प्रतिदत्ताक्षर नामक अलङ्कार है। विशेषार्थ के ऊहन का आधार—**विमोहाढ्य:**।।५०।।

अधिश्रीरैश्वर्यान्निधिपतित एषोऽस्म्यवनिजे
पुमान्वीर: को मां समिति धिनुयाद्दोर्विलसितै:।
धियाऽत्यन्तं स्फीतोऽभ्युदय इह मे रे निशिचर
प्रवेष्टव्यश्रोत्राऽस्म्यपि कुवचसाऽनेन विधिना।।५१।।

अधिश्रीरिति। रावण: सीतामाह—अधिश्रीरित्यादि म इत्यन्तम्। हे अवनिजे! एष इति स्वाभिमुखेन हस्तेनात्मनो निर्देश: अहमित्यर्थ:। ऐश्वर्याद्धेतो: निधिपतित: कुबेरादवधिभूतात्। पञ्चम्यन्तात्तसि:। अधिश्री: अधिकसम्पत्क: अस्मि। वीर: क: पुमान् समिति युद्धे दोर्विलसितै: बाहुविलासै: पराक्रमविजृम्भणैरिति यावत्। मां धिनुयात् प्रीणयेत् न कोऽपि जगति मदभिनन्दनीयपराक्रमो वीरोऽस्तीत्यर्थ:। इह लोके मे मम अभ्युदय: धिया बुद्ध्या। तत्कार्यभूतेन नीतिविभवेनेत्यर्थ:। अत्यन्तं यथा तथा स्फीत: प्रवृद्ध:। एवं सम्पच्छौर्याभ्युदय-शालिन्यपि मयि न कुतोऽनुरज्ज्यस इति वाक्यशेष:। सीता प्रत्याह—र इत्यादि विधिनेत्यन्तम्। रे निशिचर! विधिना दैवेन प्रतिकूलेनेति भाव:। 'विधिर्विधाने दैवेऽपि' इत्यमर:। अनेन अधिश्रीरित्यादिना कुवचसा दुर्वचनेनापि प्रवेष्टव्ये श्रोत्रे यस्या: तथोक्ता अस्मि। प्रतिकूलं दैवमेव मया त्वदीयमेवं दुर्भाषितमपि श्रावयतीत्यर्थ:।

प्रतिवचननिगूढार्थस्तु—रे निशिचर! अनेन अधिश्रीरित्यादिना कुवचसाऽपि विधिना विगतधिवर्णेन सता प्रवेष्टव्ये श्रोत्रे यस्यास्सा तथोक्ताऽस्मि। एवञ्च—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधिश्रीरित्यादि त्वदुक्तं वचनं धि इत्यानुपूर्वीकं वर्णमन्तरा 'अश्रीरैश्वर्यान्निपतित एषोऽस्म्यवनिजे पुमान्वीरः को मां समिति नुयाद्दोर्विलसितैः यात्यन्तं स्फीतोऽभ्युदय हि मे' इत्युक्तं चेन्मम श्रोत्रे प्रवेष्टुमर्हतीत्यर्थः। हे अवनिजे! अश्रीः असम्पत्कः एषोऽहं ऐश्वर्यान्निपतितोऽस्मि वीरः कः पुमान् समिति दोर्विलसितैः मां नुयात्। न केनापि वीरेण युध्यभिनन्दनीयं मम शौर्यमित्यर्थः। इह लोके स्फीतो मेऽभ्युदयः अन्तं नाशं याति। च्यावितक्षरमिदं चित्रम्। वृत्तं पूर्ववत्॥५१॥

सामान्यार्थ—रावण ने सीता से कहा—हे अवनिजे! यह मैं ऐश्वर्य के कारण कुबेर से भी अधिक सम्पत्तिशाली हूँ, कौन-सा वीर पुरुष युद्ध के मैदान में पराक्रम[1] के द्वारा मुझे पीड़ित कर सकता है, अर्थात् मेरे द्वारा अभिनन्दनीय पराक्रम वाला वीर इस जगत् में कोई नही है। इस लोक में मेरा अभ्युदय, बुद्धि (राजनीतिज्ञ होने) के कारण अत्यन्त वृद्धि को प्राप्त है[2]। रावण की इस आत्मप्रशंसा के अनन्तर देवी सीता ने कहा—रे निशिचर! प्रतिकूल भाग्य ही तुम्हारे इस दुर्वचन को भी सुना रहा है।

विशेषार्थ—सीता ने रावण से कहा—रे निशिचर! 'धि' वर्ण से रहित ही तुम्हारे इस दुर्वचन को सुनने वाली हूँ। तदनुसार प्रस्तुत श्लोक में से 'धि' वर्ण का अपहार कर देने पर श्लोकार्थ अधोलिखित प्रकार से सम्पन्न होता है—

रावण ने सीता से कहा—हे अवनिजे! यह मैं आधिपत्य से रहित हूँ। कौन-सा वीर पुरुष युद्ध के मैदान में पराक्रम के कारण मेरी प्रशंसा कर सकता है। इस लोक में मेरा अभ्युदय विनाश को प्राप्त हो रहा है।

प्रस्तुत श्लोक में च्यावितक्षर नामक अलङ्कार है। विशेषार्थ के ऊहन का आधार—**विधिना**॥५१॥

आशार्हाखिलसम्पदर्यभिमुखव्यक्तीभवत्पौरुष-
स्तेऽहं वनवारिजावमतिभृद्वक्त्रावलिः सङ्गरे।
न श्रूये किमशोचितस्वजनतापर्यावृतश्च त्वया
रे मूर्खासि यथोदिताखिलगुणः प्रागेव नी च श्रुतः॥५२॥

आशेति। रावणः सीतामाह—आशार्हेत्यादि त्वयेत्यन्तम्। हे सीते! अहं आशायाः अर्हाः योग्याः स्पृहणीयाः—'वयमपीदृशस्सम्पदोऽनुभूयास्म' इति स्पृहां द्रष्टॄणां जनयन्त्य इत्यर्थः। अखिलाः समग्राः सम्पदो यस्य स तथोक्तः। अरीणामभिमुखं यथा तथा व्यक्तीभवत् पौरुषं यस्य स तथोक्तः। सङ्गरे युद्धे

१. दोर्विलसितैः = बाहुविलास के द्वारा = पराक्रम के द्वारा।
२. इस तरह सम्पत्ति, शौर्य, अभ्युदयशाली होने पर भी मुझ रावण से प्रीति क्यों नहीं करती हो, यह अर्थ व्यंग्य है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वनवारिजानां जलकमलानाम् अवमतिमवमानं बिभर्ति पुष्णातीति वनवारिजावमतिभृत् वक्त्राणां मुखानाम् आवलिः पङ्क्तिर्यस्य स तथोक्तः। 'वने सलिलकानने' इत्यमरः। कमलानामम्लानत्वद्योतनायोपात्तं वनपदं बोध्यम्। सम्भवेदेव म्लानत्वमम्भसस्समुद्धृतानामम्भोजानामिति। युध्यपरिक्षीणोल्लास इत्यर्थः। अशोचितया येन केनापि शोकमप्रापितया स्वजनतया स्वजनसमूहेन। 'ग्रामजनबन्धुभ्यः' इति समूहार्थे तल्प्रत्ययः। पर्यावृतश्च त्वया न श्रूये किं? श्रुतिविषयो न क्रिये किं? शृणोतेः कर्मणि लट्युत्तमपुरुषैकवचनम्। सीता प्रत्याह—र इत्यादि श्रुत इत्यन्तम्। रे मूर्ख! नीच! त्वं यथोदिताः पूर्वोक्तविधाः अखिलाः गुणाः यस्य स तथोक्तस्सन् प्रागेव पूर्वमेव श्रुतोऽसि। अतः पुनस्स्वगुणान्मा वादीरिति वाक्यशेषः।

प्रतिवचननिगूढार्थस्तु—रे मूर्ख! त्वं यथोदिताः पूर्वोक्तां वर्णानुपूर्वीमनतिक्रान्ताः अखिलाः गुणाः विशेषणानि यस्य स तथोक्तस्सन् प्रागेव प्रथमत एव विशेषणानामाद्यंश एवेत्यर्थः। नी च न इत्यानुपूर्वीकवर्णवांश्च अकारान्तान्नशब्दात् 'अत इनिठनौ' इति मत्वर्थीय इनिप्रत्ययः। श्रुतोऽसि। तथा च—त्वं नाशार्हाखिलसम्पत् नार्यभिमुखव्यक्तीभवत्पौरुषः सङ्गरे नवनवारिजावमतिभृद्वक्त्रावलिः नाशोचितस्वजनतापर्यावृतश्च सन् श्रुतोऽसीत्यर्थः। नाशार्हाः आसन्नविनाशाः अखिलाः सम्पदो यस्य स तथोक्तः। नारीणाम् अङ्गनानाम् अभिमुखं यथा तथा व्यक्तीभवत् पौरुषं यस्य स तथोक्तः। सङ्गरे युद्धे नवनवं यथा तथा अरिजां शत्रुजन्याम् अवमतिं बिभर्ति धारयतीति तथोक्ता वक्त्रावलिर्यस्य स तथोक्तः। नाशोचितया नाशयोग्यया अवश्यं नङ्क्ष्यन्त्या इत्यर्थः स्वजनतया पर्यावृतश्च सन् श्रुतोऽसि। अधिदत्ताक्षरमिदं चित्रम्।

कस्मिंश्चिदधिके वर्णे दत्तेऽर्थो यत्र भिद्यते।
अधिदत्ताक्षरं नाम चित्रं तदिति बुध्यताम्।।

इति तल्लक्षणात्।।५२।।

सामान्यार्थ—रावण ने सीता से कहा—हे सीते! मैं स्पृहणीय हूँ[1]। तथा अखिल सम्पत्तियों से युक्त हूँ, शत्रुओं के सम्मुख पौरुष को प्रकट करने वाला हूँ, युद्ध में जलकमलों की भी शोभा को मलिन कर देने वाले मुख से युक्त हूँ, अर्थात् अतिशय प्रसन्न रहने वाला हूँ। इस प्रकार की चिन्ता से विरहित स्वजनों से घिरा हुआ मैं क्या

१. हम लोग भी इस तरह की सम्पत्ति का अनुभव करें, इस प्रकार की इच्छा लोगों में उत्पन्न करने वाला हूँ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तुम्हारे द्वारा नहीं सुना गया हूँ? रावण की इस आत्मश्लाघा के अनन्तर देवी सीता ने कहा—रे मूर्ख! तुम पूर्वोक्त समस्त गुणों से परिपूर्ण सुने गये हो (अतः पुनः अपने गुणों का वर्णन मत करो)।

विशेषार्थ—सीता ने रावण से कहा—रे मूर्ख! तुम पूर्वोच्चरित वर्णानुपूर्वी का अतिक्रमण न करने वाले समस्त गुणों से युक्त होते हुए आदि अंश को 'न' इत्याकारक वर्ण से संयुक्त सुने गये हो। तदनुसार समस्त विशेषणों के आदि में नकार का योग कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे सीते! मैं शीघ्र ही विनष्ट होने वाली समस्त संपत्तियों वाला तथा स्त्रियों के सम्मुख पौरुष को प्रकट करने वाला हूँ। युद्ध में शत्रुओं में उत्पन्न ह्रास (अपमान) को धारण करने वाले मुख से युक्त हूँ, नाशयोग्य स्वजनों से घिरा हुआ सुना गया हूँ।

प्रस्तुत श्लोक में अधिदत्ताक्षर अलङ्कार है। विशेषार्थ के ऊहन का आधार—**नी च**[१]।।५२।।

सङ्ग्रामेषु जयश्रियं परगतां रामो दृढं मन्यते
नापि श्लाघ्यगुणो न वाचि च पटुर्मद्वद्विदेहात्मजे।
प्रव्याहाररसज्ञता न खलु ते यन्मय्यरक्ताऽसि रे
वाक्ते पाप विपाकसङ्गतिमतीत्येवावगच्छाम्यहम्।।५३।।

सङ्ग्रामेष्विति। रावणः सीतामाह—सङ्ग्रामेष्वित्याद्यसीत्यन्तम्। हे विदेहात्मजे! रामः सङ्ग्रामेषु युद्धेषु जयश्रियं विजयलक्ष्मीं परगतां शत्रुगामिनीं दृढं गाढं यथा तथा मन्यते जानाति। 'न रिपूनहं जेष्यामि त एव सर्वथा मां जेष्यन्ति' इत्यसन्दिग्धं निश्चिनोतीत्यर्थः। निरुत्साहत्वादेस्स्वदोषस्यैव तथा प्रत्यायकत्वादिति भावः। मद्वत् मया तुल्यम् अहमिवेत्यर्थः। श्लाघ्याः गुणाः यस्य स तथोक्तोऽपि न भवति। वाचि च वचनेऽपि पटुस्समर्थः न भवति। ते तव प्रव्याहारेषु मदीयासु प्रौढोक्तिषु विषये रसज्ञता रसाभिज्ञत्वं न खलु नैवास्ति। यत् यस्मात्कारणात् मयि एवं वाग्मिन्यपीति भावः। अरक्ता अननुरक्ता असि। तस्मात्ते प्रव्याहारेषु रसज्ञता नैवास्तीति पूर्वेण सम्बन्धः। सीता प्रत्याह—र इत्याद्यहमित्यन्तम्। रे नीच! ते तव वाक् पापस्य विपाकेन परिपाकेन सङ्गतिमती संसक्ता इत्येव अहम् अवगच्छामि जानामि। फलोन्मुखपापत्वादेव त्वमेवं जल्पसीति जानामीत्यर्थः।

---

१. अकारान्त न शब्द से मत्वर्थीय इनि प्रत्यय करने पर नी इस रूप की सिद्धि होती है जिसका अर्थ होता है नकार वाला।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिवचननिगूढार्थस्तु—रे पाप! पापिन्! ते वाक् सङ्ग्रामेष्वित्यादि: विपा विगतपकारा कसङ्गतिमती ककारेण सम्बद्धा। पकारस्थानापन्नककारेत्यर्थ:। इत्येव अहम् अवगच्छामि। एवञ्च—'सङ्ग्रामेषु जयश्रियं करगतां रामो दृढं मन्यते नाकिश्लाघ्यगुणो न वाचि न कटुर्मद्वद्विदेहात्मजे। क्रव्याहाररसज्ञता न खलु ते यन्मय्यरक्ताऽसि' इत्येव त्वमवादीरिति जानामीत्यर्थ:। नाकिभि: देवै: श्लाघ्या: गुणा गाम्भीर्यादयो यस्य स तथोक्त: राम: सङ्ग्रामेषु जयश्रियं करगतां हस्तगताम्। अयत्नलभ्यामित्यर्थ:। दृढमसन्दिग्धं यथा तथा मन्यते। मद्वत् वाचि वचने कटु: क्रूरश्च न भवति। ते तव क्रव्यं मांसमेवाहार: अशनं तस्मिन् रसज्ञता रसाभिज्ञत्वं न खलु नास्त्येव। यत् यस्मात्कारणात् मयि अरक्ता अननुरक्ता असि तस्मात्ते क्रव्याहाररसज्ञता न खल्विति पूर्वेण सम्बन्ध:। मांसभोजनरसाभिज्ञा चेत्त्वं मय्यनुरक्तैव स्या इत्यर्थ:। 'पललं क्रव्यमामिषम्' इत्यमर:। प्रतिदत्ताक्षरमिदं चित्रम्।।५३।।

सामान्यार्थ—रावण ने सीता से कहा—हे विदेहात्मजे! राम युद्ध में विजयलक्ष्मी को निश्चित रूप से शत्रुगामी मानते हैं, अर्थात् मैं शत्रुओं पर विजय नहीं प्राप्त कर सकता, शत्रु ही हमेशा विजय को प्राप्त होंगे। मेरी तरह प्रशंसनीय गुणों से युक्त भी नहीं हैं तथा मेरी तरह वाक्यपटुता भी नहीं है, तुम मेरे उत्कृष्ट कथनों के मर्म को भी नहीं जानती, जिस कारण से तुम मुझमें अनुरक्त नहीं हो, वह वाग्मिता भी राम में नहीं है। रावण के इस कथन के अनन्तर देवी सीता ने कहा—रे नीच! तुम्हारी वाणी पाप के परिपाक से संसक्त है, यही मैं जानती हूँ।

विशेषार्थ—देवी सीता ने रावण से कहा—रे पापिन्! तुम्हारी वाणी पकार से रहित तथा ककार से सम्बद्ध है। तदनुसार पकार के स्थान पर ककार का प्रयोग कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे विदेहात्मजे! स्वर्गवासी देवताओं के द्वारा प्रशंसनीय गाम्भीर्यादि गुणों से युक्त राम युद्ध में विजयलक्ष्मी को निश्चित रूप से हस्तगत मानते हैं, मेरी तरह भाषण में कटुता भी नहीं है। मांसाहार की रसज्ञता भी तुम्हारे में नहीं है, जिसके कारण तुम मुझ रावण में अनुरक्त नहीं हो, अर्थात् यदि मांसाहार की रसज्ञता तुम्हारे में होती, तो निश्चित ही मुझमें अनुराग होता।

प्रस्तुत श्लोक में प्रतिदत्ताक्षर नामक अलङ्कार है। विशेषार्थ के ऊहन का आधार—**विपाकसङ्गति**।।५३।।

मत्सेनाऽभ्यरिमाहवे मृगयते सा तावकं किं पुन-
र्नाथं दुर्गतिभावनाशिततमौजस्कं विदेहात्मजे।
तस्मान्मेऽङ्ग रतोत्सवं नियतमेवावेहि ते प्रीतिदं
रे किं जल्पसि जल्प वा खल हृदा गङ्गामहं भावये।।५४।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मत्सेनेति। रावण: सीतामाह—मत्सेनेत्यादि प्रीतिदमित्यन्तम्। हे विदेहात्मजे! मत्सेना आहवे युद्धे अभ्यरिम् अभिगच्छन्तं शत्रुं मृगयते अन्विष्यति। न कोऽप्यरिर्मत्सेनामभिगच्छति किन्तु तद्दर्शनादेव भयेन पलायत इत्यर्थ:। सा मत्सेना दुर्गतिभावेन दारिद्र्यस्वभावेन। सहायसम्पद्विकलतयेत्यर्थ:। नाशिततमम् अतिशयेन नाशितम् ओजो यस्य तं तथोक्तम्। शैषिक: कप्रत्यय:। तावकं नाथं रामं किं पुन: मृगयत इति किमुत मत्सैन्याद्भयेनौजस्विष्वपि पलायमानेषु निरोजा राम: पलायत इति कुतो वा वक्तव्यमित्यर्थ:। 'दुर्गति: नैस्व्यनरकौ' इति नानार्थरत्नमाला। 'भावस्सत्तास्वभावाभिप्रायचेष्टात्मजन्तुषु' इत्यमर:। तस्माद्धेतो: 'रामोऽरीन्विजित्य मामितो नीत्वा प्रीणयेत्' इति तव प्रत्याशाया वृथात्वादित्यर्थ:। अङ्ग! हे सीते! 'अथ सम्बोधनार्थका:। 'स्यु: फ्याट् फाडङ्ग हे है भो:' इत्यमर:। मे मम रतोत्सवमेव सुरतोद्धर्षमेव नियतं निश्चितं यथा तथा ते तव प्रीतिदं अवेहि जानीहि। यदि प्रीत्याऽवस्थातुमिच्छसि तर्हि मम रतिमनुमन्यस्वेत्यर्थ:। सीता प्रत्याह—र इत्यादि भावय इत्यन्तम्। रे खल! किं जल्पसि? किमित्याक्षेपे। मैवं पापवचनं जल्पीरित्यर्थ:। अथवा जल्प अहं हृदा मनसा गङ्गां भावये ध्यायामि। ध्यानमात्रादेव निखिलपापनिवर्तकभागीरथीध्यानेनाश्राव्यश्रवणपापमपनोदय इत्यर्थ:।

प्रत्युक्तिनिगूढार्थस्तु—रे खल! किं जल्पसि अथवा जल्प अहं गं ग इत्यानुपूर्वीकं वर्णं गां गा इत्यानुपूर्वीकं हृदा भावये। एवञ्च—'मत्सेनाऽभ्यरिमाहवे मृगायते सा तावकं किं पुनर्नाथं दुर्गातिभावनाशिततमौजस्कं विदेहात्मजे तस्मान्मेऽङ्गारतोत्सवं नियतमेवावेहि ते प्रीतिदम्' इत्येव त्वयोक्तं जानामीत्यर्थ:। हे विदेहात्मजे! मत्सेना आहवे अरिमभि शत्रोराभिमुख्ये 'अभिरभागे' इति कर्मप्रवचनीयसंज्ञायां 'कर्मप्रवचनीययुक्ते द्वितीया' इति द्वितीया। मृगायते मृग इवाचरति पलायत इत्यर्थ:। 'कर्तु: क्यङ्' इति क्यङ्। ङित्त्वादात्मनेपदम्। सा मत्सेना दुर्गाया: दुष्टदैत्यदमनाय धृतरौद्ररूपाया: कात्यायिन्या: अतिभावनया अतीवतादात्म्यानुसन्धानेन शिततमम् अतिनिशितम् ओजो यस्य तं दुर्गातिभावनाशिततमौजस्कं तावकं नाथं राममभि किं पुन: किमुत शत्रुसामान्यस्यावलोकनादेव पलायमाना मत्सेना त्रिभुवनैकवीरं राममवलोक्य पलायत इति कुतो वा वक्तव्यमित्यर्थ:। तस्मात् मम ससहायताया: वृथात्वाद्धेतो: मे मम नियतं सर्वथैव भविष्यन्तम् अङ्गारतोत्सवमेव चित्यग्निज्वालावृताङ्गत्वापतिष्य-दङ्गारत्वरूपमुत्सवमेव ते प्रीतिदं अवेहि। ममावश्यं मरणतस्तव प्रीतिर्भविष्यतीति जानीहीत्यर्थ:। वर्णचित्रमिदं प्रतिदत्ताक्षराख्यमेव; किन्त्वत्र गकारस्यैकस्यैव च्युतत्वाद्दत्तत्वाच्च सस्वरस्यैव तस्य ग्रहणं, न त्वन्यत्रेव विस्वरस्य।

प्रतिदत्ताक्षरे चित्रे विस्वरं व्यञ्जनाक्षरम्।
सङ्केतितं सस्वरं तु च्युतदत्तैकता यदि।।

इति परिभाषानियमात्।।५४।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामान्यार्थ—रावण ने सीता से कहा—हे विदेहात्मजे! मेरी सेना युद्ध में पलायन कर रहे शत्रुओं का अन्वेषण करती है[१]। वह मेरी सेना सहायतारूपी सम्पत्ति से विरहित सर्वथा ओजविहीन तुम्हारे पति राम का अन्वेषण क्या करेगी? अर्थात् मेरी सेना के भय से ओजस्वी भी पलायन कर जाते हैं, तो ओजविहीन राम के विषय में क्या कहना है[२]? हे सीते! मेरा रतोत्सव ही निश्चित रूप से तुम्हें आनन्द प्रदान करने वाला है, यह जानो। रावण के इन दुर्वचनों के अनन्तर देवी सीता ने कहा—रे खल! क्या मिथ्या प्रलाप कर रहे हो अथवा असद् भाषण करो, मैं तो मन से गङ्गा का ध्यान कर रही हूँ[३]।

विशेषार्थ—सीता ने रावण से कहा—रे खल! क्या मिथ्या प्रलाप कर रहे हो अथवा प्रलाप करो मैं गं ग इत्याकारक आनुपूर्वी वाले वर्णों को गां गा इस आनुपूर्वी के रूप में जान रही हूँ। तदनुसार गं ग के स्थान पर गां 'गा' का प्रयोग कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे विदेहात्मजे! मेरी सेना युद्ध में शत्रुओं के सम्मुख होने पर मृग की तरह आचरण करती है, अर्थात् पलायन कर जाती है, वह मेरी सेना दुर्गा (दुष्ट दैत्य के दमन के लिए रौद्र रूप धारण की हुई कात्यायनी) के अतीव तादात्म्यानुसन्धान के कारण सर्वथा ओजहीन है, वह तुम्हारे पति राम का पीछा क्या करेगी, अर्थात् शत्रु सामान्य को देखकर पलायन कर जाने वाली मेरी सेना त्रिभुवनैकवीर राम को देखकर ही पलायन कर जायेगी, अतः मेरी सहायता के व्यर्थ होने के कारण निश्चित रूप से होने वाले, चिता की आग में (जलने वाला) मेरा उत्सव ही तुम्हें आनन्दित करने वाला होगा, यह जानो।

प्रस्तुत श्लोक में प्रतिदत्ताक्षर नामक अलङ्कार है। विशेषार्थ का आधार—**गङ्गामहं भावये**॥५४॥

महाकुल इति श्रुतः क इव मद्वदुर्वीसुते
सतां श्रुतिविहारिणी मदपदानकीर्तिः सदा।
अनाहतपराक्रमो युधि परैः सदैवास्मि रे
तवोक्तिरपहासदा भवितुमेव सैषाऽर्हति।।५५।।

---

१. अर्थात् शत्रुओं की सेना मेरी सेना का पीछा नहीं करतीं; किन्तु मेरी सेना के दर्शन से ही पलायन कर जाती है।

२. अतः राम शत्रुओं पर विजय प्राप्त करके मुझको यहाँ से ले जाकर आनन्दित करेंगे, यह तुम्हारी आशा व्यर्थ है।

३. ध्यान मात्र से ही गङ्गा समस्त पापों का अपहार करने वाली हैं।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाकुल इति। रावणः सीतामाह–महाकुल इत्याद्यस्मीत्यन्तम्। हे उर्वीसुते! मद्वत् मया तुल्यं यथा तथा महत् कुलं यस्य स तथोक्तः इति श्रुतः क इव अस्तीति शेषः। इवशब्दो वाक्यालङ्कारे। मदपदानकीर्तिः कैलासविक्षेपणादिभिर्मम वृत्तैः कर्मभिस्सञ्जनितं यशः—'अपदानं कर्म वृत्तम्' इत्यमरः। सदा सतां श्रुत्योः विहरतीति तथोक्ता। ताच्छील्ये णिनिः। 'ऋन्नेभ्यो ङीप्' इति ङीप्। युधि युद्धे सदा न तु कदाचित् परैः शत्रुभिः अनाहतः अनपहतः अकुण्ठित इति यावत्। पराक्रमो यस्य स तथोक्त एव अस्मि। सीता प्रत्याह—र इत्याद्यर्हतीत्यन्तम्। रे नीच! सैषा पूर्वोक्ता महाकुल इत्यादिः, तव उक्तिः अपहासदैव अपकर्षाभिव्यञ्जकहास-सम्पादिकैव। श्रोतॄणां मुख इति शेषः। भवितुमर्हति। तवोक्तिमाकर्णयन्त-स्सर्वेऽप्यपहसन्त्येव न त्वभिनन्दन्तीत्यर्थः।

प्रत्युक्तिनिगूढार्थस्तु—रे नीच! सैषा तव उक्तिः महाकुल इत्यादिः अपहा अपगतहकारा सती सदैव दकारसहितैव हकारस्थानापन्नदकारैवेत्यर्थः। भवितुमर्हति। एवञ्च—'मदाकुल इति श्रुतः क इव मद्वदुर्वीसुते सतां श्रुतिविदारिणी मदपदानकीर्तिस्सदा। अनादृतपराक्रमो युधि परैस्सदैवास्मि' इत्येव त्वं वक्तुमर्हसीत्यर्थः। हे उर्वीसुते! मद्वत् मदेन आकुलः विह्वलः इति श्रुतः क इव अस्तीति शेषः। अहमेव महान्मदोन्मत्त इत्यर्थः। मदपदानकीर्तिः सदा सतां श्रुतिं कर्णं विदारयति विदलयतीति तथोक्ता। अहं युधि सदा परैः अनादृतः अवधीरितः पराक्रमो यस्य स तथोक्त एव अस्मि। प्रतिदत्ताक्षरमिदं चित्रम्। पृथ्वीवृत्तम्—

जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः।

इति लक्षणात्॥५५॥

सामान्यार्थ—रावण ने सीता से कहा—हे उर्वीसुते! मेरी तरह महान् कुल वाला कौन है? मेरे कैलास-विक्षेपणादि कर्मों के द्वारा उत्पन्न यश, सदा सत्पुरुषों के कानों का विषय बनता है, अर्थात् सत्पुरुषों को हमेशा सुनाई देता है। युद्ध में सदा शत्रुओं के द्वारा अपराहत पराक्रम वाला मैं हूँ। रावण के इस कथन के अनन्तर सीता ने कहा—रे नीच! तुम्हारा कथन अपकर्ष का सम्पादन ही है, अर्थात् तुम्हारे वचनों को सुनकर सभी लोग तुम्हारी निन्दा ही करेंगे, अभिनन्दन नहीं।

विशेषार्थ—सीता ने रावण से कहा—रे नीच! तुम्हारा कथन हकाररहित होते हुए दकारसहित ही उचित है। तदनुसार प्रस्तुत श्लोक में हकार के स्थान पर दकार का प्रयोग कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे उर्वीसुते! मेरी तरह मद से व्याकुल कौन है? मेरे कर्मों से उत्पन्न यश हमेशा सज्जनों के कानों को कष्ट देने वाला है। मैं युद्ध में सदा शत्रुओं के द्वारा अनादृत पराक्रम से युक्त हूँ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रस्तुत श्लोक में प्रतिदत्ताक्षर नामक अलङ्कार तथा पृथ्वी छन्द है। विशेषार्थ का आधार—**अपहासदा**॥५५॥

सीते त्वामपहृत्य मय्युपगते रामादियं मत्पुरी
भाति प्राप्तवतीव कञ्चन शुभश्रीसङ्गमन्यादृशम्।
सव्याचारलवोऽप्यलभ्य इह मय्यन्विष्यमाणोऽपि रे
जल्प स्वैरमसम्भवत्तव वचो रक्षोऽधमावैम्यहम्।।५६।।

सीते इति। रावणः सीतामाह—सीत इत्याद्यन्विष्यमाणोऽपीत्यन्तम्। हे सीते! मयि रामात् अपादानात् त्वाम् अपहृत्य उपगते सति। इयमिति हस्तेन निर्देशः। मत्पुरी लङ्का अन्यादृशं लोकोत्तरप्रकारकं 'त्यदादिषु' इत्यादिनाऽन्य-शब्दोपपदकात् दृशेः कञ्। 'आ सर्वनाम्नः' इत्यन्यशब्दस्याकारोऽन्तादेशः। कञ्चन अनिर्वचनीयं शुभश्रीसङ्गं शुभलक्ष्मीसम्बन्धं प्राप्तवतीव भाति। इह अस्मिन् स्वाभिमुखेन हस्तेनात्मनो निर्देशार्थमिदं विशेषणम्। मयि अन्विष्यमाणोऽपि मृग्यमाणोऽपि। अनुपूर्वकादिष्यतेः कर्मणि लटश्शानच्। सव्याचारस्य वामाचारस्य दुराचारस्येत्यर्थः। 'वामं शरीरे सव्यं स्यात्' इत्यमरः। लवोऽपि लेशोऽपि अलभ्यः लब्धुमशक्यः। सीता प्रत्याह—र इत्याद्यहमित्यन्तम्। रे रक्षोऽधम! स्वैरं स्वच्छन्दं यथा तथा जल्प। अहं तव वचः असम्भवत् असङ्गच्छमानम् अवैमि। पूर्वार्धस्य तृतीयचरणस्य च मिथोऽर्थतस्सम्बन्धविरहादनुपपद्यमानं जानामीत्यर्थः।

प्रत्युक्तिनिगूढार्थस्तु—रे रक्षोऽधम! स्वैरं जल्प। अहं तव वचः न विद्यते सः यस्मिन्नित्यसं सकाररहितं भोऽस्मिन्नस्तीति भवत् भकारसहितम्। सकारस्थाना-पन्नभकारमित्यर्थः। अवैमि जानामि। एवञ्च—'भीते त्वामपहृत्य मय्युपगते रामादियं मत्पुरी भाति प्राप्तवतीव कञ्चन शुभश्रीभङ्गमन्यादृशम्। भव्याचारलवोऽप्यलभ्य इह मय्यन्विष्यमाणोऽपि' इत्येव त्वयोक्तं जानामीत्यर्थः। प्रकरणवशादेव सीतायास्सम्बुद्धिरत्राध्याहार्या। मयि त्वामपहृत्य रामाद्भीते उपगते सति 'रामः पश्येद्यदि मां हन्यात्' इति भयेन सत्वरं पलाय्यागते सतीत्यर्थः। इयं मत्पुरी अन्यादृशं कञ्चन शुभश्रीभङ्गं प्राप्तवतीव भाति। इह मयि अन्विष्यमाणोऽपि भव्याचारस्य लवोऽपि अलभ्यः। कथमीदृशस्य मम श्रेयस्स्यादिति वाक्यशेषः। प्रतिदत्ताक्षरमिदं चित्रम्॥५६॥

सामान्यार्थ—रावण ने सीता से कहा—हे सीते! राम के पास से अपहरण करके, तुम्हारी प्राप्ति मुझे हो जाने के कारण यह मेरी लङ्कापुरी लोकोत्तरप्रकारक अनिर्वचनीय शुभ लक्ष्मी के सम्बन्ध को प्राप्त करके सुशोभित हो रही है। इस (हाथ से अपना निर्देश) मुझ रावण में खोजने पर भी दुराचार का लेशमात्र भी संभव नहीं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

है। रावण के ऐसा कहने पर देवी सीता ने कहा—रे रक्षोऽधम! स्वच्छन्द रूप से मिथ्याप्रलाप करो, मैं तुम्हारी वाणी को असम्भव (असंगत) जान रही हूँ।

विशेषार्थ—सीता ने रावण से कहा—रे रक्षोऽधम! मैं तुम्हारी वाणी को सकाररहित तथा भकारसहित जान रही हूँ। तदनुसार सकार के स्थान पर भकार का प्रयोग कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे सीते! राम के पास से तुम्हारा अपहरण करके, मेरे डर जाने के कारण यह मेरी लङ्कापुरी अन्य प्रकार की किसी शुभ लक्ष्मी के सम्बन्ध को प्राप्त करके सुशोभित हो रही है, इस मुझ रावण में भव्याचार (शुभाचार) का लेशमात्र भी सम्भव नहीं है।

प्रस्तुत श्लोक में प्रतिदत्ताक्षर नामक अलङ्कार है। विशेषार्थ का आधार—**स्वैरमसम्भवत्**।।५६।।

स्फुटं रामस्य स्याद्युधि मम जयश्रीविहरणं
स दृष्ट्वा मां विद्यादयमवनिजेऽहस्कर इति।
प्रहारप्रावीण्यं मम समवगच्छेदपि च रे
वचोऽभिज्ञाः सर्वे तव विदुरहन्ताऽन्वितमिदम्।।५७।।

स्फुटमिति। रावणः सीतामाह—स्फुटमित्याद्यपि चेत्यन्तम्। हे अवनिजे! मम जयश्रीविहरणं जयलक्ष्मीखेलनम्। इदानीं वदतां मुखतश्श्रूयमाणमिति भावः। युधि युद्धे रामस्य स्फुटं व्यक्तं स्यात्। 'नूनमयं सर्वजित्वरो महावीरः' इति साक्षादनुभवादेव स तदा प्रतीयादित्यर्थः। स रामः मां दृष्ट्वा अयं पुरोवर्ती अहस्करस्सूर्यः इति विद्यात् जानीयात्। तादृशत्वान्मत्तेजसामिति भावः। अपि च मम कर्तुः प्रहारे विषये शरखड्गाद्यायुधसाध्य इति भावः। प्रावीण्यं नैपुण्यं समवगच्छेत् तदपीदानीं श्रुतं तदा स्वयमनुभवात्सम्यग्जानीयादित्यर्थः। सीता प्रत्याह—र इत्यादीदमित्यन्तम्। रे नीच! अभिज्ञाः प्राज्ञाः सर्वे जनाः तव इदं वचः स्फुटं रामस्येत्यादि वचनम् अहन्तया अहङ्कारेण अन्वितं युतं विदुः जानन्ति—'विदो लटो वा' इति झेर्जुस्।

प्रत्युक्तिनिगूढार्थस्तु—रे नीच! अभिज्ञाः अर्थौचित्यं जानन्तः सर्वे तव इदं वचः अहं न विद्यते हः यस्मिन्निति विग्रहात् हकाररहितं, तान्वितं तकारेण सहितम्, हकारस्थानापन्नतकारमित्यर्थः। विदुः जानन्ति। एवञ्च—'स्फुटं रामस्य स्याद्युधि मम जयश्रीवितरणं स दृष्ट्वा मां विद्यादयमवनिजे तस्कर इति। प्रतारप्रावीण्यं मम समवगच्छेदपि च' इत्येव त्वयोक्तं जानन्तीत्यर्थः। हे अवनिजे! स्फुटं असन्दिग्धं यथा तथा युधि रामस्य मम जयश्रीवितरणं जयलक्ष्मीदानं स्यात्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवेत्। सर्वथा युधि रामायाहं जयलक्ष्मीं दद्यामित्यर्थः। रामस्य ममेत्युभयत्र क्रमेण सम्प्रदानत्वकर्तृत्वसम्बन्धाभिप्रायिका शेषे षष्ठी बोध्या। सः रामः मां दृष्ट्वा अयं तस्करः चोरः इति विद्यात् जानीयात्। अपि च मम प्रतारप्रावीण्यं वञ्चनाचातुर्यम्। मायायुद्धदर्शितमिति भावः। समवगच्छेत् केवलमयं मायावीरो न तु बाहुवीर इति सम्यग्जानीयादित्यर्थः। प्रतिदत्ताक्षरमिदं चित्रम्। शिखरिणीवृत्तम्॥५७॥

सामान्यार्थ—रावण ने सीता से कहा—हे अवनिजे! युद्ध में मेरे विजयलक्ष्मी का विहरण राम को स्पष्टतया ज्ञात है। वह राम मुझको देखकर, यह सम्मुख स्थित सूर्य है, इस रूप में मुझे जानता है (सूर्यसदृश तेजस्वी होने के कारण) और शर, खड्गादि के प्रहार के विषय में भी मेरे प्रावीण्य को जानता है। रावण के इस कथन के अनन्तर देवी सीता ने कहा—रे नीच! उत्कृष्ट ज्ञान वाले सभी लोग तुम्हारी इस वाणी को अहङ्कारयुक्त जानते हैं।

विशेषार्थ—सीता ने रावण से कहा—रे नीच! उचित अर्थ को जानने वाले सभी लोग तुम्हारे इस कथन को हकाररहित तथा तकारसहित जानते हैं। तदनुसार हकार के स्थान पर तकार का प्रयोग कर देने पर श्लोकार्थ अधोलिखित रूप से सम्पन्न होता है—

रावण ने सीता से कहा—हे अवनिजे! युद्ध में मेरे विजयलक्ष्मी का वितरण (दान) विषयक ज्ञान असन्दिग्ध रूप से राम को ज्ञात है, अर्थात् युद्ध में हमेशा मैं राम को विजयलक्ष्मी का दान करता हूँ। वह राम मुझको देखकर यह चोर है, इस रूप में जानता है और मेरी वञ्चनाचातुरी (माया-वीरता) को भी सम्यक् रूप से जानता है, अर्थात् यह मायावीर है, न कि बाहुवीर इस रहस्य को राम ठीक से समझता है।

प्रस्तुत श्लोक में प्रतिदत्ताक्षर नामक अलङ्कार है। विशेषार्थ का आधार—**हन्तान्वित**॥५७॥

वैदेह्यस्मि विलोकयाहमरिपुत्रासाकुलः सर्वदा
कीर्तिश्रीविपुलोपसम्भरणकृत्यैकाग्र्यभागस्म्यहम्।
वैरित्रासनपुष्टहर्षसकलस्वानीकिनीकोऽस्मि रे
चोरस्त्वं पिशिताशनाधम पुमानित्येव न ज्ञायसे॥५८॥

वैदेहीति। रावणः सीतामाह—वैदेहीत्याद्यनीकिनीकोऽस्मीत्यन्तम्। हे वैदेहि! अहं सर्वदा रिपुत्रासेन शत्रुभयेन आकुलः क्षुभितान्तःकरणः न भवतीति अरिपुत्रासाकुलः अस्मि। अहं कीर्तिश्रियाः यशोलक्ष्म्याः विपुलं विस्तृतं यदुपसम्भरणमभिवर्धनं तस्य कृतिषु रचनासु, शौर्यौदार्यादिगुणातिशयाविष्करण-रूपास्विति भावः। ऐकाग्र्यमेकाग्रतां 'गुणवचन.' इत्यादिना ष्यञ्। भजतीति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथोक्तः अस्मि। 'भजेर्ण्विः' इति। ण्विप्रत्ययः। किञ्चाहमिति शेषः। वैरिणां त्रासनेन भयोत्पादनेन पुष्टः हर्षः यस्यास्तथोक्ता सकला स्वस्य अनीकिनी सेना यस्य तथोक्तः अस्मि। 'नद्यृतश्च' इति कप्। विलोकय। एवंगुणं मां जानीहीत्यर्थः। सीता प्रत्याह—र इत्यादि ज्ञायस इत्यन्तम्। रे पिशिताशनाधम! राक्षसापशद! चोरः तस्करः त्वं पुमान् पुरुष इत्येव न ज्ञायसे नावगम्यसे। बुधैरिति शेषः। रामलक्ष्मणौ विघटय्य चोरवृत्त्या मामपहृतवता त्वया स्वस्मिन् शौर्यधैर्यादिपुरुषलक्षण-विपर्ययस्यैव प्रख्यापितत्वादिति भावः।

गूढार्थस्तु—रे पिशिताशनाधम! चोरः त्वं पुमान् पु इत्याकारकवर्णवानिति नैव ज्ञायसे। पुमानित्यत्र पुः अस्यास्तीति विग्रहः। 'तदस्य' इत्यादिना मतुप्। एवञ्च—त्वं पु इत्याकारकवर्णरहितविशेषणकतयैव बुधैर्ज्ञायमानत्वात् 'वैदेह्यस्मि विलोकयाहमरित्रासाकुलस्सर्वदा कीर्तिश्रीविलोपसम्भरणकृत्यैकाग्र्यभागस्म्यहं वैरित्रासनष्टहर्षसकलस्वानीकिनीकोऽस्मि' इत्येव वक्तुमर्हसीत्यर्थः। हे वैदेहि! अहं सर्वदा अरित्रासेन शत्रुभयेन आकुलः अस्मि। अहं कीर्तिश्रियाः विलोपसम्भरणस्य विच्छेदापादनस्य कृत्येषु व्यापारेषु परदारापहारादिष्विति भावः। ऐकाग्र्यं भजतीति तथोक्तः अस्मि। वैरित्रासेन शत्रुभयेन नष्टः हर्षः यस्याः तथोक्ता सकला स्वस्य अनीकिनी यस्य तथोक्तः अस्मि। विलोकय। च्यावितक्षरमिदं चित्रम्।।५८।।

श्लोकार्थ—रावण ने सीता से कहा—हे वैदेहि! मैं हमेशा (कभी भी) शत्रुओं के भय से व्याकुल नहीं होता हूँ। मैं यशरूपिणी लक्ष्मी की विस्तृत जो अभिवृद्धि है उसकी रचना (शौर्यौदार्यादि गुणों का आविष्कार) के विषय में एकाग्र रहने वाला हूँ। मैं वैरियों के त्रास से हर्षित होने वाली सेना से युक्त हूँ (इस प्रकार के गुणों वाला मुझको जानो)। रावण की इस आत्मश्लाघा के अनन्तर सीता ने कहा—रे पिशिताशनाधम! तुम चोर हो, तुमको पुरुष के रूप में विद्वानों के द्वारा नहीं जाना जाता है।

विशेषार्थ—सीता ने रावण से कहा—रे पिशिताशनाधम! विद्वान् तुम्हें 'पु' इत्याकारक वर्ण से युक्त नहीं जानते। तदनुसार प्रस्तुत श्लोक में से 'पु' इत्याकारक वर्ण का अपहार कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे वैदेहि! मैं हमेशा शत्रुओं के डर से व्याकुल रहता हूँ। मैं यशरूपिणी लक्ष्मी के विनाशविषयक व्यापार (परदारापहरणादि) में एकाग्र (दत्त-चित्त) रहता हूँ। मैं शत्रुओं के डर से समाप्त हो गया है हर्ष जिसका, उस प्रकार की अपनी सेना से युक्त हूँ (मुझको देखो)।

प्रस्तुत श्लोक में च्यावितक्षर नामक अलङ्कार है। विशेषार्थ का आधार—**पुमानित्येव**।।५८।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सीते शौर्यरमाऽऽहितेन मनसा भर्ता त्वदीयः स किं
सङ्ग्रामे परमादरादहमिव व्याप्नोति सर्वतः दिशः।
प्रेमा ते मयि नोचितः किमु महाहर्षोदयः सर्वतः
स्वैरं रे पिशिताश जल्प न मया श्राव्यं तवेदं वचः।।५९।।

सीते इति। रावणः सीतामाह—सीते इत्यादि सर्वत इत्यन्तम्। हे सीते! स त्वदीयो भर्ता रामः अहमिव शौर्यरमायां शौर्याभिमानिन्यां लक्ष्म्याम् आहितेन। शौर्यश्रीरवश्यं सम्पादनीयेति कृतनिश्चयेनेत्यर्थः। मनसा सङ्ग्रामे युद्धे परमश्चासावादरश्च तस्मात् सर्वाः दिशः व्याप्नोति किम्? प्रतिदिशमभिषेणयति किमित्यर्थः। मयि एवं सर्वदिग्विजित्वर इति भावः। ते तव सर्वतः सर्वेषु विषयेषु वस्त्राभरणादिष्विति भावः। सप्तम्यन्तात्तसिः। महान् हर्षस्य सन्तोषस्य उदयः अतिशयः यस्मात् हेतुभूतात्तथोक्तः प्रेमा अनुरागः नोचितः किमु? उचित एवेत्यर्थः। सकलदिग्जिष्णौ मय्यनुरक्तया त्वया न कश्चिदपि दुर्लभो भविष्यति वस्त्राभरणादिरभिमतार्थ इति समुदितार्थः। एवमेवोक्तं श्रीरामायणे रावणेन—'लोकेभ्यो यानि रत्नानि' इत्यादिना। सीता प्रत्याह—स्वैरमित्यादि वच इत्यन्तम्। रे! पिशिताश! राक्षस! स्वैरं स्वेच्छया जल्प तव इदं पूर्वोक्तं सीते शौर्यरमेत्यादि वचः मया न श्राव्यं श्रोतुमनर्हम्।

गूढार्थस्तु—रे पिशिताश! स्वैरं जल्प तवेदं वचः मया मा इत्याकारकेण वर्णेन हेतुना न श्राव्यं मावर्णं विरहय्योक्तं चेच्छ्राव्यमित्यर्थः। बुधैरिति शेषः। एवञ्च—'सीते शौर्यरहितेन मनसा भर्ता त्वदीयस्स किं सङ्ग्रामे परदरादहमिव व्याप्नोति सर्वा दिशः प्रेते मयि नोचितः किमु महाहर्षोदयस्सर्वतः' इत्येव त्वं वक्तुमर्हसीत्यर्थः फलितः। हे सीते! सः त्वदीयः भर्ता अहमिव सङ्ग्रामे शौर्यरहितेन मनसा परदरात् शत्रुभयात्—'परोऽरिपरमात्मनोः' इति विश्वः। 'दरत्रासौ भीतिर्भीस्साध्वसं भयम्' इत्यमरः। सर्वाः दिशः व्याप्नोति किं? प्रतिदिशं धावति किम्? न स स्वप्नेऽप्येवं कुर्यादित्यर्थः। मयि प्रेते सति सर्वतः सर्वेषां सर्वेषु लोकेष्विति वाऽर्थः। षष्ठ्यन्तात्सप्तम्यन्ताद्वा तसिः। महाहर्षोदयः महतः हर्षस्य आविर्भावः नोचितः किम्? उचित एवेत्यर्थः। दुष्टनाशस्य सर्वाभिमतत्वादिति भावः। इदं च च्यावितक्षरमेव चित्रम्।।५९।।

सामान्यार्थ—रावण ने सीता से कहा—हे सीते! वह तुम्हारा पति राम, क्या मेरी तरह शौर्यश्री की प्राप्ति के विषय में निश्चय कर लिया है जिसने, तादृश मन से युद्ध में परमप्रतिष्ठारूप हेतु द्वारा प्रत्येक दिशाओं को व्याप्त करता है? अर्थात् सर्वदिग्विजयी मैं ही हूँ। तुम्हारे समस्त विषयों (वस्त्राभरणादि कार्यों) में अतीव हर्षित होने वाला हूँ, अतः क्या मेरा अनुराग उचित नहीं है, अर्थात् उचित ही है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रावण की इस आत्मश्लाघा के अनन्तर देवी सीता ने कहा—रे पिशिताश! राक्षस! स्वेच्छा से प्रलाप करो, तुम्हारे द्वारा कहा गया वचन मेरे सुनने योग्य नहीं है।

विशेषार्थ—सीता ने रावण से कहा—रे पिशिताश! स्वेच्छा से प्रलाप करो, तुम्हारे द्वारा कहा गया वचन 'मा' इस वर्ण के कारण सुनने योग्य नहीं है, अर्थात् 'मा' इत्याकारक वर्णविरहपुरस्सर उच्चारण करो, तदनुसार मा इत्याकारक वर्ण का प्रस्तुत श्लोक में प्रयुक्त वर्णसमूह में से अपहार कर देने पर श्लोकार्थ अधोलिखित रूप से सम्पन्न होता है—

रावण ने सीता से कहा—हे सीते! वह तुम्हारा पति राम क्या मेरी तरह शौर्य-रहित मन से (शत्रुभय से) प्रत्येक दिशाओं में भागता है? मेरी मृत्यु के अनन्तर समस्त लोकों में महान् हर्ष का प्राकट्य क्या उचित नहीं है? अर्थात् उचित ही है।

प्रस्तुत श्लोक में च्यावितक्षर नामक अलङ्कार है। विशेषार्थ के ऊहन का आधार—**न मया**॥५९॥

सर्वत्राहमभीक एव विदधे कालोचितां प्रक्रियां
दुष्कर्मस्ववगच्छ लज्जिततमं सीते प्रकृत्यैव माम्।
दृग्धारां शुभलोचनेऽतिचतुरामाधेहि मय्याशु रे
वाक्ते पापसमाविलेति न कथं विद्युर्दुरात्मन् बुधाः॥६०॥

सर्वत्रेति। रावणः सीतामाह—सर्वत्रेत्यादि आश्वित्यन्तम्। हे सीते! अहं नास्ति भीर्यस्य सोऽभीको निर्भयः स एव सन् असिद्ध्यन्यथासिद्धिशङ्कारहित एव सन्नित्यर्थः। सर्वत्र सर्वेषु विषयेषु सुसाधेषु दुस्साधेषु वेति भावः। कालोचितां तत्कालविधेयामित्यर्थः। प्रक्रियां व्यापारं विदधे करोमि। विपूर्वाद्दधाते-र्लट्यात्मनेपदोत्तमपुरुषैकवचनम्। नीतिनैपुण्येन निश्चितफलान्येव महान्त्यपि सर्वाणि कार्याणि यथाकालमहमनुतिष्ठामीत्यर्थः। मां प्रकृत्यैव स्वभावेनैव न तु शिक्षावशेनेत्यर्थः। दुष्कर्मसु विषये लज्जिततमम् अतिशयेन लज्जितम् अवगच्छ जानीहि। तस्मादिति शेषः। हे शुभलोचने! सुनयने! जानकि! मयि आशु अविलम्बितं यथा तथा अतिचतुरामत्यन्तपेशलां दृग्धारां दृष्टिधोरणीम् आधेहि निधेहि। अतिव्यामोहिकया दृशा क्षिप्रं मां पश्येत्यर्थः। सीता प्रत्याह—र इत्यादि बुधा इत्यन्तम्। रे दुरात्मन्! ते तव वाक् पापेन पातकेन समाविला सङ्कलुषा—'कलुषोऽनच्छ आविलः' इत्यमरः। अतिदूषितेति यावत्। इति बुधाः कथं न विद्युः न जानीयुः जानीयुरेवेत्यर्थः।

गूढार्थस्तु—रे पाप! पापिन्! मत्वर्थीयाच्प्रत्ययान्तस्य पापशब्दस्य सम्बुद्धिः। 'त्रिषु द्रव्ये पापपुण्यसुखादि च' इत्यमरः। दुरात्मन्! दुष्ट! ते तव वाक्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वत्राहमित्यादिः पूर्वोक्ता विला विगतलकारा सती, समा मकारसहिता उभयत्र बहुव्रीहिः। लकारस्थानापन्नमकारेत्यर्थः। इति बुधाः कथं न विद्युः। एवञ्च—'सर्वत्राहमभीक एव विदधे कामोचितां प्रक्रियां दुष्कर्मस्ववगच्छ मज्जिततमं सीते प्रकृत्यैव माम्। दृग्धारां शुभमोचनेऽतिचतुरामाधेहि मय्याशु' इत्येव त्वयोक्तमिति जानन्तीत्यर्थः। हे सीते! अभीकः कामुकः—'कम्रः कामयिताऽभीकः' इत्यमरः। अहं सर्वत्र सर्वासु गम्यास्वगम्यासु चेति भावः। कामस्य कामविकारस्य उचितां योग्यामेव प्रक्रियां चेष्टां विदधे करोमि। मां प्रकृत्यैव कर्त्र्या स्वभावेनैव। न तु संसर्गादिजन्येनागन्तुकधर्मेणेत्यर्थः। दुष्कर्मसु दुर्व्यापारेषु मज्जिततमम् अतिशयेन मज्जितम्। मज्जतेर्ण्यन्तात्कर्मणि क्तः, ततोऽतिशायने तमप्। गाढं प्रवर्तितमित्यर्थः। अवगच्छ शुभस्य मङ्गलस्य। मदीयस्येत्यार्थिकोऽर्थः। मोचने त्याजने अतिचतुरामत्यन्तदक्षाम्। 'दक्षे तु चतुरपेशलपटवः' इत्यमरः। कोपकलुषत्वादिति भावः। दृग्धाराम् आशु मयि आधेहि। यथा कामी दुरात्माऽहं क्षिप्रमेव नश्येयं तथा मां पश्येत्यर्थः। प्रतिदत्ताक्षरं चित्रम्॥६०॥

सामान्यार्थ—रावण ने सीता से कहा—हे सीते! मैं साधु असाधु सभी विषयों में भयरहित हूँ तथा कालोचित कार्य को सम्पादित करता हूँ, अर्थात् जिस काल में जो कार्य उचित है, उस कार्य को उसी समय में करता हूँ। मुझको स्वभाव से ही दुष्कर्मों में अतिशय लज्जित होने वाला जानो, अतः हे सुनयने! जानकि! अत्यन्त प्रेमपूर्वक दृष्टि के द्वारा शीघ्र ही मुझको देखो। इसके बाद देवी सीता ने कहा—रे पापिन्! तुम्हारी वाणी को विद्वानों ने पाप से कलुषित क्या नहीं जाना है, अर्थात् जाना ही है।

विशेषार्थ—सीता ने रावण से कहा—रे पापिन्! तुम्हारे द्वारा पूर्वोक्त वचनों को क्या विद्वानों ने लकार से रहित तथा मकारसहित नहीं जाना है, अर्थात् जाना ही है। तदनुसार लकार के स्थान पर मकार का प्रयोग कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे सीते! मैं सर्वत्र (गम्य अथवा अगम्य युवतियों में) कामविकारोचित चेष्टा को सम्पादित करता हूँ। मुझको देखो, अर्थात् मुझ दुरात्मा कामी का शीघ्र ही जिससे विनाश हो जाय, उस प्रकार की दृष्टि से मुझे देखो।

प्रस्तुत श्लोक में प्रतिदत्ताक्षर अलङ्कार है। विशेषार्थ का आधार—**समाविलेति**॥६०॥

कामारात्युपलालनारसविदस्म्येकोऽहमुर्वीसुते
दोर्दर्पोऽतितरां प्रकाशमित इत्याजिक्षितौ विद्धि मे।
मद्वत्कः स्ववधूजनं कलयते कामोचितालङ्क्रियं
श्राव्यः स्वस्तव एष तेऽपि कुमते कालोपसम्प्राप्तितः॥६१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कामारातीति। रावणः सीतामाह—कामारातीत्याद्यलङ्क्रियमित्यन्तम्। हे उर्वीसुते! एकः अहं अहमेवेत्यर्थः। कामारातेः शिवस्य कर्तुः या उपलालना सस्नेहमादरणं तस्यां यो रसः स्वादः तं वेत्तीति कामारात्युपलालनारसवित् अस्मि। मामिव न कमपीश्वरः प्रेम्णोपलालयतीत्यर्थः। स्वस्य तद्भक्ताग्रगण्यत्वादिति भावः। आजिक्षितौ युद्धभूमौ मे मम दोर्दर्पः भुजबलावष्टम्भ इत्यर्थः। अतितरां प्रकाशं प्राकट्यम् इतः प्राप्तः प्रति विद्धि जानीहि। मद्वत् कः पुमान् स्ववधूजनं निजकलत्रवर्गकामस्य इच्छाया उचिता अनुगुणा अलङ्क्रिया आभरणं यस्य तथोक्तं कलयते करोति। अहमेक एव कलत्राणां इच्छानुगुणाभरणोपकल्पनेन सन्तोषापादक इत्यर्थः। सीता प्रत्याह—श्राव्य इत्यादि प्राप्तित इत्यन्तम्। रे कुमते! दुर्बुद्धे! कालस्य उपसम्प्राप्तितः उपसम्प्राप्त्या हेतुना। तृतीयान्तात्तसिः। दुर्दैवयोगान्ममैवमत्र निरोधानुभवदुस्समयस्योपगमेनेत्यर्थः। एषः पूर्वोक्तः ते तव स्वस्तवोऽपि आत्मश्लाघाऽपि। अपिशब्दोऽत्यन्तजुगुप्सितत्वद्योतनार्थः। श्राव्यः श्रोतव्यः अभूदिति शेषः।

गूढार्थस्तु—रे कुमते! ते एषः स्वस्तवोऽपि। अर्थः पूर्ववत्। कायाः का इत्याकारकवर्णस्य लोपसम्प्राप्तितः लोपसम्प्राप्त्या। पूर्ववत्तसिः। श्राव्यः श्रोतुं योग्यः। अभिज्ञैरिति शेषः। एवञ्च—'मारात्युपलालनारसविदस्म्येकोऽहमुर्वीसुते दोर्दर्पोऽतितरां प्रशमित इत्याजिक्षितौ विद्धि मे मद्वत्कस्स्ववधूजनं कलयते मोचितालङ्क्रियम्' इति वदसि चेच्छ्रोतुमर्हं तव वचो भवेदित्यर्थः। हे उर्वीसुते! एकः अहं मारस्य कर्मणः अतिलालनायामत्यन्तादरणे। तृतीय एव परमः पुरुषार्थ इत्यासक्त्या तदुपसेवायामित्यर्थः। यो रसः तं वेत्तीति तथोक्तः अस्मि। न कश्चिदप्यहमिवात्यन्तं कामलम्पट इत्यर्थः। आजिक्षितौ मे दोर्दर्पः अतितरां प्रशमितः निर्वापित इत्यर्थः। रामेणेति शेषः। भविष्यतोऽप्यर्थस्य नैयत्यनिश्चयद्योतको भूतवद्व्यपदेशः इति विद्धि। मद्वत्कः स्ववधूजनं मोचिता त्याजिता अलङ्क्रिया यस्य तं तथोक्तं वैधव्यापादनेनेति भावः। कलयते करोति। च्यावितक्षरं चित्रम्।।६१।।

सामान्यार्थ—रावण ने सीता से कहा—हे उर्वीसुते! मैं ही कामारि भगवान् शिव के सस्नेह आदर के रस को जानने वाला हूँ, अर्थात् मेरी तरह शिव का प्रेमपात्र दूसरा नहीं है। युद्धभूमि में मेरे बाहुबल को अत्यन्त प्राकट्य को प्राप्त जानो। मेरी तरह कौन-सा पुरुष अपने वधूजनों को इच्छा के अनुरूप अलङ्कारों (आभूषणों) को प्रदान करता है, अर्थात् मैं अकेला ही अपनी पत्नियों की इच्छा के अनुरूप आभूषणों को प्रदान करने वाला हूँ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इसके अनन्तर देवी सीता ने कहा—हे दुर्बुद्धे! काल की प्राप्ति के कारण अर्थात् दुर्भाग्यवशात् तुम्हारी आत्मस्तुति भी सुननी पड़ रही है।

विशेषार्थ—सीता ने रावण से कहा—रे कुमते! यह (पूर्वोक्त) तुम्हारी आत्मस्तुति भी 'का' इत्याकारक वर्ण के लोप होने के कारण सुनने योग्य है। तदनुसार प्रस्तुत श्लोक में प्रयुक्त वर्णराशि में से का इत्याकारक वर्ण का लोप कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे उर्वीसुते! मैं ही कामदेव का जो कर्म अत्यधिक प्रेम, उसके रस को जानने वाला हूँ, अर्थात् मेरी तरह कोई भी कामलम्पट नहीं है। युद्धभूमि में मेरे बाहुबल को अत्यन्त शान्त कर दिया गया है। मेरी तरह अपने वधूजनों को अलङ्कारविहींन करने वाला वैधव्यापादक कौन है?

प्रस्तुत श्लोक में 'च्यावितक्षर' नामक अलङ्कार है। विशेषार्थ का आधार—**का-लोपसम्प्राप्तितः**।।६१।।

तैस्तैः स्वैश्चरितैः सुदूरविधुतारात्युल्लसत्सद्यशाः
सीते कोऽहमिवास्ति च त्रिभुवनेऽत्यन्तं कृताशो रणे।
तापानाकलनेन च प्रमुदितो मद्वत्सदाऽतीव कोऽ-
स्त्येवं स्वस्तवनं त्वया जडमते कर्तुं न तावत् क्षमम्।।६२।।

तैस्तैरिति। रावणः सीतामाह—तैस्तैरित्याद्यस्तीत्यन्तम्। हे सीते! त्रिभुवने त्रिलोक्याम् अहमिव स्वैः स्वकीयैः तैस्तैः कैलासोत्क्षेपणादिनान्यादृशैरित्यर्थः। चरितैः व्यापारैः हेतुभिः सुदूरं यथा तथा विधुतं निर्धूतम् अरातीनां शत्रूणाम् उल्लसत् प्रकाशमानं सद्यशः बाहुबलप्रयुक्तं येन तथोक्तः। रणे विषये अत्यन्तं यथा तथा कृता आशा अतितृष्णा येन तथोक्तश्च कः अस्ति? न कोऽपि किं त्वहमेक एव तादृश इत्यर्थः। 'आशा दिगतितृष्णयोः' इति विश्वः। किञ्चेति चार्थः। मद्वत् ममतुल्यम्। क्रियाविशेषणमेतत्। अहमिवेत्यर्थः। तापस्य आध्यात्मिकादेः अनाकलनेन अत्यन्तापरिचयेन हेतुना। कामधेनुः। सदा अतीव प्रमुदितः सन्तुष्टः कोऽस्ति? ईदृशश्चाहमेक एवेत्यर्थः। सीता प्रत्याह—एवमित्यादि क्षममित्यन्तम्। रे जडमते! मन्दबुद्धे! एवं त्वया स्वस्तवनम् आत्मश्लाघनं कर्तुं न तावत्क्षमं नैव युक्तं—'यावत्तावच्च साकल्येऽवधौ मानावधारणे। क्षितिक्षान्त्योः क्षमा युक्ते क्षमं शक्ते हिते त्रिषु' इति चामरः।

गूढार्थस्तु—रे जडमते! त्वया एवं तैस्तैरित्याद्युक्तिप्रकारेणेत्यर्थः। तावत् ता इत्याकारकवर्णवत्। तावदित्यत्र ता अस्मिन्नस्तीति विग्रहः। 'तदस्य' इत्यादिना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मतुप्। 'मतोर्वः' इति मकारस्य वकारादेशः। स्वस्तवनं कर्तुं न क्षमम्। एवञ्च—तावर्णं परित्यज्य 'तैस्तैस्स्वैश्चरितैस्सुदूरविधुरात्युल्लसत्सद्यशास्सीते कोऽहमिवास्ति च त्रिभुवनेऽत्यन्तं कृशो रणे पानाकलनेन च प्रमुदितो मद्वत्सदाऽतीव कोऽस्ति' इत्येव त्वया वक्तुं युक्तमित्यर्थः। हे सीते! त्रिभुवने अहमिव स्वैः तैस्तैः परदारचौर्यादिभिरित्यर्थः। चरितैः सुदूरविधुरम् अत्यन्तविश्लिष्टम् उल्लसत्सद्यशः प्रकाशमानसुकीर्तिः यस्मात्तथोक्तः। 'विधुरौ कष्टविश्लिष्टौ' इति नानार्थरत्नमाला। रणे अत्यन्तं कृश कोऽस्ति? अहमेक एव तादृश इत्यर्थः। कृश इत्यनेन निरुत्साहत्वमूलभूतमतिभीरुत्वं द्योत्यते। मद्वत् सदा अतीव पानस्य मद्यपानस्य आकलनेन सेवनेन प्रमुदितश्च कोऽस्ति? तादृशश्चाहमेवेत्यर्थः। च्यविताक्षरं चित्रम्।।६२।।

सामान्यार्थ—रावण ने सीता से कहा—हे सीते! तीनों लोकों में मेरी तरह अपने उन-उन चरित्रों (कैलासोत्क्षेपणादि) के द्वारा प्रकाशित हो रहे शत्रुओं के उज्ज्वल यश को समाप्त कर देने वाला कौन है? हर प्रकार से युद्ध में अत्यन्त तृषित रहने वाला मैं हूँ। मेरी तरह संतापादि कार्यों से अपरिचित रहने के कारण सन्तुष्ट रहने वाला कौन है? इसके अनन्तर देवी सीता ने कहा—रे जडमते! तुम्हारे द्वारा अपनी स्तुति अपने से करना उचित नहीं है।

विशेषार्थ—सीता ने रावण से कहा—रे जडमते! तुम्हारे द्वारा 'ता' इत्याकारक वर्ण से युक्त आत्मस्तुति करना उचित नहीं है। तदनुसार प्रस्तुत श्लोक में से ता इत्याकारक वर्ण का अपहार कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे सीते! तीनों लोकों में मेरी तरह अपने उन-उन चरित्रों के द्वारा प्रकाशित हो रही सुन्दर कीर्ति से अत्यन्त विरहित कौन है? युद्ध में अत्यन्त कृश (अतिभीरु) कौन है? अर्थात् मैं अकेला ही युद्ध में डरने वाला हूँ तथा मेरी तरह हमेशा मदिरा के सेवन से प्रसन्न रहने वाला कौन है?

प्रस्तुत श्लोक में च्यविताक्षर नामक अलङ्कार है। विशेषार्थ का आधार—**न तावत्**।।६२।।

पौरैरध्युषिता मुदा कुचरितं स्वप्नेऽप्यनभ्याश्रितै-
वैरिभ्योऽपकृतौ नितान्तनिपुणैर्योधैः समभ्यावृता।
प्राप्य त्वां कलयेव भाति सुतरां सीते ममेयं पुरी
त्वद्वाङ्मूढ समीपतः श्रवणयोर्निष्कासमेवार्हति।।६३।।

पौरैरिति। रावणः सीतामाह—पौरैरित्यादि-पुरीत्यन्तम्। हे सीते! स्वप्नेऽपि कुचरितम् अनभ्याश्रितैः नित्यपरिशुद्धचरितैरित्यर्थः। पौरैः मुदा अध्युषिता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधिपूर्वाद्वसतेः कर्मणि क्तः। तथा वैरिभ्यः अपकृतौ द्रोहे शत्रुनिग्रहे इत्यर्थः। अपपूर्वकस्य करोतेः द्रुह्यर्थकतया 'क्रुधद्रुह' इत्यादिना कोपविषयाणां वैरिणां सम्प्रदानत्वाच्चतुर्थी। नितान्तनिपुणैः अतिप्रवीणैः योधैः भटैः समभ्यावृता सम्यक्परिवृता मम इयं नगरी लङ्का उक्तरीत्या इष्टप्राप्त्यनिष्टनिवृत्तिसाधनाभ्यां सृजनसंसर्गभटगुप्तिभ्यामुपलक्षितत्वात्प्रागेव शोभमानेति भावः। त्वां प्राप्य सुतराम् अवभाति मङ्गलदेवतायास्तव सन्निधानादतितरां शोभत इत्यर्थः। कलये जानामि। उक्त एव वाक्यार्थः। कर्म। सीता प्रत्याह—त्वदित्याद्यर्हतीत्यन्तम्। रे मूढ! त्वद्वाक् श्रवणयोः समीपतः समीपात्। पञ्चम्यास्तसिः। निष्कासमेव दूरतोऽपसारण-मेव अर्हति। अत्यन्तमश्राव्या भवतीत्यर्थः।

गूढार्थस्तु—रे मूढ! त्वद्वाक् श्रवणयोः समीपतः समीपे। सप्तम्यास्तसिः। निष्का निर्गतककारा सती समेव सकारमेव अर्हति ककारस्थाने सकारमेवार्हतीत्यर्थः। एवञ्च—'पौरैरध्युषिता मुदा सुचरितं स्वप्नेऽप्यनभ्या-श्रितैर्वैरिभ्योऽपसृतौ नितान्तनिपुणैर्योधैस्समभ्यावृता। प्राप्य त्वां सलयेव भाति सुतरां सीते ममेयं पुरी' इत्येव त्वं वक्तुमर्हसीत्यर्थः। हे सीते! स्वप्नेऽपि सुचरितम् अनभ्याश्रितैर्नित्यदुश्चरितैरित्यर्थः। पौरैः मुदा अध्युषिता तथा वैरिभ्य इत्यपादानत्वात् पञ्चमी। अपसृतौ अपसरणे दूरतः पलायन इत्यर्थः। नितान्तनिपुणैः योधैस्समभ्यावृता ईदृशत्वादेव सूचितासन्नविनाशेति भावः। इयं मम पुरी त्वां प्राप्य सुतरां लयेन विनाशेन सह वर्तत इति तथोक्तेव प्राप्तविनाशेवेत्यर्थः। भाति पूर्वमाशङ्कितोऽस्य नगरस्य विनाशोऽद्य त्वदनुषङ्गान्निश्चित एवास्तीत्यर्थः। प्रतिदत्ताक्षरं चित्रम्॥६३॥

सामान्यार्थ—रावण ने सीता से कहा—हे सीते! स्वप्न में भी निन्दनीय चरित का आश्रयण न करने के कारण पुरवासी प्रसन्नतापूर्वक निवास करते हैं तथा शत्रुनिग्रह में अत्यन्त प्रवीण होने के कारण वीरों से अच्छी तरह घिरी हुई यह मेरी लङ्का नगरी तुमको प्राप्त करके अत्यधिक शोभा को प्राप्त कर रही है[१]। रावण के इस कथन के अनन्तर देवी सीता ने कहा—रे मूढ़! तुम्हारी वाणी कानों के पास से दूर ही रहने लायक है, अर्थात् अत्यन्त अश्रवणीय है।

विशेषार्थ—सीता ने रावण से कहा—रे मूढ़! तुम्हारी वाणी कानों के समीप में ककाररहित तथा सकारसहित होकर ही सुनने योग्य है। तदनुसार ककार के स्थान पर सकार का प्रयोग कर देने पर श्लोकार्थ होता है—

१. इष्ट-प्राप्ति तथा अनिष्ट-निवृत्तिरूप साधनों के द्वारा पूर्व में शोभा वाली भी तुमको प्राप्त कर अतिशय शोभित हो रही है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रावण ने सीता से कहा—हे सीते! स्वप्न में भी सुन्दर चरित का आश्रयण न करने के कारण पुरवासी प्रसन्नतापूर्वक निवास करते हैं तथा शत्रुओं से पलायन में अत्यन्त निपुण होने के कारण योद्धाओं से घिरी हुई यह मेरी लङ्कानगरी तुमको प्राप्त करके अत्यन्त विनष्ट होने वाली है[1]।

प्रस्तुत श्लोक में प्रतिदत्ताक्षर अलङ्कार है। विशेषार्थ का आधार—**निष्कासमेव**।।६३।।

सर्वानप्यवजानतो युधि रिपून् मद्वत्स किं राघवः
सद्यः संशमयेदहं स इव किं सीतेऽस्म्यजात्युत्तमः।
भूजातोत्सवभाजनं कलयितुं त्वं मां किमाशङ्कसे
पापिन् जारहितं तव प्रलपितं जानन्त्यभिज्ञा न किम्।।६४।।

सर्वानिति। रावणः सीतामाह—सर्वानित्याद्याशङ्कस इत्यन्तम्। हे सीते! स राघवः मद्वत् मया तुल्यम् अहमिवेत्यर्थः। युधि अवजानतः अवमन्वानान् सर्वानपि रिपून् सद्यः अवमाननाक्षण एव संशमयेत्किं? हन्तुं शक्नुयात्किमित्यर्थः। 'शकि लिङ् च' इति लिङ्। 'शमोऽदर्शने' इति दर्शनभिन्नार्थे मित्त्वादुपधाह्रस्वः। अहं राक्षसानां देवयोनित्वेन प्रबलत्वादुत्कृष्ट इति भावः। स इव मानुषत्वाद्दुर्बलो राम इव जात्या उत्तमो न भवतीत्यजात्युत्तमः जात्याऽनुत्कृष्ट इत्यर्थः। अस्मि किं?

दर्शितैव श्रीमद्रामायणे भगवता वाल्मीकिना राक्षसोक्तिषु मानुषजातेः राक्षसजातितोऽपकर्षप्रतिपादनसरणिः—'मानुषं कृपणं रामं त्यक्त्वा रावणमाश्रय'। इत्यादिना। भूजाता अयोनिजत्वाज्जन्मनोत्कृष्टेत्यर्थः। त्वं मां जात्योत्कृष्टमिति भावः। उत्सवस्य भाजनं पात्रं कलयितुं परिग्रहेणानन्दयितुमित्यर्थः। किमाशङ्कसे? कुतो वितर्कयसि? सीता प्रत्याह—पापिन्नित्यादि न किमित्यन्तम्। रे पापिन्! अभिज्ञाः प्राज्ञाः तव प्रलपितम् अनर्थकं वचनं जारेभ्यः हितं जारपुरुषाभिमतं 'चतुर्थी तदर्थ' इत्यादिना चतुर्थीसमासः। न जानन्ति किं जानन्त्येवेत्यर्थः।

गूढार्थस्तु—पापिन्नभिज्ञास्तव प्रलपितं जारहितं जया जा इत्याकारकवर्णेन रहितं परित्यक्तं न जानन्ति किम्? एवञ्च—'सर्वानप्यवनतो युधि रिपून्मद्वत्स किं राघवस्सद्यस्संशमयेदहं स इव किं सीतेऽस्म्यत्युत्तमः। भूतोत्सवभाजनं कलयितुं त्वं मां किमाशङ्कसे' इत्येव त्वयोक्तं जानन्तीत्यर्थः। हे सीते! स राघवः मद्वत् युधि

---

१. पूर्व में विनाश की आशङ्का होने के कारण तुम्हारी प्राप्तिरूप हेतु से निश्चय ही नष्ट होने वाली है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वान् रिपूनपि अवनतस्सन् कृतप्रणामस्सन्नित्यर्थः। सद्यः युध्योपक्रमक्षण एवेत्यर्थः। संशमयेत्किं? शान्तवैरान्कुर्यात्किं? शरणागत्या प्रसादयेत्किमित्यर्थः। तत्र हेतुमाह—अहं स इव राम इव अत्युत्तमः अस्मि किं? नास्मीत्यर्थः। युक्त एवाधमस्य युधि शत्रून्प्रति प्रणाम इति भावः। त्वं मां भूतानां कुणपभुजां पिशाचभेदानाम् उत्सवस्य भुक्तिविशेषलाभप्रयुक्तस्य भाजनं पात्रं हेतुभूतमित्यर्थः। कलयितुं कर्तुं विनाशयितुमित्यर्थः। किमाशङ्कसे कुतो विचारयसि? निर्विचारं विनाशनीयोऽभिसन्धिमात्रेण तवाहमित्यर्थः। च्यावितार्क्षरं चित्रम्।।६४।।

सामान्यार्थ—रावण ने सीता से कहा—वह राम मेरी तरह समस्त शत्रुओं का तत्क्षण ही वध करने में समर्थ है क्या? मैं[1] राम की तरह[2], जाति का उत्तम नहीं हूँ क्या? पृथ्वी से उत्पन्न होने के कारण, अर्थात् अयोनिज होने के कारण तुम, जात्युत्तम मुझ रावण को पति के रूप में स्वीकार करके आनन्द प्राप्त करने में क्यों वितर्क कर रही हो? इसके बाद सीता ने कहा—रे पापिन्! विद्वान् लोग तुम्हारे इन अनर्थक वचनों को जार[3] पुरुषाभिमत नहीं जानते हैं क्या?

विशेषार्थ—सीता ने रावण से कहा—रे पापिन्! तुम्हारे इन अनर्थक वचनों को विद्वान् लोग 'जा' इत्याकारक वर्णरहित जानते हैं। तदनुसार प्रस्तुत श्लोक में से 'जा' इत्याकारक वर्ण का अपहार कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे सीते! वह राघव मेरी तरह युद्ध में प्रणाम कर रहे समस्त शत्रुओं का तत्क्षण ही वध करने में समर्थ है क्या? मैं राम की तरह अत्युत्तम हूँ क्या? अर्थात् नहीं हूँ। तुम मुझको पिशाचोत्सव का पात्र बनाने में (मृत्यु प्रदान करने में) क्यों विचार कर रही हो[4]।

प्रस्तुत श्लोक में च्यावितार्क्षर अलङ्कार है। विशेषार्थ का आधार—**जा-रहितम्।।६४।।**

सीतेऽसौ नगरी विजृम्भितमहारक्षः शुभाऽनामया
शोभाकारहिताऽवरोधकरणात्स्यादेव तेऽलङ्कृता।
नन्वेषोऽस्मि च भावनोपसरणायत्तेप्सितश्रीरहं
रे रक्षोऽधम भावियोगत इयं निर्यातु वाक्ते मुखात्।।६५।।

---

१. राक्षसों के देवयोनि होने के कारण मैं उत्कृष्ट हूँ।
२. मानवयोनि होने के कारण राम जाति से उत्तम नहीं है।
३. पर नारी के साथ रमण करने वाला।
४. विना विचारे ही विनाश के योग्य मैं हूँ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सीते इति। रावणः सीतामाह—सीते इत्याद्यहमित्यन्तम्। हे सीते! विजृम्भितानि विशेषतः प्रवृत्तानि महान्ति च रक्षसां राक्षसानां शुभानि मङ्गलानि यस्यां सा तथोक्ता। न विद्यते आमयो यस्यां सा अनामया अरोगभूमिरित्यर्थः। 'रोगव्याधिगदामयाः' इत्यमरः। शोभा दीप्तिः आकारस्सन्निवेशसौष्ठवं तयोर्द्वन्द्वः। ताभ्यां हिता हृद्या असौ नगरी लङ्का ते तव अवरोधकरणात् अन्तःपुरनिर्माणात्। 'स्त्र्यगारं भूभुजामन्तःपुरं स्यादवरोधनम्। शुद्धान्तश्चावरोधश्च' इत्यमरः। अलङ्कृता भूषिता स्यादेव। ईदृश्यां लङ्कायां यदि च तवान्तःपुरमेकं निर्मितं स्यात्तदाऽतीव-शोभाऽस्यास्सम्पत्स्यत इत्यर्थः। एषोऽहं च चशब्दस्त्वर्थकः। एष इति स्वहस्तेनात्मनो निर्देशः। भावनया सङ्कल्पमात्रेण उपसृतौ समीपप्राप्तौ आयत्ता ईप्सितश्रीः इष्टार्थसम्पत् यस्य तथोक्तः। अस्मि ननु। ईदृशेऽपि मयि न कुतोऽनुरज्यस इति वाक्यशेषद्योतको ननुशब्दः। सीता प्रत्याह—र इत्यादि मुखादित्यन्तम्। रे रक्षोऽधम! भावी भविष्यद् यो योगः कालकर्मणोस्सम्बन्धः तस्माद्धेतोः। सार्वविभक्तिकस्तसिः। भवितव्यतावशादित्यर्थः। इयं पूर्वोक्ता वाक् ते तव मुखात् निर्यातु निर्गच्छतु। सम्भावनायां लोट्। आसन्नविनाशस्य तव मुखादेवं दुरुक्तिनिर्गमनं सम्भावितमेवेत्यर्थः।

गूढार्थस्तु—रे रक्षोऽधम! इयं सीतेऽसावित्यादिः वाक् भावियोगतः भायाः भा इत्याकारकवर्णस्य वियोगं प्राप्येति। ल्यब्लोपे पञ्चमी, ततस्तसिः। ते तव मुखात् निर्यातु। एवञ्च—'सीतेऽसौ नगरी विजृम्भितमहा रक्षश्शुना मया शोकारहिताऽवरोधकरणात्स्यादेव तेऽलङ्कृता। नन्वेषोऽस्मि च वनोपसरणा-यत्तेप्सितश्रीरहम्' इत्येव भवान्प्रलपत्वित्यर्थः। हे सीते! विजृम्भिताः महाः उत्सवाः यस्यां सा तथोक्ता। 'मह उद्धव उत्सवः' इत्यमरः। असौ नगरी लङ्का रक्षश्शुना राक्षसशुनकेन राक्षसेषु शुनकवदतिदूष्येणेत्यर्थः। उपमानोत्तरपदः कर्मधारयः। मया कर्त्रा ते तव अवरोधकरणात् उपरोधसम्पादनात् हेतोः अलम् अत्यन्तं शोकारहिता शोकेन राक्षसीजनसम्बन्धिना रामलक्ष्मण-कर्तृकसर्वराक्षसवधमूलकेनेति भावः। अरहिता परिपूर्णा सती कृता स्यादेव न तत्र संशय इत्यर्थः। एषोऽहं च वनोपसरणे काननप्राप्तौ विनशन इत्यर्थः। आयत्ता ईप्सितश्रीर्यस्य स तथोक्तः। अस्मि ननु अस्म्येव। च्यावितात्क्षरमिदं चित्रम्॥६५॥

सामान्यार्थ—रावण ने सीता से कहा—हे सीते! विशेष रूप से प्रवृत्त तथा महान् राक्षसों के मङ्गल से पूर्ण, रोगरहित तथा सुन्दरता एवं सन्निवेश सौष्ठव के कारण हृदय को प्रिय लगने वाली यह लङ्कानगरी तुम्हारे अन्तःपुर के निर्माण से अवश्यमेव सुसज्जित होगी। अर्थात् इस तरह की लङ्का में यदि तुम्हारे अन्तःपुर का निर्माण होग, तो इसकी शोभा अतीव वृद्धि को प्राप्त करेगी। यह मैं (रावण) सङ्कल्प मात्र से ही

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभीप्सित लक्ष्मी को प्राप्त करने वाला हूँ (इस तरह के भी मुझ रावण से प्रेम क्यों नहीं करती हो)। रावण के इस कथन के अनन्तर देवी सीता ने कहा—रे रक्षोऽधम! भविष्य में होने वाला जो काल और कर्म का सम्बन्धरूप हेतु, उसके कारण, यह (पूर्वोक्त) वाणी तुम्हारे मुख से निकले।

विशेषार्थ—सीता ने रावण से कहा—रे रक्षोऽधम! यह पूर्वोक्त वाणी 'भा' इत्याकारक वर्णवियोगपूर्वक ही तुम्हारे मुख से निकले। तदनुसार प्रस्तुत श्लोक में से भा इत्याकारक वर्ण का अपहार कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे सीते! विशेषरूप से प्रवृत्त उत्सवों वाली यह नगरी लङ्का, राक्षसों में कुत्ते की तरह (अतिदुष्ट) मुझ रावण से तुम्हारा अपकार होने के कारण अत्यन्त शोक से पूर्ण होगी ही, यह मैं वन की प्राप्ति में, अर्थात् विनाश होने में जो अभीप्सित लक्ष्मी उसको प्राप्त करने वाला हूँ।

प्रस्तुत श्लोक में च्याविताक्षर नामक अलङ्कार है। विशेषार्थ का आधार—**भा-वियोगतः**॥६५॥

सीते मद्भुजयोः प्रतापदहने जाज्वल्यमाने तव
प्राणेशः स रणार्थिनोऽभिमुखतां मे प्राप्नुयाद्वा न वा।
मां प्राप्तः स मनःप्रवृत्तिमुचितां द्रागेव कुर्यान्न वा
रे पाप त्यज संशयो गत इहाभीष्टोऽर्थ एवाप्स्यते॥६६॥

सीते इति। रावणः सीतामाह—सीते इत्यादि कुर्यान्न वेत्यन्तम्। हे सीते! मद्भुजयोः प्रतापदहने प्रतापाग्नौ जाज्वल्यमाने भृशं ज्वलति सति। ज्वलतेर्यङन्ताल्लटश्शानच्। स तव प्राणेशः रामः रणार्थिनः युद्धाभिलाषिणः मे मम अभिमुखताम् आभिमुख्यं प्राप्नुयाद्वा? उत न प्राप्नुयाद्वा? मत्प्रतापम् अतत्त्वतो बुद्ध्वा युद्धे प्रवर्तेत वा? तत्त्वत एव बुद्ध्वा पलायेत वेत्यर्थः। मा प्राप्तः कथञ्चिन्ममाभिमुखत्वं गतोऽपीत्यर्थः। स रामः द्राक् द्रुतम् उचितामेव वीरपुरुषेयोग्यामेव मनःप्रवृत्तिं कुर्याद्वा? न कुर्याद्वा? धैर्यादभियोद्धुमुद्युञ्जीत वा? भयाच्छरणागतिपक्षमेवावलम्बेत वेत्यर्थः। तस्य पलायनं शरणागतिपक्षाश्रयणं च न ममाभिमतं किं त्वभियोधनमेवेति भावः। रणार्थिन इति स्वस्य विशेषणोपादानात्। सीता प्रत्याह—र इत्याद्याप्स्यत इत्यन्तम्। रे पाप! पापिन्! त्यज जहीहि संशयोपन्यसनमित्यार्थिकं कर्म।

सप्राणां प्राणनाथो मां सखि सम्भावयेन्न वा।
मुञ्च मुञ्चाधुना प्रावृष्यप्यसौ प्रवसेत्कथम्॥

इत्यत्र सकर्मकस्याप्यनिर्दिष्टकर्मणो मुञ्चतेरिवात्र पूर्ववाक्यगतसंशयोपन्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सनकर्मकतायास्त्यजतेर्वक्तुमुचितत्वात्। इह त्वदभिमतेऽर्थे रामस्य त्वदभिमुखीभवने तावकयुद्धदुर्मदनिर्मूलने चेत्यर्थः। संशयः गतः अपास्तः अभीष्टः त्वदभिमतः अर्थः विषयः पूर्वोक्तरूपः आप्स्यत एव असंशयं लप्स्यत इत्यर्थः। आप्नोतेः कर्मणि लृट्।

गूढार्थस्तु—रे पाप! स सकारं त्यज इह सकारस्थान इत्यर्थः। शयोगतः शस्य शकारस्य योगतः योगेन। सार्वविभक्तिकस्तसिः। अभीष्ट एव साधुजनाभिमत एव अर्थः अभिधेयः आप्स्यते लप्स्यते। 'अर्थोऽभिधेयैरवस्तुप्रयोजननिवृत्तिषु' इत्यमरः। एवञ्च—'शीते मद्भुजयोः प्रतापदहने जाज्वल्यमाने तव प्राणेशश्शरणार्थिनोऽभिमुखतां मे प्राप्नुयाद्वा न वा। मां प्राप्तश्शमनः प्रवृत्तिमुचितां द्रागेव कुर्यान्न वा' इति त्वयोक्तं चेदभिमतार्थं भवेदित्यर्थः। हे जानकि! प्राकरणिकीयं सम्बुद्धिः। जाज्वल्यमाने भृशं ज्वलति रामदर्शनात्पूर्वमिति भावः। मद्भुजयोः प्रतापदहने शीते शीतले सति निर्वाणे सतीत्यर्थः। रामदर्शनक्षण एवेति भावः। स तव प्राणेशः रामः शरणं रक्षणम् अर्थयते याचत इति शरणार्थी तस्य मां रक्षेति याचमानस्येत्यर्थः। 'शरणं स्याद्रक्षितरि रक्षणे मन्दिरे वधे' इति नानार्थरत्नमाला। मे मम श्रीरामाभिमुख्यविषयतासम्बन्धविवक्षया षष्ठी। मयीत्यर्थः। अभिमुखतां प्रसन्नतां प्राप्नुयाद्वा? न वा? वध्यस्यापि मम रक्षणेन 'सकृदेव प्रपन्नाय' इति वचनोक्तां स्वस्य प्रपन्नाभयदानप्रतिज्ञामेव सफलयेद्वा? 'जीवत्यस्मिन् दुरात्मनि जगदखिलमुपप्लुतं भवेदतोऽयमवश्यं हन्तव्य एव' इति मां हन्यादेव वेत्यर्थः। एवमुपन्यस्तयोः पक्षयोः सकललोकाभिमतत्वाद्द्वितीयस्मिन्नेव प्रबलतां निर्धार्याह—मां प्राप्त इत्यादि। मां प्राप्तः रामेणावश्यं हनिष्यमाणं मां स्वपुरं नेतुमागत इत्यर्थः। शमनः यमः—'शमनो यमराड्यमः' इत्यमरः। उचितां स्वाधिकारयोग्यामित्यर्थः। प्रवृत्तिं जीवकर्षणरूपं व्यापारमित्यर्थः। द्रागेव अविलम्बितमेव कुर्याद्वा? न वा? 'कथमिममहं महापापिनं स्पृशेयम्' इति मां स्प्रष्टुमीषद्विलम्बेत वेत्यर्थः। प्रतिदत्ताक्षरं चित्रम्॥६६॥

श्लोकार्थ—रावण ने सीता से कहा—हे सीते! मेरी भुजाओं की प्रतापाग्नि के प्रज्वलित होने पर वह तुम्हारे प्राणों का स्वामी राम, युद्धाभिलाषी मुझ रावण का साम्मुख्य प्राप्त करेगा या नहीं[1]? कथंचित् मेरे सम्मुख आने पर भी वह राम शीघ्र वीर पुरुषों के ही योग्य मन की प्रवृत्ति को करेगा या नहीं[2]?

---

१. मेरे प्रताप को ठीक से न जानकर प्रवृत्त होगा, अथवा तत्त्वतः प्रताप का ज्ञान हो जाने पर पलायन कर जायेगा।

२. धैर्य से युद्ध में प्रवृत्त होगा अथवा शरणागति पक्ष का ही आश्रयण करेगा, उसका पलायन अथवा शरणागति-पक्षाश्रयण मुझे अभिमत नहीं है; किन्तु युद्ध ही अभिमत है पद यह रणार्थिनः द्योत्य है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रावण के इस कथन के अनन्तर देवी सीता ने कहा—रे पापिन्! पूर्वोक्त वाक्यगत संयम का परित्याग करो यहाँ, अर्थात् श्रीराम के तुम्हारे सम्मुख होने पर तुम्हें अभीष्ट अर्थ की ही प्राप्ति होगी, अर्थात् तुम्हारी युद्धेच्छा अवश्यमेव पूर्ण होगी।

विशेषार्थ—सीता ने रावण से कहा—रे पापिन्! सकार का परित्याग करो यहाँ, स के स्थान पर श का योग होने पर तुम्हें अभीष्ट (साधुजनाभिमत) अर्थ की ही प्राप्ति होगी। तदनुसार 'स' के स्थान 'श' का प्रयोग कर देने पर श्लोकार्थ होता है—

रावण ने सीता से कहा—हे जानकि! प्रज्वलित हो रही मेरे भुजाओं की प्रतापाग्नि के शीतल हो जाने पर वह तुम्हारे प्राणों के स्वामी राम शरणागति की कामना करने वाले मुझ रावण का साम्मुख्य प्राप्त करेंगे या नहीं? अर्थात् मुझको देखकर कृपा करेंगे या नहीं? मुझको प्राप्त कर शमन अर्थात् विनाश के अनुरूप प्रवृत्ति को शीघ्र ही सम्पादित करेंगे या नहीं।

प्रस्तुत श्लोक में प्रतिदत्ताक्षर अलङ्कार है। विशेषार्थ के ऊहन का आधार—**संशयोगतः**।।६६।।

रामायातिपटुत्वमेव समरे व्यक्तं भवेन्मामकं
राकेशोपमितं ममैव भुवने जानीहि सीते यशः।
राजीवेऽपि गतस्पृहस्तव मुखं सानन्दमालोकये
रावर्णं विरहय्य तत्पुनरपि ब्रूहि क्षपाटाधम।।६७।।

रामायेति। रावणः सीतामाह—रामायेत्यादिभिः त्रिभिः पादैः। हे सीते! समरे मामकम् अतिपटुत्वमेव रामाय व्यक्तं भवेत्। युद्धे रामो न कदाऽपि मामसमर्थं जानीयादित्यर्थः। भुवने ममैव यशः राकेशोपमितं चन्द्रसदृशं जानीहि राजीवेऽपि कमलेऽपि गतस्पृहः निरपेक्षः सन् सानन्दं यथा तथा तव मुखम् आलोकये पश्यामि। तव मुखं पश्यतो मम कमलमप्यनादरणीयमेव भवतीत्यर्थः। ततोऽपि सुन्दरं तव मुखमिति भावः। सीता प्रत्याह—रावर्णमित्यादिना चरणेनैकेन। रे क्षपाटाधम! राक्षसापसद! रावर्णं पादत्रयेऽपि रा इत्यानुपूर्वीकं प्रथमवर्णमित्यर्थः। विरहय्य त्यक्त्वा तत् त्वद्वचनं पुनरपि ब्रूहि। एवञ्च—'मायाऽतिपटुत्वमेव समरे व्यक्तं भवेन्मामकं केशोपमितं ममैव भुवने जानीहि सीतेऽयशः। जीवेऽपि गतस्पृहस्तव मुखं सानन्दमालोकये' इति ब्रूहीत्यर्थः। हे सीते! समरे मामकं मत्सम्बन्धि मायाऽतिपटुत्वमेव मायाविषयकमतिशयितं सामर्थ्यमेव व्यक्तं भवेत्, युद्धेऽहं मायाबलेनैव जीवामि न तु बाहुबलेनेत्यर्थः। भुवने ममैव केशैः उपमितम् अतिनीलमित्यर्थः। अयशः अकीर्तिम्। अस्मिन्पक्षे सीतेयश इति मूले सीते अयश इति पदच्छेदो बोध्यः। जानीहि जीवेऽपि प्राणधारणेऽपि—'जीवोऽसुधारणम्'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यमरः। गतस्पृहः सन् सानन्दं यथा तथा तव मुखम् आलोकये। एवमुद्वृत्तोऽहं न सर्वथा जीविष्यामीति निश्चिन्वन्नेव त्वन्मुखदर्शनानन्दमनुभवामीत्यर्थः। शार्दूलविक्रीडितं वृत्तम्।।६७।।

सामान्यार्थ—रावण ने सीता से कहा—हे सीते! युद्ध में मेरे कुशल कौशल का परिज्ञान राम को होना चाहिए, अर्थात् युद्ध में राम कभी भी मुझको असमर्थ न जाने। संसार में मेरा ही यश चन्द्रसदृश जानो, कमल में भी स्पृहा न रखने के कारण[1] आनन्दपूर्वक तुम्हारे मुख को देखता हूँ। रावण के इस कथन के अनन्तर देवी सीता ने कहा—रे क्षपाटाधम! (राक्षसापसद!) 'रा' वर्ण का परित्याग करके अपने पूर्वोक्त वचनों को पुनः बोलो। तदनुसार पूर्व के तीनों चरणों में प्रयुक्त 'रा' वर्ण का परित्याग कर देने पर श्लोकार्थ होता है।

विशेषार्थ—रावण ने सीता से कहा—हे सीते! युद्ध में मेरा मायाविषयक अतिशय सामर्थ्य प्रकट होता है, अर्थात् युद्ध में मैं माया के बल से ही प्राणों को धारण करता हूँ न कि बाहुबल से। संसार में मेरा ही अयश अतिनील (काला) है, प्राणधारण की भी इच्छा न रखने वाला मैं आनन्दपूर्वक तुम्हारे मुख को देखता हूँ[2]।

प्रस्तुत श्लोक में च्यविताक्षर अलङ्कार है। विशेषार्थ का आधार—**रावर्णं विरहय्य**।।६७।।

अतीव गुणवान् पुमान् क इह मद्वदुर्वीसुते
शशीव समवेक्षणाद्धृदि कृतप्रहर्षोऽस्म्यहम्।
महारणमहोत्सवार्थ्यहमिवापरः कः पुमान्
पुनश्च खल तद्वचो वद विना द्वितीयाक्षरम्।।६८।।

अतीवेति। रावणः सीतामाह—अतीवेत्यादिभिस्त्रिभिश्चरणैः। हे उर्वीसुते! इह अस्मिन् जगति मद्वत् मयातुल्यं यथातथा अतीव गुणवान्पुमान् कः? अस्तीत्यध्याह्रियते। अहं शशी चन्द्र इव समवेक्षणाद् दर्शनाद् हृदि द्रष्टॄणां मनसि कृतप्रहर्षो येन यथोक्तः अस्मि। अहमिव महांश्चासौ रणश्च स एव महोत्सवः तं अर्थयते ताच्छील्येनेति तथोक्तः। अपरः पुमान् कः? अस्तीति शेषः। अहमेक एव तादृश इत्यर्थः। सीता प्रत्याह—पुनश्चेत्यादिना चरणेनैकेन। रे खल! द्वितीयाक्षरं विना तत् पूर्वोक्तं वचः पुनश्च वद। एवञ्च—'अवगुणवान् पुमान् क इह मद्वदुर्वीसुते शवसमवेक्षणाद्धृदि कृतप्रहर्षोऽस्म्यहं मरणमहोत्सवार्थ्यहमिवापरः। कः पुमान्' इति वदेत्यर्थः। हे उर्वीसुते! मद्वत् अवगुणवान् पुमान् इह अस्मिन् जगति

---

१. अर्थात् कमल से भी सुन्दर तुम्हारा मुख है।

२. अपनी मृत्यु को निश्चित जानकर ही तुम्हारे मुख को सानन्द देख रहा हूँ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कः? अस्तीति शेषः। न कोऽप्यहमिवावगुणवानित्यर्थः। अहं शवसमवेक्षणात् कुणपदर्शनात् हृदि स्वमनसि कृतः धृतः प्रहर्षो येन तथोक्तः अस्मि। कुणपस्य भक्ष्यत्वाद्भक्ष्यदर्शनेन भक्षयितुर्हर्षोदयस्यावश्यकत्वादिति भावः। अहमिव मरणमेव महोत्सवः तम् अर्थयते ताच्छील्येनेति तथोक्तः अपरः पुमान् कः? अस्तीति शेषः। अहमेक एव मरणमुत्सवं बुद्ध्वाऽभ्यर्थयमान इत्यर्थः। पृथ्वीवृत्तम्।।६८।।

सामान्यार्थ—रावण ने सीता से कहा—हे उर्वीसुते! इस संसार में मेरे जैसा गुणवान् पुरुष कौन है? मैं चन्द्रमा की तरह दर्शन से ही दर्शकों के मन में अत्यधिक हर्ष को उत्पन्न करने वाला हूँ, मेरी तरह महारणरूपी महोत्सव की कामना करने वाला दूसरा पुरुष कौन है, अर्थात् मैं अकेला ही इस तरह का हूँ। इसके बाद देवी सीता ने कहा—रे खल! द्वितीयाक्षर का परित्याग करके पूर्वोक्त वचनों को पुनः बोलो, तदनुसार पूर्वोक्त तीनों चरणों में से द्वितीयाक्षर का परित्याग कर देने पर श्लोकार्थ होता है—

विशेषार्थ—रावण ने सीता से कहा—हे उर्वीसुते! मेरी तरह अवगुणों वाला पुरुष इस संसार में कौन है? अर्थात् कोई नहीं; मैं ही अवगुणों वाला हूँ। मैं शव देखकर अपने मन में प्रसन्न होने वाला हूँ[1]। मेरी तरह मृत्युरूपी महोत्सव की कामना करने वाला दूसरा पुरुष कौन है? अर्थात् मैं अकेला ही मरण-महोत्सव की इच्छा रखने वाला हूँ।

प्रस्तुत श्लोक में पृथ्वी छन्द तथा च्यावित्ताक्षर नामक अलङ्कार है। विशेषार्थ का आधार—**विना द्वितीयाक्षरम्**।।६८।।

अनपायवानहमिवास्ति कोऽपरो
निरपायमेव पदमस्य विद्धि मे।
उपकारतोऽधिकमुदे सतामहं
वितृतीयवर्णमभिधेहि रे पुनः।।६९।।

अनपायेति। रावणः सीतामाह—अनपायेत्यादिभिस्त्रिभिश्चरणैः। हे सीते! इत्यध्याह्रियते प्रकरणात्। अहमिव अनपायवान् अपायवतोऽन्यः विनाशरहित इत्यर्थः। अपरः कोऽस्ति? न कोऽपीत्यर्थः। अस्येति हस्तेन आत्मनो निर्देशः। मे मम पदं स्थानं लङ्कामित्यर्थः। 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः। निरपायमेव निर्विनाशमेव विद्धि जानीहि अहम् उपकारत उपकारेण। तृतीयान्तात्तसिः। सतां साधूनाम् अधिकमुदे भूयःसन्तोषाय भवामीति शेषः। सीता

१. मांस ही भक्ष्य होने के कारण भक्षणकर्ता के मन में प्रसन्नता आवश्यक है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्याह—वितृतीयेत्यादिनैकेन चरणेन। रे नीच! वितृतीयवर्णं विगततृतीयाक्षरं यथा तथा पुनः अभिधेहि वद। पूर्वोक्तं चरणत्रयमिति कर्मार्थादेव गम्यते। एवञ्च—'अनयवानहमिवास्ति कोऽपरो निरयमेव पदमस्य विद्धि मे उपरतोऽधिकमुदे सतामहम्' इति वदेत्यर्थः। हे सीते! अहमिव अनयवान् नीतिविधुरः अपरः कोऽस्ति? अस्य मे निरयमेव नरकमेव पदं स्थानं विद्धि। 'स्यान्नारकस्तु नरको निरयः' इत्यमरः। तथा पापवत्तमत्त्वात्स्वस्येति भावः। अहम् उपरतस्सन् मृतस्सन् सताम् अधिकमुदे भविष्यामीति शेषः। सज्जनाशंसितवधोऽहं दुरात्मेति भावः। मञ्जुभाषिणीवृत्तम्। 'सजसा जगौ भवति मञ्जुभाषिणी' इति तल्लक्षणात्।।६९।।

सामान्यार्थ—रावण ने सीता से कहा—हे सीते! मेरी तरह विनाशरहित दूसरा कौन है? मेरी लङ्का को नष्ट न होने वाली जानो। मैं उपकार के द्वारा सज्जनों को अत्यधिक प्रसन्न करने वाला हूँ। रावण के इस कथन के अनन्तर देवी सीता ने कहा—रे नीच! प्रस्तुत श्लोक के पूर्वोक्त तीनों चरणों में से तृतीय वर्ण का परित्याग करके पुनः बोलो। तदनुसार ऊपर के तीनों चरणों में से तृतीय वर्ण का परित्याग कर देने पर श्लोकार्थ होता है—

विशेषार्थ—रावण ने सीता से कहा—हे सीते! मेरी तरह नीतिरहित दूसरा कौन है? नरक को ही मेरा स्थान जानो। मैं मरकर सज्जनों को अत्यधिक प्रसन्न करने वाला होऊँगा।

प्रस्तुत श्लोक में मञ्जुभाषिणी नामक वृत्त है, जिसका लक्षण है—सजसाजगौ भवति मञ्जुभाषिणी। विशेषार्थ का आधार—**वितृतीयवर्णम्**।।६९।।

मद्वत्पावनशीलतामुपगतः कोऽप्यस्ति नोर्वीसुते
श्रेयो लोकपवन्ममेति कलये त्वत्प्राप्तितः साम्प्रतम्।
क्षिप्रं प्रेरित एव तेऽभिमतसंसिद्धिं विदध्यामहं
त्रिष्वप्यङ्घ्रिषु तुर्यवर्णरहितं रे जल्प ते जल्पितम्।।७०।।

मद्वदिति। रावणः सीतामाह—मद्वदित्यादिभिस्त्रिभिः पादैः। हे उर्वीसुते! मद्वत् पावनं शीलं यस्य तस्य भावस्तत्ता तामुपगतः कोऽपि नास्ति। साम्प्रतं त्वत्प्राप्तितः त्वल्लाभेन। आद्यादित्वात्तृतीयान्तात्तसिः। मम श्रेयः लोकपवत् लोकपालानामिव भवतीति शेषः। 'तत्र तस्येव' इति वतिप्रत्ययः। प्रति कलये जानामि। अहं प्रेरितः सन् स्वाभिमतेऽर्थे त्वया प्रचोदितस्सन्नित्यर्थः। क्षिप्रमेव ते तव अभिमतसंसिद्धिं इष्टार्थसंसिद्धिं विदध्यां कुर्याम्। सीता प्रत्याह—त्रिष्वित्यादिना चरणेनैकेन। रे नीच! त्रिष्वप्यङ्घ्रिषु तुर्यवर्णरहितं चतुर्थाक्षरविहीनं यथा तथा ते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तव जल्पितं जल्प। एवञ्च—'मद्वत्पानशीलतामुपगतः कोऽप्यस्ति नोर्वीसुते श्रेयो लोपवन्ममेति कलये त्वत्प्राप्तितस्साम्प्रतं क्षिप्रं प्रेत एव तेऽभिमतसंसिद्धिं विदध्यामहम्' इति वदेत्यर्थः। हे उर्वीसुते! मद्वत् पानं शीलं यस्य तस्य भावस्तत्ता ताम् उपगतः मद्यपानमदोन्मत्त इत्यर्थः। कोऽपि नास्ति साम्प्रतं त्वत्प्राप्तित मम श्रेयः लोपवत् विच्छिन्नं इति कलये जानामि। अहं क्षिप्रं प्रेत एव मृत एव सन् 'परेतप्रेतसंस्थिताः। मृतप्रमीतौ' इत्यमरः। ते तव अभिमतस्य श्रीरामसमाश्रयण-रूपेष्टार्थस्य संसिद्धिं विदध्याम्। शार्दूलविक्रीडितम्।।७०।।

सामान्यार्थ—रावण ने सीता से कहा—हे सीते! मेरी तरह पवित्र शील (स्वभाव) वाला कोई नहीं है, इस समय तुम्हारी प्राप्ति के कारण मेरा महत्त्व लोकपालों की तरह है, यह मैं जान रहा हूँ। स्वाभिमत अर्थ में तुम्हारे द्वारा प्रेरित होकर शीघ्र ही तुम्हारी इष्टार्थसिद्धि को सम्पादित करना चाहिए। रावण के इस दुर्वचन के अनन्तर देवी सीता ने कहा—रे नीच, पूर्वोक्त तीनों चरणों में से चतुर्थ अक्षर का अपहार करके अपने कहे हुए वचनों को बोलो। तदनुसार श्लोकार्थ होता है—

विशेषार्थ—रावण ने सीता से कहा—हे सीते! मेरी तरह मद्यपान करने वाला कोई नहीं है। इस समय तुम्हारी प्राप्ति से मेरा महत्त्व समाप्त हो गया है, यह मैं जान रहा हूँ। मुझे शीघ्र ही मृत्यु को प्राप्त करते हुए तुम्हारे अभिमत इष्टार्थसिद्धि को सम्पादित करना चाहिए।

प्रस्तुत श्लोक में च्याविताक्षर नामक अलङ्कार है। विशेषार्थ का आधार—**तुर्यवर्णरहितम्**।।७०।।

काकुत्स्थः कृशतान्त एव भविता युद्धे ममोर्वीसुते
तच्छौर्यं महिमप्रणाशजनितामेव प्रथामेष्यति।
तत्कीर्तिर्विकला सहासमुखतां कुर्याद्बुधानां ततो
रे रक्षोऽधम पञ्चमाक्षरपरित्यग्जल्प तज्जल्पितम्।।७१।।

काकुत्स्थ इति। रावणः सीतामाह—काकुत्स्थ इत्यादिभिस्त्रिभिश्चरणैः। हे उर्वीसुते! मम युद्धे काकुत्स्थः कृशतान्त एव कृशश्चासौ तान्तश्चेति विग्रहः। परिक्षामः प्रग्लानश्चैवेत्यर्थः। भविता। भवतेर्लुट्। तस्य रामस्य शौर्यं तच्छौर्यं महिम्नः महत्त्वस्य जामदग्न्यविजयादिना सम्मार्जितस्येति भावः। प्रणाशेन जनितामेव प्रथां दुष्प्रथामित्यर्थः। एष्यति प्राप्स्यति। ततः अनन्तरं तस्य रामस्य कीर्तिः तत्कीर्तिः विकला सती नष्टा सती बुधानां विदुषां हासेन सह वर्तत इति तथोक्तं मुखं येषां तेषां भावस्तत्ता तां कुर्यात्। सीता प्रत्याह—रे इत्यादिना चरणेनैकेन। रे नीच! पञ्चमम् अक्षरं परित्यजतीति पञ्चमाक्षरपरित्यक् सत् तत् पूर्वोक्तं जल्पितं वचनम्। भावे क्तः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जल्प। एवञ्च—'काकुत्स्थः कृतान्त एव भविता युद्धे ममोर्वीसुते तच्छौर्यं मम प्रणाशजनितामेव प्रथामेष्यति तत्कीर्तिर्विलासहासमुखतां कुर्याद्बुधानां ततः' इति वदेत्यर्थः। हे उर्वीसुते! काकुत्स्थः युद्धे मम कृतान्त एव यम एव भविता। स मां हन्तेत्यत्रासंशयमित्यर्थः। तच्छौर्यं मम प्रणाशजनितामेव प्रथामेष्यति। मद्वधेनैव रामस्य शौर्यं प्रथिष्यत इत्यर्थः। ततः मद्वधेन रामस्य शौर्यप्रथावाप्त्यनन्तरमित्यर्थः। तत्कीर्तिः बुधानां देवानां विलासेन यो हासः सः मुखे येषां तेषां भावस्तत्ता तां कुर्यात्। एतेन रावणवधात्पूर्वमिन्द्रादीनां निष्परितोषतया म्लानमुखत्वं तेन रावणोपप्लुतत्वञ्च व्यज्यत इति वस्तुना वस्तुध्वनिः। वृत्तं पूर्ववत्॥७१॥

सामान्यार्थ—रावण ने सीता से कहा—हे उर्वीसुते! मेरे युद्ध में ककुत्स्थकुलोत्पन्न राम दुर्बल और हर्षरहित होंगे। महिमा[1] का नाश हो जाने के कारण राम की वीरता की दुष्प्रथा समाप्त हो जायगी, उसके बाद राम की कीर्ति के विनष्ट हो जाने पर हासयुक्त विद्वानों का मुख होवे अर्थात् राम उपहास के पात्र बनेंगे। इसके अनन्तर देवी सीता ने कहा—रे नीच! पञ्चमाक्षर का परित्याग करते हुए पूर्वोक्त वचनों को बोलो, तदनुसार पूर्वोक्त तीनों चरणों में प्रयुक्त वर्णसमूह में से पञ्चमाक्षर का परित्याग कर देने पर श्लोकार्थ होता है—

विशेषार्थ—रावण ने सीता से कहा—हे उर्वीसुते! ककुत्स्थकुलोत्पन्न राम युद्ध में मेरे यमराज ही बनेंगे। उनका शौर्य मेरे विनाश से उत्पन्न प्रथा को प्राप्त करेगा। उनकी कीर्ति देवताओं के विलासपूर्ण हास से युक्त मुख को प्राप्त करेगी, अर्थात् रावण-वध के पूर्व इन्द्रादि देवताओं का मुख म्लानता को प्राप्त है, इससे रावण का अत्याचार व्यञ्जित होता है।

प्रस्तुत श्लोक में च्याविताक्षर अलङ्कार तथा शार्दूलविक्रीडित छन्द है। विशेषार्थ का आधार—**पञ्चमाक्षरपरित्यक्**॥७१॥

आर्षाचारप्रशमिततमक्षात्रतेजाः पतिस्ते
राज्यभ्रंशः सुखरहिततामेव तस्य व्यनक्ति।
तेन क्षिप्रं मम रणसुखं स्यात्कदेत्युत्सुकोऽस्मि
ब्रूहीदं रे पुनरपि विना षष्ठवर्णं दुरात्मन्॥७२॥

आर्षाचारेति। रावणः सीतामाह—आर्षेत्यादिभिस्त्रिभिः पादैः। हे सीते! अध्याहार्यमेतत्। ते पतिः रामः आर्षेण ऋषिसम्बन्धिना आचारेण कायक्लेशरूपेण प्रशमिततमम् अतिशयेन प्रशमितं क्षात्रं क्षत्रसम्बन्धि तेजो यस्य स तथोक्तः। अस्तीति शेषः। राज्यभ्रंशः तस्य रामस्य सुखरहिततामेव व्यनक्ति प्रकटयति।

---

१. परशुराम पर प्राप्त विजय के द्वारा अर्जित की गयी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राज्यभ्रष्टत्वात्स निस्सुख इति स्पष्टं ज्ञायत इत्यर्थः। तेन रामेण सह मम रणसुखं क्षिप्रं कदा स्यात् इति उत्सुकः विलम्बासह इत्यर्थः। 'कालाक्षमत्वमौत्सुक्यम्' इत्युक्तेः। अस्मि—निस्तेजस्कं परिक्लिष्टं च तं सुजयमवगम्य तेन सह सलीलमभियोद्धुं त्वरितोऽस्मीत्यर्थः। सीता प्रत्याह—ब्रूहीत्यादिना चरणेनैकेन। रे दुरात्मन्! षष्ठवर्णं विना इदम् आर्षेत्यादिवचनं पुनरपि ब्रूहि। एवञ्च—'आर्षाचारप्रमिततमक्षात्रतेजाः पतिस्ते राज्यभ्रंशस्सुरहिततामेव तस्य व्यनक्ति ते क्षिप्रं मरणसुखं स्यात्कदेत्युत्सु-कोऽस्मि' इति वदेत्यर्थः। हे सीते! ते पतिः आर्षाचारेण हेतुना तपोरूपेणेति भावः। प्रमिततमं प्रकर्षवत्तया विदिततमं क्षात्रं तेजो यस्य स तथोक्तः अस्ति। तस्य राज्यभ्रंशः सुरेभ्यो हितस्सुरहितः। 'चतुर्थी तदर्थ' इत्यादिना चतुर्थीसमासः। तस्य भावस्तत्ता तामेव व्यनक्ति रामप्रवासस्य राक्षसवधार्थकतया देवतेष्टार्थसम्पादकत्वं स्पष्टमेवावगम्यत इत्यर्थः। तेन रामेण मरणसुखं ममेत्यर्थात्सिद्ध्यति। क्षिप्रं कदा स्यात् इत्युत्सुकोऽस्मि। मन्दाक्रान्तावृत्तम्—'मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ तौ गुरू चेत्' इति लक्षणात्।।७२।।

सामान्यार्थ—रावण ने सीता से कहा—हे सीते! तुम्हारा पति राम ऋषिसम्बन्धित आचार के कारण, अर्थात् ऋषियों की तरह आचार-व्यवहार होने के कारण क्षत्रियोचित तेज (बल) से विहीन हो गया है, राज्य का नाश उसके सुखराहित्य को ही प्रकट करता है। उस राम के साथ मेरा युद्ध शीघ्र ही कब सम्पन्न होवें, इस प्रकार से मैं उत्साहित हूँ।

रावण के इस कथन के अनन्तर देवी सीता ने कहा—रे दुरात्मन्! छठें वर्ण का परित्याग करके फिर से बोलो—तदनुसार तीनों चरणों में से छठें वर्ण का अपहार कर देने पर श्लोकार्थ होता है—

विशेषार्थ—रावण ने सीता से कहा—हे सीते! तुम्हारा पति राम ऋषि सम्बन्धित आचरण के कारण प्रकृष्टक्षत्रियोचित तेज वाला है। उसके राज्य का विनाश देवताओं के हित को प्रकट करता है। उस राम से मृत्यु का सुख शीघ्र ही कब प्राप्त होवे, इस प्रकार से मैं उत्साहित हूँ।

प्रस्तुत श्लोक में च्यावितार्क्षर नामक अलङ्कार है। विशेषार्थ का आधार—**विना षष्ठवर्णम्**।।७२।।

रामः सीते विकलसदभिप्रीतिभारो भवत्यां
युध्युद्द्रावप्रहसिततमानेव कुर्यात्स वीरान्।
नाथस्तेऽसावननुगुण इत्येव जानीहि नूनं
षष्ठं वर्णं विजहदथवा सप्तमं जल्प पापिन्।।७३।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राम इति। रावणः सीतामाह—राम इत्यादिभिस्त्रिभिश्चरणैः। हे सीते! रामः भवत्यां त्वयि विषये विकलः नष्टः सदभिप्रीतिभारः स्वानुरागातिशयो यस्य तथोक्तः। अस्तीति शेषः। अतस्तव तस्मिन्ननुरागोऽतीव विरस इति भावः। एकनिष्ठानुरागस्य रसाभासत्वात् विरसत्वं बोध्यम्। तदुक्तम्—

एकत्रैवानुरागश्चेत् तिर्यङ्म्लेच्छगतोऽपि वा।
योषितो बहुसक्तिश्चेत् रसाभासस्त्रिधा मतः।।

इति। स रामः युधि युद्धे वीरान् उद्द्रावम् उच्चैर्घोषं यथा तथा प्रहसिततमानेव अतिशयेन हासकर्तृनेव। कर्तरि क्तप्रत्ययान्तात् प्रपूर्वाद्धसतेरतिशायनेऽर्थे तमप्प्रत्ययः। कुर्यात्। युधि वीरास्सर्वेऽप्यतिभीरुं राममवलोक्य कथमयमेवंविधो निर्लज्जम् आहवमवतीर्णः इयुच्चैर्घोषेण प्रहसेयुरित्यर्थः। असौ नाथः ते तव अननुगुण इत्येव अनुरूपगुणो न भवतीत्येव नूनं निश्चितं यथा तथा जानीहि। सीता प्रत्याह—षष्ठमित्यादिना चरणेनैकेन। रे पापिन्! षष्ठं वर्णम् अथवा सप्तमं वर्णं विजहत् त्यजन् सन्। जहातेश्शतृप्रत्ययः। 'नाभ्यस्ताच्छतुः' इति नुम्निषेधः। जल्प। राम इत्यादिचरणत्रयम् आर्थिकं कर्म। एवं च—षष्ठवर्णविरहेण—'रामः सीते विलसदभिप्रीतिभारो भवत्यां युध्युद्द्रावप्रसिततमानेव कुर्यात्सवीरान् नाथस्तेऽसावनुगुण इत्येव जानीहि नूनम्' इति। सप्तमवर्णविरहेण—'रामस्सीते विकसदभिप्रीतिभारो भवत्यां युध्युद्द्रावप्रहततमानेव कुर्यात्स वीरान् नाथस्तेऽसावनगुण इत्येव जानीहि नूनम्' इति वा वदेत्यर्थः। षष्ठवर्णविरहे—हे सीते! रामः भवत्यां विषये विलसन् अभिप्रीतिभारो यस्य तथोक्तः। इति भिन्नं वाक्यम्। सः रामः युधि वीरान् उद्द्रावे पलायने प्रसिततमानेव अतिशयेनासक्तानेव कुर्यात्। 'प्रद्रावोद्द्रावसंद्रावविद्रावा विद्रवो द्रवः। अपक्रमोऽपयानं च' इति, 'तत्परे प्रसितासक्तौ' इति चामरः। असौ नाथः ते तव अनुगुण इत्येव नूनं जानीहि। सप्तमवर्णविरहे—हे सीते! रामः भवत्यां विषये विकसन् अभिप्रीतिभारो यस्य तथोक्तः। सः रामः युधि वीरान् उद्रैः बाणविशेषैः अवप्रहततमान् अतिशयेन अवप्रहतानेव कुर्यात्। अव प्र इत्युपसर्गद्वयपूर्वकाद्धन्तेः कर्मणि क्तः। ततोऽतिशायनेऽर्थे तमप्। 'उद्रः पन्नगभेदे च यादोभेदेषुभेदयोः' इति निघण्टुसारे। असौ ते नाथः रामः अगुणः गुणहीनः न भवतीत्यनगुणः गुणवानित्येव नूनं जानीहि। वृत्तं पूर्ववत्।।७३।।

सामान्यार्थ—रावण ने सीता से कहा—हे सीते! राम तुम्हारे विषय में अनुराग-रहित है। वह राम युद्ध में वीरों को अट्टहासयुक्त ही कर सकते हैं, अर्थात् हमारे वीरों के हँसी के पात्र ही होंगे। यह तुम्हारे स्वामी राम अनुरूपगुणवाले नहीं हैं, यही

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निश्चितरूप से जानो। रावण के इस दुर्वचन के अनन्तर देवी सीता ने कहा—रे पापिन्! छठें अथवा सातवें वर्ण का परित्याग करते हुए बोलो। तदनुसार प्रस्तुत श्लोक के आदि के तीनों चरणों में से छठें वर्ण का त्याग कर देने पर श्लोकार्थ होता है—

विशेषार्थ—रावण ने सीता से कहा—हे सीते! राम तुम्हारे विषय में अत्यधिक अनुराग वाले हैं। वह राम युद्ध में वीरों को पलायन में प्रवृत्त कर सकते हैं। वह तुम्हारे स्वामी तुम्हारे अनुरूप हैं, यह निश्चित रूप से जानो।

तथा—प्रस्तुत श्लोक में प्रयुक्त वर्णसमूह में से सातवें वर्ण का त्याग कर देने पर श्लोकार्थ होता है—रावण ने सीता से कहा—हे सीते! राम तुम्हारे विषय में विकसित हो रहे अनुराग वाले हैं। वह राम युद्ध में वीरों को विशिष्ट बाणों के द्वारा अत्यधिक घायल कर सकते हैं। वह तुम्हारे पति राम गुणहीन नहीं है, अर्थात् गुणवान् हैं, यह निश्चित रूप से जानो।

प्रस्तुत श्लोक में च्यावितातक्षर अलङ्कार है। विशेषार्थ का आधार—**षष्ठं वर्णं विजहदथवा सप्तमं जल्प पापिन्**॥७३॥

शौर्यं भूतनये सदाऽमरभयोन्नेयं न किं मामकं
कार्तान्तीं नगरीं निरोधनवशान्नेष्येऽहमात्मीयताम्।
त्वद्भर्तुर्युधि मां विराजितमवेह्युद्यत्तमेनौजसा
जल्पेदं पुनरष्टमाक्षरपरित्यक्तं क्षपाटाधम॥७४॥

शौर्यमिति। रावणः सीतामाह—शौर्यमित्यादिभिस्त्रिभिः पादैः। हे भूतनये! मामकं मत्संबन्धि शौर्यं सदा सर्वदा अमराणाम् इन्द्रादीनां भयेन त्रासरूपेण लिङ्गेन उन्नेयम् अनुमेयं न किम्? अमराणां भयादेव शूरोऽयमित्यहं वेदितव्योऽस्मीत्यर्थः। अहं निरोधनस्य अवस्कन्दनस्य वशात् आयत्तत्वात् कार्तान्तीं यमसम्बन्धिनीं नगरीम् आत्मीयतां स्वीयतां नेष्ये। संयमिनीमप्यवस्कन्दनेनात्मसात्कर्तुमहं शक्तोऽस्मीत्यर्थः। तस्मादिति शेषः। त्वद्भर्तुः रामस्य युधि युद्धे माम् उद्यत्तमेन अतिशयादुज्जृम्भमाणेन ओजसा विराजितम् अवेहि। एवञ्च—युध्यहमेव रामं विजेष्य इत्यर्थः। सीता प्रत्याह—जल्पेदमित्यादिना चरणेनैकेन। रे क्षपाटाधम! इदं शौर्यमित्यादि पूर्वोक्तपादत्रयम् अष्टमाक्षरपरित्यक्तं यथा तथा पुनर्जल्प। एवञ्च—'शौर्यं भूतनये समरभयोन्नेयं न किं मामकं कार्तान्तीं नगरीं निधनवशान्नेष्येऽहमात्मीयतां त्वद्भर्तुर्युधि मां विजितमवेह्युद्यत्तमेनौजसा' इति वदेत्यर्थः। हे भूतनये! मामकं शौर्यं समरभयेन रामलक्ष्मणयोरसन्निधौ त्वदपहरणादेव सुजातेनेति भावः। उन्नेयं न किं? समरभीरुत्वादेव मामशूरं न जानासि किमित्यर्थः। अहं निधनवशात् कार्तान्तीं नगरीम् आत्मीयतां नेष्ये।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षिप्रमेव मरणमनुभूय यमपुरपौरेष्वेकतमो भविष्यामीत्यर्थः। मां युधि त्वद्भर्तुस्सम्बन्धिना उद्यत्तमेनौजसा विजितमवेहि। सर्वथा युधि रामो मां विजेष्यत इति जानीहीत्यर्थः। शार्दूलविक्रीडितं वृत्तम्।।७४।।

सामान्यार्थ—रावण ने सीता से कहा—हे भूतनये! मेरी वीरता सदा देवताओं के भयरूप हेतु से क्या अनुमान का विषय नहीं बनती? मैं विनाश के वशीभूत होने के कारण कृतान्त (यमराज) की नगरी (संयमनी) को भी आत्मसात् कर सकता हूँ। इसलिए तुम्हारे पति राम के युद्ध में मेरे उद्यत होने के कारण ओज से पूर्ण मुझे जानो। अर्थात् युद्ध में मैं ही राम पर विजय प्राप्त करूँगा। इसके अनन्तर देवी सीता ने कहा—रे क्षपाटाधम! अष्टमाक्षर का परित्याग करके पुनः बोल! तदनुसार पूर्वोक्त तीनों चरणों में से अष्टाक्षर का अपहार कर देने पर श्लोकार्थ होता है—

विशेषार्थ—रावण ने सीता से कहा—हे भूतनये! मेरी वीरता युद्ध में डर के कारण जानी नहीं जाती है क्या? अर्थात् समरभीरु होने के कारण मुझको वीरता से रहित नहीं जानती हो क्या, मैं मृत्यु के वशीभूत होने के कारण यमपुरी को प्राप्त करूँगा। ओजस्वी तुम्हारे पति के अतिशयेन उद्यत होने के कारण युद्ध में मुझको जीत लिया गया है, यह जानो। अर्थात् सर्वथा युद्ध में राम मुझको जीतेंगे ही, यह जानो।

प्रस्तुत श्लोक में च्यविताक्षर नामक अलङ्कार है। विशेषार्थ का आधार—**अष्टमाक्षरपरित्यक्तम्**।।७४।।

काकुत्स्थोऽवनिपुत्रि कोणपवशो युद्धे यदा स्यात्तदा
वक्त्रश्रीर्जयजातमोदभरिता स्यादेव सद्यो मम।
मद्वत्संयति नैव वीक्षितमुखोल्लासो भवेद्राघवः
पापिन्निर्नवमाक्षरं पुनरिदं जल्प त्वदुक्तं वचः।।७५।।

काकुत्स्थ इति। रावणः सीतामाह—काकुत्स्थ इत्यादिभिस्त्रिभिश्चरणैः। हे अवनिपुत्रि! काकुत्स्थः युद्धे यदा कोणपानां राक्षसानां वशः आयत्तः स्यात् तदा मम वक्त्रश्रीः मुखकान्तिः सद्य एव जयजातेन विजयसम्भूतेन मोदेन हर्षेण भरिता स्यात् संयति युद्धे राघव मद्वत् वीक्षितः दृष्टः मुखोल्लासो यस्य तथोक्तः न भवेदेव। सीता प्रत्याह—पापिन्नित्यादिना चरणेनैकेन। रे पापिन्! त्वदुक्तम् इदं वचः निर्गतं नवमाक्षरं यस्मिन् कर्मणि तद्यथा तथा पुनः जल्प। निर्नवमाक्षरं सद्दिति वचस उत्तरविशेषणं वा बोध्यम्। तदा तु निर्गतं नवमाक्षरं यस्मात्तदिति विग्रहः। एवञ्च—'काकुत्स्थोऽवनिपुत्रि कोपवशो युद्धे यदा स्यात्तदा वक्त्रश्रीर्जयजा तमोभरिता स्यादेव सद्यो मम मद्वत्संयति नैव वीतमुखोल्लासो भवेद्राघवः' इति वदेत्यर्थः। हे अवनिपुत्रि! काकुत्स्थः युद्धे यदा कोपवशः कोपाधीनः क्रुद्ध इति यावत्। स्यात्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदा जयता रामकोपात्पूर्वं जयसम्भूता मम वक्त्रश्रीः सद्य एव तमोभरिता अन्धकारावृता स्यात्। संयति राघवः मद्वत् वीतः अपगतः मुखोल्लासो यस्य तथोक्तः न भवेदेव। वृत्तं पूर्ववत्॥७५॥

सामान्यार्थ—रावण ने सीता से कहा—हे अवनिपुत्रि! ककुत्स्थकुलोत्पन्न राम युद्ध में जब राक्षसों के अधीन होंगे, तब मेरे मुख की कान्ति विजय से उत्पन्न हर्ष से पूर्ण होगी युद्ध में राम मेरी तरह प्रसन्न मुख वाले नहीं दीखते हैं। इसके अनन्तर देवी सीता ने कहा—अपने द्वारा कहा गया यह वचन नवमाक्षर से रहित बोलो। तदनुसार पूर्वोक्त तीनों चरणों में से नवमाक्षर का परित्याग कर देने पर श्लोकार्थ होता है—

विशेषार्थ—रावण ने सीता से कहा—हे अवनिपुत्रि! ककुत्स्थकुलोत्पन्न राम युद्ध में जब क्रोधित होंगे, तो जयोत्पन्न मेरी मुखकान्ति शीघ्र ही अन्धकार से आवृत होगी। युद्ध में राघव मेरी तरह उल्लसित मुख से रहित नहीं हैं।

प्रस्तुत श्लोक में च्यविताक्षर नामक अलङ्कार है॥७५॥

इत्यूनां षष्टिमेकेन पद्यानि पवनात्मजः।।
अपि रामाय विदुषे विवृण्वन्नर्थतोऽब्रवीत्।।७६।।

इतीति। पवनात्मजः इति प्रागुक्तरीत्या एकेन ऊनां षष्टिं एकोनषष्टिसङ्ख्यानीत्यर्थः। पद्यानि विदुषेऽपि स्वत एवार्थं जानतेऽपि रामाय अर्थतः विवृण्वन् व्याख्यानरीत्याऽर्थं चोपपादयन्नित्यर्थः। सार्वविभक्तिकस्तसिः। प्रत्युक्तिचातुर्यजनितहर्षपारवश्यादिति भावः। अब्रवीत्॥७६॥

श्लोकार्थ—इस प्रकार चित्रकाव्य के माध्यम से पवनात्मज हनुमान् ने ५९ पदों का अर्थतः विवरण भगवान् राम के सम्मुख किया, यद्यपि भगवान् राम उक्त विषय को पूर्वतः जानते थे॥७६॥

पद्यान्युक्तिमयानि तान्यपि रिपोः प्रत्युक्तियोगादति-
स्वादुन्यादरतोऽनिलात्मजमुखाच्छ्रुत्वाऽपि संतुष्यतः।
तां देवीं विरहातुरां रघुपतेः साध्वीमनुध्यायतः
क्रोधाग्निर्हृदि रावणं प्रति महानुज्ज्वालजालोऽज्ज्वलत्।।७७।।

पद्यानीति। रिपोः शत्रोः रावणस्य उक्तिमयान्यपि वचनप्रचुराण्यपि। प्राचुर्ये मयट्। प्रत्युक्तियोगात् सीताप्रतिवचनसम्बन्धात् अतिस्वादूनि अतीव स्वाद्यानि पद्यानि आदरत आदरेण। सार्वविभक्तिकस्तसिः। अनिलात्मजमुखात् श्रुत्वा संतुष्यतोऽपि चमत्कारग्रहणेन परितुष्यतोऽपि विरहातुरां साध्वीं पतिव्रतां तां देवीं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सीताम् अनुध्यायतः चिन्तयतः रघुपतेः हृदि रावणं प्रति महान् क्रोधाग्निः उद्गतं ज्वालजालं ज्वालापटलं यस्य तथोक्तस्सन् अज्वलत् अदीप्यत। 'वह्नेर्द्वयो-र्ज्वालकीलौ' इत्यमरः। शार्दूलविक्रीडितं वृत्तम्।।७७।।

श्लोकार्थ—शत्रु रावण के प्रचुर वचनों को भी देवी सीता के प्रतिवचनों के सम्बन्ध से अत्यधिक सरस उन पद्यों को आदरपूर्वक हनुमान् के मुख से सुन करके सन्तुष्ट होते हुए भी विरहातुर पातिव्रत्यपरायण देवी सीता का चिन्तन करते हुए रघुपति के हृदय में रावण के प्रति ज्वालायुक्त महान् क्रोधाग्नि जल उठी।।७७।।

अथाभिप्रायज्ञद्युमणितनयाज्ञाक्षरविनि-
र्गमादेवाशाभ्यस्त्वरिततरमेत्यान्तिकजुषा।
कपीनां वाहिन्या सह रघुपतिः सानुजसुहृ-
ज्जिघांसुः पौलस्त्यं निरगमदहिं वासव इव।।७८।।

अथेति। अथ क्रोधोज्ज्वलनानन्तरं रघुपतिः अभिप्रायं रावणवधायाद्यैव निर्गन्तव्यमित्याकारकं स्वाशयं जानातीति तथोक्तस्य द्युमणितनयस्य सुग्रीवस्य आज्ञाक्षराणां सर्वैरपि वानरैरिदानीमेव राक्षसवधाय लङ्कां प्रति प्रस्थातव्य-मित्याकारकाणां विनिर्गमादेव मुखतो निस्सरणादेव। न तु बलात्कार-पूर्वकाच्चोदनादित्यर्थः। आशाभ्यः दिग्भ्यः त्वरिततरं यथा तथा एत्य आगत्य अन्तिकं समीपं जुषते सेवत इति तथोक्त्या। कपीनां वाहिन्या सेनया सह अनुजेन लक्ष्मणेन सुहृदा सुग्रीवेण च सह वर्तत इति तथोक्तस्सन् अहिं वृत्रासुरं—'सर्पे वृत्रासुरेऽप्यहिः' इति विश्वः। वासवः इन्द्र इव पौलस्त्यं रावणं जिघांसुः हन्तुमिच्छुस्सन् निरगमत् निरगात्।।७८।।

श्लोकार्थ—इस प्रकार क्रोध-ज्वाला के दीप्त हो जाने के अनन्तर रघुपति के अभिप्राय[१] को जानने वाले सुग्रीव के आज्ञाक्षरों (समस्त वानरों को उसी समय प्रस्थान करना चाहिए इत्याकारक) को मुख से निकलते ही नाना दिशाओं से तुरन्त ही पास पहुँची हुए वानरी सेना, अनुज लक्ष्मण तथा मित्र सुग्रीव के साथ पुलस्त्यकुलोत्पन्न रावण के वध की इच्छा से इन्द्र की तरह रघुपति ने प्रस्थान किया।।७८।।

अहमहमहमेवायोधने रावणं तं
नखरशिखरघातैर्दृष्टमात्रं छिनद्मि।
इति पथि पृथगुच्चैर्वीरवादं कपीनां
स हृदि समभिनन्दन् राघवः सस्मितोऽभूत्।।७९।।

---

१. आज ही रावण-वध के लिए प्रस्थान करना चाहिए।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहमिति। अहमहमहमेव आयोधने युद्धे दृष्टमात्रं तं रावणं नखरशिखरघातैः नखशिखाप्रहारैः छिनद्मि छेत्स्यामीत्यर्थः। इति पथि मार्गे कपीनां पृथक् प्रत्येकम् उच्चैः तारं वीरवादं हृदि समभिनन्दन् सम्यक् श्लाघमानः स राघवः सस्मितः समन्दहासः अभूत्। मालिनीवृत्तम्—'ननमयययुतेयं मालिनी भोगिलोकैः' इति लक्षणात्॥७९॥

श्लोकार्थ—मैं ही मैं ही (इस प्रकार बार-बार उच्चारण करते हुए) युद्ध में देखते ही उस रावण (सीतापहारी) को नख एवं प्रस्तरशिलाओं के प्रहार से टुकड़े-टुकड़े कर डालूँगा। इस प्रकार मार्ग में वानरों की उच्चैः स्वर से अलग-अलग अपनी-अपनी वीरता के वर्णन का सम्यक्तया अभिनन्दन करते हुए वह राघव मन्द मुस्कान से युक्त हुए॥७९॥

महताऽथ विस्मयकरेण सेतुना
रचितेन वानरवरैर्निजाज्ञया।
समतीत्य दाशरथिरर्णवं रिपो-
रुपपत्तनं शिखरिणं कमप्यगात्॥८०॥

महतेति। अथ दाशरथिः निजाज्ञया वानरवरैः रचितेन महता विस्मयकरेण आश्चर्यजनकेन सेतुना अर्णवं समतीत्य रिपोः शत्रोः रावणस्येत्यर्थः। उपपत्तनं पत्तनस्य समीपे 'अव्ययं विभक्ति' इत्यादिना समीपार्थेऽव्ययीभावः। कमपि शिखरिणं पर्वतं सुवेलाचलमित्यर्थः। अगात् प्रापत्। मञ्जुभाषिणीवृत्तम्—'सजसा जगौ भवति मञ्जुभाषिणी' इति लक्षणात्॥८०॥

श्लोकार्थ—इसके बाद दशरथनन्दन श्रीराम ने अपनी आज्ञा से श्रेष्ठ वानरों के द्वारा बनाये गये आश्चर्यजनक सेतु के माध्यम से समुद्र को पार करके शत्रु रावण के नगर के समीप किसी पर्वत (सुवेलाचल) को प्राप्त किया। प्रस्तुत श्लोक में मञ्जुभाषिणी नामक वृत्त है॥८०॥

तमारुह्योत्तुङ्गं जनकतनयाजानिरचलं
वृतः सुग्रीवाद्यैः पवनजनुषि प्रश्रयजुषि।
प्रदेशिन्या संदर्शयति धुरि पौलस्त्यनगरं
स्फुटाकृत्यद्राक्षीद्बदरमिव हस्तोदरगतम्॥८१॥

तमिति। जनकतनया जाया यस्य स जनकतनयाजानिः श्रीरामः। जायाया निङ्। सुग्रीव आद्यो येषां तैः वृतः परिवृतस्सन् उत्तुङ्गं तमचलं सुवेलम् आरुह्य प्रश्रयं विनयं जुषते सेवत इति तथोक्ते पवनजनुषि हनुमति धुरि अग्रे प्रदेशिन्या तर्जन्या—'तर्जनी स्यात्प्रदेशिनी' इत्यमरः। संदर्शयति प्रदर्शयति सति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पौलस्त्यनगरं लङ्कापुरं हस्तोदरगतं कराभ्यन्तरं प्राप्तं बदरं बदरीफलमिव स्फुटा आकृतिः यस्मिन्कर्मणि तद्यथा भवति तथा अद्राक्षीत्। शिखरिणीवृत्तम्॥८१॥

श्लोकार्थ—जनकनन्दिनी जानकी के पति श्रीराम ने सुग्रीवादि से घिरे हुए ऊँची चोटी वाले सुवेल नामक पर्वत पर चढ़कर विनयपूर्वक सेवा करने वाले पवनपुत्र हनुमान् द्वारा आगे की तरफ तर्जनी अंगुली से दिखायी जा रही पुलस्त्यवंशोत्पन्न रावण की नगरी (लङ्कापुरी) को मुट्ठी में आए हुए बदरीफल (बेर) की तरह, स्पष्टरूप से देखा॥८१॥

तद्दर्शनादेव रघूत्तमस्य कृतास्पदेऽक्ष्णोररुणिम्नि किञ्चित्।
हुमित्यदादर्कसुतः कपीनामरातिपुर्याक्रमणेऽभ्यनुज्ञाम्।।८२।।

तदिति। तस्य लङ्कापुरस्य दर्शनात् वीक्षणादेव रघूत्तमस्य अक्ष्णोः नेत्रयोः अरुणिम्नि आरुण्ये किंचित् कृतम् आस्पदं स्थानं येन तथोक्ते सति रामे ईषत्क्रुद्धे सतीत्यर्थः। अर्कसुतः सुग्रीवः कपीनाम् अरातिपुर्याः लङ्कायाः आक्रमणे अवस्कन्दने विषये हुमिति अभ्यनुज्ञामदात् अभ्यनुज्ञार्थं हुङ्कारमकार्षीदित्यर्थः। वृत्तमुपजातिः॥८२॥

श्लोकार्थ—उस लङ्कापुरी का दर्शन करते ही रघुश्रेष्ठ श्रीराम की आँखों में किञ्चित् लालिमा के स्थान प्राप्त कर लेने पर अर्थात् श्रीराम के थोड़ा क्रोधित हो जाने पर सूर्यपुत्र सुग्रीव ने वानरों के शत्रु की नगरी लङ्का के आक्रमण के विषय में अभ्यनुज्ञा प्राप्त करने के लिए हुङ्कार किया॥८२॥

क्षणे तस्मिन्नेव प्लवगततिरन्यादृशनिज-
प्रतापाविष्कारोचितसमयसम्प्राप्तिमुदिता।
तथाऽऽक्रम्यामृद्गाद्दशमुखपुरीं तत्र वसतां
यथा हाहारावा बत मुखरयेयुर्दश दिशः।।८३।।

क्षण इति। तस्मिन्नेव क्षणे सुग्रीवस्य हुङ्कारप्रवृत्तिसमय एवेत्यर्थः। अन्यादृशस्य असाधारणस्य निजस्य प्रतापस्य आविष्कारे अभिव्यञ्जने विषये उचितस्य समयस्य सम्प्राप्त्या उपगमेन मुदिता हृष्टा प्लवगततिः दशमुखपुरीं आक्रम्य तथा अमृद्गात् तत्र वसतां पौराणां हाहाकाराः दश दिशापीत्यर्थः। दिशः यथा मुखरयेयुः शब्दायमानाः कुर्युः तथा अमृद्गादिति पूर्वेण सम्बन्धः। बतेत्याश्चर्ये। शिखरिणीवृत्तम्॥८३॥

श्लोकार्थ—उसी समय अर्थात् सुग्रीव के द्वारा की गयी हुङ्कार प्रवृत्ति के समय ही असाधारण अपने प्रताप के प्राकट्य का उचित समय प्राप्त हो जाने के कारण हर्ष से युक्त वानरी सेना ने दशमुख रावण की नगरी लङ्का पर आक्रमण करके उस

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकार तहस-नहस किया, जिससे वहाँ निवास कर रहे पुरवासियों की हाहाकार ध्वनि से दशों दिशाएँ गूँज उठीं॥८३॥

तच्छ्रुत्वा ज्वलितक्रुधो दशमुखस्यादेशतोऽत्योजसः
सिंहाः पर्वतकन्दरादिव पुरान्निर्गत्य रक्षोभटाः।
युद्ध्वा वानरयूथपै रघुपतेः सानुग्रहोद्गारदृग्-
धारोत्तेजितपौरुषैर्जहुरसून् क्रीडद्भिरेवार्दिताः।।८४।।

तदिति। तत् वानरकृतं स्वपुरमर्दनं श्रुत्वा ज्वलितक्रुधः दीप्तकोपस्य दशमुखस्य आदेशतः आज्ञया। सार्वविभक्तिकस्तसिः। अतिशयितं ओजो येषां तथोक्ताः रक्षोभटाः पर्वतकन्दरात् सिंहा इव पुरात् निर्गत्य युद्ध्वा रघुपतेः अनुग्रहस्य उद्गारेण अभिव्यक्त्या सह वर्तत इति तथोक्तया दृग्धारया दृष्टिधोरण्या उत्तेजितम् उपजितं पौरुषं येषां तथोक्तैः, अत एव क्रीडद्भिरेव वानरयूथपैः अर्दिताः निष्पिष्टाः सन्तः असून् प्राणान् जहुः तत्यजुः॥८४॥

श्लोकार्थ—वानरों के द्वारा किये गये स्वपुरमर्दन को सुनकर क्रोध से जल रहे रावण के आदेश से अत्यधिक ओज से परिपूर्ण राक्षसवीर पर्वतों की कन्दराओं से निकले हुए सिंहों की तरह लङ्कापुरी से निकलकर युद्ध करके, कृपा से परिपूर्ण रघुपति की दृष्टि के कारण बढ़े हुए बल वाले वानर सेनापतियों के द्वारा खेल-खेल में ही चकनाचूर किये जा रहे (राक्षसों ने) प्राणों का परित्याग कर दिया॥८४॥

सचिवेषु सूनुषु सहोदरेष्वपि
प्रहितेष्वथ प्रमथितेषु सङ्गरे।
अपि कुम्भकर्णमनुजं दशाननः
प्रजिघाय सुप्तमवबोध्य यत्नतः।।८५।।

सचिवेष्विति। अथ दशाननः प्रहितेषु योद्धुं प्रेषितेषु सचिवेषु प्रहस्तवज्रदंष्ट्रादिषु मन्त्रिषु सूनुषु देवान्तकनरान्तकादिषु पुत्रेषु सहोदरेष्वपि महोदरमहापार्श्वादिषु भ्रातृषु च सङ्गरे प्रमथितेषु नीलादिभिर्वानरवीरैर्निहतेषु सत्सु सुप्तं निद्राणम् अनुजं कुम्भकर्णमपि यत्नतः प्रयत्नेन अवबोध्य प्रबोध्य प्रजिघाय योद्धुं प्रेषयामास। प्रपूर्वात् हिनोतेः कर्तरि लिट्। मञ्जुभाषिणीवृत्तम्॥८५॥

श्लोकार्थ—इसके अनन्तर रावण ने युद्ध में भेजे गये मन्त्रियों (प्रहस्त, वज्रदंष्ट्रादि) पुत्रों (देवान्तक, नरान्तकादि) और भाइयों (महोदर, महापार्श्वादि) के नीलादि वानरवीरों के द्वारा मार दिये जाने पर शयन कर रहे छोटे भाई कुम्भकर्ण को प्रयत्नपूर्वक जगा करके युद्ध करने के लिए भेजा। प्रस्तुत श्लोक में मञ्जुभाषिणी छन्द है॥८५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मिन्नप्यवगिलिताखिलप्लवङ्गे
ध्वान्तत्वं गतवति रामबाणभानोः।
शूरः सोऽप्यजनि नियुद्ध्य मेघनादः
सौमित्रिज्वलदिषुबर्हिषः पतङ्गः॥८६॥

तस्मिन्निति। अवगिलिताः भक्षिताः अखिलाः प्लवङ्गाः येन तथोक्ते तस्मिन्नपि कुम्भकर्णे च रामस्य बाण एव भानुः तस्य ध्वान्तत्वम् अन्धकारतां गतवति सति रामेण बाणेन हते सतीत्यर्थः। शूरः स प्रसिद्धः मेघनादोऽपि इन्द्रजिच्च नियुद्ध्य युद्ध्वा सौमित्रेः लक्ष्मणस्य सम्बन्धी ज्वलन् य इषुर्बाणः स एव बर्हिरग्निः— 'बर्हिश्शुष्मा कृष्णवर्त्मा' इत्यमरः। तस्य पतङ्गः शलभः अजनि लक्ष्मणेन हतोऽभूदित्यर्थः। प्रहर्षणीवृत्तम्—'म्नौज्रौ गस्त्रिदशयतिः प्रहर्षणीयम्' इति लक्षणात्॥८६॥

श्लोकार्थ—जिसने वानरों का भक्षण कर लिया है, सूर्यसदृश राम के बाणों द्वारा अन्धकारस्वरूप कुम्भकर्ण के पञ्चत्व को प्राप्त हो जाने पर[1] अर्थात् राम के बाणों द्वारा कुम्भकर्ण की मृत्यु हो जाने पर प्रसिद्ध योद्धा मेघनाद भी युद्ध करके अग्नि की तरह जलते हुए लक्ष्मण के बाणों (आग्नेयास्त्र) के द्वारा पतङ्ग की तरह युद्ध के मैदान में मार दिया गया॥८६॥

तथा समरदुर्मदं तमपि कुम्भकर्णं तथा
सुराधिपतिजित्वरं तमपि मेघनादं हतम्।
निशम्य दशकन्धरश्चिरतरं प्ररुद्य क्रुधा
ज्वलन्नरिजिघांसया निरगमद्दुरीक्षः पुरात्॥८७॥

तथेति। तथा अनितरसाधारणेन प्रकारेणेत्यर्थः। समरे दुर्मदं दुर्दमगर्वं तं कुम्भकर्णमपि तथा सुराधिपतेरिन्द्रस्य जित्वरं जेतारं तं मेघनादमपि हतं निशम्य रामलक्ष्मणाभ्यां संहतौ श्रुत्वा दशकन्धरः चिरतरं प्ररुद्य रुदित्वा क्रुधा ज्वलन् अत एव दुरीक्षः दुर्दर्शः सन् अरिजिघांसया पुरात् निरगमत्। पृथ्वीवृत्तम्—'जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः' इति लक्षणात्॥८७॥

श्लोकार्थ—इस प्रकार समरदुर्मद उस कुम्भकर्ण की तथा इन्द्रजित् मेघनाद की भी मृत्यु का समाचार सुनकर दशकन्धर बहुत देर तक विलाप करके क्रोध से जलते हुए भयानक दिखाई देने वाला (रावण) शत्रुवध की इच्छा से लङ्कानगरी से[2] प्रस्थान किया। प्रस्तुत श्लोक में पृथ्वी छन्द है॥८७॥

---

१. प्रस्तुत श्लोक में श्रीराम को सूर्य की उपमा तथा कुम्भकर्ण को अंधकार की उपमा दी गयी है।
२. रणभूमि के लिए।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्षोनाथस्य विक्षोभितमतिनिशितैः सायकैर्वानराणां
सैन्यं संप्राप्तदैन्यं दिशि दिशि भयतो धावदालोक्य रामः।
आचक्षाणेन तेषामभयमिव दिशः पूरयन्नुद्भटेन
ज्याघोषेणाभ्यधावद्दशवदनमिभं केसरीवोग्ररंहाः।।८८।।

रक्षोनाथस्येति। रामः रक्षोनाथस्य रावणस्य सम्बन्धिभिः अतिनिशितैः सायकैः। विक्षोभितं व्याकुलीकृतम् अत एव भयतः दिशि दिशि संप्राप्तदैन्यं यथा तथा धावत् वानराणां सैन्यम् आलोक्य तेषां वानराणामभयं मा भैष्टेत्यभयवचनम् आचक्षाणेन ब्रुवाणेनेव स्थितेन उद्भटेन अत्यूर्जितेन ज्याघोषेण मौर्वीझङ्कारेण दिशः पूरयन् सन् इभं केसरी सिंह इव उग्रं रंहो वेगो यस्य तथोक्तः सन् दशवदनं रावणम् अभ्यधावत्। स्रग्धरावृत्तम्।।८८।।

श्लोकार्थ—राम ने राक्षसों के स्वामी रावण के अत्यन्त तीखे बाणों के द्वारा व्याकुल कर दिये जाने के कारण भय से प्रत्येक दिशाओं में दीनतापूर्वक पलायन करते हुए वानरों की सेना को देखकर उन वानरों को अभय[1] प्रदान करते हुए से, प्रभावशाली (अत्यन्त गम्भीर) धनुष की टङ्कार से दिशाओं को पूर्ण करते हुए सिंह की तरह वेगवाले (श्रीराम ने) दशवदन (रावण) का पीछा किया।।८८।।

ततोऽभिमुखतां गते दशमुखे रघूणां पतिः
ववर्ष विशिखावलीर्घन इवाम्बुधारा गिरौ।
स ता अपि सहन् कथञ्चन मुमोच यानाशुगान्
स तानपि तिलांशशः शकलयाम्बभूव प्रभुः।।८९।।

तत इति। ततः रघूणां पतिः अभिमुखतां गते दशमुखे घनो मेघः गिरौ पर्वते अम्बुधारा इव विशिखावलीः बाणपङ्क्तीः ववर्ष। बाणधाराणामसङ्ख्या-कत्वाविच्छिन्नपातत्वद्योतनायेयमुपमा। ता अपि रामबाणधारा अपि कथञ्चन सहन्। विकल्पतश्चौरादिकात्सहश्शतृप्रत्ययः 'स एवायं नागस्सहति कलभेभ्यः परिभवम्' इति प्रयोगश्च। स रावणः यान् आशुगान् बाणान् मुमोच तानपि प्रभुस्सर्वसमर्थः सः रघूणां पतिः तिलांशशः तिलशकलरूपेण शकलयाम्बभूव खण्डयामास। पृथ्वीवृत्तम्।।८९।।

श्लोकार्थ—उसके बाद राघव ने, रावण के सम्मुख पहुँचकर पर्वत पर बादलों से गिर रही जलधारा की तरह बाणसमूह की वर्षा की[2]। राम के द्वारा चलाये गये

१. 'मत डरो' इस प्रकार कहते हुए।
२. बाणसमूह के असंख्य होने के कारण वर्षा से उपमा दी गयी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उन बाणों के समूह को भी, किसी प्रकार सहन करते हुए उस रावण ने जिन शीघ्रगामी बाणों को छोड़ा, उन बाणों को भी सर्वसमर्थ रघुनाथ ने तिल की तरह काट डाला।।८९।।

साक्षाच्छृण्वति शिंशुपाशिखरमध्यास्याञ्जनेये पुरा
यच्छौर्यं जनकात्मजां प्रति मुहू रक्षोधमाकत्थथाः।
क्वेदं दर्शय दर्शयेति वदतः संतक्षतश्चाशुगै
रामस्योक्तिमरुन्तुदां दशमुखोऽसोढ्वा पराचक्रमे।।९०।।

साक्षादिति। रे रक्षोधम! पुरा आञ्जनेये शिंशुपाशिखरमध्यास्य शिंशुपावृक्षाग्रे उपविश्येत्यर्थः। 'अधिशीङ्स्थासां कर्म' इत्याधारस्य कर्मत्वम्। साक्षात् प्रत्यक्षं यथा तथा शृण्वति सति जनकात्मजां प्रति मुहुः यत् शौर्यम् अकत्थथाः अश्लाघथाः इदं शौर्यं क्व? कुत्र? अस्तीति शेषः। दर्शय दर्शय इति वदतः ब्रुवाणस्य आशुगैः संतक्षतश्च बाणैः सन्तक्षणेन दुस्सहं स्वशौर्यमेव दर्शयतश्चेत्यर्थः। 'अरुन्तुदं तु मर्मस्पृक्' इत्यमरः। उक्तिम् असोढ्वा दशमुखः पराचक्रमे ईर्ष्यावशादुदितं पराक्रमं दर्शयितुमारेभ इत्यर्थः। 'उपपराभ्याम्' इत्यात्मनेपदम्।।९०।।

श्लोकार्थ—रे रक्षोऽधम! पूर्वकाल में, अञ्जनानन्दन हनुमान् के शिंशपा वृक्ष के अग्रभाग पर स्थित होकर प्रत्यक्ष श्रवण करते समय, जनकात्मजा (सीता) के प्रति जिस शौर्य का वर्णन किया, इस समय तुम्हारा शौर्य (वीरता) कहाँ है? दिखाओ-दिखाओ! इस प्रकार बोलते हुए शीघ्रगामी बाणों के द्वारा अपने दुस्सह शौर्य को दिखाते हुए राम की मर्मस्पर्शी उक्तियों को सहन न करके दशमुख (रावण) ने ईर्ष्यावशात् प्रकट हुए पराक्रम को दिखाना शुरू किया।।९०।।

अन्योन्यास्त्रहतित्रुटत्कवचफाट्फाट्कारसाडम्बरा
चापोद्यच्छरतर्क्यतद्ग्रहणसन्धानप्रयोगक्रिया।
अश्रद्धेयजयाजयाऽतिभयदाऽप्याजिस्तयोर्द्योसदा-
मुच्छिन्नोत्पतदाशराधिपमुखालोकादभूत्तुष्टये।।९१।।

अन्योन्येति। अन्योन्यास्त्रहत्या परस्परशस्त्रप्रहारेण त्रुटतां छिद्यमानानां कवचानां परस्परतनुत्राणां सम्बन्धिना फाट्फाट्कारेण फाट्फाडिति ध्वनिना साडम्बरा सतूर्यनिनदा तूर्यनिनदायितफाट्फाट्कारेणेत्यर्थः। 'आडम्बरस्तूर्यरवो' इत्यमरः। चापाभ्याम् उद्यद्भिः उत्पतद्भिः शरैः बाणैः चापाभ्यां बाणानाम् उत्पतनरूपेण लिङ्गेनेत्यर्थः। तर्क्याः अनुमेयाः तेषां शराणां ग्रहणसंधानप्रयोगक्रियाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

तूणीमुखोद्धरणमौर्वीसंयोजनलक्ष्याभिपातनरूपव्यापारा: यस्यां तथोक्ता। उभयोरप्यतिक्षिप्रहस्तत्वादिति भाव:। अश्रद्धेयौ निर्णयाविषयौ जयाजयौ जयपराजयौ यस्यां तथोक्ता अत एव अतिभयदाऽपि तयो: रामरावणयो: आजि: युद्धम् उच्छिन्नानां रामबाणैरुल्लूनानाम् उत्पततां च आशराधिपमुखानां रावणशिरसाम् आलोकात् दर्शनाद्धेतो: द्योसदां देवानां तुष्टये अभूत्॥९१॥

श्लोकार्थ—परस्पर शस्त्रप्रहार से टूट रहे कवचों के फाट् फाट् इत्याकारक ध्वनि के कारण तूर्य नामक वाद्यविशेष की ध्वनि से युक्त धनुषों से निकल रहे[1] बाणों के द्वारा अनुमेय (अनुमान के योग्य) उनके बाणों के ग्रहण (तरकस में से निकालना), संधान (धनुष की डोरी पर रखना) एवं प्रयोग (लक्ष्य का भेदन करना) रूप व्यापार[2] वाले (राम एवं रावण) जय तथा पराजय के निर्णय से रहित होने के कारण अत्यन्त भयदायक होने पर भी राम-रावण का युद्ध राम के बाणों द्वारा काटे गये रावण के मस्तकों का दर्शनरूप हेतु देवताओं की तुष्टि के लिए हुआ॥९१॥

शस्त्रेऽस्त्रेऽतिमहत्सु बाहुषु महामायाविधानेऽपियत्
प्राचण्ड्यं बत सर्वदिक्पतिजये रक्ष:पते: साधनम्।
तद्वीरस्य रघूत्तमस्य पुरतोऽकिञ्चित्करं सर्वमप्य-
ग्रेऽग्नेरिव शालभं विलसितं जज्ञेऽपहासास्पदम्।।९२।।

शस्त्र इति। शस्त्रे खड्गाद्यायुधप्रयोगे इत्यर्थ:। एवमग्रेऽपि लक्षणया। अस्त्रे आग्नेयाद्यस्त्रप्रयोगे अतिमहत्सु बाहुषु महाभुजबलसाध्ये कर्मणि। महत्या: मायाया विधानेऽपि आविर्भावने च। सर्वत्र विषयसप्तमी। रक्ष:पते: रावणस्य यत् प्राचण्ड्यं प्रचण्डत्वम् अतिपटुत्वमिति यावत्। सर्वेषां दिक्पतीनाम् इन्द्रादीनाम्। कर्मणि षष्ठी। जये साधनम् अभूदिति शेष:। बतेत्याश्चर्ये। सर्वमपि तत्प्राचण्ड्यं वीरस्य रघूत्तमस्य पुरत: अकिञ्चित्करम् अतितरामप्रयोजकं सदित्यर्थ:। अग्ने: दीपात्मकस्येति भाव:। अग्ने: शालभं शलभसम्बन्धि विलसितं क्रीडितमिव अपहासास्पदं द्रष्टृणाम् अपहासविषयीभूतं जज्ञे बभूव॥९२॥

श्लोकार्थ—शस्त्रों (खड्गादि आयुधों) एवं अस्त्रों (आग्नेयादि) के प्रयोग के विषय में तथा महाभुजबलसाध्यकर्म में एवं महामाया के प्राकट्य के विषय में राक्षसाधिपति रावण का जो अतिपटुत्व इन्द्रादि दिक्पालों पर विजय का कारण बना, आश्चर्य है कि समस्त उसका अतिपटुत्व रघुवंशियों में श्रेष्ठ वीर (श्रीराम) के समक्ष

१. धनुष पर संधान करके छोड़े गये।
२. राम तथा रावण के हस्तकौशल।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्यन्त निष्फल होते हुए अग्नि (दीपक) के सामने शलभ (पतङ्ग) के विलास की तरह अपहास का विषय बन गया॥९२॥

छेदो निष्पुनरुद्भवोऽयमयमित्येव प्रतिच्छेदमु-
च्छिन्नेष्वप्यसकृच्छिरस्सु पुनरुत्पन्नेषु रक्षःपतेः।
एवं दुर्दम एष केन सुदमः पापीति धीः क्रोधमु-
द्बोध्याजिग्रहदस्त्रमाम्बुजभवं द्राग्जानकीजानिना।।९३।।

छेद इति। प्रतिच्छेदं छेदे छेदे। वीप्सायामव्ययीभावः। अयं छेदो निष्पुनरुद्भवोऽयं छेदो निष्पुनरुद्भवः इत्येव। इदानीं छिन्नान्यस्य शिरांसि न पुनरुत्पत्स्यन्त इदानीं छिन्नान्यस्य शिरांसि न पुनरुत्पत्स्यन्त इति निश्चित्यैवेत्यर्थः। असकृत् उच्छिन्नेष्वपि बाणैर्लूनेष्वपि रक्षःपतेः शिरस्सु पुनः भूयोऽपि उत्पन्नेषु अङ्कुरितेषु सत्सु एवं दुर्दमः अनया रीत्या शिरांस्येव समूलमसकृदुच्छिन्दताऽपि मया प्राणैर्वियोजयितुमशक्यः। एष पापी रावणः केन सुदमः? केन पुनरन्येन वीरेण हन्तुं शक्यः? इति धीः पर्यालोचनात्मिका बुद्धिः प्रयोजिका कर्त्री क्रोधमुद्बोध्य चिरयुद्धकेल्यनुबुभूषया रामस्य हृदि विलम्बितामपि जिघांसां क्षिप्रमुत्पाद्येत्यर्थः। जानकीजानिना रामेण प्रयोज्येन द्राक् क्षिप्रम् आम्बुजभवं ब्राह्मम् अस्त्रम् अजिग्रहत् ग्राहयति स्म ग्राहयतेर्लुङ्॥९३॥

श्लोकार्थ—यह कटा हुआ सिर पुनः उत्पन्न नहीं होगा, यह कटा हुआ सिर पुनः उत्पन्न नहीं होगा, इस प्रकार प्रत्येक शिरों के कटने पर निश्चय करके बार-बार बाणों के द्वारा शिरों के कट जाने पर भी पुनः राक्षसाधिपति रावण के सिरों के उत्पन्न हो जाने से इस प्रकार यह मारा नहीं जा सकता[१] है। यह पापी रावण किस वीर के द्वारा मारा जा सकता है, इस प्रकार की पर्यालोचनात्मिका बुद्धि ने, क्रोध को जागृत करके[२] जानकीनाथ श्रीराम से शीघ्र ही ब्रह्मास्त्र को ग्रहण कराया॥९३॥

अलब्धव्याघातं क्वचिदपि तदस्त्रं रघुपतौ
प्रयुञ्जानेऽत्युग्रं कुलिशमिव वेगान्मघवति।
तदा घातादुच्चैर्गिरिरिव स रक्षःपरिवृढः
पपातोर्व्यां सान्द्रैः सह कुसुमवर्षैर्दिविषदाम्।।९४।।

---

१. जड़ के साथ शिरों को बार-बार काटने पर भी प्राणरहित करना संभव नहीं है।
२. बहुत समय तक युद्ध होने की इच्छा के कारण विलम्ब से होने वाली रावणवध की इच्छा को शीघ्र उत्पन्न करके।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अलब्धेति। मघवति अत्युग्रं कुलिशं वज्रायुधमिव रघुपतौ क्वचिदपि कुत्रचिल्लक्ष्येऽपि अलब्धः व्याघातः प्रतिघातो येन तथोक्तं तदस्त्रं ब्रह्मास्त्रं वेगात् प्रयुञ्जाने सति तदाघातात् तस्य ब्रह्मास्त्रस्य अभिघातात्। पर्वतपक्षे तस्य कुलिशस्य अभिघातादित्यर्थः। उच्चैर्गिरिरिव स रक्षःपरिवृढः रावणः दिविषदां देवानां सम्बन्धिभिः तत्कर्तृकैरित्यर्थः। सान्द्रैः कुसुमवर्षैः सह उर्व्यां पपात॥९४॥

श्लोकार्थ—इन्द्र के द्वारा चलाये गये वज्र नामक विशेष आयुध की तरह श्रीराम के द्वारा चलाये गये किसी भी लक्ष्य का भेदन करने में निष्फल न होने वाले **'ब्रह्मास्त्र'** के, वेगपूर्वक लगने के कारण उस ब्रह्मास्त्र के आघात से, ऊँचे पहाड़ की तरह वृद्धि को प्राप्त राक्षस (रावण) देवताओं के द्वारा की जा रही पुष्पों की वर्षा के साथ ही साथ पृथ्वी पर गिर पड़ा॥९४॥

अथैत्य ब्रह्माद्या निजगदुरमर्त्या रघुपते
त्रिलोकी निर्बाधाऽजनि विरचिते रावणवधे।
सतीं सीतां नीत्वा विधिवदभिषिक्तोऽवनिमव-
न्नयोध्यायां राज्यश्रियमनुभवानन्दत इति॥९५॥

अथ रावणसंहारानन्तरं ब्रह्माद्याः अमर्त्याः देवाः एत्य आगत्य निजगदुः राममूचुः तत्प्रकारमेवाह—हे रघुपते! रावणवधे विरचिते सति त्रिलोकी निर्बाधा निरुपप्लवा अजनि अभूत्। सतीं पतिव्रतां सीतां नीत्वा अयोध्यामुपनीयेत्यर्थः। विधिवत् अर्हार्थे वतिः। विध्यर्हं यथा तथेत्यर्थः। अभिषिक्तस्सन् अवनिं भूमिम् अवन् रक्षन् अयोध्यायाम् आनन्दतः आनन्देन राज्यश्रियम् अनुभव इति निजगदुरिति पूर्वेण सम्बन्धः॥९५॥

श्लोकार्थ—रावणवध के अनन्तर ब्रह्मादि देवताओं ने आ करके प्रभु श्रीराम से इस प्रकार से कहा—हे रघुपते! रावणवध हो जाने से तीनों लोक उपद्रव से रहित हो गया। पतिव्रता पत्नी सीता को अयोध्या ले जाकर विधिवत् अभिषिक्त होकर पृथ्वी का पालन करते हुए अयोध्या में आनन्दपूर्वक राज्यलक्ष्मी का उपभोग करें॥९५॥

तथाऽस्त्विति कृताननतिः प्रमुदितानशेषान्सुरा-
न्विसृज्य दशकन्धरानुजमशेषरक्षःपतिम्।
विधाय तदुपाहृतं सजनकात्मजः सानुजो
विमानवरमास्थितो रघुपतिः प्रतस्थे मुदा॥९६॥

तथेति। रघुपतिः तथाऽस्त्विति उक्त्वेति शेषः। कृता आनतिः येन तथोक्तस्सन् प्रमुदितान् स्वस्य विनयेन प्रहृष्टान् अशेषान् सुरान् विसृज्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशकन्धरानुजं विभीषणम् अशेषरक्षःपतिं सकलराक्षसाधीश्वरं विधाय लङ्काराज्येऽभिषिच्येत्यर्थः। तदुपाहृतं तेन विभीषणेनोपायनीकृतम् इत्यर्थः। विमानवरं पुष्पकं सजनकात्मजः सानुजः आस्थितः सन् सीतालक्ष्मणाभ्यां सहारूढः सन्नित्यर्थः। मुदा प्रतस्थे। अयोध्यामिति शेषः। पृथ्वीवृत्तम्।।९६।।

श्लोकार्थ—प्रभु श्रीराम ने 'तथाऽस्तु' इस प्रकार कहकर, प्रणाम कर चुके तथा अपने विनय की स्वीकृति से प्रमुदित हुए समस्त देवताओं को विदा करके, दशकन्धर (रावण) के छोटे भाई विभीषण को समस्त राक्षसों का स्वामी बनाकर अर्थात् लङ्कानगरी के राजा के रूप में अभिषिक्त करके, विभीषण के द्वारा प्रदान किये गये श्रेष्ठ विमान पुष्पक पर जानकी एवं लक्ष्मण सहित आरूढ़ होकर प्रसन्नतापूर्वक (श्रीअवध के लिए प्रभु श्रीराम ने) प्रस्थान किया।।९६।।

तदाऽतिप्रेम्णोद्यत्पुलकभरमङ्कं रघुपति-
र्बलाल्लज्जाविष्टामपि समधिरोप्यावनिसुताम्।
प्रफुल्लाभ्यामन्तःप्रणयरसमत्युत्कटमिव
प्रवर्षन्नक्षिभ्यामिदमवददत्यन्तमुदितः।।९७।।

तदेति। रघुपतिः लज्जाविष्टामपि उत्सङ्गमधिरोढुमपत्रपमाणामपीत्यर्थः। अवनिसुतां सीताम् उद्यन् उत्पद्यमानः पुलकभरः। रोमाञ्चातिशयः यस्मिन् तम् अङ्कम् उत्सङ्गम् अतिप्रेम्णा बलात् समधिरोप्य प्रफुल्लाभ्यां विकसिताभ्याम् अक्षिभ्यां नेत्राभ्याम् अत्युत्कटम् अत्युद्रेकान्मनस्यमान्तमित्यर्थः। अन्तःप्रणयरसं प्रवर्षन्निवेत्युत्प्रेक्षा। अत्यन्तमुदितः अतीवप्रहृष्टः सन् इदं वक्ष्यमाणं वचनम् अवदत्। अतीव अनुरागतः पश्यन्नब्रवीदित्यर्थः। शिखरिणीवृत्तम्।।९७।।

श्लोकार्थ—रघुपति ने, लज्जा से युक्त होने पर भी अवनितनया सीता को, उत्पन्न हो रहे रोमाञ्च से युक्त गोद में उठा करके, खिले हुए नेत्रों के द्वारा अत्युत्कट अन्तःप्रणयरस की वर्षा करते हुए अत्यन्त प्रसन्नतापूर्वक इन वचनों को कहा अर्थात् अत्यन्त अनुराग से देखते हुए प्रभु श्रीराम ने कहा। प्रस्तुत श्लोक में शिखरिणी नामक छन्द है।।९७।।

दुर्दैवपरिपाकेन दुष्टराक्षसमायया।
प्राप्तानुभूतं संक्लेशं सर्वं सुतनु विस्मर।।९८।।

दुर्दैवेति। हे सुतनु! दुर्दैवस्य परिपाकेन फलोन्मुखतया दुष्टानां राक्षसानां मायया हेतुना प्राप्तानुभूतं सर्वं संक्लेशं राक्षसोपरोधराक्षसीपरितर्जनादिरूपं विस्मर।।९८।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्लोकार्थ—हे सुन्दर शरीरवाली सीते! दुर्भाग्य के फलोन्मुख होने के कारण राक्षसों की माया से प्राप्त तथा सहन किये गये समस्त कष्टों (राक्षसोपरोध-राक्षसी-परितर्जनादिरूप) को भूल जाओ॥९८॥

प्रिये जनकजे निजं गुणमभिष्टुवन्रावणः
पुरा यदुभयार्थकप्रतिगिरा निरस्तस्त्वया।
तदस्मदभितुष्टयेऽजनि हनूमदुक्तं क्रमा-
त्तथा प्रतिवचोऽद्भुतं वद कथं तव प्रत्यभात्।।९९।।

प्रिये इति। प्रिये जनकजे! हे प्रेयसि! जानकि! पुरा अशोकवनवासावसरे निजं गुणम् अभिष्टुवन् 'परिक्षीणालस्यः समरभुवि' इत्यादिरूपेण आत्मश्लाघां कुर्वन्नित्यर्थः। रावणः त्वया उभयार्थकप्रतिगिरा 'रेऽधम मुहुरलं त्वां श्रुतवती' इत्यादिरूपेण श्लिष्टार्थेन प्रतिवचनेन निरस्तः निराकृत इति यत्—'प्रत्यादिष्टो निरस्तस्स्यात्प्रत्याख्यातो निराकृतः' इत्यमरः। क्रमात् हनूमदुक्तम् आञ्जनेयेन कथितं तत् सर्वम् अस्मदभितुष्टये अजनि। अस्माकं परितोषमकार्षीदित्यर्थः। तथा तेन प्रकारेण अद्भुतं अर्थान्तरप्रतिपादनानुकूलयाऽक्षरघटनयाऽऽश्चर्य-करमित्यर्थः। प्रतिवचः प्रतिवचनं तव कथं प्रत्यभात् प्रतिभाति स्म वद। पृथ्वीवृत्तम्॥९९॥

श्लोकार्थ—प्रभु श्रीराम ने देवी सीता से कहा—हे प्रेयसि! जानकि! अशोकवन में निवास करते समय **'परिक्षीणालस्यः समरभुवि'** इत्यादि रूप से आत्मप्रशंसा करता हुआ रावण तुम्हारे द्वारा उभयार्थक प्रतिकथन **(रेऽधम मुहुरलं त्वां श्रुतवती)** के माध्यम से निरादृत हुआ। क्रमपूर्वक हनुमान् के द्वारा कहा गया वह सम्पूर्ण प्रतिकथन मेरी संतुष्टि हुआ। उस प्रकार से अद्भुत (अर्थप्रदान्तर प्रतिपादन के अनुकूल अक्षरों का संघटन रूप) तुम्हारा प्रतिकथन कैसा लगता था, बोलो॥९९॥

इत्यादरेण पृच्छन्तं प्रेमतः प्राणवल्लभम्।
उवाच देवी मन्दाक्षमन्दाक्षरमिदं वचः।।१००।।

इतीति। देवी सीता इति प्रेमतः आदरेण पृच्छन्तं प्राणवल्लभं रामं मन्दाक्षेण लज्जया मन्दानि अस्फुटानि अक्षराणि यस्मिन् तथोक्तं यथा तथा इदं वक्ष्यमाणं वचः उवाच॥१००॥

श्लोकार्थ—देवी सीता ने, प्रेमपूर्वक आदर से पूछ रहे प्रभु श्रीराम से लज्जा के कारण स्फुट अक्षरों से रहित (जिस किसी प्रकार से) इन वचनों को कहा॥१००॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देव त्वच्चरणारविन्दयुगलध्यानामृतास्वादन-
व्यासक्तामपि मां दुरुक्तिमसकृद्रक्षोऽधमे जल्पति।
क्रोधस्यैव बलात्किमप्युदभवत्प्रत्युत्तरं मन्मुखा-
च्छ्लिष्टार्थत्वचमत्क्रियाऽत्र तु तवैवानुग्रहान्नान्यथा।।१०१।।

देवेति। हे देव! रक्षोऽधमे रावणे त्वच्चरणारविन्दयोः युगलस्य ध्यानमेव अमृतं तस्य आस्वादने व्यासक्तामपि माम् असकृत् दुरुक्तिं जल्पति सति क्रोधस्य बलादेव पतिव्रताजनसमुचितं परपुरुषानभिभाषणव्रतमपि प्रसभमुत्सारयतः कोपादित्यर्थः। किमपि अर्थतोऽन्वयतश्चानाकलितरूपमित्यर्थः। प्रत्युत्तरं मन्मुखात् उदभवत् अत्र एवमुद्भूते प्रतिवचने श्लिष्टार्थत्वचमत्क्रिया तु उभयार्थप्रतिपादकत्व-चमत्कृतिः पुनः स्वादितत्वद्योतनार्थकस्तुशब्दः। तव अनुग्रहादेव स्यादिति शेषः। अन्यथा न। स्याच्चेत्सा त्वदनुग्रहमूलिकैव। न तु स्वविज्ञानमूलिकेत्यर्थः।।१०१।।

श्लोकार्थ—देवी सीता ने प्रभु श्रीराम से कहा—हे देव! तुम्हारे चरणारविन्द-युगल के, ध्यानामृत के आस्वादन में आसक्त भी मुझ सीता को बार-बार निन्दित वचन बोल रहे अधम राक्षस रावण पर क्रोध के कारण ही कुछ (अर्थ और अन्वय से रहित) प्रत्युत्तर मेरे मुख से निकला। इस प्रकार से निकले हुए प्रत्युत्तर में श्लिष्टार्थत्वरूप चमत्कार[1] तो[2] आपकी कृपा से हुआ, आपकी कृपा के न होने पर श्लिष्टार्थत्व चमत्कृति भी नहीं होती, अर्थात् वह चमत्कृति मेरे ज्ञान के कारण नहीं अपितु आपकी कृपा से सम्पन्न हुई।।१०१।।

इति सविनयं प्रेयस्योक्तः प्रहृष्य रघूत्तमो
द्रुतमुपगतोऽयोध्यामुच्चैस्समूर्तिरिवोत्सवः।
भरतमभिनन्द्यर्षिश्रेष्ठैर्वसिष्ठपुरोगमैः
विधिवदभिषिक्तः सन्राज्ये जुगोप चिरं महीम्।।१०२।।

इतीति। इति उक्तप्रकारेण प्रेयस्या सीतया सविनयं यथा तथा उक्तः अभिहितः रघूत्तमः रामः प्रहृष्य सन्तुष्य समूर्तिः मूर्तिमान् उच्चैः महान् उत्सव इव द्रुतम् अयोध्याम् उपगतस्सन् भरतम् अभिनन्द्य उपलालनया परितोष्य वसिष्ठः पुरोगमो येषां तैः ऋषिश्रेष्ठैः विधिवत् राज्ये अभिषिक्तः सन् चिरं महीं जुगोप ररक्ष। हरिणीवृत्तम्—'रस्त्रयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा' इति लक्षणात्।।१०२।।

---

१. सामान्यार्थ एवं विशेषार्थ की प्रतिपादक चमत्कृति।
२. तु शब्द स्वाविदितत्व के द्योतन के लिए है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्लोकार्थ—उक्त प्रकार से प्रेयसी सीता के द्वारा विनयपूर्वक निवेदित रघुश्रेष्ठ श्रीराम ने सन्तुष्ट हो करके, मूर्तिमान् महोत्सव की तरह शीघ्र ही अयोध्या में पहुँचकर भरत को उपलालना के द्वारा सन्तुष्ट करके, वशिष्ठ हैं अगुआ (श्रद्धेय) जिनके, उन श्रेष्ठ ऋषियों के द्वारा विधिवत् राज्य पर अभिषिक्त होकर बहुत काल तक पृथ्वी का पालन किया॥१०२॥

इन्दुः कैरविणीरिवाम्बरमणिः श्रीमानिवाम्भोजिनी-
र्वासन्तीर्लतिकावलीरिव जगत्कान्तो वसन्तोदयः।
उल्लासं सकलाः प्रजाः प्रतिकलं कल्लोलितं लम्भयन्
जानक्या सह राघवश्चिरतरं राज्यश्रियं सोऽन्वभूत्।।१०३।।

इन्दुरिति। स राघवः कैरविणीः कुमुदिनीः इन्दुरिव अम्भोजिनीः पद्मिनीः श्रीमान् अम्बरमणिः सूर्य इव—'द्युमणिस्तरणिर्मित्रः' इत्यमरः। वासन्तीः माधवीः लतिकावलीः लतापङ्क्तीः जगत्कान्तः लोकमनोहरः वसन्तोदय इव सकलाः प्रजाः प्रतिकलं प्रतिक्षणं कल्लोलितं तरङ्गितम् उल्लासं लम्भयन् प्रापयन् सन् जानक्या सह चिरतरम् अतिचिरं कालं राज्यश्रियं राज्यलक्ष्मीम् अन्वभूत्॥१०३॥

श्लोकार्थ—कुमुदिनियों को चन्द्रसदृश एवं कमलिनियों को श्रीमान् सूर्य की तरह तथा लतासमूह को वसन्तर्तुसदृश एवं वसन्त के आगमन की तरह लोकमनोहर, सारी प्रजा को प्रतिक्षण उल्लसित करते हुए श्रीराम ने जानकी के साथ बहुत दिनों तक राज्यलक्ष्मी का उपभोग किया॥१०३॥

अन्यूनैः शतकात्कृतिः स्वयमियं गूढार्थपद्यैर्युता
कर्तव्येति ससंविदप्यतिचिरश्रान्तो मतिक्षोभतः।
विश्रान्तोऽस्म्यवशिष्टमर्धशतकं संग्रथ्य मत्संविदा
सार्धं यः परिपूरयेत्कृतिमिमां तस्मै सहस्रं नमः।।१०४।।

ग्रन्थमेवं परिसमाप्य ग्रन्थकृदिदानीमेतद्ग्रन्थविषयकं स्वोदन्तमाह—**अन्यूनैरिति**। इयं कृतिः **सीतारावणसंवादझरी** स्वयम् आत्मनैव शतकात् शतसंख्येभ्यः श्लोकेभ्य इत्यर्थः। अन्यूनैः अनवहीनैः गूढः अर्थः येषु तथोक्तानि च तानि पद्यानि च तैः युता युक्ता कर्तव्या इति ससंविदपि कृतप्रतिज्ञोऽपीत्यर्थः। मतिक्षोभतः बुद्धिक्लेशात् हेतोः अतिचिरश्रान्तः चिरतरकृतपरिश्रमः अहं विश्रान्तोऽस्मि पञ्चाशतैव तादृशैः पद्यैः कृतकृत्यंमन्यः कर्तव्यत्वेन प्रतिज्ञातेष्वप्यन्येषु श्लथोद्यमोऽस्मीत्यर्थः। यः कविः अवशिष्टम् अर्धशतकं कर्तव्यत्वेन प्रतिज्ञातानि पञ्चाशतं पद्यानीत्यर्थः। सङ्ग्रथ्य मत्संविदा सार्धमिमां कृतिं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मम प्रतिज्ञां कृतिमिमां चोभयमपीत्यर्थः। परिपूरयेत् तस्मै सहस्त्रं नमः। महोपकारिणं तं सहस्त्रशः प्रणमामीत्यर्थः। 'नमः स्वस्ति' इत्यादिना चतुर्थी॥१०४॥

श्लोकार्थ—ग्रन्थ की समाप्ति हो जाने के अनन्तर ग्रन्थकार ने प्रस्तुत ग्रन्थ के विषय में कहा—**'सीतारावणसंवादझरी'** नामक यह कृति गूढ़ार्थयुक्त शताधिक श्लोकों से पूरी करनी है, इस प्रकार कृतप्रतिज्ञ होने पर भी बुद्धिक्लेश के कारण अत्यधिक श्रान्त हूँ। पचास ही गूढ़ार्थ से युक्त श्लोकों की रचना करके थक गया हूँ। जो कवि अवशिष्ट तादृश पचास श्लोकों की रचना करके मेरी प्रतिज्ञा एवं इस कृति को पूरा करे, उस महोपकारी के प्रति सहस्त्रशः नमन है॥१०४॥

भवित्री रम्भोर्वित्यनभिनवपद्यं यदिह त-
द्विधं पद्यं त्वेवासुकरमिति कस्यापि वचसा।
दशास्योक्त्यङ्घ्रिक्षितिदुहितृवागन्त्यचरण-
स्फुटैकार्थं चोक्तं सुललितमिह श्लोकनवकम्।।१०५।।

एवं गूढार्थगर्भितप्रत्युक्तिमतां श्लोकानामतिदौष्कर्यमुक्तिभङ्ग्या द्योतयित्वा सम्प्रति स्फुटार्थप्रत्युक्तिमतां श्लोकानां सुकरत्वं द्योतयन्नाह—**भवित्रीति**। इह लोके भवित्री रम्भोर्विति उपक्रमनिर्देशोऽयम्। 'भवित्री रम्भोरु त्रिदशवदनग्लानिरधुना स मे रामस्स्थाता न युधि पुरतो लक्ष्मणसखः। इयं यास्यत्युच्चैर्विपदमधुना वानरचमूर्लघिष्ठेदं षष्ठाक्षरपरविलोपात्पठ पुनः' इत्याकारकमित्यर्थः। यत् अनभिनवपद्यं पुरातनश्लोकः अस्तीति शेषः। तस्य विधेव विधा यस्य तत्तथोक्तं पद्यं त्वेव असुकरं दुष्करम् इति कस्यापि यस्य कस्यचिदित्यर्थः। वचसा वचनेन हेतुना कस्यापीत्युक्तिस्तस्मिन्कवितातारतम्यानभिज्ञत्वोपरिप्लवबुद्धित्वनिश्चयेनात्यन्तमनादरं द्योतयति। दशास्यस्य रावणस्य उक्तयः उक्तिरूपाः त्रयः अङ्घ्रयः पादाः यस्मिन् तथोक्तं क्षितिदुहितुः सीतायाः वाक्षु वाग्रूपेष्वित्यर्थः। अन्त्यचरणेषु तुरीयपादेषु स्फुटः अगूढः एकः अश्लिष्टः अर्थः निर्दिष्टसङ्ख्याक्षरपरित्यागविधानरूपः यस्मिन् तथोक्तं सुललितं सुबोधार्थमित्यर्थः। श्लोकनवकं च इह ग्रन्थे उक्तम्। कर्मणि क्तः। शिखरिणीवृत्तम्॥१०५॥

श्लोकार्थ—गूढ़ार्थगर्भित प्रत्युक्ति वाले श्लोकों का अतिकाठिन्य उक्तियों के द्वारा द्योतित करके सम्प्रति स्फुटार्थप्रत्युक्ति वाले श्लोकों का सुकरत्व (सहजता) द्योतित करते हुए ग्रन्थकार ने कहा—भवित्री रम्भोरु.....षष्ठाक्षर पर विलोपात्पठ पुनः (श्लोक-संख्या ७२) इस प्रकार का जो प्राचीन श्लोक है, उन श्लोकों के निर्माण की विधा की तरह विधा वाले श्लोक जो जिस किसी के लिए कठिन हैं, रावण की उक्तिस्वरूप तीन चरणों से युक्त तथा अवनितनया सीता की उक्तिस्वरूप चतुर्थ चरणों में स्फुट

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थात् गूढ़ार्थरहित (अश्लिष्ट) एक अर्थ (निर्दिष्टसंख्याक्षर-परित्याग-विधानरूप) वाले सुललित नव श्लोक इस ग्रन्थ में लिखे गये हैं।।।१०५।।

ग्रन्थं वीक्ष्य गुणागुणाववहिता निर्धार्य नन्दन्ति ये
ये निन्दन्ति च तांश्च तांश्च शिरसा भक्त्यैव वन्दामहे।
कर्तुः साम्प्रतिकत्वमेव परमो दोषः कृतेरित्यमू-
मस्पृष्ट्वैव हुमित्यनादरकृतां नामापि न ब्रूमहे।।१०६।।

ग्रन्थमिति। ये बुधा इति शेषः। गुणैकदृश इति भावः। अवहिताः सावधानाः सन्तः ग्रन्थं वीक्ष्य गुणागुणौ गुणदोषौ निर्धार्य तत्त्वतो निश्चित्य नन्दन्ति ये च बुधाः दोषैकदृश इति भावः। निन्दन्ति तांश्च तांश्च गुणग्रहणेन नन्दतो दोषग्रहणेन निन्दतश्चोभयानपि भक्त्यैव न तु कुटिलभावेनेत्येवकारार्थः। शिरसा वन्दामहे नमस्कुर्मः किन्त्विति शेषः। कर्तुः कवेः साम्प्रतिकत्व-मिदानीन्तनत्वमेव कृतेः काव्यस्य परमः निरतिशयः दोष इति मत्वेति शेषः। गम्यमानत्वादप्रयोगः। अमुं कृतिम् अस्पृष्ट्वैव दूरत एव परिहृत्येत्यर्थः हुमिति अत्यन्तावज्ञाप्रयुक्तेन विकृतहुङ्कारेणेत्यर्थः। अनादरं परिभवं कुर्वन्तीति तथोक्तानाम् असूयान्धानामिति भावः। नामापि न ब्रूमहे न वदामः। तेभ्योऽत्यन्तं जुगुप्सामह इत्यर्थः।।१०६।।

श्लोकार्थ—गुणमात्र देखने वाले जो विद्वान् सावधान हैं, अर्थात् तटस्थ रूप से स्थित हैं, ग्रन्थ को देखकर गुण-दोष का तत्त्वतः निश्चय करके आनन्दित होते हैं तथा दोषमात्र देखने वाले जो विद्वान् निन्दा करते हैं, उन आनन्दित होने वाले तथा निन्दा करने वाले दोनों ही प्रकार के विद्वानों को भक्तिपूर्वक प्रणाम करता हूँ। कवि का साम्प्रतिकत्व (एतत्कालीनत्व) ही काव्य का सर्वोत्कृष्ट दोष है, यह मानकर इस कृति (रचना) का विना स्पर्श किए ही दूर से ही हुम् (अत्यन्त निन्दाप्रयुक्त विकृत हुङ्कार) इस प्रकार उच्चारण करके इस कृति का अनादर करते हैं। उस प्रकार के असूयान्धों का नाम भी नहीं लेता, अर्थात् ऐसे लोगों से अत्यन्त घृणा करता हूँ।।१०६।।

शृङ्गेरीपुरशारदाङ्घ्रिकमलद्वन्द्वं बहून् वत्सरान्
सेवित्वा तदनुग्रहेण परमं वैदुष्यमासेदुषः।
श्रीमद्वेङ्कटशब्दपूर्वरमणाभिख्यस्य विद्वन्मणेः
सूनोर्वागिह चामराजनगरीरामस्य जीयादियम्।।१०७।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शृङ्गेरीति। शृङ्गेरीपुरे कर्नाटमण्डल्यां तुङ्गभद्रातीरस्थतया प्रसिद्धे या शारदा श्रीमच्छङ्करभगवत्पादाचार्यप्रतिष्ठापिततया जगत्प्रसिद्धेति भावः। तस्याः अङ्घ्री कमले इवेत्युपमितसमासः। तयोः द्वन्द्वं बहून्वत्सरान् बहुषु वत्सरेष्वित्यर्थः। अत्यन्तसंयोगे द्वितीया। सेवित्वा तस्याश्शारदायाः अनुग्रहेण परमं निरतिशयं वैदुष्यं विद्वत्ताम् आसेदुषः प्राप्तवतः श्रीमान् पापापनोदनशक्तिसम्पत्तिमान्— 'शोभासम्पत्तिपद्मासु लक्ष्मीश्श्रीरपि कथ्यते' इत्यजयः। वेङ्कटशब्दः पूर्वः पूर्वसमीपवर्ती यस्य स तादृशो यः रमणः रमणशब्दः स एव अभिख्या नाम यस्य तथोक्तस्य वेङ्कटरमणाभिख्यस्येत्यर्थः—'अभिख्या नामशोभयोः' इति विश्वः। विद्वान् मणिरिव तस्य विद्वद्वर्यस्येत्यर्थः। सूनोः पुत्रस्य कनीयस इति भावः। ज्यायसस्तु—धातुकारिकाधातुरूपप्रकाशिकाद्युद्ग्रन्थरचनतश्श्रुततमेन चामराजनगर-श्रीकण्ठसुधीनाम्ना प्रथमानत्वात्। चामराजनगरीरामस्य चामराजनगररामनाम्ना व्यवह्रियमाणस्येत्यर्थः। कवेरिति शेषः। वाक् उक्तिः तेनोक्तेत्यर्थः। इयं **सीतारावणसंवादझरी** जीयात् सर्वोत्कर्षेण वर्तिषीष्ट। आशिषि लिङ्॥१०७॥

श्लोकार्थ—शृङ्गेरीपुर में (कर्नाटक प्रान्त में तुङ्गभद्रा नामक नदी के तट पर स्थित) जो शारदा (श्रीमच्छङ्करभगवत्पादाचार्य द्वारा प्रतिष्ठापित) उन माँ शारदा के चरणकमलों की बहुत वर्षों तक सेवा करके उनकी कृपा से उत्कृष्ट वैदुष्य प्राप्त श्रीमान् वेङ्कट शब्द है पूर्व में जिसके, उस प्रकार का जो रमण अर्थात् वेङ्कटरमण नामक श्रेष्ठ विद्वान् के पुत्र **'चामराजनगरराम'** नाम से व्यवहृत होने वाले कवि की रचना (**सीतारावणसंवादझरी**) सर्वोत्कृष्टता को प्राप्त होवे॥१०७॥

तर्कव्याकरणादिषु क्वचिदपि प्रज्ञाविशेषाद्यशो
नैवाप्नोद्विदुषां वरस्य जगति ख्यातस्य पुत्रोऽपि यः।
व्यर्थं हन्त स चामराजनगरीरामोऽजनिष्टाथवा
सीतारावणवादझर्यवतरेत्कस्मादतस्माद्भुवि॥१०८॥

तर्केति। यः चामराजनगरीराम इत्यर्थः। जगति ख्यातस्य पूर्वोक्तस्य चामराजनगरवेङ्कटरमणान्तर्वाणिनाम्ना प्रथितस्य विदुषां वरस्य पुत्रोऽपि तर्कव्याकरणादिषु शास्त्रेष्विति शेषः। क्वचिदपि कुत्रचिच्छास्त्रेऽपि विषये प्रज्ञाविशेषात् ज्ञानातिशयात् यशः कीर्तिं नैवाप्नोत् नालभतैव स चामराजनगरीरामः व्यर्थं निष्प्रयोजनं यथा तथा अजनिष्ट उदभूत्। हन्तेति खेदे। अथवा तस्मिन्नजाते सतीत्यर्थः। **सीतारावणसंवादझरी** पूर्वोक्ता अतस्मात् तदन्यस्मात् कस्मात्कवेः अपादानान् भुवि अवतरेत् प्रवर्तेत न कस्मादपीत्यर्थः। अत एव सफलं तस्य जन्मेति सर्वमनवद्यम्॥१०८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अव्याजादतिवत्सला मयि ममाध्यास्याननं या स्वयं
सीतारावणवादझर्यभिधया ख्यातां कृतिं दुर्घटाम्।
सङ्ग्रथ्यातिमुदा तदर्थविवृतिं चैवं व्याधात्तुष्टये
सीताराघवयोर्नमामि शिरसा वाग्देवतामेव ताम्।।

श्लोकार्थ—जो, लोकप्रसिद्ध चामराजनगर वेङ्कटरमण नाम से प्रसिद्ध श्रेष्ठ विद्वान् का पुत्र होने पर भी तर्क-व्याकरणादि किसी भी शास्त्र के विषय में ज्ञानातिशय के कारण यश को नहीं प्राप्त किया, वह **चामराजनगरराम** व्यर्थ ही जन्म लिया हन्त अर्थात् खेद है। अथवा उसके न उत्पन्न होने पर **सीतारावणसंवादझरी** नामक पूर्वोक्त ग्रन्थ अन्य किस विद्वान् के द्वारा पृथ्वी पर अवतरित होता, अर्थात् किसी के द्वारा नहीं, इसलिए चामराजनगरराम नामक कवि का जन्म सफल है।।१०८।।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिशिष्टम्

श्लोकानुक्रमणिका

श्लोकः	श्लोक-संख्या	श्लोकः	श्लोक-संख्या
अतल्पं निद्रालू	१८	काकुत्स्थः	७१
अतीवगुणवान्	६८	कामारात्यु	६१
अथाभिप्रायज्ञ	७८	क्रीडारुष्टा	१
अथैत्य	९५	क्षणे तस्मिन्नेव	८३
अधिश्रीरैश्वर्या	५१	क्षोणीनन्दिनि	२५
अनपायवानह.	६९	ग्रन्थं वीक्ष्य	१०६
अन्यूनैः	१०४	छेदो निष्पुन	९३
अन्योन्यास्त्र.....	९१	जनस्यास्य	२८
अर्थपुष्ट्यविना	२	जनस्यास्यैश्वर्यम्	५०
अलब्धव्याघात	९४	जयश्रीर्लग्ना	४१
अहमहमह	७९	जुष्टो मन्त्रि	२२
अहं नापत्त्रा	४३	तच्छ्रुत्वा	८४
आचारेण शुभेन	४९	ततोऽभिमुखतां	८९
आतङ्कोदय	३१	तथा समरदुर्मदं	८७
आरामस्मृति	३९	तथाऽस्विति	९६
आशार्हा	५२	तदज्ञानात्	८
आर्षाचार	७२	तदाऽतिप्रेम्णो	९७
इति सविनयं	१०२	तदानीं	६
इत्यादरेण	१००	तद्दर्शनादेव	८२
इत्युदीर्य	१६	तयोस्तं	९
इत्यूनां	७६	तमारुह्य	८१
इन्दुः कैरविणी	१०३	तर्कव्याकरणादिषु	१०८
ईतित्य	४०	त्वल्लाभे मम	२४
एतस्मिन्नन्तरे	५	तस्मिन्नप्य	८६
काकुत्स्थो	७५	तापोन्मेष	२६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तैस्तैस्स्व	६२	रामायाति	६७
दिगन्तश्रीर्मग्नो	४६	रामो दूषित	३२
दुर्दैव	९८	रामो वाच्यति	१९
दृप्तः स्वस्मिन्	१३	रामः सीते	७३
देव त्वच्चरणा	१०१	लाभात्ते	३०
न जात्वाप	४४	वयस्थोऽहं	४५
नत्वोत्थाय	१०	वैदेह्यस्मि	५८
नातिश्लाघ्य	४८	वैदेहि स्वजाना	३५
निवेश्योद्याने	४	शतार्धश्लिष्टार्थ	१५
निश्चिन्तस्य	३६	शस्त्रेऽस्त्रे	९२
पद्यान्युक्ति	७७	शौर्यं दाशरथौ	४७
परिक्षीणा	१७	शौर्यं भूतनये	७४
पश्याम्यन्य	२०	सङ्ग्रामेषु	५३
पुरा रामे	३	स च श्रीरामचन्द्रेण	११
पौरैरध्यु	६३	सदायत्तं	२७
प्रत्युक्त्यर्थ	१४	स भर्ता ते	३८
प्रलापरचितोधमः	२९	सम्प्राप्ते मम	३३
प्रिये न जनकजे	९९	सर्वत्राऽहम	६०
भद्रो ह्वेति विशारदः	३७	सर्वानप्य	६४
भवित्री रम्भो	१०५	साध्व्याषिद्गमभि	७
मत्सेना	५४	सीते त्वामपहृत्य	५६
मद्वत्पावन	७०	सीते मद्भुजयोः	६६
महताऽथ	८०	सीते शौर्य	५९
महाकुल इति	५४	सीतेऽसौ	६५
मारास्योन्नति	४२	स्फुटं रामस्य	५७
मूर्त्या मर्कट	२३	स्मृत्वा मां	२१
यत्सौशील्यं	१२	हरौचित्य	३४
रक्षोनाथस्य	८८		

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri